The Department of Public Instruction, Bombay.

PETERSON'S

SECOND SELECTION

OF

HYMNS FROM THE ṚGVEDA

Originally Revised and Enlarged

by the late Rev. Father R. Zimmermann, S. J.

Third Edition Completely Revised and Enlarged

BY

V. G. PARANJPE, M.A., LL.B., D.Litt. (Paris)

Professor of Sanskrit, Fergusson College, Poona

1938

Price Four Rupees and Eight Annas

Bombay Sanskrit and Prakrit Series, No. LVIII

Printed and published by Dr. V. S. Sukthankar, M A , Ph. D.
at the Bhandarkar Institute Press, Bhandarkar Oriental
Research Institute, Poona No. 4,

All Rights Reserved

Preface to the First Edition.

The Hymns from the Rigveda in this second selection are those appointed by the University of Bombay as an alternative course for candidates for its B. A. degree. Two of the Hymns (Nos. 1 and 22 here) have had to be repeated from my previous volume as, perhaps by inadvertence, they figure in both selections. I am not responsible for the choice of the Hymns in the present selection. In editing Sayana's commentary I have made constant reference to two manuscripts, one of the first five ashtakas belonging to the Bhao Daji collection, and one of the last seven ashtakas which was kindly lent to me by my friend, Professor Apte, of Kolhapore. The manuscript in the collection at Elphinstone College was also occasionally consulted, but not to much purpose. It is really a greatly abbreviated edition of Sayana of little or no value for critical purposes. It need not, I hope, be said that wherever I have differed from Max Muller it has only been after careful consideration and from what seemed to me to be strong reasons. It is matter of gratification to me that the introduction of the Veda into the B. A. course of the University at Bombay, originally made at my instance, has proved so successful an experiment, and has wiped away the reproach of the exclusion from the ordinary curriculum in Sanskrit here of the most important book in the Sanskrit language. I cannot hope not to have made many mistakes in my two volumes. But I can, and do, hope that I have done something in them to smooth the student's way.

Bombay,
12th January 1899.

PETER PETERSON.

Preface to the Second Edition.

With the exception of the Saṁhitāpāṭha, the Padapāṭha, and Sāyaṇa's Commentary, the first edition had to be changed. The lexicographical and exegetical notes have been substituted by new ones, a translation, appendices on Grammer, Metre, Accent, and Vedic Mythology, as well as some remarks on the age of the Rgveda have been added. Strictly speaking only the Padapāṭha has been left as it was in the first edition. That in the Saṁhitāpāṭha a minor technical detail of little consequence was changed may just be mentioned. Of more importance is that Sāyaṇa's Bhāsya of the first edition (प्रथमावृत्ति.) has been compared with that of Max Müller's large Rgveda edition (the आदर्शपुस्तकम्). The difference of reading, if any, has been registered at the foot of the Bhāsya. The reading of the प्रथमावृत्तिः has been kept against the आदर्शपुस्तकम् where it seemed preferable, where the आदर्शपुस्तकम् was better it has been adopted and marked so that Peterson's original reading* has not been altogether thrown out. The mss. from the Bhau Daji Collection and the Kolhapur mss. on which the first edition was based, deserve that their readings should be preserved. The quotations in Sāyaṇa have been traced, compared, and the figures given where possible and practical.

The purpose of the book and the progress of Vedic studies have made the other more radical changes necessary. The notes after the Padapāṭha and Sāyaṇa's Commentary on each mantra are of a lexicographical and exegetical nature. The lexicographical notes are intended to substitute the complete Vedic dictionary, which for more than one reason in the majority of cases the beginner is unable to use. Sāyaṇa's Commentary will help only a śāstric वैयाकरण, not a beginner as far as grammatical forms are concerned. The exegetical notes try to give the views advanced by ancient and modern Veda interpreters. The list of authors used does not claim to be complete, but it should at least prove useful. Where their views were practically unanimous, the editor had as little reason as right to put forth a new one. When their opinions were divided, the most likely one was adopted, where none of them could claim preference on account of greater probability, the question was left open, or (in rare cases) the editor ventured upon an idea of his own.

---

* These readings have been relegated to the end of the Notes in the present edition.

The appendices are meant to serve mainly a utilitarian purpose. This is also the reason why the notes on Grammar, Metre and Accent follow so closely greater models. If a thing has been done well once, there is no ground why it should be done only as well, or worse, once more. And there is, after all, no higher tribute paid to an author than that others utilize his labours. Whatever has been taken over in a body has been acknowledged, the longer passages by giving the source explicitly; wordings borrowed have been put into inverted commas. The editor trusts that no omission has been made on this side. He has refrained गौरव-भयात् from putting too much ballast at the foot of the pages, either in the shape of references to works used or of matter concerning side issues. The beginner who peruses the mythological notes, for instance, will be interested more to know what views have been put forward, than on what page of a particular work, in most cases inaccessible to him, they are to be found. The advanced student will easily find his way by means of the Bibliography given in the beginning. The editor has, in particular thought it his plain duty to avoid quoting stray etymologies, wild guesses, in matters mythological, and the like. It would be a comparatively easy task to make a book like this bristle with learned looking scraps of etymology and comparative mythology. But a little knowledge of this kind serves neither an educational nor a scientific purpose. it may even, as the proverb wisely puts it, become dangerous. The professor whose good fortune it is to explain the RV. to M A and B. A. students will know how to supplement the book from his own wisdom, if special need arises.

The translation, with the exceptions explicitly mentioned, has to be taken as the work of the editor. He consulted other translations only after having made his own, to learn from others where he could, to differ from them there where he thought he could not help doing so. Neither in the translation nor in the notes on mythology can he expect to see everybody converted to his views. Too often there is the case where the Vedic student may say to himself रेकु पद्मलकमा जगन्थ, Nr. 26. 7. The suppositions for clearing up all questions of Vedic mythology and giving a final, all-round satisfactory translation of Vedic hymns are not yet given. For pedagogical reasons the editor has not mentioned views such as that which quite lately saw Agni in Vṛtrahan. Even tho freedom of the jungle of Vedic problems should not be thought to be altogether without limits, and the former taunt should never be justified once more that *la philologie sanscritique est une philologie sans critique.*

Vedic scholars will recognise without difficulty that in writing the remarks on the age of the RV. the editor has mainly followed Professor M. Winternitz, the best recent Vedic literary historian. Some reflections

and conclusions have been added by the editor. He has frankly to own apostasy from M Muller's view in this matter. Even such a question as the age of Vedic literature may not look quite the same to a scholar residing some thousand miles away from India, as it does to someone nearer to the scene of action

In the question on the literary merit and the underlying tendency of the Vedic sūktas the editor cannot bring himself to believe that Viśvāmitra and his fellow-rsis considered religion and poetry mainly as a कामधेनु which could and should be milked whenever a यजमान invited them to officiate. Those who are so eloquent and sarcastic in this matter seem to forget that some four or five thousand years back the Āryas had very few founded and well endowed University chairs with a certain and regular income for people who devoted themselves to matters above the sword and the plough. Nor are, on the other hand, the Vedic hymns "der Morgenleichentriller der zum Bewusstsein ihrer Grosse erwachend en Menschheit', either

To publish a book of this kind, even if it were done well, is nothing to be proud of. For originality there is little room, for mistakes plenty of scope, and the editor cannot flatter himself not to have committed mistakes freely. His chief motive throughout has been to be of some help to the B A and M. A. student in such a way as not to preclude the beginner from thinking, and to point out to him the road for work in the same line. If to other people, to whom on account of the foreign idiom a good deal of Vedic criticism of the West is a sealed book, this edition should be welcome—though, being a mere selection of hymns, the book is something कृताकृत—so much the better.

The editor has utilized the best literature on the matter, but in the beginning especially he too was hampered by the difficulty of communication with certain sources and centres of Vedic learning He hopes, however, not to have been careless in this matter either. Finally due thanks must be given to Prof. Dr S. K. Belvalkar, M. A., Ph. D, Superintendent of the Publication Department, Bhandarkar Oriental Research Institute, Poona, to whose technical experience and advice this edition owes much of its improved looks. Bhavānīśaṁkar Sikthankar, Sāstri of this College, has rendered loyal help throughout His śāstric learning and memory tracked more than one elusive grammatical or exegetical sūtra. And, last not least, the Manager and staff of the Nirnaya Sāgara Press deserve sincere acknowledgment for the untiring, really exemplary way, in which they did their share. It is an idle hope to expect a book of

this kind to be entirely without printing mistakes ; but everybody who has had to bring out a publication with mixed characters and accents in addition will readily agree that the Press have kept up their reputation.

St. Xavier's College, Bombay,
November 1, 1921.

R. ZIMMERMANN, S J.

Preface to the Third Edition

In this edition the text, the Sāyanabhāsya and two of the Appendices from the Second edition have been reproduced with slight changes, which were absolutely necessary, otherwise this edition has been completely re-written. In doing so, however, the present editor has kept in view all that the late Father Zimmermann has written in Paragraphs 2 and 4 of his Preface and he has done his best to reach the ideal set forth there, knowing full well his own limitations for the task.

Some of the new features of this edition might be indicated below —

1 A fuller treatment has been given here to the phonetics, grammar and accent of the RV. than in the earlier edition.

2 Being persuaded that it is not in the interests of higher scholarship that our students should not have it in their power to examine the evidence on which conclusions rest, and in spite of the fact that our examination system tends to encourage cramming, the editor has thought it necessary to give, very succinctly no doubt, but with some amount of fulness the data for arriving at a particular meaning for a given word. The student will do well to have an edition of the Rgveda by his side when he is reading the Notes. Mr. Satavalekar of Aundh has laid the student-world under obligations by having placed a very cheap and well-printed edition of the RV. at their disposal. On the other hand it is to be hoped that examiners will realize that the Rgveda exegesis is not a proper subject for examinations and will not expect students to cram details.

3 There is nothing like an Indian point of view as opposed to the European point of view, there are no provincial frontiers in scholarship, further,

all Indians of this century would have to acknowledge the European scholars of the last century as their Gurus, and yet the present author has felt that, if the torch of learning is to be kept burning, nothing would be so disastrous as servile acquiescence in the views of the European scholars In the appendix on Vedic Metre, therefore, as well as in the notes and translation, the present editor has tried to be independent, even when he is conscious that he may have thereby rendered himself liable to the charge of temerity.

4 The printing of accent marks in Devanāgarī characters presents a great difficulty. In the Notes of the present edition the European method of marking the accent has been applied to the Devanāgarī characters, an inverted period (after the manner of the Oxford Dictionary) serving to mark the Udātta The accent changes have been throughly explained in an appendix and in the Notes Further, with the use of another notation for the accents of the Saṁhitā, which is a slight improvement on the old Indian method, and a juxtaposition of the Saṁhitā and Pada texts in horizontally parallel lines, it will be possible for the student to make a thorough study of the accent changes.

The abbreviations and table of contents will be found at the end of the book.

On account of the hurry with which the work has been printed, it is very likely that it is full of typographical errors. The editor has only to crave the indulgence of the reader. He has to thank Mr. G. N. Shingondekar of the Bhandarkar Institute for help in the correction of proofs, but it need not be said that he alone is responsible for the errors.

V. G. Paranjpe.

यच्चिद्धि ते विशो यथा प्र देव वरुण व्रतम् ।
मिनीमसि द्यविद्यवि ॥ १ ॥

मा नो वधाय हत्नवे जिहीळानस्य रीरधः ।
मा हृणानस्य मन्यवे ॥ २ ॥

वि मृळीकाय ते मनो रथीरश्वं न संदितम् ।
गीर्भिर्वरुण सीमहि ॥ ३ ॥

परा हि मे विमन्यवः पतन्ति वस्यइष्टये ।
वयो न वसतीरुप ॥ ४ ॥

कदा क्षत्रश्रियं नरमा वरुणं करामहे ।
मृळीकायोरुचक्षसम् ॥ ५ ॥

तदित्समानमाशाते वेनन्ता न प्र युच्छतः ।
धृतव्रताय दाशुषे ॥ ६ ॥

वेदा यो वीनां पदमन्तरिक्षेण पतताम् ।
वेद नावः समुद्रियः ॥ ७ ॥

वेद मासो धृतव्रतो द्वादश प्रजावतः ।
वेदा य उपजायते ॥ ८ ॥

वेद॒ वात॑स्य वर्त॒निमु॒रोर्ऋ॒ष्वस्य॑ बृह॒तः ।
वेदा॒ ये अ॒ध्यास॑ते ॥ ९ ॥

नि षसाद धृ॒तव्र॑तो॒ वरु॑णः प॒स्त्या॒३॑स्वा ।
साम्रा॑ज्याय सु॒क्रतुः॑ ॥ १० ॥

अतो॒ विश्वा॒न्यद्भु॑ता चिकि॒त्वाँ अ॒भि प॑श्यति ।
कृ॒ता॒नि॒ या च॒ कर्त्वा॑ ॥ ११ ॥

स नो॑ वि॒श्वाहा॑ सु॒क्रतु॑रादि॒त्यः सु॒पथा॑ करत् ।
प्र ण॒ आयूं॑षि तारिषत् ॥ १२ ॥

बिभ्र॑द्द्रा॒पिं हिर॑ण्ययं॒ वरु॑णो॒ वस्त॑ नि॒र्णिज॑म् ।
परि॒ स्पशो॒ नि षे॑दिरे ॥ १३ ॥

न यं दिप्सन्ति॒ दि॒प्सवो॒ न द्रुह्वा॑णो॒ जना॑नाम् ।
न देव॒मभि॑मा॒तयः ॥ १४ ॥

उ॒त यो मानु॑षे॒ष्वा यशश्च॒क्रे अ॑सा॒म्या ।
अ॒स्माक॑मु॒दरे॒ष्वा ॥ १५ ॥

परा॑ मे यन्ति धी॒तयो॒ गावो॒ न गव्यू॑तीरनु॑ ।
इ॒च्छन्ती॑रुरुचक्ष॒सम् ॥ १६ ॥

सं नु वोचावहै पुनर्यतो मे मध्वाभृतम् ।
होतेव क्षदसे प्रियम् ॥ १७ ॥

दर्शं नु विश्वदर्शतं दर्शं रथमधि क्षमि ।
एता जुषत मे गिरः ॥ १८ ॥

इमं मे वरुण श्रुधी हवमद्या च मृळय ।
त्वामवस्युरा चके ॥ १९ ॥

त्वं विश्वस्य मेधिर दिवश्च ग्मश्च राजसि ।
स यामनि प्रति श्रुधि ॥ २० ॥

उदुत्तमं मुमुग्धि नो वि पाशं मध्यमं चृत ।
अवाधमानि जीवसे ॥ २१ ॥

म० १ No. 2. इन्द्र सू० ३२

इन्द्रस्य नु वीर्याणि प्र वोचं
यानि चकार प्रथमानि वज्री ।
अहन्नहिमन्वपस्ततर्द
प्र वक्षणा अभिनत्पर्वतानाम् ॥ १ ॥

अहन्नहिं पर्वते शिश्रियाणं
त्वष्टास्मै वज्रं स्वर्यं ततक्ष ।
वाश्रा इव धेनवः स्यन्दमाना
अञ्जः समुद्रमव जग्मुरापः ॥ २ ॥

वृषायमाणोवृणीत सोमं
त्रिकद्रुकेष्वपिबत्सुतस्य ।
आ सायकं मघवादत्त वज्र-
महन्नेनं प्रथमजामहीनाम् ॥ ३ ॥

यदिन्द्राहन्प्रथमजामहीना-
मान्मायिनाममिनाः प्रोत मायाः ।
आत्सूर्यं जनयन्द्यामुषासं
तादीत्ना शत्रुं न किला विवित्से ॥ ४ ॥

अहन्वृत्रं वृत्रतरं व्यंस-
मिन्द्रो वज्रेण महता वधेन ।
स्कन्धांसीव कुलिशेना विवृक्णा-
हिः शयत उपपृक्पृथिव्याः ॥ ५ ॥

अयोद्धेव दुर्मद आ हि जुह्वे
महावीरं तुविबाधमृजीषम् ।
नातारीदस्य समृतिं वधानां
सं रुजानाः पिपिष इन्द्रशत्रुः ॥ ६ ॥

अपादहस्तो अपृतन्यादिन्द्र-
मास्य वज्रमधि सानौ जघान ।
वृष्णो वध्रिः प्रतिमानं बुभूष-
न्पुरुत्रा वृत्रो अशयद्व्यस्तः ॥ ७ ॥

नदं न भिन्नममुया शयानं
मनो रुहाणा अति यन्त्यापः ।
याश्चिद्वत्रो महिना पर्यतिष्ठ-
त्तासामहिः पत्सुतःशीर्बभूव ॥ ८ ॥

नीचावया अभवद्वृत्रपुत्रे-
न्द्रो अस्या अव वधर्जभार ।
उत्तरा सूरधरः पुत्र आसी-
दानुः शये सहवत्सा न धेनुः ॥ ९ ॥

अतिष्ठन्तीनामनिवेशनानां
काष्ठानां मध्ये निहितं शरीरम् ।
वृत्रस्य निण्यं वि चरन्त्यापो
दीर्घं तम आशयदिन्द्रशत्रुः ॥ १० ॥

दासपत्नीरहिगोपा अतिष्ठ-
न्निरुद्धा आपः पणिनेव गावः ।
अपां बिलमपिहितं यदासी-
द्वृत्रं जघन्वाँ अप तद्ववार ॥ ११ ॥

अश्व्यो वारो अभवस्तदिन्द्र
सृके यत्त्वा प्रत्यहन्देव एकः ।
अजयो गा अजयः शूर सोम-
मवासृजः सर्तवे सप्त सिन्धून् ॥ १२ ॥

नास्मै विद्युन्न तन्यतुः सिषेध
न यां मिहमकिरद्ध्रादुनिं च ।
इन्द्रश्च यद्युयुधाते अहिं-
श्चोतापरीभ्यो मघवा वि जिग्ये ॥ १३ ॥

अहेर्यातारं कमपश्य इन्द्र
हृदि यत्ते जघ्नुषो भीरगच्छत् ।
नव च यन्नवतिं च स्रवन्तीः
श्येनो न भीतो अतरो रजांसि ॥ १४ ॥

इन्द्रो यातोवसितस्य राजा
शमस्य च शृङ्गिणो वज्रबाहुः ।
सेदु राजा क्षयति चर्षणीना-
मरान्न नेमिः परि ता बभूव ॥ १५ ॥

म० १ No. 3 सू० ४

सह वामेन न उषो
व्युच्छा दुहितर्दिवः ।
सह द्युम्नेन बृहता विभावरि
राया देवि दास्वती ॥ १ ॥

अश्वावतीर्गोमतीर्विश्वसुविदो
भूरिं च्यवन्त वस्तवे ।

उदीरय प्रति मा सूनृता उष-
श्चोद राधो मघोनाम् ॥ २ ॥

उवासोषा उच्छाच्च नु
देवी जीरा रथानाम् ।
ये अस्या आचरणेषु दध्रिरे
समुद्रे न श्रवस्यवः ॥ ३ ॥

उषो ये ते प्र यामेषु युञ्जते
मनो दानाय सूरयः ।
अत्राह तत्कण्व एषां कण्वतमो
नाम गृणाति नृणाम् ॥ ४ ॥

आ घा योषेव सून-
र्युषा याति प्रभुञ्जती ।
जरयन्ती वृजनं पद्वदीयत
उत्पातयति पक्षिणः ॥ ५ ॥

वि या सृजति समनं व्यर्थिनः
पदं न वेत्योदती ।
वयो नकिष्टे पप्तिवांस आसते
व्युष्टौ वाजिनीवति ॥ ६ ॥

एषायुक्त परावतः
सूर्यस्योदयनादधि ।

शतं रथेभिः सुभगोषा इयं
वि यात्यभि मानुषान् ॥ ७ ॥

विश्वमस्या नानाम चक्षसे जग-
ज्ज्योतिष्कृणोति सूनरी ।
अप द्वेषो मघोनी दुहिता दिव
उषा उच्छदप स्रिधः ॥ ८ ॥

उष आ भाहि भानुना
चन्द्रेण दुहितर्दिवः ।
आवहन्ती भूर्यस्मभ्यं सौभगं
व्युच्छन्ती दिविष्टिषु ॥ ९ ॥

विश्वस्य हि प्राणनं जीवनं त्वे
वि यदुच्छसि सूनरि ।
सा नो रथेन बृहता विभावरि
श्रुधि चित्रामघे हवम् ॥ १० ॥

उषो वाजं हि वंस्व
यश्चित्रो मानुषे जने ।
तेना वह सुकृतो अध्वराँ उप
ये त्वा गृणन्ति वह्नयः ॥ ११ ॥

विश्वान्देवाँ आ वह सोमपीतये-
न्तरिक्षादुषस्त्वम् ।

सास्मासु धा गोमदश्वावदुक्थ्य१-
मुषो वाजं सुवीर्यम् ॥ १२ ॥

यस्या रुशन्तो अर्चयः
प्रति भद्रा अदृक्षत ।
सा नो रयिं विश्ववारं सुपेशस-
मुषा ददातु सुग्म्यम् ॥ १३ ॥

ये चिद्धि त्वामृषयः पूर्व ऊतये
जुहूरेवसे महि ।
सा नः स्तोमाँ अभि गृणीहि राध-
सोषः शुक्रेण शोचिषा ॥ १४ ॥

उषो यदद्य भानुना
वि द्वारावृणवो दिवः ।
प्र नो यच्छतादवृकं पृथु च्छर्दिः
प्र देवि गोमतीरिषः ॥ १५ ॥

सं नो राया बृहता विश्वपेशसा
मिमिक्ष्वा समिळाभिरा ।
सं द्युम्नेन विश्वतुरोषो महि
सं वाजैर्वाजिनीवति ॥ १६ ॥

म० १ No. 4. सू० ४९

उषो भद्रेभिरा गहि
दिवश्चिद्रोचनादधि ।
वहन्त्वरुणप्सव
उप त्वा सोमिनो गृहम् ॥ १ ॥

सुपेशसं सुखं रथं
यमध्यस्था उषस्त्वम् ।
तेना सुश्रवसं जनं
प्रावाद्य दुहितर्दिवः ॥ २ ॥

वयश्चित्ते पतत्रिणो
द्विपच्चतुष्पदर्जुनि ।
उषः प्रारन्नृतूँरनु
दिवो अन्तेभ्यस्परि ॥ ३ ॥

व्युच्छन्ती हि रश्मिभि-
र्विश्वमाभासि रोचनम् ।
तां त्वामुषर्वसूयवो
गीर्भिः कण्वा अहूषत ॥ ४ ॥

म० १ No. 5 सू० ११६

नासत्याभ्यां बर्हिरिव प्र वृञ्जे
स्तोमाँ इयर्म्यभ्रियेव वातः ।

यावभ्यो गाय विमदाय जायां
सेनाजुवा न्यूहतू रथेन ॥ १ ॥

वीळुपत्मभिराशुहेमभिर्वा
देवानां वा जूतिभिः शाशदाना ।
तद्रासभो नासत्या सहस्र-
माजा यमस्य प्रधने जिगाय ॥ २ ॥

तुग्रो ह भुज्युमश्विनोदमेघे
रयिं न कश्चिन्ममृवाँ अवाहाः ।
तमूहथुर्नौभिरात्मन्वतीभि-
रन्तरिक्षप्रुद्भिरपोदकाभिः ॥ ३ ॥

तिस्रः क्षपस्त्रिरहातिव्रजद्भि-
र्नासत्या भुज्युमूहथुः पतद्भैः ।
समुद्रस्य धन्वन्नार्द्रस्य पारे
त्रिभी रथैः शतपद्भिः षळश्वैः ॥ ४ ॥

अनारम्भणे तदवीरयेथा-
मनास्थाने अग्रभणे समुद्रे ।
यदश्विना ऊहथुर्भुज्युमस्तं
शतारित्रां नावमातस्थिवांसम् ॥ ५ ॥

यमश्विना ददथुः श्वेतमश्व-
मघाश्वाय शश्वदित्स्वस्ति ।

तद्वां दात्रं महि कीर्तेन्यं भू-
त्पैद्वो वाजी सदमिद्धव्यो अर्यः ॥ ६ ॥

युवं नरा स्तुवते पज्रियाय
कक्षीवते अरदतं पुरंधिम् ।
कारोतराच्छफादश्वस्य वृष्णः
शतं कुम्भाँ असिञ्चतं सुरायाः ॥ ७ ॥

हिमेनाग्निं घ्रंसमवारयेथां
पितुमतीमूर्जमस्मा अधत्तम् ।
ऋजीसे अत्रिमश्विनावनीत-
मुन्निन्यथुः सर्वगणं स्वस्ति ॥ ८ ॥

परावतं नासत्यानुदेथा-
मुच्चाबुध्नं चक्रथुर्जिह्मबारम् ।
क्षरन्नापो न पायनाय राये
सहस्राय तृष्यते गोतमस्य ॥ ९ ॥

जुजुरुषो नासत्योत वव्रिं
प्रामुञ्चतं द्रापिमिव च्यवानात् ।
प्रातिरतं जहितस्यायुर्दस्रा-
दित्पतिमकृणुतं कनीनाम् ॥ १० ॥

तद्वां नरा शंस्यं राध्यं
चाभिष्टिमन्नासत्या वरूथम् ।

यद्द्रुह्वांसा निधिमिवापगूळ्ह-
मुदर्शतादूपथुर्वन्दनाय ॥ ११ ॥

तद्वां नरा सनये दंस उग्र-
माविष्कृणोमि तन्यतुर्न वृष्टिम् ।
दध्यङ् ह यन्मध्वाथर्वणो वा-
मश्वस्य शीर्ष्णा प्र यदीमुवाच ॥ १२ ॥

अजोहवीन्नासत्या करा वां
महे यामन्पुरुभुजा पुरंधिः ।
श्रुतं तच्छासुरिव वध्रिमत्या
हिरण्यहस्तमश्विनावदत्तम् ॥ १३ ॥

आस्नो वृकस्य वर्तिकामभीके
युवं नरा नासत्यामुमुक्तम् ।
उतो कविं पुरुभुजा युवं ह
कृपमाणमकृणुतं विचक्षे ॥ १४ ॥

चरित्रं हि वेरिवाच्छेदि पर्ण-
माजा खेलस्य परितक्म्यायाम् ।
सद्यो जङ्घामायसीं विश्पलायै
धने हिते सर्तवे प्रत्यधत्तम् ॥ १५ ॥

शतं मेषान्वृक्ये चक्षदानं-
मृज्राश्वं तं पितान्धं चकार ।

तस्मा॑ अ॒क्षी ना॑सत्या वि॒चक्ष॒
आ॒धत्तं॑ दस्रा भिषजावनु॒र्वन् ॥ १६ ॥

आ वां॒ रथं॑ दुहि॒ता सू॒र्य॑स्य
का॒र्ष्मे॒वाति॑ष्ठदर्व॒ता॒ जय॑न्ती ।
विश्वे॑ दे॒वा अन्व॑मन्यन्त हृ॒द्भिः
सम॑ु श्रि॒या ना॑सत्या सचेथे ॥ १७ ॥

यदया॑तं दि॒वोदा॑साय व॒र्ति-
र्भ॒र॒द्वा॒जाया॑श्विना॒ हय॑न्ता ।
रे॒वदु॑वाह सच॒नो रथो॑ वां
वृष॒भश्च॑ शिंशु॒मार॑श्च यु॒क्ता ॥ १८ ॥

र॒यिं सु॑क्ष॒त्रं स्व॑पत्य॒मायुः॑
सु॒वी॒र्यं॑ नासत्या॒ वह॑न्ता ।
आ ज॒ह्नावीं॑ सम॑नसोप॒ वाजै॒-
स्त्रि॒रह्नो॑ भा॒गं द॑धतीमयातम् ॥ १९ ॥

परि॑विष्टं जाहु॒षं वि॒श्वत॑ः सी॑
सु॒गे॒भि॒र्नक्त॑मू॒हथू॒ रजो॑भिः ।
वि॒भि॒न्दु॒ना॑ नासत्या॒ रथे॑न
वि पर्व॑ताँ अजर॒यू अ॑यातम् ॥ २० ॥

एक॑स्या॒ वस्तो॑रावतं॒ रणा॑य
वश॑मश्विना स॒नये॑ स॒हस्रा॑ ।

निरंहतं दुच्छुना इन्द्रवन्ता
पृथुश्रवसो वृषणावरातीः ॥ २१ ॥

शुरस्य चिदार्चत्कस्यावतादा
नीचादुच्चा चक्रथुः पातवे वाः ।
शयवे चिन्नासत्या शचीभि-
र्जसुरये स्तर्यं पिप्यथुर्गाम् ॥ २२ ॥

अवस्यते स्तुवते कृष्णियाय
ऋजूयते नासत्या शचीभिः ।
पशुं न नष्टमिव दर्शनाय
विष्णाप्वं ददथुर्विश्वकाय ॥ २३ ॥

दश रात्रीरशिवेना नव द्यू-
नवनद्धं श्रथितमप्स्वन्तः ।
विप्रुतं रेभमुदनि प्रवृक्त-
मुन्निन्यथुः सोममिव स्रुवेण ॥ २४ ॥

प्र वां दंसास्यश्विनाववोच-
मस्य पतिः स्यां सुगवः सुवीरः ।
उत पश्येन्नश्नुवन्दीर्घमायु-
रस्तमिवेज्जरिमाणं जगम्याम् ॥ २५ ॥

ता वामद्य तावपरं हुवे-
मोच्छन्त्यामुषसि वह्निरुक्थैः ।
नासत्या कुह चित्सन्तावर्यो
दिवो नपाता सुदास्तराय ॥ १ ॥

अस्मे ऊ षु वृषणा मादयेथा-
मुत्पणीर्हितमर्म्या मदन्ता ।
श्रुतं मे अच्छोक्तिभिर्मतीना-
मेष्टा नरा निचेतारा च कर्णैः ॥ २ ॥

श्रिये पूषन्निषुकृतेव देवा
नासत्या वहतुं सूर्यायाः ।
वच्यन्ते वां ककुहा अप्सु जाता
युगा जूर्णेव वरुणस्य भूरेः ॥ ३ ॥

अस्मे सा वां माध्वी रातिरस्तु
स्तोमं हिनोतं मान्यस्य कारोः ।
अनु यद्वां श्रवस्या सुदानू
सुवीर्याय चर्षणयो मदन्ति ॥ ४ ॥

एष वां स्तोमो अश्विनावकारि
मानेभिर्मघवाना सुवृक्ति ।
यातं वर्तिस्तनयाय त्मनेचा-
गस्त्ये नासत्या मदन्ता ॥ ५ ॥

अतारिष्म तमसस्पारमस्य
प्रति वां स्तोमो अश्विनावधायि ।
एह यातं पथिभिर्देवयानै-
र्विद्यामेषं वृजनं जीरदानुम् ॥ ६ ॥

म० २ No. 7. सू० २३

गणानां त्वा गणपतिं हवामहे
कविं कवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत
आ नः शृण्वन्नूतिभिः सीद सादनम् ॥ १ ॥

देवाश्चित्ते असुर्य प्रचेतसो
बृहस्पते यज्ञियं भागमानशुः ।
उस्रा इव सूर्यो ज्योतिषा महो
विश्वेषामिज्जनिता ब्रह्मणामसि ॥ २ ॥

आ विबाध्या परिरापस्तमांसि च
ज्योतिष्मन्तं रथमृतस्य तिष्ठसि ।
बृहस्पते भीममभित्रदम्भनं
रक्षोहणं गोत्रभिदं स्वर्विदम् ॥ ३ ॥

सुनीतिभिर्नयसि त्रायसे जनं
यस्तुभ्यं दाशान्न तमंहो अश्नवत् ।

ब्रह्मद्विषस्तपनो मन्युमीरसि
बृहस्पते महि तत्ते महित्वनम् ॥ ४ ॥

न तमंहो न दुरितं कुतश्चन
नारातयस्तितिरुर्न द्वयाविनः ।
विश्वा इदस्माद्ध्वरसो वि बाधसे
यं सुगोपा रक्षसि ब्रह्मणस्पते ॥ ५ ॥

त्वं नो गोपाः पथिकृद्विचक्षण-
स्तव व्रताय मतिभिर्जरामहे ।
बृहस्पते यो नो अभि ह्वरो दधे
स्वा तं मर्मर्तु दुच्छुना हरस्वती ॥ ६ ॥

उत वा यो नो मर्चयादनागसो-
रातीवा मर्तः सानुको वृकः ।
बृहस्पते अप तं वर्तया पथः
सुगं नो अस्यै देववीतये कृधि ॥ ७॥

त्रातारं त्वा तनूनां हवामहे-
वस्पर्तरधिवक्तारमस्मयुम् ।
बृहस्पते देवनिदो नि बर्हय
मा दुरेवा उत्तरं सुम्नमुन्नशत् ॥ ८ ॥

त्वया वयं सुवृधा ब्रह्मणस्पते
स्पार्हा वसु मनुष्या ददीमहि ।

या नो दूरे तळितो या अरातयो-
भि सन्ति जम्भया ता अनप्नसः ॥ ९ ॥

त्वया वयमुत्तमं धीमहे वयो
बृहस्पते परिणसा सक्षिणा युजा ।
मा नो दुःशंसो अभिदिप्सुरीशत
प्र सुशंसा मतिभिस्तारिषीमहि ॥ १० ॥

अनानुदो वृषभो जग्मिराहवं
निष्टप्ता शत्रुं पृतनासु सासहिः ।
असि सत्य ऋणया ब्रह्मणस्पत
उग्रस्य चिद्दमिता वीळुहर्षिणः ॥ ११ ॥

अदेवेन मनसा यो रिषण्यति
शासामुग्रो मन्यमानो जिघांसति ।
बृहस्पते मा प्रणक्तस्य नो वधो
नि कर्म मन्युं दुरेवस्य शर्धतः ॥ १२ ॥

भरेषु हव्यो नमसोपसद्यो
गन्ता वाजेषु सनिता धनंधनम् ।
विश्वा इदर्यो अभिदिप्स्वो मृधो
बृहस्पतिर्वि ववर्हा रथाँ इव ॥ १३ ॥

तेजिष्ठया तपनी रक्षसस्तप
ये त्वा निदे ददिरे दृष्टवीर्यम् ।

आविस्तत्कृष्व यदसत्त उक्थ्यं
बृहस्पते वि परिरापो अर्दय ॥ १४ ॥

बृहस्पते अति यदर्यो अर्हा-
द्द्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छवस ऋतप्रजात
तदस्मासु द्रविणं धेहि चित्रम् ॥ १५ ॥

मा नः स्तेनेभ्यो ये अभि द्रुहस्पदे
निरामिणो रिपवोन्नेषु जागृधुः ।
आ देवानामोहते वि व्रयो हृदि
बृहस्पते न परः साम्नो विदुः ॥ १६ ॥

विश्वेभ्यो हि त्वा भुवनेभ्यस्परि
त्वष्टाजनत्साम्नःसाम्नः कविः ।
स ऋणचिदृणया ब्रह्मणस्पति-
र्द्रुहो हन्ता मह ऋतस्य धर्तरि ॥ १७ ॥

तव श्रिये व्यजिहीत पर्वतो
गवां गोत्रमुदसृजो यदङ्गिरः ।
इन्द्रेण युजा तमसा परीवृतं
बृहस्पते निरपामौब्जो अर्णवम् ॥ १८ ॥

ब्रह्मणस्पते त्वमस्य यन्ता
सूक्तस्य बोधि तनयं च जिन्व ।

विश्वं तद्भद्रं यदवन्ति देवा
बृहद्वदेम विदथे सुवीराः ॥ १९ ॥

म० २ No. 8. सू० २८

इदं कवेरादित्यस्य स्वराजो
विश्वानि सान्त्यभ्यस्तु महा ।
अति यो मन्द्रो यजथाय देवः
सुकीर्तिं भिक्षे वरुणस्य भूरेः ॥ १ ॥

तवे व्रते सुभगासः स्याम
स्वाध्यो वरुण तुष्टुवांसः ।
उपायन उषसां गोमतीना-
मग्नयो न जरमाणा अनु द्यून् ॥ २ ॥

तवे स्याम पुरुवीरस्य शर्मन्
नुरुशंसस्य वरुण प्रणेतः ।
यूयं नः पुत्रा अदितेरदब्धा
अभि क्षमध्वं युज्याय देवाः ॥ ३ ॥

प्र सीमादित्यो असृजद्विधर्ता
ऋतं सिन्धवो वरुणस्य यन्ति ।
न श्राम्यन्ति न वि मुचन्त्येते
वयो न पप्तू रघुया परिज्मन् ॥ ४ ॥

वि मच्छ्रथाय रशनामिवाग
ऋध्याम ते वरुण खामृतस्य ।
मा तन्तुश्छेदि वयतो धियं मे
मा मात्रा शार्यपसः पुर ऋतोः ॥ ५ ॥

अपो सु म्यक्ष वरुण भियसं म-
त्सम्राळृतावोनु मा गृभाय ।
दामेव वत्साद्वि मुमुग्ध्यंहो
नहि त्वदारे निमिषश्चनेशे ॥ ६ ॥

मा नो वधैर्वरुण ये त इष्टा-
वेनः कृण्वन्तमसुर भ्रीणन्ति ।
मा ज्योतिषः प्रवसथानि गन्म
वि षू मृधः शिश्रथो जीवसे नः ॥ ७ ॥

नमः पुरा ते वरुणोत नून-
मुतापरं तुविजात ब्रवाम ।
त्वे हि कं पर्वते न श्रिता-
न्यप्रच्युतानि दूळभ व्रतानि ॥ ८ ॥

परा ऋणा सावीरध मत्कृतानि
मा राजन्नन्यकृतेन भोजम् ।
अव्युष्टा इन्नु भूयसीरुषास
आ नो जीवान्वरुण तासु शाधि ॥ ९ ॥

यो मे राजन्युज्यो वा सखा वा
स्वप्ने भयं भीरवे मह्यमाह ।
स्तेनो वा यो दिप्सति नो वृको वा
त्वं तस्माद्वरुण पाह्यस्मान् ॥ १० ॥

माहं मघोनो वरुण प्रियस्य
भूरिदाय्य आ विदं शूनमापेः ।
मा रायो राजन्त्सुयमादव स्थां
बृहद्वदेम विदथे सुवीराः ॥ ११ ॥

म० २ No. 9. सू० ३८

उदु ष्य देवः सविता सवाय
शश्वत्तमं तदपा वह्निरस्थात् ।
नूनं देवेभ्यो वि हि धाति रत्न-
मथाभजद्वीतिहोत्रं स्वस्तौ ॥ १ ॥

विश्वस्य हि श्रुष्टये देव ऊर्ध्वः
प्र बाहवा पृथुपाणिः सिसर्ति ।
आपश्चिदस्य व्रत आ निमृग्रा
अयं चिद्धातो रमते परिज्मन् ॥ २ ॥

आशुभिश्चिद्यान्वि मुचाति नून-
मरीरमदतमानं चिदेतोः ।

अह्रषूणां चिन्न्ययाँ अविष्या-
मनु व्रतं सवितुर्मोक्यागात् ॥ ३ ॥

पुनः समव्यद्वितंतं वयन्ती
मध्या कर्तोर्न्यधाच्छक्म धीरः ।
उत्संहायास्थाद्व्यृतूँरदर्ध-
ररमतिः सविता देव आगात् ॥ ४ ॥

नानौकांसि दुर्यो विश्वमायु-
र्वि तिष्ठते प्रभवः शोकों अग्नेः ।
ज्येष्ठं माता सूनवे भागमाधा-
दन्वस्य केतमिषितं सविता ॥ ५ ॥

समावर्वर्ति विष्ठितो जिगीषु-
र्विश्वेषां कामश्चरतामभूत् ।
शश्वाँ अपो विकृतं हित्व्यागा-
दनु व्रतं सवितुर्दैव्यस्य ॥ ६ ॥

त्वया हितमप्यमप्सु भागं
धन्वान्वा मृगयसो वि तस्थुः ।
वनानि विभ्यो नकिरस्य तानि
व्रता देवस्य सवितुर्मिनन्ति ॥ ७ ॥

याद्राध्यं वरुणो योनिमप्य-
मनिशितं निमिषि जर्भुराणः ।

विश्वो मार्ताण्डो व्रजमा पशुर्गा-
त्स्थशो जन्मानि सविता व्याकः ॥ ८ ॥

न यस्येन्द्रो वरुणो न मित्रो
व्रतमर्यमा न मिनन्ति रुद्रः ।
नारातयस्तमिदं स्वस्ति
हुवे देवं सवितारं नमोभिः ॥ ९ ॥

भगं धियं वाजयन्तः पुरंधिं
नराशंसो ग्नास्पतिर्नो अव्याः ।
आये वामस्य संगथे रयीणां
प्रिया देवस्य सवितुः स्याम ॥ १० ॥

अस्मभ्यं तद्दिवो अद्भ्यः पृथिव्या-
स्त्वया दत्तं काम्यं राध आ गात् ।
शं यत्स्तोतृभ्य आपये भवा-
त्युरुशंसाय सवितर्जरित्रे ॥ ११ ॥

म० ३ No. 10 सू० ९

सखायस्त्वा ववृमहे
देवं मर्तास ऊतये ।
अपां नपातं सुभगं सुदीदितिं
सुप्रतूर्तिमनेहसम् ॥ १ ॥

कार्यमानो वना त्वं
मन्मातूरजगन्नपः ।
न तत्ते अग्ने प्रमृषे निवर्तनं
यद्दूरे सन्निहाभवः ॥ २ ॥

अति तृष्टं ववक्षिथा-
थैव सुमना असि ।
प्रप्रान्ये यन्ति पर्यन्य आसते
येषां सख्ये असि श्रितः ॥ ३ ॥

ईयिवांसमति स्रिधः
शश्वतीरति सश्चतः ।
अन्वीमविन्दन्निचिरासो अद्रुहो-
प्सु सिंहमिव श्रितम् ॥ ४ ॥

ससृवांसमिव त्मना-
ग्निमित्था तिरोहितम् ।
एनं नयन्मातरिश्वा परावतो
देवेभ्यो मथितं परि ॥ ५ ॥

तं त्वा मर्ता अगृभ्णत
देवेभ्यो हव्यवाहन ।
विश्वान्यद्यज्ञाँ अभिपासि मानुष
तव क्रत्वा यविष्ठ्य ॥ ६ ॥

तद्भद्रं तव दंसना
पाकाय चिच्छदयति ।
त्वां यदग्ने पशवः समासते
समिद्धमपिशर्वरे ॥ ७ ॥

आ जुहोता स्वध्वरं
शीरं पावकशोचिषम् ।
आशुं दूतमजिरं प्रत्नमीड्यं
श्रुष्टी देवं सपर्यत ॥ ८ ॥

त्रीणि शता त्री सहस्राण्यग्निं
त्रिंशच्च देवा नव चासपर्यन् ।
औक्षन्घृतैरस्तृणन्बर्हिरस्मा
आदिद्धोतारं न्यसादयन्त ॥ ९ ॥

म० ३ No. 11. सू० ३२

इन्द्र सोमं सोमपते पिबेमं
माध्यंदिनं सवनं चारु यत्ते ।
प्रप्रुथ्या शिप्रे मघवन्नृजीषि-
न्विमुच्या हरी इह मादयस्व ॥ १ ॥

गवाशिरं मन्थिनमिन्द्र शुक्रं
पिबा सोमं रिरिमा ते मदाय ।
ब्रह्मकृता मारुतेना गणेन
सजोषा रुद्रैस्तृपदा वृषस्व ॥ २ ॥

ये ते शुष्मं ये तविषीमवर्धन्
नर्चन्त इन्द्र मरुतस्त ओजः ।
माध्यंदिने सवने वज्रहस्त
पिबा रुद्रेभिः सगणः सुशिप्र ॥ ३ ॥

त इन्वस्य मधुमद्विविप्र
इन्द्रस्य शर्धो मरुतो य आसन् ।
येभिर्वृत्रस्येषितो विवेदा-
मर्मणो मन्यमानस्य मर्म ॥ ४ ॥

मनुष्वदिन्द्र सवनं जुषाणः
पिबा सोमं शश्वते वीर्याय ।
स आ ववृत्स्व हर्यश्व यज्ञैः
सरण्युभिरपो अर्णा सिसर्षि ॥ ५ ॥

त्वमपो यद्ध वृत्रं जघन्वाँ
अत्याँ इव प्रासृजः सर्तवाजौ ।
शयानमिन्द्र चरता वधेन
वव्रिवांसं परि देवीरदेवम् ॥ ६ ॥

यजाम इन्नमसा वृद्धमिन्द्रं
बृहन्तमुष्वमजरं युवानम् ।
यस्य प्रिये ममतुर्यज्ञियस्य
न रोदसी महिमानं ममाते ॥ ७ ॥

इन्द्रस्य कर्म सुकृता पुरूणि
व्रतानि देवा न मिनन्ति विश्वे ।
दाधार यः पृथिवीं द्यामुतेमां
जजान सूर्यमुषसं सुदंसाः ॥ ८ ॥

अद्रोघ सत्यं तव तन्महित्वं
सद्यो यज्जातो अपिबो ह सोमम् ।
न द्यावं इन्द्र ततसस्त ओजो
नाहा न मासाः शरदो वरन्त ॥ ९ ॥

त्वं सद्यो अपिबो जात इन्द्र
मदाय सोमं परमे व्योमन् ।
यद्द द्यावापृथिवी आविवेशी-
रथाभवः पूर्व्यः कारुधायाः ॥ १० ॥

अहन्नहिं परिशयानमर्णो
ओजायमानं तुविजात तव्यान् ।
न ते महित्वमनु भूदध द्यौ-
र्यदन्यया स्फिग्या क्षामवस्थाः ॥ ११ ॥

यज्ञो हि त इन्द्र वर्धनो भू-
दुत प्रियः सुतसोमो मियेधः ।
यज्ञेन यज्ञमव यजियः स-
न्यज्ञस्ते वज्रमहिहत्य आवत् ॥ १२ ॥

यज्ञेनेन्द्रमवसा चक्रे अर्वा-
गैनं सुम्नाय नव्यसे ववृत्याम् ।
यः स्तोमेभिर्वावृधे पूर्व्येभि-
र्यो मध्यमेभिरुत नूतनेभिः ॥ १३ ॥

विवेष यन्मा धिषणा जजान
स्तवै पुरा पार्यादिन्द्रमह्नः ।
अंहसो यत्र पीपरद्यथा नो
नावेव यान्तमुभये हवन्ते ॥ १४ ॥

आपूर्णो अस्य कलशः स्वाहा
सेक्तेव कोशं सिसिचे पिबध्यै ।
समु प्रिया आववृत्रन्मदाय
प्रदक्षिणिदभि सोमास इन्द्रम् ॥ १५ ॥

न त्वा गभीरः पुरुहूत सिन्धु-
र्नाद्रयः परि षन्तो वरन्त ।
इत्था सखिभ्य इषितो यदिन्द्रा
दृळ्हं चिदरुजो गव्यमूर्वम् ॥ १६ ॥

शुनं हुवेम मघवानमिन्द्र-
मस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु
घ्नन्तं वृत्राणि संजितं धनानाम् ॥ १७ ॥

प्र पर्वतानामुशती उपस्था-
दश्वे इव विषिते हासमाने ।
गावेव शुभ्रे मातरा रिहाणे
विपाट्छुतुद्री पयसा जवेते ॥ १ ॥

इन्द्रेषिते प्रसवं भिक्षमाणे
अच्छा समुद्रं रथ्येव याथः ।
समाराणे ऊर्मिभिः पिन्वमाने
अन्या वामन्यामप्येति शुभ्रे ॥ २ ॥

अच्छा सिन्धुं मातृतमामयासं
विपाशमुर्वीं सुभगामगन्म ।
वत्समिव मातरा संरिहाणे
समानं योनिमनु संचरन्ती ॥ ३ ॥

एना वयं पयसा पिन्वमाना
अनु योनिं देवकृतं चरन्तीः ।
न वर्तवे प्रसवः सर्गतक्तः
किंयुर्विप्रो नद्यो जोहवीति ॥ ४ ॥

रमध्वं मे वचसे सोम्याय
ऋतावरीरुप मुहूर्तमेवैः ।
प्र सिन्धुमच्छा बृहती मनीषा-
वस्युरह्वे कुशिकस्य सूनुः ॥ ५ ॥

इन्द्रो अस्माँ अरदद्वज्रबाहु-
रपाहन्वृत्रं परिधिं नदीनाम् ।
देवोनयत्सविता सुपाणि-
स्तस्य वयं प्रसवे याम उर्वीः ॥ ६ ॥

प्रवाच्यं शश्वधा वीर्यं१ त-
दिन्द्रस्य कर्म यदहिं विवृश्चत् ।
वि वज्रेण परिषदो जघाना-
यन्नापोयनमिच्छमानाः ॥ ७ ॥

एतद्वचो जरितर्मापि मृष्ठा
आ यत्ते घोषानुत्तरा युगानि ।
उक्थेषु कारो प्रति नो जुषस्व
मा नो नि कः पुरुषत्रा नमस्ते ॥ ८ ॥

ओ षु स्वसारः कारवे शृणोत
ययौ वो दूरादनसा रथेन ।
नि षू नमध्वं भवता सुपारा
अधोअक्षाः सिन्धवः स्रोत्याभिः ॥ ९ ॥

आ ते कारो शृणवामा वचांसि
ययाथ दूरादनसा रथेन ।
नि ते नंसै पीप्यानेव योषा
मर्यायेव कन्या शश्वचै ते ॥ १० ॥

यद॒द्य त्वा॑ भर॒ताः सं॒तरे॑यु-
गव्यन्ग्रा॑म इषि॒त इन्द्र॑जूतः ।
अर्षा॒दह॑ प्रस॒वः सर्ग॑तक्त
आ वो॑ वृणे सुम॒तिं य॒ज्ञिया॑नाम् ॥ ११ ॥

अता॑रिषुर्भर॒ता ग॒व्यव॒ः स-
मभ॑क्त॒ विप्रः॑ सुम॒तिं न॒दीना॑म् ।
प्र पिन्व॑ध्वमिषय॑न्तीः सु॒राधा॒
आ व॒क्षणा॑ः पृण॒ध्वं या॑त शी॒भम् ॥ १२ ॥

उद्व॑ ऊ॒र्मिः शम्या॑ ह॒-
न्त्वापो॒ योक्त्रा॑णि मुञ्चत ।
मादु॑ष्कृतौ॒ व्यैन॑सा-
इ॒यौ शू॒नमार॑ताम् ॥ १३ ॥

म० २ No. 13 सू० ४२

उप॑ नः सुतमा ग॑हि॒ सोम॑मिन्द्र॒ गवा॑शिरम् ।
हरि॑भ्यां॒ यस्ते॑ अस्म॒युः ॥ १ ॥

तामि॑न्द्र॒ मद॒मा ग॑हि ब॒र्हिःष्ठां ग्रा॑वभिः सुतम् ।
कु॒विन्न्व॑स्य तृ॒ष्णव॑ः ॥ २ ॥

इन्द्र॑मित्था गिरो॒ ममाच्छा॑गुरिषि॒ता इ॒तः ।
आ॒वृ॒ते सोम॑पीतये ॥ ३ ॥

इन्द्रं सोमस्य पीतये स्तोमैरिह हवामहे ।
उक्थेभिः कुविदागमत् ॥ ४ ॥

इन्द्र सोमाः सुता इमे तान्दधिष्व शतक्रतो ।
जठरे वाजिनीवसो ॥ ५ ॥

विश्वा हि त्वा धनंजयं वाजेषु दधृषं कवे ।
अधा ते सुम्नमीमहे ॥ ६ ॥

इममिन्द्र गवाशिरं यवाशिरं च नः पिब ।
आगत्या वृषभिः सुतम् ॥ ७ ॥

तुभ्येदिन्द्र स्व ओक्ये सोमं चोदामि पीतये ।
एष रारन्तु ते हृदि ॥ ८ ॥

त्वां सुतस्य पीतये प्रत्नमिन्द्र हवामहे ।
कुशिकासो अवस्यवः ॥ ९ ॥

म० ४ No. 14. सू० ३०

नकिरिन्द्र त्वदुत्तरो न ज्यायाँ अस्ति वृत्रहन् ।
नकिरेवा यथा त्वम् ॥ १ ॥

सत्रा ते अनु कृष्टयो विश्वा चक्रेव वावृतुः ।
सत्रा महाँ असि श्रुतः ॥ २ ॥

विश्वै चनेदना त्वा देवास इन्द्र युयुधुः ।
यदहा नक्तमातिरः ॥ ३ ॥

यत्रोत बाधितेभ्यश्चक्रं कुत्साय युध्यते ।
मुषाय इन्द्र सूर्यम् ॥ ४ ॥

यत्र देवाँ ऋघायतो विश्वाँ अयुध्य एक इत् ।
त्वमिन्द्र वनूँरहन् ॥ ५ ॥

यत्रोत मर्त्याय कमरिणा इन्द्र सूर्यम् ।
प्रावः शचीभिरेतशम् । ६ ॥

किमादुतासि वृत्रहन्मघवन्मन्युमत्तमः ।
अत्राह दानुमातिरः ॥ ७ ॥

एतद्धेदुत वीर्यमिन्द्र चकर्थ पौंस्यम् ।
स्त्रियं यद्दुर्हणायुवं वधीर्दुहितरं दिवः ॥ ८ ॥

दिवश्चिद्धा दुहितरं महान्महीयमानाम् ।
उषासमिन्द्र सं पिणक् ॥ ९ ॥

अपोषा अनसः सरत्संपिष्टादह बिभ्युषी ।
नि यत्सीं शिश्नथद्वृषा ॥ १० ॥

एतदस्या अनः शये सुसंपिष्टं विपाश्या ।
ससारं सीं परावतः ॥ ११ ॥

उत सिन्धुं विबाल्यं वितस्थानामधि क्षमि ।
परि ष्ठा इन्द्र मायया ॥ १२ ॥

उत शुष्णस्य धृष्णुया प्र मृक्षो अभि वेदनम् ।
पुरो यदस्य संपिणक् ॥ १३ ॥

उत दासं कौलितरं बृहतः पर्वतादधि ।
अवाहन्निन्द्र शम्बरम् ॥ १४ ॥

उत दासस्य वर्चिनः सहस्राणि शतावधीः ।
अधि पञ्च प्रधीरिव ॥ १५ ॥

उत त्यं पुत्रमग्रुवः परावृक्तं शतक्रतुः ।
उक्थेष्विन्द्र आभजत् ॥ १६ ॥

उत त्या तुर्वशायदू अस्नातारा शचीपतिः ।
इन्द्रो विद्वाँ अपारयत् ॥ १७ ॥

उत त्या सद्य आर्या सरयोरिन्द्र पारतः ।
अर्णाचित्ररथावधीः ॥ १८ ॥

अनु द्वा जहिता नयोन्धं श्रोणं च वृत्रहन् ।
न तत्ते सुम्नमष्टवे ॥ १९ ॥

शतमश्मन्मयीनां पुरामिन्द्रो व्यास्यत् ।
दिवोदासाय दाशुषे ॥ २० ॥

अस्वापयद्भीतये सहस्रा त्रिंशतं हथैः ।
दासानामिन्द्रो मायया ॥ २१ ॥

स घेदुतासि वृत्रहन्त्समान इन्द्र गोपतिः ।
यस्ता विश्वानि चिच्युषे ॥ २२ ॥

उतः नूनं यदिन्द्रियं करिष्या इन्द्र पौंस्यम् ।
अद्या नकिष्टदा मिनत् ॥ २३ ॥

वामंवामं त आदुरे
देवो ददात्वर्यमा ।
वामं पूषा वामं भगो
वामं देवः करूळती ॥ २४ ॥

मं० ५ No. 15 सू० १

अबोध्यग्निः समिधा जनानां
प्रतिं धेनुमिवायतीमुषासम् ।
यद्वा इव प्र वयामुज्जिहानाः
प्र भानवः सिस्रते नाकमच्छ ॥ १ ॥

अबोधि होता यजथाय देवा-
नूर्ध्वो अग्निः सुमनाः प्रातरस्थात् ।
समिद्धस्य रुशददर्शि पाजो
महान्देवस्तमसो निरमोचि ॥ २ ॥

यदीं गणस्य रशनामजीगः
शुचिरङ्क्ते शुचिभिर्गोभिरग्निः ।
आद्दक्षिणा युज्यते वाजय-
न्त्यर्युक्तानामूर्ध्वो अधयज्जुहूभिः ॥ ३ ॥

अग्निमच्छा देवयतां मनांसि
चक्षूंषीव सूर्ये सं चरन्ति ।
यदीं सुवाते उषसा विरूपे
श्वेतो वाजी जायते अग्रे अह्नाम् ॥ ४ ॥

जनिष्ट हि जेन्यो अग्रे अह्नां
हितो हितेष्वरुषो वनेषु ।
दमेदमे सप्त रत्ना दधानो-
ऽग्निर्होता नि षसादा यजीयान् ॥ ५ ॥

अग्निर्होता न्यसीदद्यजीया-
नुपस्थे मातुः सुरभा उ लोके ।
युवा कविः पुरुनिःष्ठ ऋतावा
धर्ता कृष्टीनामुत मध्य इद्धः ॥ ६ ॥

प्र णु त्यं विप्रमध्वरेषु साधु-
मग्निं होतारमीळते नमोभिः ।
आ यस्ततान रोदसी ऋतेन
नित्यं मृजन्ति वाजिनं घृतेन ॥ ७ ॥

मार्जाल्यो मृज्यते स्वे दमूनाः
कविप्रशस्तो अतिथिः शिवो नः ।
सहस्रशृङ्गो वृषभस्तदोजा
विश्वाँ अग्ने सहसा प्रास्यन्यान् ॥ ८ ॥

प्र सद्यो अग्ने अत्येष्यन्या-
नाविर्यस्मै चारुतमो बभूथ ।
ईळेन्यो वपुष्यो विभावा
प्रियो विशामतिथिर्मानुषीणाम् ॥ ९ ॥

तुभ्यं भरन्ति क्षितयो यविष्ठ
बलिमग्ने अन्तित ओत दूरात् ।
आ भन्दिष्ठस्य सुमतिं चिकिद्धि
बृहत्ते अग्ने महि शर्म भद्रम् ॥ १० ॥

आद्य रथं भानुमो भानुमन्त-
मग्ने तिष्ठ यजतेभिः समन्तम् ।
विद्वान्पथीनामुर्विन्तरिक्ष-
मेह देवान्हविरद्याय वक्षि ॥ ११ ॥

अवोचाम कवये मेध्याय
वचो वन्दारु वृषभाय वृष्णे ।
गविष्ठिरो नमसा स्तोममग्नौ
दिवीव रुक्ममुरुव्यञ्चमश्रेत् ॥ १२ ॥

ऋतस्य गोपावधि तिष्ठथो रथं
सत्यधर्माणा परमे व्योमनि ।
यमत्र मित्रावरुणावथो युवं
तस्मै वृष्टिर्मधुमत्पिन्वते दिवः ॥ १ ॥

सम्राजावस्य भुवनस्य राजथो
मित्रावरुणा विदथे स्वर्दृशा ।
वृष्टिं वां राधो अमृतत्वमीमहे
द्यावापृथिवी वि चरन्ति तन्यवः ॥ २ ॥

सम्राजा उग्रा वृषभा दिवस्पती
पृथिव्या मित्रावरुणा विचर्षणी ।
चित्रेभिरभ्रैरुप तिष्ठथो रवं
द्यां वर्षयथो असुरस्य मायया ॥ ३ ॥

माया वां मित्रावरुणा दिवि श्रिता
सूर्यो ज्योतिश्चरति चित्रमायुधम् ।
तमभ्रेण वृष्ट्या गूहथो दिवि
पर्जन्य द्रप्सा मधुमन्त ईरते ॥ ४ ॥

रथं युञ्जते मरुतः शुभे सुखं
शूरो न मित्रावरुणा गविष्टिषु ।
रजांसि चित्रा वि चरन्ति तन्यवो
दिवः सम्राजा पयसा न उक्षतम् ॥ ५ ॥

वाचं सु मित्रावरुणाविरावतीं
पर्जन्यश्चित्रां वदति त्विषीमतीम् ।
अभ्रा वसत मरुतः सु मायया
द्यां वर्षयतमरुणामरेपसम् ॥ ६ ॥

धर्मणा मित्रावरुणा विपश्चिता
व्रता रक्षेथे असुरस्य मायया ।
ऋतेन विश्वं भुवनं वि राजथः
सूर्यमा धत्थो दिवि चित्र्यं रथम् ॥ ७ ॥

म० ५ No 17. सू० ७३

यदद्य स्थः परावति
यदर्वावत्यश्विना ।
यद्वा पुरू पुरुभुजा
यदन्तरिक्ष आ गतम् ॥ १ ॥

इह त्या पुरुभूतमा
पुरू दंसांसि बिभ्रता ।
वरस्या याम्यध्रिगू
हुवे तुविष्टमा भुजे ॥ २ ॥

ईर्मान्यद्वपुषे वपु-
श्चक्रं रथस्य येमथुः ।
पर्यन्या नाहुषा युगा
मह्ना रजांसि दीयथः ॥ ३ ॥

तदू षु वामेना कृतं
विश्वा यद्वामनु ष्टवै ।
नाना जातावरेपसा
समस्से बन्धुमेयथुः ॥ ४ ॥

आ यद्वां सूर्या रथं
तिष्ठद्रघुष्यदं सदा ।
परि वामरुषा वयो
घृणा वरन्त आतपः ॥ ५ ॥

युवोरत्रिश्चिकेतति
नरा सुम्नेन चेतसा ।
घर्मं यद्वामरेपसं
नासत्यास्ना भुरण्यति ॥ ६ ॥

उग्रो वां ककुहो ययिः
शृण्वे यामेषु संतनिः ।
यद्वां दंसोभिरश्विना-
त्रिर्नरावर्तीति ॥ ७ ॥

मध्व ऊ षु मधूयुवा
रुद्रा सिषक्ति पिप्युषी ।
यत्समुद्राति पर्षथः
पक्वाः पृक्षो भरन्त वाम् ॥ ८ ॥

सत्यमिद्वा उ अश्विना
युवामाहुर्मयोभुवा ।
ता यामन्यामहूतमा
यामन्ना मृळयत्तमा ॥ ९ ॥
इमा ब्रह्माणि वर्धना-
श्विभ्यां सन्तु शंतमा ।
या तक्षाम रथाँ इ-
वावोचाम बृहन्नमः ॥ १० ॥

म० ५ No. 18. सू० ८०

द्युतद्यामानं बृहतीमृतेन
ऋतावरीमरुणप्सुं विभातीम् ।
देवीमुषसं स्वरावन्तीं
प्रति विप्रासो मतिभिर्जरन्ते ॥ १ ॥
एषा जनं दर्शता बोधयन्ती
सुगान्पथः कृण्वती यात्यग्रे ।
बृहद्रथा बृहती विश्वमि-
न्वोषा ज्योतिर्यच्छत्यग्रे अह्नाम् ॥ २ ॥
एषा गोभिररुणेभिर्युजा-
नास्रेधन्ती रयिमप्रायु चक्रे ।
पथो रदन्ती सुविताय देवी
पुरुष्टुता विश्ववारा वि भाति ॥ ३ ॥

एषा व्यैनी भवति द्विबर्ही
आविष्कृण्वाना तन्वं पुरस्तात् ।
ऋतस्य पन्थामन्वेति साधु
प्रजानतीव न दिशो मिनाति ॥ ४ ॥

एषा शुभ्रा न तन्वो विदान-
नोर्ध्वेव स्नाती दृशये नो अस्थात् ।
अप द्वेषो बाधमाना तमांस्युषा दिवो दुहिता ज्योतिषागात् ॥ ५ ॥ ✓

एषा प्रतीची दुहिता दिवो नॄ-
न्योषेव भद्रा नि रिणीते अप्सः ।
व्यूर्ण्वती दाशुषे वार्याणि
पुनर्ज्योतिर्युवतिः पूर्वथाकः ॥ ६ ॥

म० ७ No. 19. सू० ६१

उद्वां चक्षुर्वरुण सुप्रतीकं
देवयोरेति सूर्यस्ततन्वान् ।
अभि यो विश्वा भुवनानि चष्टे
स मन्युं मर्त्येष्वा चिकेत ॥ १ ॥

प्र वां स मित्रावरुणावृतावा
विप्रो मन्मानि दीर्घश्रुदियर्ति ।
यस्य ब्रह्माणि सुक्रतू अवाथ
आ यत्कृत्वा न शरदः पृणैथे ॥ २ ॥

प्रोरोर्मित्रावरुणा पृथिव्याः
प्र दिव ऋष्वाद्बृहतः सुदानू ।
स्पशो दधाथे ओषधीषु वि-
क्ष्वृधग्यतो अनिमिषं रक्षमाणा ॥ ३ ॥

शंसा मित्रस्य वरुणस्य धाम
शुष्मो रोदसी बद्बधे महित्वा ।
अयन्मासा अयज्वनामवीराः
प्र यज्ञमन्मा वृजनं तिराते ॥ ४ ॥

अमूरा विश्वा वृषणाविमा वां
न यासु चित्रं ददृशे न यक्षम् ।
द्रुहः सचन्ते अनृता जनानां
न वां निण्यान्यचितें अभूवन् ॥ ५ ॥

समु वां यज्ञं महयं नमोभि-
र्हुवे वां मित्रावरुणा सबाधः ।
प्र वां मन्मान्यृचसे नवानि
कृतानि ब्रह्म जुजुषन्निमानि ॥ ६ ॥

इयं देव पुरोहितिर्युवभ्यां
यज्ञेषु मित्रावरुणावकारि ।
विश्वानि दुर्गा पिपृतं तिरो नो
यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

अप स्वसुरुषसो नग्जिहीते
रिणक्ति कृष्णीररुषाय पन्थाम् ।
अश्वामघा गोमघा वां हुवेम
दिवा नक्तं शरुमस्मद्युयोतम् ॥ १ ॥

उपायातं दाशुषे मर्त्याय
रथेन वामर्श्विना वहन्ता ।
युयुतमस्मदनिराममीवां
दिवा नक्तं माध्वी त्रासीथां नः ॥ २ ॥

आ वां रथमवस्यं व्युष्टौ
सुम्नायवो वृषणो वर्तयन्तु ।
स्यूमगभस्तिमृतयुग्भिरश्वै-
राश्विना वसुमन्तं वहेथाम् ॥ ३ ॥

यो वां रथो नृपती अस्ति वोळ्हा
त्रिवन्धुरो वसुमाँ उस्रयामा ।
आ नो एना नासत्योप यात-
मभि यद्वां विश्वप्स्न्यो जिगाति ॥ ४ ॥

युवं च्यवानं जरसोमुमुक्तं
नि पेदव ऊहथुराशुमश्वम् ।
निरंहसस्तमसः स्पर्तमत्रिं
नि जाहुषं शिथिरे धातमन्तः ॥ ५ ॥

इयं मनीषा इयमश्विना गी-
रिमां सुवृक्तिं वृषणा जुषेथाम् ।
इमा ब्रह्माणि युवयून्यग्म-
न्युयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

म० ७ No. 21. सू० ७७

उषो रुरुचे युवतिर्न योषा
विश्वं जीवं प्रसुवन्ती चरायै ।
अभूदग्निः समिधे मानुषाणा-
मकर्ज्योतिर्बाधमाना तमांसि ॥ १ ॥
विश्वं प्रतीची सुप्रथा उदस्था-
द्रुशद्वासो बिभ्रती शुक्रमश्वैत् ।
हिरण्यवर्णा सुदृशीकसंदृ-
ग्गवां माता नेत्र्यह्नामरोचि ॥ २ ॥
देवानां चक्षुः सुभगा वहन्ती
श्वेतं नयन्ती सुदृशीकमश्वम् ।
उषा अदर्शि रश्मिभिर्व्यक्ता
चित्रामघा विश्वमनु प्रभूता ॥ ३ ॥
अन्तिवामा दूरे अमित्रमु-
च्छोर्वीं गव्यूतिमभयं कृधी नः ।
यावय द्वेष आ भरा वसूनि
चोदय राधो गृणते मघोनि ॥ ४ ॥

अस्मे श्रेष्ठेभिर्भानुभिर्वि भा-
हुषो देवि प्रतिरन्ती न आयुः ।
इषं च नो दधती विश्ववारे
गोमदश्वावद्रथवच्च राधः ॥ ५ ॥
यां त्वा दिवो दुहितर्वर्धयन्त्यषः सुजाते मतिभिर्वसिष्ठाः ।
सास्मासु धा रयिमूष्वं बृहन्तं
यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

म० ७ No. 22. सू० ८६

धीरा त्वस्य महिना जनूंषि
वि यस्तस्तम्भ रोदसी चिदुर्वी ।
प्र नाकमृष्वं नुनुदे बृहन्तं
द्विता नक्षत्रं पप्रथच्च भूम ॥ १ ॥
उत स्वया तन्वा३ सं वदे तत्
कदा न्व१न्तर्वरुणे भुवानि ।
किं मे हव्यमहृणानो जुषेत
कदा मृळीकं सुमना अभि ख्यम् ॥ २ ॥
पृच्छे तदेनो वरुण दिदृक्षूपो एमि चिकितुषो विपृच्छम् ।
समानमिन्मे कवयश्चिदाहु-
रयं ह तुभ्यं वरुणो हृणीते ॥ ३ ॥

किमाग आस वरुण ज्येष्ठं
यत्स्तोतारं जिघांससि सखायम् ।
प्र तन्मे वोचो दूळभ स्वधावो-
वं त्वानेना नमसा तुर इयाम् ॥ ४ ॥

अवे द्रुग्धानि पित्र्या सृजा नो-
व या वयं चकृमा तनूभिः ।
अवे राजन्पशुतृपं न तायुं
सृजा वत्सं न दाम्नो वसिष्ठम् ॥ ५ ॥

न सो अस्ति दक्षो वरुण ध्रुतिः सा
सुरा मन्युर्विभीदको अचित्तिः ।
अस्ति ज्यायान्कनीयस उपारे
स्वप्नश्चनेदनृतस्य प्रयोता ॥ ६ ॥

अरे दासो न मीळ्हुषे करा-
ण्यहं देवाय भूर्णयेनागाः ।
अचेतयदचितो देवो अर्यो
गृत्सं राये कवितरो जुनाति ॥ ७ ॥

अयं मु तुभ्यं वरुण स्वधावो
हृदि स्तोम उपश्रितश्चिदस्तु ।
शं नः क्षेमे शमु योगे नो अस्तु
यूयं पात स्वस्तिभिः सदा नः ॥ ८ ॥

प्र क्षोदसा धायसा सस्र एषा
सरस्वती धरुणमायसी पूः ।
प्रबाबधाना रथ्येव याति
विश्वा अपो महिना सिन्धुरन्याः ॥ १ ॥

एकाचेतत्सरस्वती नदीनां
शुचिर्यती गिरिभ्य आ समुद्रात् ।
रायश्चेतन्ती भुवनस्य भूरे-
र्घृतं पयो दुदुहे नाहुषाय ॥ २ ॥

स वावृधे नर्यो योषणासु
वृषा शिशुर्वृषभो यज्ञियासु ।
स वाजिनं मघवद्भ्यो दधाति
वि सातये तन्वं मामृजीत ॥ ४ ॥

उत स्या नः सरस्वती जुषाणोप श्रवत्सुभगा यज्ञे अस्मिन् ।
मितज्ञुभिर्नमस्यैरियाना
राया युजा चिदुत्तरा सखिभ्यः ॥ ४ ॥

इमा जुह्वाना युष्मदा नमोभिः
प्रति स्तोमं सरस्वति जुषस्व ।
तव शर्मन्प्रियतमे दधाना
उप स्येयाम शरणं न वृक्षम् ॥ ५ ॥

अयमु ते सरस्वति वासिष्ठो
द्वारावृतस्य सुभगे व्यावः ।
वर्धा शुभ्रे स्तुवते रासि वाजा-
न्यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

म० ८ No. 24. सू० २९

बभ्रुरेको विषुणः सूनरो
युवाञ्ज्यङ्क्ते हिरण्ययम् ॥ १ ॥

योनिमेक आ ससाद द्योत-
नोन्तर्देवेषु मेधिरः ॥ २ ॥

वाशीमेकौ बिभर्ति हस्त आयसी-
मन्तर्देवेषु निध्रुविः ॥ ३ ॥

वज्रमेकौ बिभर्ति हस्त आहितं
तेन वृत्राणि जिघ्नते ॥ ४ ॥

तिग्ममेकौ बिभर्ति हस्त आयुधं
शुचिरुग्रो जलाषभेषजः ॥ ५ ॥

पथ एकः पीपाय तस्करो यथाँ
एष वेद निधीनाम् ॥ ६ ॥

त्रीण्येक उरुगायो वि चक्रमे
यत्र देवासो मदन्ति ॥ ७ ॥

विभिर्द्वा चरत एकया सह
प्र प्रवासेव वसतः ॥ ८ ॥

सदो द्वा चक्राते उपमा दिवि
सम्राजा सर्पिरासुती ॥ ९ ॥

अर्चन्त एके महि साम मन्वत
तेन सूर्यमरोचयन् ॥ १० ॥

म० १० No. 25. सू० ७२

देवानां नु वयं जाना
प्र वोचाम विपन्यया ।
उक्थेषु शस्यमानेषु
यः पश्यादुत्तरे युगे ॥ १ ॥

ब्रह्मणस्पतिरेता
सं कर्मार इवाधमत् ।
देवानां पूर्व्ये युगे-
ऽसतः सदजायत ॥ २ ॥

देवानां युगे प्रथमे-
ऽसतः सदजायत ।
तदाशा अन्वजायन्त
तदुत्तानपदस्परि ॥ ३ ॥

भूर्जज्ञ उत्तानपदो
भुव आशा अजायन्त ।
अदितेर्दक्षो अजायत
दक्षाद्वदितिः परि ॥ ४ ॥
अदितिर्ह्यजनिष्ट
दक्ष या दुहिता तव ।
तां देवा अन्वजायन्त
भद्रा अमृतबन्धवः ॥ ५ ॥
यद्देवा अदः सलिले
सुसंरब्धा अतिष्ठत ।
अत्रा वो नृत्यतामिव
तीव्रो रेणुरपायत ॥ ६ ॥
यद्देवा यतयो यथा
भुवनान्यपिन्वत ।
अत्रा समुद्र आ गूळ्ह-
मा सूर्यमजभर्तन ॥ ७ ॥
अष्टौ पुत्रासो अदितेः
ये जातास्तन्वस्परि ।
देवाँ उप प्रैत्सप्तभिः
परा मार्ताण्डमास्यत् ॥ ८ ॥
सप्तभिः पुत्रैरदितिः
उप प्रैत्पूर्व्यं युगम् ।

प्रजायै मृत्यवे त्व-
त्पुनर्मर्तांण्डमाभरत् ॥ ९ ॥

म० १० No. 26 सू० १०८

किमिच्छन्ती सरमा प्रेदमानड्
दूरे ह्यध्वा जगुरिः पराचैः ।
कास्येहितिः का परितक्म्यासी-
त्कथं रसाया अतरः पयांसि ॥ १ ॥
इन्द्रस्य दूतीरिषिता चरामि
मह इच्छन्ती पणयो निधीन्वः ।
अतिष्कदो भियसा तन्न आव-
त्तथा रसाया अतरं पयांसि ॥ २ ॥
कीदिङिन्द्रः सरमे का दृशीका
यस्येदं दूतीरसरः पराकात् ।
आ च गच्छान्मित्रमेना दधा-
माथा गवां गोपतिर्नो भवाति ॥ ३ ॥
नाहं तं वेद दभ्यं दभत्स
यस्येदं दूतीरसरं पराकात् ।
न तं गूहन्ति स्रवतो गभीरा
हता इन्द्रेण पणयः शयध्वे ॥ ४ ॥
इमा गावः सरमे या ऐच्छः
परि दिवो अन्तान्त्सुभगे पतन्ती ।

कस्त एना अव सृजादयुर्-
ध्युतास्माकमायुधा सन्ति तिग्मा ॥ ५ ॥

असेन्या वः पणयो वचाँस्यनिषव्यास्तन्वः सन्तु पापीः ।
अधृष्टो व एत्वा अस्तु पन्था
बृहस्पतिर्व उभया न मृळात् ॥ ६ ॥

अयं निधिः सरमे अद्रिबुध्नो
गोभिरश्वेभिर्वसुभिर्न्यृष्टः ।
रक्षन्ति तं पणयो ये सुगोपा
रेकुं पदमलकमा जगन्थ ॥ ७ ॥

एह गमन्नृषयः सोमशिता
अयास्यो अङ्गिरसो नवग्वाः ।
त एतमूर्वं वि भजन्त गोना-
मथैतद्वचः पणयो वमन्नित् ॥ ८ ॥

एवा च त्वं सरम आजगन्थ
प्रबाधिता सहसा दैव्येन ।
स्वसारं त्वा कृणवै मा पुनर्गा
अप ते गवां सुभगे भजाम ॥ ९ ॥

नाहं वेद भ्रातृत्वं नो स्वसृत्व-
मिन्द्रो विदुरङ्गिरसश्च घोराः ।

गोकामा मे अच्छदयन्यदाय-
मप्रतं इत पणयो वरीयः ॥ १० ॥
दूरमित पणयो वरीय उ-
द्गावो यन्तु मिनतीर्ऋतेन ।
बृहस्पतिर्या अविन्दन्निगूळ्हाः
सोमो ग्रावाण ऋषयश्च विप्राः ॥ ११ ॥

म० १०　　No. 27.　　सू० १३९

सूर्यरश्मिर्हरिकेशः पुरस्ता-
त्सविता ज्योतिरुदयाँ अजस्रम् ।
तस्य पूषा प्रसवे याति विद्वा-
न्त्संपश्यन्विश्वा भुवनानि गोपाः ॥ १ ॥
नृचक्षा एष दिवो मध्य आस्त
आपप्रिवान्रोदसी अन्तरिक्षम् ।
स विश्वाचीरभि चष्टे घृताची-
रन्तरा पूर्वमपरं च केतुम् ॥ २ ॥
रायो बुध्नः संगमनो वसूनां
विश्वा रूपाभि चष्टे शचीभिः ।
देव इव सविता सत्यधर्मेन्द्रो न तस्थौ समरे धनानाम् ॥ ३ ॥
विश्वावसुं सोम गन्धर्वमापौ
ददृशुषीस्तदृतेना व्यायन् ।

तदन्ववैदिन्द्रो गाहाण आसां
परि सूर्यस्य परिधीरपश्यत् ॥ ४ ॥
विश्वावसुरभि तन्नो गृणातु
दिव्यो गन्धर्वो रजसो विमानः ।
यद्वा घा सत्यमुत यन्न विद्म
धियो हिन्वानो धिय इन्नो अव्याः ॥ ५ ॥
सस्मिमविन्दच्चरणे नदीना-
मपावृणोद्दुरो अश्मव्रजानाम् ।
प्रासां गन्धर्वो अमृतानि वोच-
दिन्द्रो दक्षं परि जानादहीनाम् ॥ ६ ॥

NOTES

No. 1

MANDALA I SŪKTA 25

यच्चिदित्येकविंशत्यृचं द्वितीय सूक्तम् । तथा चानुक्रान्तम् । (कात्या० सर्वानुक्रमणी २) यच्चित्सकेति । ऋषिश्चान्यस्मादिति परिभाषया शुन:शेप एव ऋषिः आद्या गायत्रमिति परिभाषितत्वाद्गायत्री छन्दः । वारुणं त्विति पूर्वोक्तत्वात्तृह्यादिपरिभाषया (सर्वा० परि० १२-३) वरुणो देवता । विनियोग उक्तः शौन शेपाख्याने । विशेषविनियोगस्तु । आभिप्लवषडह इदं सूक्तं होत्रकशास्त्रे स्तोमनिमित्तमावापार्थम् । अभिप्लवपृष्ठ्यहानीति खण्डे तथैव सूत्रितम् । यच्चिद्धि ते विश इति वारुणमेतस्य तृचमावपेत मैत्रावरुणः (आश्व० श्रौ. ७-५, ९, १०) इति ॥

The Aitareya Brāhmana in VII. 13–18 gives the story of Śunahśepa, to whom old tradition, as incorporated in the Ait. Br. itself and the Sarvānukramanī, attributes this hymn, the preceding hymn, and the following five hymns. Śunahśepa is sold to the dropsy-stricken Hariścandra by his greedy father Ajigarata, to be used as a sacrificial victim to Varuna in the place of Rohita, Hariścandra's son. When he was bound to the sacrificial post and when his own father's hand was about to smite him, he prayed to one god after another and when he recited the trca to Usas, the last in the series, the ropes with which he was tied fell off and Hariścandra also was cured of his dropsy. Viśvāmitra, the *hotā* in the sacrifice, adopted Śunahśepa as his own son and renamed him Devarāta. This will explain the Sarvānukramanī reference to I-24: 'कस्य'—पञ्चोना (विंशतिः), आजीगर्तिः शुन:शेपः (ऋषिः), स कृत्रिमो वैश्वामित्रो देवरातः. Like most Brahmanic legends this legend also, full of dramatic movement and intense human interest as it is, is based more on a fantastic explanation of the Vedic hymns than on history. RV. I. 24. 12–13 शुन:शेपो यमह्वद्गृभीतः, शुन:शेपो ह्यह्वद्गृभीत स्त्रिष्वादित्यं द्रुपदेषु बद्धः and Ry. V. 2. 7 शुनश्चिच्छेपं निदितं सहस्रादयूपादमुञ्चो अशामिष्ट हि षः । एवास्मदग्ने वि

मुमुग्धि पाशान् would, however, point to the existence of a tradition already in the Rgvedic times of a शुनःशेप saved from the Yūpa after invoking Varuṇa and Agni. There is, however, nothing in the RV. to show that the hymns were composed by Śunaḥśepa; reference to him in the third person in I. 24 12-13 would, if possible, prove the contrary.

The present hymn (I. 25) consists of seven trcas (groups of three ṛks), each of which originally formed a hymn by itself. It is worth while going into the details of this question as it has a bearing not only on the arrangement of the RV. but also on the interpretation of rks 4 and 7. Oldenberg, while admitting in his Prolegomena that the hymn consists of trcas, still regards it as being made up of two hymns, one consisting of the first four trcas and the other, of the last three. According to him the Śunahśepa cycle of hymns will be finally resolved into five deity-groups of altogether sixteen hymns with the following number of rks: Varuna–3 hymns of 15 (I 24), 12, 9 (I. 25) rks; Agni–4 hymns of 10 (I. 26), 6, 3, 4 (I. 27); Indra–5 hymns of 9 (I. 28), 7 (I 29), 6, 6, 4; Aśvins–1 hymn: 3; Usas–1 hymn: 3 (I. 30) I have to submit, that Bergaigne is right in splitting up this hymn into more than two hymns,[1] because thus we secure complete conformity with the Rgvedic principle of arrangement of hymns[2] within each

1 Bergaigne thinks that the hymn is to be split up into six hymns of three ṛks, ṛks 4, 5 and 7 forming the second hymn and ṛks 6, 8 and 9 being interpolated. Against this latter, Oldenberg points out that the recurrence of सद् in 7-9 clearly indicates that they form a trca; on the other hand it has to be admitted that ṛk 7 hangs unconnected after 6 and that it would come naturally after 5.

2 According to the researches of Bergaigne, which were preceded by those of Delbrück, Grassmann and Oldenberg, the 'family' cycles of hymns in the latter half of the first maṇḍala and maṇḍalas II–VII were in the original Saṃhitā (collection of hymns) arranged according to certain definite principles. These are: (i) cycles of hymns of the same *Ṛṣi* (or Gotra) are arranged in the *ascending* order and subdivided according to deity-groups; (ii) the *Deity*-groups are arranged according

उत अपि च यो वरुणो मानुषेषु यशोऽन्नम् आ चक्रे सर्वतः कृतवान् । स वरुणः कुर्वन्नपि आ सर्वतः असामि । संपूर्णं चक्रे न तु न्यूनं कृतवान् । विशेषतोऽस्माकमुदरेषु आ सर्वतश्चक्रे । मानुषेषु । मनोर्जातावञ्यतौ षुक् च । (पा० ४-१-१६१) इत्यञ् । ङिन्नित्यादिर्नित्यमित्याद्युदात्तत्वम् । चक्रे । प्रत्ययस्वरः । असामि । अव्यये नञ्कुनिपातानामिति वक्तव्यम् (पा० ६-२-२-२) 'यशः' । अशेर्युट् च (उ० ४-१९०) इत्यसुन् । उदरेषु । उदि इणातेरजादौ पूर्वपदान्त्यलोपश्च (उ० ५-१९) इत्यत्रन् । लित्स्वरः । गतिकारकोपपदा० (पा० ६-२-१३९) इत्युत्तरपदप्रकृतिस्वरत्वम् ॥

मानुषेषु आ॑ Among men. अ॑सामि (not half i. e. wholly, completely) is an adv. cf. मह्यः चित् यः वव्रये असामि VI. 14. 2 ; असामि ववृधानं VI. 38. 5 ; महः य॑. पति॑. शवसः असामि आ ; X. 22. 3. *b* is repeated in X. 22. 2 मित्रो न यो जनेषु आ यश चक्रे असामि आ, and the rhetorical exuberance which manifests itself in the repetition of आ is carried into the first line of 3. य॑शः चक्रे॑ यश॑. means (i) lustre, splendour; अग्नि is called यशस्वान्. his याम (course) is called यशस्वान्. It means (ii) a splendid name : cf. क त्यत् इन्द्रावरुणा यशः वाम् III. 62. 1. (iii) splendid position : prosperity, wealth, sons, food

&c.; cf. (इन्द्र त्वादातं यशः I. 10. 7; प्रति शुष्यतु यशः अस्य देवाः यः नः दिवा दिप्सति यः च नक्तम् VII. 104. 11, also वरिवत् यशः IV. 32. 12, रयिमत् यशः X. 36. 10 &c. अस्माकम् उदरेषु आ (यशःचके) is understood by Geldner as humorously intended to refer to the swollen belly of a man suffering from dropsy. But it is impossible to imagine this levity with reference to Varuna and esp. with reference to the punishment he metes out to offenders. The यश· would be established in men's bellies when these feel his liberality.

Mark (cf. 9) that between ए or ओ and the following अ there is no Samdhi as a rule in the RV inside the Pāda, except when the ए or ओ is preceded or followed by य or व; cf. App. III.

Tr. And further, he who has completely established prosperity among men, yea, in our very bellies.

Verse 16

परा । मे । यन्ति । धीतयः । गावः । न । गव्यूतीः । अनु ॥
परा मे यन्ति धीतयः गावः न गव्यूतीः अनु
इच्छन्तीः । उरुऽचक्षसम् ॥ १६ ॥
इच्छन्तीः उरुचक्षसम्

उरुचक्षस बहुभिर्दृष्टव्यं वरणमिच्छन्तीमे धीतयः शुनःशेपस्य बुद्धयः परा यन्ति पराङ्मुखा निवृत्तिरहिता गच्छति। तत्र दृष्टान्तः। गावो न यथा गावो गव्यूतीरनु गोष्ठान्यनुलक्ष्य गच्छन्ति तद्वत्। गव्यूतीः। गावोऽत्र यूयन्त इत्यधिकरणे क्तिन् गोर्युतौ छन्दसि (पा० ६-१-७९-२) इत्यवादेशः। दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वम्। यद्वा यूतिर्यवनं गवां यवनमत्रेति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्।इच्छन्तीः। इषु इच्छायाम्। लटः शतृ० (पा० २-२-१२४) तुदादिभ्यः शः (पा० ३-१-७७) इषुगमियमां छः (पा० ७-३-७७) इति च्छत्वम्। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे विकरणस्वरः शिष्यते॥

मे धीतयः परा यन्ति. धीति and धी (from धी-दीध्यति-ते to think, ponder, feel) mean a hymn. इ with परा so forth. गावो न गव्यूतीः अनु a pastorals simile. गव्यूति (गो+यूति acc. to Kātyā.; गो+ऊति acc. to BR and Gr., the first is decidedly better) pasture-land

(where cows meet acc. to Kā., where they are guarded acc. to Gr.). इच्छन्तीः from इष् to seek.

Tr. My songs go forth, as cows to the pastures, in search of the far-seeing (Varuna).

Verse 17

सम् । नु । वोचावहै । पुनः । यतः । मे । मधु । आऽभृतम् ॥
सं॒म् नु वो॒चा॒व॒है पु॒नः य॒तः मे॒ म॒धु आ॒ऽभृ॒तम्
होताऽइव । क्षदसे । प्रियम् ॥ १७ ॥
हो॒ता॒ऽइ॒व क्ष॒द॒से प्रिय॑म्

यतो यस्मात्कारणात् मे मज्जीवनार्थं मधुरं हविराभृतम् अध्वरसवाख्ये कर्मणि संपादितम् । अतः कारणाद्धोतेव होमकर्तेव त्वमपि प्रियं हविः क्षदसे अश्नासि । पुनर्हविःस्वीकारादूर्ध्वं तृप्तस्त्वं जीवन्नहं च नु अवश्यं संवोचावहै । संभूय प्रियवार्तां करवावहै । वोचावहै । लोडर्थे छान्दसे लुङि ब्रुवो वचिः । (पा० २-४-५३) अस्यतिवक्ति० (पा० ३-१-५२) इति च्लेरङादेशः । वच उम् (पा० ७-४-२०) इत्युमागमे गुणः । ऽपित्ययेन टेरैत्वम् । यद्वा लोट एव लुङादेशः । स्थानिवद्भावादैत्वम् । आभृतम् । हृग्रहोर्भः (पा० ३-१-८४-२) गतिरनन्तर इति गतेः प्रकृतिस्वरत्वम् ॥

सं॑म नु वोचावहै. नु now. It is also used emphatically in this sense : उवास (in the past) उषाः उच्छात् (has shone) च नु I. 48 3. In any case it does not come in the beginning of a sentence, but must be preceded by at least a word. It is used also as an interrogative or an expletive. न, on the other hand, comes in the beginning of a sentence : cf. नु च पुरा च I. 96. 7 ; नू चित् I. 5. 81. The पदपाठ does not distinguished between them and the नू appears as नु there. It may be said that being in an emphatic position the नु is lengthened in the beginning of a sentence. वोचावहै aor. inj. आ॑भृत म॑धु. भृ in Vedic language stands for the classical भृ as well as हृ ; ग्रह् similarly figures as ग्रभ्; forms of हृ and ग्रह also occur. Thus a beginning of the Prakritic changes is to be seen in the earliest Vedic times. Most roots ending in ह originally end in a soft aspirate, e. g. नह् (ध्), मिह् (ध्), रुह् (ध्), वह् (ध्) &c. For आभृत cf. तुभ्यं सुतः मघवन् तुभ्यं आभृतः II. 36. 5. मधु is an

old Indo-European word; cf. Lithuanian medus, old Slav. medu; old High Germ. metu, Gr. medu. It means honey, and hence any sweet drink, esp. soma prepared with milk; secondarily it means anything sweet and agreable होताऽइव क्षदसे प्रियं मम. It was the privilege of the होता to be the first to partake of the soma offering after sacrifice; cf. होता इव न प्रथमः पाहि अस्य V. 43. 3; (ग्रावाणः) होतुः चित् पूर्वे हविः अद्यं आशत X. 94. 2. क्षद् to cut up, to eat. The verb can be used with a drink also; cf. स्वादुक्षद्मा I, 31. 15, मधु क्षदामहे Av. X. 6. 5. क्षदसे is understood by Geld. as an infini; Ludwig wanted to remove the accent from it; but क्षदसे is a verb in the subordinate clause यतः आभृतं मधु क्षदसे and so is accented. The ve b of a clause begun in (a) or (b) can verb well be found in (c); cf. 1 and 3. Mistaking क्षदसे for an infinitive scholars like Bollensen and Weber have tried to emend the text by changing होते to होत्रेव and होत्रे व; the grammatical connection even then remains very obscure; bacause होत्रेव must give the meaning होत्रे इव प्रियं क्षदसे. Geldner keeps the text as it is and translates the last line as 'in order that I may taste the dear (soma) as a hotr'; but since the construction अहं होतेव सोमं क्षदसे मे मधु आभृतम् is impossible in Sanskrit, his interpretation is unacceptable Geld. translates 'Let us speak to each other once more as to the reason why the drink has been brought to me to taste as does the hotr the dear (thing).' He thinks that the drink refered to in (b) is some preparation to be used as an expiation and medicine by a non-hotr, not the Soma offering in a sacrifice. He probably feels that the simile of a hotr for a god drinking soma at the sacrifice is out of place But a simile is not intended for the god, it is intended for the human auditors and contains an idea that appeals to them. The connection between (a) and (b, c) can be explained thus: यतः (कारणात्) मे मधु क्षदसे तत् (अधिकृत्य) सं वोचामहै; The poet has prepared the soma for an expiative offering (अञ्जःसव Sā.); 'come, says he' 'and let us discuss the cause, while you take the soma.' From Gr.'s dict. and Geld. Tr. it will be clear that it is wrong to translate यतः by 'since' as

Old. does in III. 10. 6 (SBB XLVI) or as Peterson has done (BSS. XXXVI, p. 307), because there is no authority for this use of यतः ; यत· must have a correlated term to be understood with it; e. g. अतः देवा अवन्तु नः यतः विष्णुः विचक्रमे I. 22. 16; यतः उ आयत् तत उत् ईयुः आविशम् II 22. 6; तत् वपुषे धायि दर्शतं देवस्य भर्गः, यतः (कालात्) सहस जनि I. 141. 1 : likewise in अग्निं वर्धन्तु नो गिरः यतः जायत III. 10. 6 and in our passage.

Since क्षदसे gives the sense of the present, it would mean that the poet imagines the god to have actually arrived. With the boldness of this manner of invocation Peterson compares *Isaiah*, I. 18, where God is the speaker: 'Come now and let us reason together', saith the Lord : though your sins be as scarlet, they shall be white as snow &c.' Another Vedic poet claims this speaking acquaintance with the god in VII. 88. 5 क्व त्यानि नौ सख्या बभूवु. सचावहे यत् अवृकं पुरा चित्. In any case this trea is conceived in altogether a different spirit from that of 13–15 or 19–21 and would confirm the view of I. 25 being made up of several original hymns.

Tr. And now let us talk together once more of the reason why thou partakest, (before every one else) like a hotr, of the mead, dear unto thee, offered by me.

Verse 18

दर्शम् । नु । विश्वऽदर्शतम् । दर्शम् । रथम् । अधि । क्षमि ॥
दर्शम् नु विश्वदर्शतम् दर्शम् रथम् अधि क्षमि
एताः । जुषत । मे । गिरः ॥ १८ ॥
एताः जुषत मे गिरः

विश्वदर्शतं सर्वैर्दर्शनीयमस्मदनुग्रहार्थमत्राविर्भूतं वरुणं दर्शं नु। अहं दृष्टवान्खलु । क्षमि क्षमायां भूमौ रथं वरुणसंबन्धिनमधिदर्शम् आधिक्येन दृष्टवानस्मि। एता उच्यमाना मे गिरो मदीयाः स्तुतीर्जुषत वरुणः सेवितवान् । दर्शम् । दृशे इरितो वा (पा० ३-१-५७) इति च्लेरङादेशः । ऋदृशोऽङि गुण· (पा० ७-४-१६) इति गुणः । विश्वदर्शतम् । दृशेर्भृमृदृशीत्यादिना (उ० ३-१०९) अतच्प्रत्ययान्तो दर्शतशब्दः । मरुद्वृधादित्वात्पूर्वपदान्तोदात्तत्वम् (पा० ६-२-१०६-२) यद्वा विश्वं दर्शनीयमस्येति बहुव्रीहिः । बहुव्रीहौ विश्वं संज्ञायाम् (पा० ६-२-१०६) इति पूर्व

पदान्तोदात्तत्वम् । क्षमि । आतो धातोः (पा० ६-४-१४०) इत्यत्रात इति योग-विभागादाकारलोपः ॥

दर्श नु विश्व दर्शतम. नु will be an interrogative particle here if दर्श is taken as an aor. inj.; it will mean 'now' if दर्शम् is imperf. without the augment. The first construction would have been better; it would have saved the poet from the charge of a pious fraud; but after v. 17 the second construction is the only one that can be natural. दर्श and जुषत must therefore be taken as aorist and imperf. respectively. The word दर्शत is used in two senses: (1) visible, (2) handsome in appearance; for (i) cf. (अग्निः) तिरः तमांसि दर्शतः III. 27. 13; for (ii) cf. आभिः दर्शताभिः श्रीभिः VI. 63. 6. The rules of accent, which are both vague and accommodating will allow the compound विश्वदर्शत to be dissolved either as विश्वेषा दर्शतः visible to all or handsome amongst all or विश्वं दर्शत यस्य. (to whom everything is visible). The latter is preferable, for according to the rule (P. VI. 2. 106) विश्व is accented on the last syllable, as here, only in a बहु० comp. अधि क्षमि. क्षम् f. क्षमा f (cf. the classical क्षमा), ग्मा, ज्मा, also क्षा, क्षामन्, all mean the earth and go back to the I. E. times. जुषत from जुष् to accept with pleasure, to relish.

Tr. I have seen him, him to whom everything is visible; I have seen (his) chariot alight on the earth: he has accepted these verse of mine.

Verse 19

वरुणप्रघासेषु इमं मे वरुणेति वारुणस्य हविषोऽनुवाक्या पञ्चम्यां पौर्णमास्यामिति खण्डे सूत्रितम् । इमं मे वरुण श्रुधि तत्त्वा यामि ब्रह्मणा वन्दमानः (आ० २-१७) इति ॥

इमम् । मे । वरुण । श्रुधि । हवम् । अद्य । च । मृळय ॥
इमं'म् मे वरुण श्रुधि ह'वम् अद्य' च मृळय
त्वाम् । अवस्युः । आ । चके ॥ १९ ॥
वा'म् अवस्यु': आ' चके

हे वरुण मे मदीयामिमं हवमाह्वानं श्रुधि शृणु । किंच अद्य अस्मिन्दिने मृळय अस्मान्सुखय । अवस्युः रक्षणेच्छुरहं त्वां वरुणमाभिमुख्येन चक्रे शब्दयामि स्तौमीत्यर्थः । श्रुधि । श्रु श्रवणे । लोटो हि· (पा० ३-४-८७) श्रुशृणुपृकृवृभ्यश्छन्दसीति (पा० ६-४-१०२) हेर्धिरादेशः । बहुलं छन्दसीति विकरणस्य लुक् । अन्येषामपि दृश्यत (पा० ६-३-१३७) इति संहितायां दीर्घः । अवस्युः । अवस्शब्दात् सुप आत्मनः क्यच् (पा० ३-१-८) क्याच्छन्दसीत्युप्रत्ययः (पा० ३-२-१७०) । आ चके । कै गै शब्दे । अस्मालिटचादेश· (पा० ६-१-४५) इत्यात्वम् । द्विर्भावचुत्वे । आतो लोप इटि च (पा० ६-४-६४) इत्याकारलोपः । तिङ्ङतिङ इति निघातः ॥

इम' ह'वं श्रुधि. हव is from ह्वे, a doublet of ह्वे Pān., ह्वा (Eur.) to call; to challenge. श्रुधि is the imperative from the aor. base of श्रु. From the present base the forms are: शृणु-शृहि-शृधि. मृळय is from the causal base of मृड् (ह्व); but the sense is the same. त्वा'म् अवस्यु': आ' चके. अवस्यति (अवः आत्मानं इच्छति) is the denominative from अवस् n. protection, help; to the denominative base उ is added to form a desiderative noun: 'wishing help for oneself'. आ चके perf from कै (Eur. कन्-का) with आ to seek to win, to love, to find pleasure in; cf सदा कवी (अश्विना) सुमतिं आ चक्र वाम् I. 119. 23; कायमानो वना त्व यत् मातृः अजगन् अप· III. 9. 2; आ उस्रा. चाकन्तु उभयेषु अस्मे I. 122. 14. The Ṛkprāti. notes the lengthening of धि in श्रुधि in our passage in 536 and of द्य in अद्य in 454.

Translation: Listen to this call of mine, Varuna, and show me mercy today. Desirous of protection I have sought to win thy favour.

Verse 20

त्वम् । विश्वस्य । मेधिर । दिवः । च । ग्मः । च । राजसि ॥
त्व'म् विश्वस्य मेधिर दिव': च ग्म': च राजसि
सः । यामनि । प्रति । श्रुधि ॥ २० ॥
स': यामनि प्र'ति श्रुधि

हे मेधिर मेधाविन्वरुण त्वं दिवश्च द्युलोकस्यापि ग्मश्च भूलोकस्यापि एवमात्मकस्य विश्वस्य सर्वस्य जगतो मध्ये राजासि दीप्यसे । स तादृशस्त्वं यामनि क्षेम-

प्रापणेऽस्मदीये प्रतिश्रुधि प्रतिश्रवणमाज्ञापनं कुरु रक्षिष्यामीयि प्रत्युत्तरं देहीत्यर्थः। दिवः। ऊडिदमित्यादिना षष्ठ्या उदात्तत्वम् (पा० ६-१-१७१)। ग्मः। ग्मेत्येतद्भूनामसु पठितम्। आतो धातोः (पा० ६-४-१४०) इत्यत्रात इति योगविभागादातो लोप इति प्रतिषेधेऽपि व्यत्ययेनाकारलोपः। उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम्। यामनि। या प्रापणे। आतो मनिन्क्वनिब्वनिपश्चेति मनिन् (पा० ३-२-७४)। नित्त्वादाद्युदात्तत्वम्। श्रुधि। उक्तम्॥

त्व विश्वस्य राजसि. राज् to rule over; to have jurisdiction over. It appears in expressions like कृष्टे॰ राजामि; दिव्यस्य पार्थिवस्य राजासि; वाजस्य, अमृतस्य, सुनस्य कलशस्य, राजामि. It governs the genitive. विश्वस्य is a general statement, after which दिव (from दिव् f.) and ग्मः (from ग्मा) are specifically stated. For ग्मा see note on क्षम्, 18. सः या'मनि प्र'ति श्रुधि. सः, as in classical स त्वम्, (e. g. स त्वं निवर्तस्व विहाय लज्जाम् Raghu. II. 40) refers to the preceding statement as an argument for the following: 'under the circumstances you &c.;' cf. त्वा देवाः दधिरे हव्यवाहं...स यामन् अग्ने स्तुवते वयोधाः X. 46. 10. प्रति + श्रु = listen or respond (to a prayer). The only other passage where it occurs is I 169. 9 where it is used in the passive voice in the sense of 'to echo', 'to resound': प्रति घोराणा मरुता शृण्वे उपाब्धिः. These meanings have survived in the later प्रतिश्रुत् (echo) and प्रतिश्रु to promise. या मन् n (from या to go) or या म m. means (i) going out on a journey; (ii) the way or path to go; these two meanings are applicable to a large majority of the passages or compounds containing the word; but there remain about twelve passages where these meanings will not do at all or may do only after a far-fetched interpretation BR. and Gr. following the interpretation of Sāy. of several of these passages have understand the word in the sense of (iii) going forth or resorting (appealing) to the gods with prayer and offering, i. e. the sacrifice; Sāy. on X. 64. 1 (यान्ति गच्छन्त्यत्र इति यामा यज्ञः) understands it to mean the sacrifice because it is (iv) the destination of the gods; so that there is a clear etymological connection between meanings i and ii and meaning iii and iv. Pischel (Ved St. I. 97–99) tries to explain यामन् as 'Von stattengehen', successful coming off, of the sacrifice. Max Müller and

Old. in SBE translate it by 'way or march'; Geldner in his Glossary renders the word in the difficult passages (including our passag) by 'the hour of need, critical hour'. Oldenberg in his Noten II. 85, 86 subjects Geldner's interpretation to an elaborate criticism and reaffirms his meaning of 'journey' for the word. This had the expected effect on Geldner's Tr., where he has complectly given up his meaning of 'hour of need' and accepted Old.'s interpretation. On going through the passages critically and with due deference to the great name of Oldenberg I have to submit that Old. has failed to establish his interpretation as against those of Sāy, and BR and Gr. and for these reasons: (i) in. I 112. 1 and X 46. 10 यामन् occurs in connection with अग्नि, who is not a 'journey'ing god; (ii) in X. 77. 8 महः च यामन् अध्वरे चकानाः, यामन् and अध्वरे have practically been used as synonyms; cf. note on सायकम् II. 32. 3; (iii) इमे यामासः त्वद्रिक् अभूवन् IV. 3. 12, appearing at the end of a hymn, like एता ते अग्न उचथानि IV. 2. 20, एता विश्वा विदुषे तुभ्यं.....वचांसि IV. 3. 16, अया ते अग्ने समिधा 4. 15, अकारि ब्रह्म समिधान तुभ्यम् 6. 11; also I. 186. 11, V 6 10, VII. 3. 10; 23. 6; 24. 6; 26. 5; 42. 6; must refer to prayer, appeal or something like it. I would therefore understand यामन् (or याम) as 'an appeal to gods or an appeal made at or through the sacrifice' in the following passages: I. 25. 20; 33 2; I. 112. 1; V. 3. 12; 53. 16; 73. 9; VI. 38. 1; VII. 32. 26; 85. 1; X. 46. 10; 64. 1; 77. 8; also in words like यामहू or यामहूति.

Tr. Thou art ruler of all, wise one, of heaven and earth. Grant then thy response in this appeal (of sacrifice).

Veres 21

उत् । उत्ऽतमम् । मुमुग्धि । नः । वि । पाशम् । मध्यमम् । चृत ।
उ॰त उत्ऽतमम॰म मुमुग्धि न वि॰ पा॰शम मध्यम॰म चृत॰
अव । अधमानि । जीवसे ॥ २१ ॥
अ॰व अधमा॰नि जीव॰से

नोऽस्माकमुत्तमं शिरोगतं पाशमुन्मुग्धि उत्कृष्य मोचय । मध्यममुदरगतं पाशं विचृत वियुज्य नाशय । जीवसे जीवितुमधमानि मदीयान्पादगतान्पाशानवचृत अवकृष्य नाशय । उत्तमम् । उच्छादिषु पाठादन्तोदात्तत्वम् । मुमुग्धि । मुच्लृ मोक्षणे । बहुलं छन्दसीति विकरणस्य श्लु । द्विर्भावः । हलादिशेषः । झझलभ्यो हेर्धिः (पा० ६-४-१०१) इति हेर्धिरादेशः । तिङ्ङतिङ इति निघातः । चृत । चृती हिंसाग्रन्थनयोः । लोटो हिः । तुदादिभ्य शः । अतो हेरिति हेर्लुक् । जीवसे । जीव प्राणधारणे । तुमर्थे सेसेनित्यसेप्रत्ययः (पा० ३-४-९) । प्रत्ययस्वरः ॥

नः उत्तमं म (पाशम्) उ'त मुमुग्धि. Varuna binds sinners with his fetters (पाश), which here have been metaphorically divided into the uppermost, the middle, and the nethermost. The first are to be unfastened उत्, in an upward direction, i. e. cut up. मुमुग्धि is impera. from the perf. base of मुच्. मध्यम'म पा'शम् वि'चृत वि चृत is from चृत 6 P. The meaning given in the धातुपाठ of ग्रन्थन has been adopted by Gr, but apparently कृत् (कृन्तति) and चृत् are doublets; and the verb also appears with वि, which has not the negative, but always an intensive force in ṚV. It should mean 'to cut'. मध्यम and अधम are adj. of the superlative degree formed by the old termination म; cf. अवम, अपम, ऽपम &c. अ'व अधमा'नि जीव'से. After अव चृत् may be added, or some suitable verb. Elliptical construction is very frequent in the ṚV; cf. II. 1. 4, 9; the same verb is very often common to several prepositions; cf. an improved version of our rc: उत् उत्तम वरुण पाशं अस्मत् अव अधम वि मध्यमं श्रथाय I. 24. 15 अधमानि is either inadvertently used for अधमान् or must refer to some other word than पाशान् such as योक्त्राणि or बन्धनानि. जीवसे is a Vedic infinitive from जीवि, the term. being असे. Pān. III. 4. 9–13 contains a complete list of the infinitives peculiar to the ṚV. See Appendix III.

Tr Cut up our topmost fetters; cut away the middle ones; down with the nethermost ones, that we may live.

इन्द्र

No. 2

MANDALA I SŪKTA 32

This is the second Sūkta of the cycle of हिरण्यस्तूपः आङ्गिरसः consisting of five hymns (31-35), addressed to Agni, Indra (2) Aśvinau and Savitr.

इन्द्रस्य नु वीर्याणीति पञ्चदशर्चं द्वितीयं सूक्तम्। आङ्गिरसो हिरण्यस्तूप ऋषिः त्रिष्टुप् छन्दः। इन्द्रो देवता। इन्द्रस्य पञ्चोनेत्यनुक्रमणिका। अग्निष्टोमे माध्यंदिने सवने निष्केवल्यशस्त्र इन्द्रस्य नु वीर्याणीति निविद्धानीयं सूक्त निष्केवल्यस्येति खण्डे इन्द्रस्य नु वीर्याणीत्येतस्मिन्नैन्द्रीं निविदं दध्यात् (आ० ५-१५) विषुवत्यपि तस्मिन् शस्त्रे एतद्विनियुक्तं विषुवान् दिवा कीर्त्य इति खण्डे सूत्रितम्। इन्द्रस्य नु वीर्याणीत्येतस्मिन्नैन्द्रीं निविदं शस्त्वा (आ० ८-६) इति। महाव्रते निष्केवल्येऽपि एतदेव विनियुक्तम राथन्तरो दक्षिणः पक्ष इति खण्डे चतस्रः सतीः षड् बृहतीः करोति। इन्द्रस्य नु वीर्याणि प्रवोचम् (ऐ० ब्रा० ५-२-२) इति॥

Verse 1

इन्द्रस्य । नु । वीर्याणि । प्र । वोचम् । यानि । चकार । प्रथमानि ।
इन्द्रस्य नु वीर्याणि प्र वोचम् यानि चकार प्रथमानि
वज्री । अहन् । अहिम् । अनु । अपः । ततर्द । प्र । वक्षणाः ।
वज्री अहन् अहिम् अनु अपः ततर्द प्र वक्षणाः
अभिनत् । पर्वतानाम् ॥ १ ॥
अभिनत् पर्वतानाम्

वज्री वज्रयुक्त इन्द्रः प्रथमानि पूर्वसिद्धानि मुख्यानि वा यानि वीर्याणि पराक्रमयुक्तानि कर्माणि चकार। तस्येन्द्रस्य तानि वीर्याणि नु क्षिप्रं प्रब्रवीमि। कानि वीर्याणि इति तदुच्यते। अहिं मेघम अहन्। हतवान्। तदेतदेकं वीर्यम्। अनु पश्चादपो जलानि ततर्द। हिंसितवान्। भूमौ पातितवानित्यर्थः। इदं द्वितीयं वीर्यम्। पर्वतानां संबन्धिनीर्वक्षणाः प्रवहणशीला नदीः प्राभिनत्। भिन्नवान्। कूलद्वयकर्षणेन प्रवाहितवानित्यर्थः। इदं तृतीयं वीर्यम्। एवमुत्तरत्रापि द्रष्टव्यम्। वीर्याणि। शूर वीर विक्रान्तौ। ण्यन्तादचो यदिति यत् (पा० ३-१-९७) णेरनिटीति (पा० ६-४-५१) णिलोपः। तित्स्वरितमिति (पा० ६-१-१८५) स्वरितत्वम्। यतोऽनावः (पा० ६-१-२१३) इत्याद्युदात्तत्वं न भवति। आद्युदात्तत्वे हि सुशब्देन बहुव्रीहौ

आद्युदात्तं द्व्यच्छन्दसि (पा० ६-२-११९) इत्यनेनैवोत्तरपदाद्युदात्तत्वस्य सिद्धत्वाद्वीरवीर्यौ च (पा० ६-२-१२०) इति पुनस्तद्विधानमनर्थकं स्यात्। अतोऽवगम्यते यतोऽनाव (पा० ६-१-२१३) इत्याद्युदात्तत्वं वीर्यशब्दे न प्रवर्तत इति। अतः परिशेषात्तित्स्वरितम् (पा० ६-१-१८५) इति प्रत्ययस्य स्वरितत्वमेव। वोचम्। अस्यतिवक्तिख्यातिभ्योऽङ् (पा० ३-१-५२) इति च्लेरङादेशः। बहुलं छन्दस्यमाङ्योगेऽपि (पा० ६-४-७५)इत्यडभावः। चकार। णलि लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वम्। यदूवृत्तयोगादनिघातः। अहन्। लङि इतिश्चेतीकारलोपे हल्ङ्याब्भ्यः। (पा० ६-१-६८) इति तकारलोपः। अहिम्। आङ्पूर्वाद्धन्तेः आङि श्रियनिभ्यां ह्रस्वश्च (उ० ४-१३७) इतीण्प्रत्ययः। आङो ह्रस्वत्वं च चशब्देन वेञो डित (उ० ४-७२) समाने ख्यश्चोदात्त (उ० ४-१३६) इति डित्त्वं पूर्वपदान्तोदात्तत्वं* चानुकृष्यते। ततष्टिलोपे पूर्वपदस्योदात्तत्वम्। ततर्द। उतृदिर् हिंसानादरयोः। तिङ्ङतिङ इति निघातः। वक्षणाः। वक्ष रोषे। कुधमण्डार्थेभ्यश्च (पा० ३-२-१५१) इति युच् चित्स्वरं बाधित्वा व्यत्ययेन प्रत्ययस्वरः॥

नु see on I 25. 17. वीर्यं n. heroic deed; also heroic power; from वीर a hero, or manly son. वोचम् Aor. inj. चकार being a verb in a subordinat classe is accented. अहन् अहिम्. अहि is the serpent or dragon वृत्र (from वृ to encompass) who has encompassed the waters. Indra with the Maruts, after having drunk soma, kills वृत्र and releases the waters. This heroic deed of Indra was the constant theme of the Vedic poets and of popular festivals, which have survived to this day in an unrecognizable form. अहन् (imperf. of हन्), accented because it begins a Pāda and a sentence, so also in 3. अपः अनु ततर्द. तृद् 7 U. to pierce, to split, (deri. तृण्ण, तृण); the preposition, अनु gives nearly an independent sense, which is combined with that of the verb, as in the English expressions, 'he scolded him into silence,' the meaning here being 'he bored holes into the rocks and caused the water to flow along; cf. उत्-, अव-, वि-श्रथय in I. 24. 15 quoted above on I. 25. 21. पर्वतानाम् वक्षणाभ्यः अभिनत्. भिद् with प्र to break *forth*, i. e. open. वक्षणा f. Gr. derives the word from वक्ष् to swell, and from the derivative meaning 'that which swells' takes it to mean in the primary sense 'the

* पदोदात्तत्वमित्यादर्शपाठः

part of the body which includes the (i) 'belly', (ii) the womb, (iii) and, in the case of the cow, the udders; and metaphorically from (i) and (ii), the river-bed and heaven's vault, where the Maruts were born. Pischel derives it (Ved. Stu. I. 173–181) from वक्ष्-उक्ष् to moisten (tr) or to be moist (intr.) and takes it to mean 'the female yoni'; metaphorically (a) the vault of heaven, (b) the sacrificial altar; (c) twig of Soma plant, (d) river channel on a mountain; (e) the cow's udders; (f) river beds In favour of the identity वक्षणा=ऊधः=योनिः he has marshalled his evidence with great ingenuity, relying chiefly on parallelism in ideas and contexts. In our passage he rejects Rosen's interpretation of वक्षणा=wing, which is also Sāy.'s interpretation of the word in TB. II. 5. 4. 2, and takes it in the sense of channels of rivers, which is practically also Sāy.'s meaning here But the etymology of Pischel is very questionable, and it is impossible to imagine how so many derivative meanings could come from a primary sense with which they have actually very little in common. Grassmann's meaning and etymology (cf. वक्षस्, वक्षण, वक्ष णि.) are perfectly satisfactory and suit all the passages (except one, V. 52, 15, where the word itself is a different one) where the word occurs. The word is obviously like the Marathi word पोट, which includes the belly and the womb, and is used always in the plural.

Tr. Let me declare the heroic deeds of Indra which were the first to be performed by the wielder of the thunderbolt. He killed the dragon: he bored the rocks and made the waters flow; he ripped open the bellies of the mountains.

Verse 2

अहन्। अहिम्। पर्वते। शिश्रियाणम्। त्वष्टा। अस्मै। वज्रम्।
अ॑हन् अ॑हिम् प॑र्वते शिश्रियाण॑म् त्वष्टा॑ अस्मै॑ व॑ज्रम्
स्वर्यम्। ततक्ष॥ वाश्राःऽइव। धेनवः। स्यन्दमानाः। अज्ञः।
स्वर्य॑म् ततक्ष॑ वाश्राः॑इव धेन॑वः स्य॑न्दमानाः अ॑ज्ञः
समुद्रम्। अव। जग्मुः। आपः॥ २॥
समु॑द्रम् अ॑व जग्मुः॑ आ॑पः

13 [RV. Hymns, 2nd Selection].

पर्वते शिश्रियाणमाश्रितम् । अहिं मेघम् । अहन् हतवान् । अस्मा इन्द्राय स्वर्यं सुष्ठु प्रेरणीयं यद्वा शब्दनीयं स्तुत्यं त्वष्टा विश्वकर्मा वज्रं ततक्ष । तनूकृतवान् । तेन वज्रेण मेघे भिन्ने सति स्यन्दमानाः प्रस्रवणयुक्ता आपः समुद्रमञ्जः सम्यगवजग्मुः प्राप्ताः । तत्र दृष्टान्तः । वाश्रा वत्सान् प्रति हम्भारवोपेता धेनव इव । यथा धेनवः सहसा वत्सगृहे गच्छन्ति तद्वत् । शिश्रियाणम् । श्रिञ् सेवायाम् । लिटः कानच् । द्विर्भावहलादिशेषेयङादेशाः । चित इत्यन्तोदात्तत्वम् । स्वर्यम् । ऋ गतौ अस्मात् सुपूर्वात् ऋहलोर्ण्यदिति ण्यत् । संज्ञापूर्वको विधिरनित्य इति वृद्ध्यभावः । यद्वा स्वृ शब्दोपतापयोरित्यस्मात् ण्यति पूर्ववद्वृद्ध्यभावः । तित्स्वरितमिति स्वरितत्वम् । वाश्यन्त इति वाश्राः । वाशृ शब्दे । स्फायितञ्चीत्यादिना रक् (उ० २-१३) । जग्मुः । उसि गमहनेत्युपधालोपः ॥

अहन् अहिम्. The words have been repeated from V. 1 ; a stylististic peculiarity which the Vedic poets share with modern poets. The fact that was described in 1 *c, d* is here taken up for detailed description. पर्वते शिश्रियाणम्. What the पर्वत, is depends on what view one takes of Indra and Vrtra. The school of Yāska understands वृत्र as the demon of drought and पर्वत then would stand for a cloud ; but *see* App. *II. pp.* XLV XLVI. शिश्रियाण perf. part from श्रि to resort to. त्वष्टा, the architect of heaven and earth, and of all beings, esp. of the animals, sometimes spoken of as Indra's father whom Indra slew, father of सरण्यू who bore to विवस्वत् the pairs यम and यमी and of the अश्विनौ. स्वर्यम् (from स्वृ 1 p. to rustle, to roar) making a rustling or roaring noise. ; cf. यः (द्यौः) ई जजान स्वर्यं सुवज्रम्. ततक्ष from तक्ष्, which was originally identical with त्वक्ष्, the root in त्वष्टृ; but त्वक्ष् connotes much greater power than तक्ष्; cf. त्वक्षाणो अति विश्वा सहांसि X. 44 1. वाश्राः इव धेनवः; see note on होतेव I. 25. 17. वाश्रा (from वाश् to low) a cow that lows to her calf. धेनु (from धे–धयति) a milk-giving cow. अञ्जः (adv.) also अञ्जसा and अञ्जसि, suddenly. straightway ; cf. बृहस्पति सः हि अञ्जः वर्णांसि विभ्वा अभवत् I. 190. 2.; अञ्जसा शासना रजः I 139. 4 ; स्वस्मिन् अञ्जसि क्षणस्य I. 132. 2. अवं जग्मु –अव signifies a downward course; cf. I. 25. 21 (*c, d*).

Tr. He killed the dragon dwelling on the mountain ; for him Tvastr had made the roaring thunderbolt. Gliding like lowing cows (to their calves), the waters straightway went in a downward course to the sea.

Verse 3

वृषऽयमाणः । अवृणीत । सोमम् । त्रिऽकद्रुकेषु । अपिबत् । सुतस्य ।
वृषय॑माणः अवृणीत सो॑मम् त्रि॑कद्रुकेषु अपिबत् सु॒त॑स्य ।
आ । सायकम् । मघऽवा । अदत्त । वज्रम् । अहन् । एनम् ।
आ॑ सा॑यकम् मघ॑वा अदत्त व॑ज्रम् अ॑हन् एनम् ।
प्रथमऽजाम् । अहीनाम् ॥ ३ ॥
प्रथमजा॑म् अ॑हीनाम् *[°माणोऽवृणीत, प्रा. 139]

*वृषायमाणः वृष इवाचरन्निन्द्रः सोममवृणीत वृतवान् । त्रिकद्रुकेषु ज्योतिर्गौरायुरित्येतन्नामकाश्चयो यागास्त्रिकद्रुका उच्यन्ते । तेषु सुतस्य अभिषुतस्य सोमस्यांशमपिबत् पीतवान् । मघवा धनवानिन्द्रः सायकं बन्धकं वज्रमादत्त । स्वीकृतवान् । तेन च वज्रेण अहीनां मेघानां मध्ये प्रथमजां प्रथमोत्पन्नं मेघम् अहन् हतवान् । वृषायमाणः वृष इवाचरन् । कर्तुः क्यङ् सलोपश्च (पा० ३-१-११) इति क्यङ् । अकृत्सार्वधातुकयोरिति दीर्घः । अदुपदेशाद्धातोरन्तोदात्तत्वे क्यङन्ताद्धातोरन्तोदात्तत्वम् । सायकम् । षिञ् बन्धने । सिनोति इति सायकः । ण्वुल् । लित्स्वरेणाद्युदात्तत्वम् । प्रथमजां प्रथमं जायते इति प्रथमजाः । जनसनखनक्रमगमो विट् (पा० ३-२-६७) । विड्वनो (६-४-४१) रित्यात्वम् ॥

वृषऽयमाण· is a pre. part. from the denominative (क्यङ्- वृषा इव आचरति वृषायते). The Padapāṭha always has an अवग्रह after the original word and before the term. य of the denom. or यु from the desi. for denom. As a gereral rule before the terminations य and यु the preceding vowel is lengthened (P. VII. 4. 25), but the पदपाठ chooses to denote the base with a short vowel, and the प्रातिः (549-553) has to note all these cases of प्लुति. There are altogether 33 such words in the RV, of which वृष is one ; before यु, अश्व, सुम्न, ऋत and वृत do not lengthen their final vowel ; cf. अत्यो न यूथे वृषयुः कनिक्रदत् IX. 77. 4 ; before य however the lengthening takes place in all cases. वृषन्, a bull, stands as a prototype of viritity and retains very often the etymological sense (वृष् to pour forth, esp. the seminal fluid) as the back-

* वृषऽयमाणः इत्यादर्शपाठः ।

ground of the sense of power that it conveys. वृषायमाणः, therefore, displaying his power like a bull. सो॑ मं॑ अवृणीत cf. अन्ना यत् इन्द्रः प्रथमा॑ वि आश वृत्रं जघन्वान् अवृणीत सोमम्; III. 36, 8 यं त्वं वव्रे इन्दुं मदाय युज्याम सोमम् IX. 88 1. Soma is his favourite drink, which was the first food he took after his Vrtra fight, which he has chosen as an intoxicant as well as a means of making friendships. The same exploit is being described further. सु॑तस्य त्रि॑ कद्रुकेषु॑ अपिबत्. कद्रु f. appears only once in अपिबत् कद्रुवः सुतं इन्द्रः सहस्रबाह्वे, when it means the brown (Soma-cup). त्रिकद्रुक m., always pl., appears seven times and its meaning is not clear; Gr. the three Kadrus (Soma-cups), or the use of the three cups for an offering. Sāy. says that they are the names of three offerings called ज्योतिः, गौः and आयुः forming the first half of the आभिप्लव षळह, and Sāy. knows the sacrificial ritual perfectly; only the ritual that he knows was developed in the post-Rgvedic times. Geld. suggests that त्रि॰ might be the name of an early form of the later त्रि॰ or it might be the name of a locality where Indra quaffed off three lakes of Soma; cf. त्री॑ सरांसि मघवा सोम्या अपा. V. 29. 8; also त्रीणि सरांसि पृश्नयः दुदुह्रे वज्रिणे मधु VIII. 7. 10; but all this is mere conjucture. सुतस्य (सोमस्य) अपिबत् is an instance of the partitive genitive, which is very frequent in RV.; cf. I. 25. 14. सा॑यकं व॑ज्रम्. सायक (from सि, the root in सेना, to shoot) is used either as an adj. in the sense of 'that which is shot', but probably it is used as a synonymous noun. In the Vedic language synonymous expresions occur frequently, (cp. Marathi बाजारहाट) amongst which may be mentioned क्रत्वा मज्मना I. 141. 6; भानुना ज्योतिषा III. 51. 4; ऋचा गिरा VII. 82. 4; युत्सु पृतनासु VIII. 8. 22; see on I. 25. 20. मघ॑वा (मघ from मंह् to be bounteous + the poss. वत्). प्रथमजा॑म् acc. from प्रथमजाः m.

Tr.— Displaying his virile power he chose the Soma (as his food); he drank the Soma as it lay pressed in the three cups (?). The bounteous (god) took up the missile, the thunderbolt, (and) he killed this first-born of the dragons.

Verse 4

यत् । इन्द्र । अहन् । प्रथमऽजाम् । अहीनाम् । आत् । मायिनाम् ।
य॑त् इन्द्र अ॑हन् प्रथ॑मजा॑म् अ॑हीनाम् आ॑त् माय॑िनाम्
अमिनाः । प्र । उत । मायाः ॥ आत् । सूर्यम् । जनयन् । द्याम् ।
अ॑मिना प्र॑ उत॑ माया॑ः आ॑त सू॑र्यम् जन॑यन् द्या॑म्
उषसम् । तादीत्ना । शत्रुम् । न । किल । विवित्से ॥ ४ ॥
उष॑सम् ता॑दी॑त्ना श॑त्रुम् न॑ कि॑ल विवित्से

उत अपि च हे इन्द्र यत् यदा अहीनां मेघानां मध्ये प्रथमजां प्रथमोत्पन्नं मेघं अहन् हतवानसि । आत् तदनन्तरं मायिनां *माययोपेतानामसुराणां संबन्धिनीं मायाः प्रामिनाः प्रकर्षेण नाशितवानसि । अनन्तरं सूर्यमुषसम् उषःकालं द्यामाकाशं च जनयन्नुत्पादयन्नावरकमेघनिवारणेन प्रकाशयन् वर्तसे । तादीत्ना तदानीम् । आवरकान्धकाराभावाच्छत्रुं घातकं वैरिणं न विवित्से किल । त्वं न लब्धवान् खलु । अहन् हन्तेर्लङि हलङ्याब्भ्य इति सिलोपः । अडागम उदात्तः । यङ्लुगन्तयोगादनिघातः । मायिनाम् । मायाशब्दस्य व्रीह्यादिषु पाठात् व्रीह्यादिभ्यश्च (पा० ५-२-११६) इति मत्वर्थीय इनिः । आमिनाः । मीञ् हिंसायाम् क्रयादिकः । मीनातेर्निगमे (पा० ७-३-८१) इति ह्रस्वत्वम् । तादीत्ना । तदानीमित्यस्य पृषोदरादित्वाद्वर्णविपर्ययः । किल । निपातस्यं च (पा० ६-३-१३६) इति दीर्घत्वम् । विवित्से । विद्लृ लाभे । क्रादिनियमात् प्राप्त इट् व्यत्ययेन न भवति ॥

य॑त् ··आ॑त. यत् at the time when. आत् appears by itself or in connection with other words, to show sequence in point of time. It is also used as a cumulative conjunctive, singly or *with* च *or* उत ; *and is used also as an emphatic particle after* an interrogative. In V. 1. 3 it is used with a relative clause to show sequence of time; in V. 30. 7 it is used with an interrogative; in I. 116. 1V and III. 9. 4 along with the emphatic आत् it denotes sequence of time. Here it is a cumulative. उत connects the आत् in (*b*) with the word आत् in (*c*), which is also a cumulative; cf. उत स्वसारा युवती भवन्ती आत् उ ब्रुवाते मिथुनानि नाम III. 54 7 (they are sisters and young maidens and also they bear the names of pairs, i. e. h. and w). मायि॑ नाम् माया॑: प्र॑ अ॑मिना॑:. यत् is

* आदर्शे मायोपेतानामिति पाठः । † आदर्शे स्येति ।

connected with it as with अहन् and hence both these verbs are accented. माया (from मा or मी, cf. अभिमाति I. 25. 14) trick, magic. मी with प्र, cut short, to destroy or overwhelm, to violate, cf. अमिननी दैव्यानि व्रतानि प्रमिननती मनुष्या युगानि (उषा· व्यद्यौत्) I. 124. 2; (मरुतः) सूर्यस्य चक्षुः प्र मिनन्ति वृष्टिभिः; व्रतं प्र मिनीमसि I. 25. 1. With our passage compare: इन्द्रः वृत्रं अवृणोत् शर्धनीतिः प्र मायिनां अमिनात् वर्पनीतिः III. 34, 3 ; मिनन्ता (आश्विना) दस्योः अशिवस्य मायाः I. 117 3 ; also II. 11. 10 ; V. 31. 7 ; 40 6. 8. Other verbs with माया in the acc. are न्यपादयत्, अवाहन्, अप अघुक्षत्, अमृष्णाः, अमुष्णात्, जघ्नथुः विजघन्थः. आ॑त् सू॒र्यं॑ जन॑यन् वा॒म॒ उष॑सम् i. e. recreating the whole world. तादी॑त्ना occurs only here in the ṚV. Sāy.'s meaning of तदानीम् is quite suitable though his etymology is very artificial. It is correlated with यत्. In the context it gives the meaning 'from that time onwards.' The form can be explained as the instru. of तदीत्न (cf. प्रत्न) = तदातन, used as an adv. like सचा or नीचा, the first syllable having been lengthened. विवित्से is pre. sing. from perf. base विद्–विन्दति. The vowels of किल and उषसम् have been lengthened because they are the eighth and tenth syllables; cf. प्राति. 523, एकादशिद्वादशिनोर्लघावष्टममक्षरम्। उदये संहिताकाले, 'In lines of eleven and twelve syllables (i. e. of the त्रिष्टुभ् and जगती) the eighth syllable becomes long when in the Saṁhitā the following syllable (उदय) is short'. and 525, दशमं चैनयोरेवम् (under like circumstances).

Tr.— Since the time when thou didst kill the first-born of the dragons, Indra, and then didst overpower the tricks of the tricksters, at the same time creating the Sun, heaven and Usas, you have not met with an enemy.

Verse 5

अहन्॑ । वृ॒त्रम् । वृ॒त्र॒ऽतर॑म् । व्यं॑सम् । इन्द्रः॑ । वज्रे॑ण । म॒हता॑ ।
अ॑हन् वृ॒त्र॑म् वृ॒त्र॒त॑रम् व्यं॑सम् इ॒न्द्रः॑ व॒ज्रे॑ण म॒हता॑
वधे॑न ॥ स्क॒न्धाँसि॑ऽइव । कु॒लिशे॑न । वि॒ऽवृ॒क्णा । अहिः॑ । शय॑ते ।
वधे॑न स्क॒न्धाँसी॑व कु॒लिशे॑न वि॒ऽवृ॒क्णा अ॒हिः॑ शय॑ते
उप॑ऽपृक् । पृ॒थि॒व्याः ॥ ५ ॥
उप॑ऽपृक पृथि॒व्याः॑

अयमिन्द्रो वज्रेण संपादितो यो महान् वधः तेन वज्रेण वृत्रतरम् अतिशयेन लोकानामावरकमन्धकाररूपम् । यद्वा । वृत्रैरावरणः सर्वान् शत्रूंस्तरति तम् । वृत्रमेतन्नामकमसुरं व्यंसं विगतांसं छिन्नबाहुर्यथा भवति तथा अहन् हतवान् । अंसच्छेद दृष्टान्तः । कुलिशेन कुठारेण विवृक्णा विशेषतः छिन्नानि स्कन्धांसीव । यथा वृक्षस्कन्धाश्छिन्ना भवन्ति तद्वत् । तथा सति अहिर्वृत्रः पृथिव्या उपरि उपपृक् सामीप्येन संपृक्तः शयते शयनं करोति । छिन्नकाष्ठवद्भूमौ पततीत्यर्थः । वृत्रतरम् । वृतु वर्तने स्फायितञ्चि (उ० १३-२) इत्यादिना भावे रक्प्रत्ययान्तो वृत्रशब्दः । वृत्रेणावरणेन सर्वं तरतीति वृत्रतरः । तरतेः पचाद्यच् (पा० ३-१-१३४) परादिश्छन्दसि बहुलम् (पा० ६-२-१९९) इत्युत्तरपदाद्युदात्तत्वम् । तरपि तु व्यत्ययेन । व्यंसम् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरितत्वे उदात्तस्वरितयोर्यणः (पा० ८-२-४) इति स्वरितत्वम् । वधेन । हनश्च वध इति भावे अप् । तत्सन्नियोगेन धातोर्वधादेशः । स चान्तोदात्तः । अन्त्यस्याकारस्य अतो लोपः (पा० ६-४-४८) इति लोपे उदात्तनिवृत्तिस्वरेण प्रत्ययस्योदात्तत्वम् । विवृक्णा । ओव्रश्च् छेदने । कर्मणि निष्ठा । यस्य विभाषा (पा० ७-२-१५) इतीट्प्रतिषेधः । ओदितश्च (पा० ८-२-४५) इति परत्वान्निष्ठानत्वम् । ततो व्रश्च भ्रस्जेति० (पा० ८-२-३६)षत्वे प्राप्ते निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु सिद्धो वक्तव्यः (पा० ८-२-६२) इति नत्वस्य सिद्धत्वेन झल्परत्वाभावात् षत्वं न भवति । कुत्वे तु कर्तव्ये तदसिद्धमेव (पा० ८-२-२१) इति चोः कुः (पा० ८-२-३०) इति कुत्वम् । शेश्छन्दसि बहुलमिति शेर्लोपः । गतिरनन्तर इति गतेः प्रकृतिस्वरत्वम । शयते । बहुलं छन्दसीति शपो लुगभावः । पृथिव्याः । उदात्तयणो हल्पूर्वात् (पा० ६-१-१७४) इति विभक्तेरुदात्तत्वम् ॥

अहन् वृत्रं मं वृत्रतरं विं ऽअसम्. The repetition of अहन् is rhetorical. There is a pun on the word वृत्र, the first being a proper name, the second being an epithet meaning 'fiend', 'enemy'. वृत्रतर the greater enemy; possibly as Macdonell takes it, 'a worse Vrtra'. व्यंसम् is a proper noun. The word occurs altogether in six passages and in five of them it is obviously a proper name, while here on account of the epithet वृत्रतर it must be likewise a proper name. Geldner translate वृत्रतरं व्यंसं as "the *greatest* enemy", but in the Rgveda the poets are scrupulously careful in the use of the comparative degree; cf. क्षेत्रवित्तरः मनुषः (abl.) X 26. 8, अक्ष्णः (abl.) गातुवित्तरा VIII. 25. 9, नक्तं यः सुदर्शतरः दिवातरात् I. 127. 5, अश्वं हि भूरिदावत्तरा वां विजामातुः उत वा घ स्यालात् I. 110. 2, त्वं अग्ने पुरूरवसे सुकृते सुकृत्तरः I. 31. 4 आ यो विवाय...इन्द्राय विष्णुः सुकृते सुकृत्तरः

I. 156. 5. &c. The accent of वृत्रतरम् presents a difficulty, forestalling which Sāy. derives तर from तॄ, which is really ingenious; but there are exceptional cases like पुरुतमं, शश्वत्तमं, बहुकृतरा where the accent is on the termination. Whether वृत्रतर is an adj. of the comp. degree or means 'the vanquisher of वृत्र', it follows necessarily that व्यंस should be a proper name and not an epithet. Again the meaning of व्यंस cannot be 'shoulderless' (See note on I. 25. 4) but 'one having unsymmetrical or deformed shoulders'. वृत्रतरं व्यंसम् is a digression; in *b* the poet returns to the main topic. वज्रेण महता वधेन by that powerful weapon, viz the Vajra (thunderbolt). स्कन्धासीव कुलिशेन विवृक्णा. स्कन्धांसि ramification: the word occurs only here in RV. but occurs in वृक्षस्य स्कन्धः AV. X. 7. 38. कुलिश (*from* रिश्–लिश् ?) *the axe or hatchet; cf.* (वैश्वानरः) धिया रथं न कुलिशः समृण्वति III. 2. 1. विवृक्णा (नि) from व्रश्च cf. यद् अहिं विवृश्चत् III. 33. 7. अहिः शयते उपपृक् पृथिव्याः. उपपृक् (from पृच् with उप) in close contact or embrace with; occurs only here, but the verb उपपृच् occurs in two senses: (i) to add, to multiply वीरेषु वीरान् उप पृङ्धि, II. 24. 15. उप क्षत्रं पृञ्चीत I. 40. 8; (ii) to unite, to copulate cf. उप इदं उपपर्चनं आसु गोषु उप पृच्यताम्. आपृक् occurs in nearly the same sense: (गावः) पृथिव्याः आपृक् अमुया शयन्ते, X, 89. 14. शयते. शी occurs in the RV. with both bases: शे (2A) as well as शय (1U.), the majority of forms being from the former.

Tr. Indra killed Vrtra—and that greater enemy (Vrtra-vanquisher) Vyamsa—with his mighty weapon, the Vajra. Like branches of a tree lopped with an axe, the dragon lies in close contact with the earth.

Veres 6

अयोद्धाऽइव । दुःमदः । आ । हि । जुह्वे । महाऽवीरम् । तुविऽ-
अयोद्धेऽव दुर्मदऽ आ हि जुह्वे महाऽवीरम् तुविऽ-
बाधम् । ऋजीषम् ॥ न । अतारीत् । अस्य । संऽऋतिम् । वधानाम् ।
बाधम् ऋजीषम् न अतारीत् अस्य संऽऋतिम् वधानाम्
सम् । रुजानाः । पिपिषे । इन्द्रऽशत्रुः ॥ ६ ॥
सम् रुजानाः पिपिषे इन्द्रऽशत्रुः

दुर्मदो *दुष्टमदोपेतो दर्पयुक्तो वृत्रः अयोद्धेव योद्धरहित इव इन्द्रमा जुहे हि आहूतवान् खलु । कीदृशमिन्द्रम् । महावीरं गुणैर्महान् भूत्वा शौर्योपेतं तुविबाधं बहूनां बाधकमृजीषं शत्रूणामपार्जकम् । अस्येदृशस्येन्द्रस्य संबन्धिनो ये शत्रुवधाः सन्ति तेषां वधानां समृतिं संगमं नातारीत् । पूर्वोक्तो दुर्मदः तरीतुं नाशक्नोत् । इन्द्रशत्रुः इन्द्रः शत्रुघातको यस्य वृत्रस्य तादृशो वृत्रः इन्द्रेण हतो नदीषु पतितः सन् रुजानाः नदीः संपिपिषे सम्यक् पिष्टवान् । सर्वान् लोकानावृण्वतो वृत्रदेहस्य पातेन नदीनां कूलानि तत्रत्यपाषाणादिकं च चूर्णीभूतमित्यर्थः । अयोद्धाऽइव । न विद्यते योद्धास्येति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वं समासान्तविधेरनित्यत्वात् । (परि० ८४) नपूतश्च (पा० ५-४-१५३) इति कबभावः । जुहे । ह्वेञ् स्पर्धायां शब्दे च । अभ्यस्तस्य च (पा० ६-१-३३) इति संप्रसारणम् । उवङादेशाभावश्छान्दसः । यद्वा छन्दस्युभयथेति सार्वधातुकसंज्ञायां हुश्नुवोः सार्वधातुके (पा० ६-४-८७) इति यणादेशः । अत्र लक्षणप्रतिपदोक्तपरिभाषा (प० १०५) लक्ष्यानुरोधान्नाश्रीयते । इतरथा हि आजुह्वान इत्यादिषु यणादेशो न स्यात् । न चैवं सति सातये हुवे वाम् (ऋ० ६-७-१३) इत्यादावपि तथा स्यादिति वाच्यम् । अनेकाच्त्वाभावात् । अनेकाच इति हि तत्रानुवर्तते । प्रत्ययस्वरेणान्तोदात्तत्वम् । हिचेति निघातप्रतिषेधः । महावीरं महांश्चासौ वीरश्च महावीरः । आन्महतः० (पा० ६-३-४६) इति आत्त्वम् । तुविबाधम् । बाधृ विलोडने । तुवीन् प्रभूतान् बाधते इति तुविबाधः । पचाद्यच् । छन्दुत्तरपदप्रकृतिस्वरत्वम् । सुसृतिम् । तादौ चेति गतेः प्रकृतिस्वरत्वम् । रुजानाः रुजो भङ्गे । रुजन्ति कूलानीति रुजानाः नद्यः रुजाना नद्यो भवन्ति रुजन्ति कूलानि (नि० ६-४) इति यास्कः । व्यत्ययेन शानच् । तुदादिभ्यः शः । नुमभावश्छान्दसः । अदुपदेशालसार्वधातुकानुदात्तत्वे विकरणस्वरः । पिपिषे । पिष्लृ संचूर्णने । व्यत्ययेन लिट् । इन्द्रशत्रुः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ॥

अयोद्धेव दुर्मदः दुर्मदः one under the evil effects of intoxication; cf. दुर्मदासः न सुगवाम् VIII. 2. 12; प्र वेपयन्ति पर्वतान् वि विञ्चन्ति वनस्पतीन् । प्रो आरत मरुतः दुर्मदाः इव देवासः सर्वया विशा I. 39. 5. अयोद्धा may be either a तत्पुरुष or a बहुव्रीहि. According to Pān. VI 2. 161 words ending in तृ and having अ or अन् as first members are optionally accented on the final syllable: otherwise in ordinary तत्पु० compounds the accent is on अ. According to Pān. VI. 2. 172 (नञ्सुभ्याम्) in बहु० compounds with अ (अन्) and सु as first members the accent is as a rule on the final syllable; thus अकेतु, अक्रतु, अगद, अज्येष्ठ, अदत्, अद्युत्, अद्वेष &c; among तत्पु० compounds may be noted अनश्नत्, अकवि, अकुमार, अक्र,

* हर्षयुक्तो इति प्रथमावृत्तौ ।

अ॑क्रीडत्, &c; among तृ ending words by the side of अयोद्ॄ॑ we have अ॑होतृ. The meaning of अयाद्ॄ therefore must be determined, not by considerations of accent, but those of context. The epithet दुर्मद, apparently, is the decisive factor. If अयोद्ॄ meant a real hero he need not be दुर्मद to send out a challenge. It is only an incapable fighter who will send a challenge under the influence of drink, to rue it later on. Sāyana, Bergaigne and Father Zimmermann prefer to take it as a बहु०, Gr., Geld., Wackernagel and Old. as a तत्पु० and the latter interpretation, for the reason stated above, is to be preferred. **तुविबाध॑म्**. तुवि mighty, much or many: it appears in compounds like तुविद्युम्न॑ very wealthy, तुविमन्यु very wrathful, तुविप्रति॑ a match for many, &c. **ऋजीष॑म्** occurs only here and probably is to be understood in the same sense as ऋजीषिन्, one who drinks Soma to the ऋजीष, the lees (or residue at the bottom), according to दुर्ग on निरुक्त 5. 12, this meaning being adopted by Geld. Gr. derives ऋजीषिन् from ऋञ्ज्, but neither his etymology nor his meaning, 'impetuous', is explicable without an intermediate explanation like that offered by दुर्ग. **अतारीत्** from तॄ to cross, used metaphorically; cf. द्विषः अंहांसि दुरिता तरेम, VI. 2. 11; अपो न नावा दुरिता तरेम VI. 68. 8. **वधा नां स॑मृतिम्**. वध a weapon. समृति, from ऋ with सम् to encounter (in battle; cf. समर, अरि &c.) onslaught, (with the geni. of the person or weapon); cf. वीळु (solid) चित् यस्य समृतौ श्रुवत् (has melted away). I. 127. 3. **स॑म् रुजा॑नाः पिपिषे इ॑न्द्रशत्रु**. इ॑न्द्रशत्रु is a बहु०, the accent being on the first member (इन्द्रः शातयिता यस्य). The meaning of रुजानाः hangs on that of पिपिषे, whether it is to be taken as a passive verb or as an active verb; Sāy. takes it as active and Atm, but in all other places where it occurs the root is Parasm.; cf. सं अनः (car) उषमः पिपेष II. 15. 6, वृजनेन वृजिनान् पिपेष III. 34. 6. From the निघण्टु onwards in the Indian tradition the word रुजा॑नाः has been understood as an epithet of the waters or rivers, and therefore as an obj. of पिपिषे (active). This means that the word has presented a difficulty ever since. The root पिष् ill suits an object like अपः or नदीः and

hence European scholars (esp. Bloomfield, Old. and Geld) have offered several ingenious interpertations; according to all these पिपिषे is passive and रुजानाः is an epithet of इन्द्रशत्रु· (वृत्रः). (i) रुजा'नाः acc. to Bl. is from रुजान' + आ'स् (mouth), or रुजान' + ना'स् (nose) by haplology; but there is the difficulty of the accent; the word ought to have been रुजानाः; (ii) Old. derives it from रुजा'[1] (with pain, or through the shattering Vajra—cf. वाज. सं. X. 8) + अन् + आस् or अ + नास्. But here also a difficulty about the accent arises: अनास्, being बहु०, must be accented on the final syllable, the first member being अन्. Old suggests that originally the expression must have been रुजा'नाः, but later on, through obscurity of the sense, one of the accents was dropped. He thinks also that in view of exceptional cases of बहु० like अ'गु, अ'ङ्गास्, अ'ङ्गुत्, अ'प्रजा, अ'भय &c. even अ'नास् is possible. But since अना'स् actually occurs with the accent on the final syll. in V. 29. 10 (अना'सः द्'स्यून् अमृणाः) this rival form proposed cannot be accepted and if we have to fall back on the theory of textual corruption, why introduce a complication by a pedantic splitting of the word into रुजा + अनाः of which the first is definitely obscure and unsuitable in the context? It would be better then to accept Bloomfield's interpretation of it as रुजान' (pass. pre. past. from रुज्) + आ'स् 'whose mouth is being crushed' (iii) Geldner suggests two more interpretations: (a) रु'ज + अनस्, and (b) रु'ज + नास् (from जरु on the analogy of त्रस'दस्यु, रद्(ा) वसु &c.) meaning (a) car-breaker and (b) nose-breaker. No car-breaking appears in the Vrtra legend, and no nose-breaking also, although Geld. thinks that he can derive some hint of it from IV. 18. 9. and I. 32. 12. But the derivation is certainly very ingenious and the first may be accepted provisionally, for want of a better one, as involving the least deviation from the ordinary rules.

Tr. Like an incapable fighter under the influence of drink he indeed challenged to battle the mighty warrior, the overwhelmer of many, the drinker of Soma to the dregs. The on-

slaught of his (Indra's) weapons he could not surmount; that car-breaker (?), that victim of Indra, was completely crushed.

Verse 7

अपात् । अहस्तः । अपृतन्यत् । इन्द्रम् । आ । अस्य । वज्रम् ।
अपा॑त् अहस्त॑ः अपृतन्यत् इ॑न्द्रम् आ अ॑स्य व॑ज्रम्
अधि । सानौ । जघान ॥ वृष्णः । वध्रिः । प्रतिऽमानम् । बुभूषन् ।
अ॑धि सा॑नौ जघान वृ॑ष्णः व॑ध्रिः प्रतिमा॑नम् बु॑भूषन्
पुरुऽत्रा । वृत्रः । अशयत् । विऽअस्तः ॥ ७ ॥
पुरुत्रा॑ वृ॑त्रः अशयत् व्य॑स्तः

अपात् वज्रेण च्छिन्नत्वात्पादरहितः अहस्तः हस्तरहितो वृत्रः इन्द्रमुद्दिश्य अपृतन्यत् । पृतनां युद्धमैच्छत् । द्वेषाधिक्येन बहुधा विद्धोऽपि युद्धं न परित्यक्तवानित्यर्थः । अस्य हस्तपादहीनस्य वृत्रस्य सानौ पर्वतसानुसदृशे प्रौढस्कन्धे * अधि उपरि वज्र जघान इन्द्र आभिमुख्येन प्रक्षिप्तवान् । अशक्तस्यापि युद्धेच्छायां दृष्टान्तः । वध्रिः छिन्नमुष्कः पुरुष· वृष्णो रेतःसेचनसमर्थस्य पुरुषान्तरस्य प्रतिमानं सादृश्यं बुभूषन् प्राप्तुमिच्छन् यथा न शक्नोति तद्वदयमिति शेषः । स वृत्रः पुरुत्रा बहुष्ववयवेषु व्यस्त· विविधं क्षिप्तः ताडित सन् अशयत् भूमौ पतितवान् । अपात् बहुव्रीहौ पादशब्दस्यान्त्यलोपश्छान्दसः । अहस्तः । बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । अपृतन्यत् । सुप आत्मनः क्यच् । कव्यध्वरपृतनस्येत्यन्यलोपः । बुभूषन् । सनिग्रहगुहोश्च (पा० ७-२-१२) इतीट्प्रतिषेध· । पुरुत्रा । देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम् (पा० ५-४-५६) इति सप्तम्यर्थे त्राप्रत्ययः । अशयत् । व्यत्ययेन परस्मैपदम् । बहुलं छन्दसीति शपो लुगभाव· । व्यस्तः । असु क्षेपणे इत्यस्मात् कर्मणि क्तः । यस्य विभाषेतीट्प्रतिषेधः । गतिरनन्तर इति गतेः प्रकृतिस्वरत्वम् । संहितायामुदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वम् ॥

अपा॑त (footless). अपृतन्यत्, denom. from पृतना, battle (पृतनां आत्मन ऐच्छत्). आ॑ अस्य व॑ज्रं अ॑धि सा॑नौ जघान. Which is the subject of आ जघान and with what word is अस्य to be connected? अपृतन्यत् and जघान should have a common subject and अस्य should have to be referred to वज्रम्; from I. 80. 5-6, इन्द्रः वृत्रस्य दोधतः सानुं वज्रेण...जिघ्नते; अधि सानौ नि जिघ्नते वज्रेण &c, it would appear that the

*न्धेऽध्युपरि इत्यादर्शपाठ· ।

सानु is of Vrtra (अस्य) and that Indra smote it with his Vajra. There is on the other hand an indication in 12 that Vrtra smote Indra on his सृक ; the meaning of सृक is sufficiently clear; if it is वज्र, as the Nighantu lists make it out, there will be good authority for taking *b* to mean 'Vrtra smote Indra's (अस्य) Vajra on its peak (or back).' वंध्रि. a castrated bull. प्रतिमानम् an equal in greatness or power : cf. यो विश्वस्य प्रतिमानं बभूव II. 12. 9 ; इन्द्रः दिवः प्रतिमानं पृथिव्याः X. 111. 5 , सतः सतः प्रतिमानं (इन्द्रः) III. 31. 8. बुभूषन् desi. pres. part. from भू. व्यस्तः Scattered, torn to pieces. पुरुत्रा in many places; the termination त्रा occurs in forms like दक्षिणत्रा, अस्मत्रा, मर्त्यत्रा, देवत्रा, पुरुषत्रा, बहुत्रा, सत्रा.

Tr. He fought Indra footless and handless. He smote his Vajra on his (its?) back A castrated bullock wishing to be the equal of a bull, Vrtra lay shattered (to pieces) in many places.

Verse 8

नदम् । न । भिन्नम् । अमुया । शयानम् । मनः । रुहाणाः ।
नद'म न' भिन्न'म अमुया' श'यानम म'नः रु'हाणाः
अति । यन्ति । आपः ॥ याः । चित् । वृत्रः । महिना । परि-
अ'ति यन्ति आ'प या'ः चित वृत्र'ः महिना' पर्य'-
अतिष्ठत् । तासाम् । अहिः । पत्सुतःऽशीः । बभूव ॥ ८ ॥
तिष्ठत ता'साम् अ'हिः पत्सुत'शी'ः बभूव

अमुयामुष्यां पृथिव्यां शयानं पतितं मृतं वृत्रमापो जलानि अति यन्ति अतिक्रम्य गच्छन्ति । तत्र दृष्टान्तः । भिन्नं बहुधा भिन्नकूलं नदं न सिन्धुमिव । यथा वृष्टिकाले प्रभूता आपो नद्याः कूलं भित्त्वातिक्रम्य गच्छन्ति तद्वत् । कीदृश्य आपः । मनो रुहाणाः । नृणां चित्तमारोहन्त्यः । पुरा वृत्रे जीवति सति तेन निरुद्धा मेघस्थिता आपो भूमौ वृष्टा न भवन्ति तदानीं नृणां मनः खिद्यते । मृते तु वृत्रे निरोधरहिता आपो वृत्रशरीरमुल्लङ्घ्य प्रवहन्ति तदा वृष्टिलाभेन तु मनुष्यास्तुष्यन्तीत्यर्थः । तदेतदुत्तरार्धेन स्पष्टीक्रियते । वृत्रो जीवनदशायां महिना स्वकीयेन महिम्ना याश्चित् या एव मेघगता अपः पर्यतिष्ठत् परिवृत्य स्थितवान् । अहिर्वृत्रो मेघः तासामपां पत्सुतःशीः पादस्याधः शयानो बभूव । यद्यप्यपां पादो नास्ति तथाप्यद्रिर्वृत्रस्या-

भलाङ्घितित्वात् पादस्याधः शयनमुपपद्यते । भिन्नम् । रदाभ्यां निष्ठातो न (पा० ८-२-४२) इति नत्वम् । अमुया । सुपां सुलुगिति सप्तम्या याजादेशः । शयानम् । शीङः सर्वधातुके गुणः (पा० ७-४-२१) । धातोर्ङित्त्वाल्लुसार्वधातुकानुदात्तत्वे धातुस्वरः । रुहाणाः । रुह बीजजन्मनि प्रादुर्भावे । व्यत्ययेन शानच् । कर्तरि शपि प्राप्ते व्यत्ययेन शः । अनित्यमागमशासनमिति वचनान्नुमभावः । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे विकरणस्वरे प्राप्ते धातुस्वरः । महिना । मह पूजायाम् सर्वधातुभ्य इन् (उ० ४-११७) इतीन्प्रत्ययः । व्यत्ययेन विभक्तेरुदात्तत्वम् । यद्वा महिना महिम्ना । महच्छब्दस्य पृथ्वादिषु पाठात्तस्य भाव इत्येतस्मिन्नर्थे पृथ्वादिभ्य इमनिज्वा (पा० ५-१-१२२) इति इमनिच् प्रत्ययः । टेरिति टिलोपः । चित इत्यन्तोदात्तत्वम् । तृतीयैकवचने अलोपे सति उदात्तनिवृत्तिस्वरेण तस्योदात्तत्वम् । मकारलोपश्छान्दसः । पत्सुतःशीः । पादस्याधः शेत इति पत्सुतःशीः । क्विन् चेति क्विप् । तमि पहन्नित्यादिना पादशब्दस्य पदादेशः । शस्प्रभृतिष्विति प्रभृतिशब्दः प्रकारवचन इति शलादोषणीत्यत्रापि दोषन्नादेशो भवति (का० ६-१-६३) इत्युक्तत्वात् । मध्ये सु इति शब्दोपजनश्छान्दसः । यद्वा पादशब्दस्य सप्तमीबहुवचने पदादेशे कृत इतराभ्योऽपि दृश्यन्ते (पा० ५-३-१४) इति सप्तम्यर्थे तसिल् । लुगभावश्छान्दसः ॥

अमुया (instr. of अमू, f. of अदस्, used either singly as an adv. or with पापया) in *such* a (hideous or ominous) manner, in *that* (peculiar) manner (belonging to some one); cf. मा मातरं अमुया पत्तवे (पत्तः fall) कः cf IV. 18. 1; शसने न गावः पृथिव्याः आपृक् अमुया शयन्ते X. 89. 14; with पापया cf. I. 29. 5, X. 85. 30, 135. 2. अमुया शयानम् is taken by Geldner here and in X. 89 14 as 'lying just that way, i e. naked, unburied &c, in V. 34 5 as 'in vain, uselessly'. But the one meaning given above suits all passages. नदं न भिन्नं. Pischel's interpretation of नद in Ved. St. I. 183 ff as primarily नड 'reed' and secondarily 'male generative organ' has been with certain reservations rejected by Old. in his Notes on I. 194. 4. In नदस्य नादे X. 11. 2 and नदयोः वित्रनयोः (वित्रन being a constant epithet of horses) X. 105 4, नद् clearly means a bellowing or neighing (bull or horse), and this meaning suits in most contexts. नळ.....भिन्दन्त्यश्मना, AV. VI. 138. 5, where नड and भिद् occur, supports the proposed identification of नद् with नळ, but in our passage the सादृश्य for the simile of a भिन्न नद is his being अमुया शयान, and a broken reed can hardly be described as अमुया शयान. The simile

may be that of a bull hacked āt a butcher's (शसने, cf. X. 89. 14) or of a horse on the battle-field. मनः रुहाणाः. The root रुह् never occurs elsewhere in the Atm. and the plain meaning of the expression, 'mounting the mind' does not yield a satisfactory sense. Various meanings have been given to it: (i) Sāy. 'causing satisfaction to men'; (ii) B. R. 'obtaining (mastery over) their wills'; (iii) Gr., Gaedicke, 'rising as they listed'; (iv) Geld. 'taking heart'; also later, 'obstinate'; 'hardening (रुह्=रुध् and cf. काव्यादर्श 1. 71; बुद्धचरित IV. 24) their hearts', (v) Pischel (ZDMG, 35.<723) would change the Pada reading to मनो उहानाः on account of the parallelism between our passage and VIII. 40. 8, इन्द्राग्न्यो. अनु वतं उहानाः यन्ति सिन्धवः. Old., adopting the emendation, would understand the expression as meaning 'flowing (वह्) for Manu', instead of understanding, with Pisbhel, मनोः as dependent on आपः. The adverbial use of मनः according to (iii) is clearly indefensible; (i) and (ii) are far-fetched; the option, therefore, lies between (iv) and (v). In view of उहानाः यान्ति having occurred once in connection with the waters, and in view of the waters having been mentioned elsewhere as having been released for the benefit of Manu (man, mankind) in I. 52. 8 (जघन्वान्...वृत्रं मनुषे गातुयन् अपः), 165. 8 (अहं एताः मनवे विश्वश्चन्द्राः सुगाः अपः चकर), II. 20. 7 (वि अजनयत् मनवे अपः VI. 29. 1 (इन्द्रः अपः मनवे सस्रुतः कः अहन् अहिं &c.) and V. 31. 6 (जयन् अपः मनवे), (iv) appears to be the best solution to the problem. The change of उहानाः to उहाणाः in the Samhitā finds parallels in गोरोहेण (Pp. गोः ओहेन) I. 180. 5; नृभिर्येमाणः SV II. 1. 1. 19. 3; पाणिभिर्वीयमाणः TS. I. 1. 13 2; निरेणसः AV. II. 10. 8, where the *r* in a preceding word changes the non-initial *n* to *ṇ*. महिना instru,s. from महिमन् m., the penultimate म् being optionally dropped. पत्सुतःशीः contains a double case-ending; तः has been added to पत्सु probably in the same way as the Eng. 'from' in 'from between' or 'from amongst'. पत्सुतः itself occurs in कृष्णा रजांसि पत्सुतः 'in the wake of Agni lies black space' VIII. 43. 6. पत्सुत-शीः (from शी) is like स्योनशीः I. 73. 1.

Tr. While he lay like a bull (?) hacked to pieces in that (hideous) manner, the waters go past him, flowing for mankind's sake. Vṛtra had (once) surrounded them by his might; he lay (now) stretched (from) below their feet.

Verse 9

नीचाऽवयाः । अभवत् । वृत्रऽपुत्रा । इन्द्रः । अस्याः । अव ।

नीचा'वयाः अभवत् वृत्र'पुत्रा इ'न्द्रः अस्याः अ'व

वधः । जभार ॥ उत्ऽतरा । सूः । अधरः । पुत्रः । आसीत् ।

व'धः जभार उ'त्तरा सूः अ'धरः पुत्रः आसीत्

दानुः । शये । सहऽवत्सा । न । धेनुः ॥ ९ ॥

दा'नुः शये सह'वत्सा न धेनुः [वधर्जभार. प्रा. ४५]

वृत्रपुत्रा वृत्रः पुत्रो यस्या मातुः सेयं माता वृत्रपुत्रा नीचावया न्यग्भावं प्राप्ता हताभवत् । पुत्रं प्रहाराद्रक्षितुं पुत्रदेहस्योपरि तिरश्ची पतितवतीत्यर्थः । तदानीमयमिन्द्रोऽस्या मातुरधोभागे वृत्रस्योपरि वधो हननसाधनमायुधं जभार प्रहृतवान् । तदानीं सूः माता उत्तरापरिस्थितासीत् । पुत्रस्याधोभागस्थित आसीत् । सा च दानुर्दानवी वृत्रमाता शये । मृता शयनं कृतवती । तत्र दृष्टान्तः । धेनुर्लोकप्रसिद्धा गौः सह वत्सा न । यथा वत्ससहिता शयनं करोति तद्वत् । नीचावयाः । वेति खादतीति वयो बाहुः । औणादिकोऽसिप्रत्ययः । न्यञ्चौ वयसौ यस्याः सा नीचावयाः । न्यञ्चशब्दादुत्तरस्या विभक्तेः सुपां सुपो भवन्तीति तृतीयैकवचनादेशः । अच इत्यकारलोपे चाविति दीर्घत्वम् । अश्वेश्छन्दस्यसर्वनामस्थानम् (पा० ६-१-१७०) इति तस्योदात्तत्वम् । समासे लुगभावश्छान्दसः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । यद्वा नीचौ निकृष्टौ वयसौ यस्याः सा । पूर्वपदस्य दीर्घश्छान्दसः । वधः । हन्यतेऽनेनेति वधः । असुनि । हन्तेर्वधादेशः । नित्त्वादाद्युदात्तत्वम् । जभार । हृग्रहोर्भ इति भत्वम् । सूः । षूङ् प्राणिगर्भविमोचने । सूते गर्भं विमुञ्चतीति सूर्माता । क्विप् चेति क्विप् । दानुः । दो अवखण्डने । दाभाभ्यां नुः (उ० ३-३२) । शये । लटि लोपस्त आत्मनेपदेषु (पा० ७-१-४१) इति तलोपः । शीङः सार्वधातुक इति गुणेऽयादेशः ॥

नीचा'वयाः (नीचा adv. instru. s. from नि+अञ्च्+वयस् vitality, power) with vitality sinking low. व'धर् n. = वध m., weapon. अव भृ (= हृ) hurl down. सू'ः (from सू to give birth to) mother; it occurs only here in this sense. दा'नुः शये, दानुः m. f. a demon or demoness, only here in the latter sense. शये occurs in about

ten passage as a form of 3 s ; Sāy. has quoted the pertinent rule from Pān. ; cf. (अग्निः) शये शयासु प्रयुत वना अनु III. 55. 4 ; (जाया) परिदाय रसं दुहे I. 105. 2 ; एणी घृतं दुहे X. 12. 3 वृत्र'पुत्रा is a बहु० and is therefore accented on the first member.

Tr. The vital energy of Vrtra's mother was on the decline ; Indra hurled down his weapon at her ; the mother was above, the son below ; the demoness lay like a cow with her calf.

Verse 10

अतिष्ठन्तीनाम् । अनिऽवेशनानाम् । काष्ठानाम् । मध्ये । निऽ-

अ'तिष्ठन्तीनाम् अनिवेशना'नाम् का'ष्ठानाम् म'ध्ये नि'-

हितम् । शरीरम् ॥ वृत्रस्य । निण्यम् । वि । चरन्ति । आपः । दीर्घम् । तमः । आ । अशयत् । इन्द्रऽशत्रुः ॥ १० ॥

हितम् श'रीरम् वृत्र'स्य निण्य'म् वि चरन्ति आ'पः

दी'र्घ'म् त'मः आ' अशयत् इ'न्द्रशत्रुः ।

वृत्रस्य शरीरमापो विचरन्ति *विशेषेण पर्याक्रम्य प्रवहन्ति । कीदृशं शरीरम् । निण्यम् । निर्नामधेयम् अप्सु मग्नत्वेन गूढत्वात्तदीयं नाम न केनापि ज्ञायते । एतदेव स्पष्टीक्रियते । काष्ठानामपां मध्ये निहित निक्षिप्तम् । कीदृशानां काष्ठानाम् । अतिष्ठन्तीनां स्थितिरहितानाम् अनिवेशनानामुपवेशनरहितानाम् । प्रवहणस्वभावत्वादेतासां मनुष्यवन्न क्वापि स्थितिः संभवति । इन्द्रशत्रुः वृत्रो जलमध्ये शरीरे प्रक्षिप्ते सति दीर्घं †दीर्घनिद्रात्मकं मरणं यथा भवति तथा आशयत । सर्वतः पतितवान् । अतिष्ठन्तीनाम् । अव्ययपूर्वप्रकृतिस्वरत्वम् । अनिवेशनानाम् । निविशन्तेऽस्मिन्निति निवेशनं स्थानम् । करणाधिकरणयोश्च (पा० ३-३-११७) इत्यधिकरणे ल्युट् । तद्रहितानां बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । क्रान्त्वा स्थिताः काष्ठाः पृषोदरादि । निहितम् । गतिरनन्तर इति गते प्रकृतिस्वरत्वम् । अत्र यास्कः । अतिष्ठन्तीनामनिविशमानानामित्यस्थावराणां काष्ठानां मध्ये निहितं शरीरं मेघः । शरीरम् । शृणाते शम्नातेर्वा । वृत्रस्य निण्यं निर्णामं विचरन्ति विजानन्ति आप इति । दीर्घं द्राघतेरतमस्तनोतेराशयदाशेतेरिन्द्रशत्रुरिन्द्रोऽस्य शमयिता वा शातयिता वा तस्मादिन्द्रशत्रुः । तत्को वृत्रो मेघ इति नैरुक्तास्त्वाष्ट्रोऽसुर इत्यैतिहासिका (नि० २-१६) इति ॥

*आदर्शे णोपर्या इति पाठः । †दीर्घ इत्यादर्शपाठ ।

अनिवेशनानां काष्ठानां मध्ये. निवेशन n. occurs in four passages, besides here. In निवेशने प्रसवे चासि भूमनः IV. 71. 2 it means 'bringing to rest'; in पुत्रं अप्नुः निवेशनात् आ जभर्थ it means 'the resting place', 'home'; VII. 19. 9 'a place of deposit'; in X. 149. 7 (समुद्रस्य निवेशन) it is probably 'bottom, that on which a thing rests'. अनिवेशन', being a बहु० with अ, is accented on the last syllable. काष्ठा is the race course including the winning post, and hence any track, the river-bed. cf. काष्ठा भिन्दन् ऊर्मिभिः पिन्वमानाः IV. 58. 7; here the stream. वृत्र स्य निण्यं वि चरन्ति. निण्य n.–Yāska explains निण्यं in our passage by निर्णामं, which is explained by Sāy. as निर्नामधेयं 'nameless because concealed', but while Sāy. understands निण्यं as adj. to शरीरं, Yāska apparently understands निर्णामं as a substantive which is the object of विजानन्ति, which is his explanation of विचरन्ति. He obviouly understands it as 'a secret'. It is a problem how that meaning can be derived from निर्णाम. Gr. takes it as 'a secret place' and translates 'removed from' or 'far away from वृ०'. Geld. 'the private parts' and he cites (ताः आपः) बभित्सुवः अप वृत्रात् अतिष्ठन् X. 124. 8. But this epithet बभित्सु of the waters is independent of वृत्र in 9 and must be so in 8 also. It cannot therefore be utilised for fixing the meaning of निण्यम्. In कविर्न निण्यं (साधन) IV. 16. 3, हृदयस्य निण्यम् VII. 33, 9 it means 'something that lies deep'; निण्यानि वचांसि IV. 3. 16 are 'innermost thoughts'. The meaning of विचरन्ति may give further precision to the meaning. In द्यावापृथिवी विचरन्ति तन्यवः; रजांसि चित्रा विचरन्ति तन्यवः V. 63. 2, 5 'moving to and from between' is the sense; in वि मे मनः चरति दूरआधीः, IV. 9. 6 'wandering here and there' it is intransitively used. Here the object of विचरन्ति must be the place where the waters move to and fro. The shyness of the waters mentioned in X, 124 would if at all be a strong reason why निण्यं should not be understood as private parts. 'Hiding place, covert fastness' will be a suitable meaning. इन्द्रशत्रुः is a बहु० as in 6.

Tr. The (dead) body has remained in the midst of river-streams that neither stop nor have a resting place. The waters (now) wander to and fro in the (former) hiding place of Vṛtra. Indra's victim has lain in impenetrable darkness.

Verse 11

दासऽपत्नीः । अहिंऽगोपाः । अतिष्ठन् । निऽरुद्धाः । आपः ।
दास॰पत्नीः अ॰हिगोपाः अतिष्ठन् नि॰रुद्धाः आ॰प॰
पणिनाऽइव । गावः ॥ अपाम् । बिलम् । अपिऽहितम् । यत् ।
पणि॰नेव गा॰व॰ अ॰पाम् बि॰लम् अ॰पिहितम् य॰त्
आसीत् । वृत्रम् । जघन्वान् । अप । तत् । ववार ॥ ११ ॥
आ॰सीत् वृत्र॰म् जघन्वा॰न् अ॰प त॰त् ववार

दासपत्नीः । दासो *विश्वोपक्षयहेतुर्वृत्रः पतिः स्वामी यासामपां ता दासपत्नीः । अत एवाहिगोपाः । अहिर्वृत्रो गोपा रक्षको यासां ता॰ । गोपनं नाम स्वच्छन्देन यथा न प्रवहन्ति तथा निरोधनम् । एतदेव स्पष्टीक्रियते । आपो निरुद्धा अतिष्ठन्निति । तत्र दृष्टान्तः । पणिनेव गाव॰ । पणिनामकोऽसुरो गा अपहृत्य बिले स्थापयित्वा बिलद्वारमाच्छाद्य यथा निरुद्धवांस्तथेत्यर्थः । अपां यद्बिलं प्रवहणद्वारमपिहितं वृत्रेण निरुद्धमासीत तद्बिलं प्रवहणद्वारं वृत्रं जघन्वान् हतवानिन्द्रोऽपववार अपवृतमकरोत् । वृत्रकृतमपां निरोधं पराहितवान् । हतवान् । अत्र यास्कः । दासपत्नीर्दासाधिपत्न्यो दासो दस्यतेरुपदासयति कर्माण्यहिगोपा अतिष्ठन्नहिना गुप्ता॰ । अहिरयनादेत्यन्तरिक्षेऽयमपीतरोऽहिरेतस्मादेव निर्हसितोपसर्ग आहन्तात । निरुद्धा आप॰ पणिनेव गाव॰ । पणिर्वणिग् भवति पणिः पणनाद्वणिक् पण्यं नेनेक्ति । अपां बिलमपिहितं यदासीत । बिलं भरं भवति बिभर्तेर्वुब्जं जघ्निवानप ववार तद्वृत्रो वृणोतेर्वा वर्धतेर्वा यदावृणोत्तद्वृत्रस्य वृत्रत्वमिति विज्ञायते । यदवर्तत तद्वृत्रस्य वृत्रत्वमिति विज्ञायते । यदवर्धत तद्वृत्रस्य वृत्रत्वमिति विज्ञायते (नि॰ २-१७) इति । दासपत्नीः । दसु उपक्षये । दासयतीति दासो वृत्र॰ । पचाद्यच् । चित (१-६-१६३) इत्यन्तोदात्तत्वम् दासः पतिर्यासां विभाषा सपूर्वस्य (पा॰ ४-१-३४) इति ङीप् । तत्सन्नियोगेनेकारस्य नकारः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । यद्वा दासस्य पालयित्र्यः । पत्यावैश्वर्ये (पा॰ ६-२-१८) इति पूर्वपदप्रकृतिस्वरत्वम् । आहिगोपाः । गुपू रक्षणे । गोपायतीति गोपाः । आयादय आर्धधातुके वा (पा॰ ३-१-३१) इत्यायप्रत्ययः । तत॰ क्विप् । अतो लोपः । वेरपृक्तलोपाद्वलि लोपो बलीयानिति पूर्वं यकारलोपः (पा॰ ६-१-६६-६७) । न चाचः परिस्मिन्नित्यतो लोपस्य स्थानिवत्त्वम् । न पदान्तद्विर्वचनेति प्रतिषेधात् । अहिर्गोपा यासाम् । पूर्ववत्स्वरः । निरुद्धा॰ । रुधिरावरणे । झषस्तथोर्धोऽधः (पा॰ ८-२-४०) इति निष्ठातकारस्य धकारः । गतिरनन्तर इति गतेः प्रकृतिस्वरत्वम् । जघन्वान हन्तेर्लिटः कसुः । अभ्यासाच्च (पा॰ ७-३-५५) इत्यभ्यासादुत्तरस्य हकारस्य कुत्वम् । क्रादिनियमप्राप्तस्येटो विभाषा गमहनेत्यादिना (पा॰ ७-२-६८) विकल्पविधानादभावः । संहितायां नकारस्य रुत्वानुनासिकावुक्तौ ॥

*क्षपण इत्यादर्शः ।

दास॰पत्नीः is a बहु॰ and so also अहिगोपाः. पति as the latter member of a compound in the fem becomes पत्नी (Pān. VI. 1. 34) optionally. दास a non-Aryan, also a demon. गोपाः primarily a cowherd; hence a protector or watchman; cf. इन्द्रगोपा॰, वायु॰-गोपाः, सोम॰गोपाः. पणि नेव गा॰वः. पणि, a niggardly, greedy man, is to be distinguished from the mythological Panis who were demons who took away the cows of the gods and pent them up in a cave: cf. X. 108 in this selection. In the singular number the word denotes the chief of the demons; cf. तद् वीर्यं वा यद् पणिं गाः अमुष्णीतम् I. 13. 7; (सोमा) इन्द्रेण युजा पणिमस्तभाद्यत् VI. 44. 22. जघन्वा॰न् perf. part. from हन्. बिलम् occurs only here and in I. 11. 22. (बलस्य बिलम्).

Tr. The waters had remained under restraint, with the Dāsa as their lord and with a dragon as their watchmen, as did the cows under the restraint of the Paṇi chief. (Indra) killed Vṛtra and threw open the shut-up hole where lay the waters.

Verse. 12

अश्व्यः । वारः । अभवः । तत् । इन्द्र । सृके । यत् । त्वा ।
अ॰श्व्यः वा॰रः अभव॰ त॰त् इन्द्र सृ॰के य॰त् त्वा
प्रतिऽअहन् । देवः । एकः ॥ अजयः । गाः । अजयः । शूर ।
प्रति॰अहन् देव॰ ए॰कः अ॰जयः गाः॰ अ॰जयः शूर
सोमम् । अव । असृजः । सर्तवे । सप्त । सिन्धून् ॥ १२ ॥
सो॰मम् अ॰व असृजः स॰र्तवे सप्त॰ सि॰न्धून्

सृके वज्रे । सृको वृक इति वज्रनामसु पठितत्वात् । *युद्धे देवो दीप्यमानः सर्वा-युधकुशलः एको द्वितीयो वृत्रो यद्यदा त्वा त्वां प्रत्यहन्प्रतिकूलत्वेन प्रहृतवान् तत्तदानीं त्वमश्व्यो वारोऽश्वसंबन्धी वालोऽभवः । यथाश्वस्य वालोऽनायासेन मक्षिकादी-न्निवारयति तद्वद्वृत्रमगणयित्वा निराकृतवानित्यर्थः । किं च गाः पणिनापहृतास्त्वमजयः । जितवान् । हे शूर शौर्ययुक्तेन्द्र सोममजयः । जितवान् । तथा च तैत्तिरीयाः त्वष्टा हत-पुत्र इत्यस्मिन्नुपाख्याने समामनन्ति । स यज्ञवेशसं कृत्वा प्रासहा सोममपिबत् (तै॰ सं. २-४-१२) इति । सप्त सिन्धून्—इमं मे गङ्गे (ऋ॰ १०-७५-५) इत्यस्या-

*आदर्शे युद्धे इति नास्ति ।

सूच्याम्नाता गङ्गाद्याः सप्तसंख्याका नदीः । सर्तवे सर्तुं प्रवाहरूपेण गन्तुम् अवासृजः संत्यक्तवान् । वृत्रकृतं प्रवाहनिरोधं निराकृतवानित्यर्थः । अश्व्यः अश्वे भवः । भवे छन्दसीति यत् । यतोनाव इत्याद्युदात्तत्वम् । वारयति दंशमशकादीनिति 'वारः । पचाद्यच् । कपिलकादित्वाल्लुत्वविकल्पः (म० ८-२-१८)। वृषादित्वादाद्युदात्तत्वम् । प्रत्यहन् । यद्वृत्तान्नित्यमिति निघातप्रतिषेधः । तिङि चोदात्तवतीति गतेरनुदात्तत्वम् । अजयः । गा इत्यस्य वाक्यान्तरगतत्वात्तदपेक्षयास्य तिङ्ङतिङः इति निघातो न भवति । समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः (पा० १-१-१८-५) इति वचनात् । सर्तवे । तुमर्थे सेसेनीति (पा. ३. ४. ९.) तवेनप्रत्ययः । नित्त्वादाद्युदात्तत्वम् ॥

सृकं य त् त्वा प्रत्यहन् is paranthetically introduced and देवः एकः is to be connected with *a.* अश्व्यः वारः—वार (from वृ to protect) the tail or the hair of the tail ; cf. द्रोघवीति वारान् II 4. 4 ; the word occurs in the RV only in these two places in this sense ; but it is of frequent occurrence in later literature as बाल. 'You became then a horse's tail' is said metaphorically, for 'you acted quickly in self-defence,' 'you brushed him aside.'. सृक has been used as a synonymous epithet of पवि, a sharp-pointed weapon, in X. 180. 2 सृकं सशाय पविम् ; cf. 7. सर्तवे is an infinitive, of which there is a great variety in the RV. Generally speaking verbal nouns ending in term. zero, or अस् or तु or धि in the acc., da., and geni. were used as infin. : they have been enumerated in Pān. III. 4 9-13. सप्त सिन्धून्. The seven rivers are generally supposed to be the rivers of the Panjab, but it is not clear which rivers are meant ; the number of rivers appears to be a conventional one ; cf. I. 35. 8 ; II. 12 3, 12 , &c. सप्त सिन्धुषु designates a country in VIII. 24. 27.

Tr. When he smote thee on thy sharp-pointed (Vajra), then thou showedst thyself to be a horse's tail (in self-defence), a unique god. Brave one ! thou hast won the kine, thou hast won the Soma ; thou hast released the seven rivers on their course.

Verse 13

न । अस्मै । विद्युत् । न । तन्यतुः । सिसेध । न । याम् ।
न अस्मै विद्युत न तन्यतुः सिसेध न याम्

मिहम् । अकिरत् । ह्रादुनिम् । च ॥ इन्द्रः । च । यत् । युयुधाते
मिहम् अकिरत् ह्रादुनिम् च इन्द्र च यत् युयुधाते
इति । अहिः । च । उत । अपरीभ्यः । मघवा । वि ।
अहिः च उत अपरीभ्यः मघवा वि
जिग्ये ॥ १३ ॥
जिग्ये

इन्द्रं निषेद्धुं वृत्रो यान्विद्युद्वादीन् मायया निर्मितवान् ते सर्वेऽप्येनं निषेद्धुमशक्ताः । सोऽयमर्थोऽनेन मन्त्रेणोच्यते । अस्मै इन्द्रार्थं निर्मिता विद्युन्न सिषेध इन्द्रं न प्राप्नोत् । तथा तन्यतुः गर्जनम् । यां मिहं सेचनं यां वृष्टिमकिरत् वृत्रो विक्षिप्तवान् साऽपि वृष्टिर्न सिषेध । ह्रादुनिं चाशनिमपि यां वृत्रः प्रयुक्तवान् सापि न सिषेध । इन्द्रश्चाहिश्च इन्द्रवृत्रावुभावपि युयुधा युयुधाते युद्धं कृतवन्तौ । तदानीं विद्युदादयो न प्राप्ता इति पूर्वत्रान्वयः । उतापि च मघवा धनवानिन्द्र अपरीभ्यः अपराभ्यः अन्यासामपि वृत्रनिर्मितानां मायानां सकाशाद्विजिग्ये विशेषेण जितवान् । सिषेध । षिधु गत्याम् । मिहम् । मिह सचने । मेहति सिञ्चतीति मिह् (sic) वृष्टिः । क्विप् चेति क्विप् । अकिरत् । कृ विक्षेपे । तुदादिभ्यः शः । कृत इद्धातोरितीत्वम् । अडागम उदात्तः यद्वृत्तयोगादनिघातः । युयुधाते । युध संप्रहारे । लिटि प्रत्ययस्वरः । जिग्ये । सन्लिटोर्जेः (पा० ७-३-५७) इत्यभ्यासादुत्तरस्य जकारस्य कुत्वम् ॥

न अस्मै ससेध There are two roots *sidh*. one with the base सिध्य and another with सेध; the first means 'to succeed', 'to avail' 'to be of help' and is connected with साध्; the other means 'to repel', 'to chase away': for (i) cf. यस्मात् ऋते न सिध्यति यज्ञ. I. 18 7; for (ii) cf. अप दस्यून् असेधः V. 31. 7 सिध्र is the verbal noun from (i), सिध्म from (ii). ससेध from the sense as well as form is certainly from (i). so also सेधिषत् in I 23. 15. To whom does अस्मै refer, to Indra or Vṛtra, and who makes use of thunder and lightning? In I. 52. 6 (निजघन्थ (वृत्रस्य) हन्वो. इन्द्र तन्यतुम्), Indra smites Vrtra with तन्यतु, and he is described as using मिहः again Vrtra in II. 30. 3 (मिहं वसानः) and in X. 73. 5 (उप दस्युं आ अगात् मिहः प्र तस्राः अवपत् तमांसि); but Vrtra also has been mentioned as using thunder and earthquake as weapons (न वेपसा न तन्यता इन्द्रं वृत्रः वि बीभयत् I. 80. 12) and so here also Vrtra

may be supposed to have employed all these weapons. तन्यतुः thunder, also used elsewhere in the sense of the thunderer, or the thundering Vajra. मिंह् (from मिंह्-मिह्, the root in मेघ, to shed water) rain or mist. ह्रादुनि occurs only here and in ह्रादुनीवृत् (brandisher of the ह्रा॰) V. 54. 3, an epithet of the Maruts. ह्रादुनि from the epithet ह्रादुनीवृत् as well as the later words like निह्राद or ह्रादिनी must mean something like thunderbolt, which is Sāy.'s meaning. The meaning 'hailstorm' given by European scholars appears to be wrong. The root कृ (किरति) is used with वसु, अश्वम् &c. in the sense of bestowing lavishly and may be used with ह्रादुनि as it is used मिहः and तमांसि in 8. 73. 5. The word उत in *d* would show that *c* and *d* do not form a continuous sentence; Sāy. is therefore right in connecting *c* with *ab*. अपरीभ्यः मघवा विं जिग्ये अपरी f. pl. is used as a substantive in the sense of 'the days to come': cf. ओ ते यन्ति ये अपरीषु (उषस) पश्यान् I. 113. 11, उत अपरीषु कृणुते सखायम् X. 119. 3, अहं जनिभ्यः अपरीषु पुत्रान् (अजनयम्) X. 183. 3. The dative form here means 'for all time'. मघवा from मंह् to give liberally.

Tr. Neither lightning and thunder, nor mist and thunderbolt that he scattered around availed him, at the time when Indra and the dragon fought together. And the bounteous god won for all time to come.

Verse 14:

अहेः । यातारम् । कम् । अपश्यः । इन्द्र । हृदि । यत् । ते ।
अहेः यातारम् कम् अपश्यः इन्द्र हृदि यत् ते
जघ्नुषः । भीः । अगच्छत् ॥ नवं । च । यत् । नवतिम् । च ।
जघ्नुषः भीः अगच्छत् नवं च यत् नवतिम् च
स्रवन्तीः । श्येनः । न । भीतः । अतरः । रजांसि ॥ १४ ॥
स्रवन्तीः श्येनः न भीतः अतरः रजांसि

हे इन्द्र जघ्नुषो वृत्रं हतवतस्तव हृदि चित्ते यदादि भीरगच्छत् न हतवानस्मिति बुद्ध्या भयं प्राप्नुयात् तर्ह्यहेर्वृत्रस्य यातारं हन्तारं कमपश्यः । त्वत्तोऽन्यं कं पुरुषं दृष्टवानसि तादृशस्य पुरुषान्तरस्याभावान्मा भूत्तव भयमित्यर्थः । यद्यस्मात्कारणात्त्वं नव च नवतिं च स्रवन्ती एकोनशतसंख्याकाः प्रवहन्तीर्नदीः प्राप्य रजांसि तत्रत्यान्युदकान्यतरः । तीर्णवानसि । तत्र दृष्टान्तः । श्येनो न । श्येननामको बलवान् पक्षीव । दूरगमनात्तव भयमासीदिति गम्यते । तद्भय मा भूदित्यभिप्रायः । तच्च दूरगमनं ब्राह्मणे समाम्नातम् । इन्द्रो वै वृत्रं हत्वा नास्तृषीति मन्यमानः पराः परावतोऽगच्छत् (ऐ० ब्रा० ३-१५) इति तैत्तिरीयाश्चामनन्ति—इन्द्रो वृत्रं हत्वा परां परावतमगच्छदपराधामिति मन्यमानः (तै० ब्रा० १-६-७-४) इति । हृदि । पद्दन्नित्यादिना हृदयशब्दस्य हृदादेशः । ऊडिदमित्यादिना विभक्तेरुदात्तत्वम् । जघ्नुषः । हन्तेर्लिटः क्वसुः । षष्ठ्येकवचने वसोः संप्रसारणमिति संप्रसारणपरपूर्वत्वे । शासिवसिघसीनां चेति षत्वम् । न च षत्वतुकोरसिद्धः (पा० ६-१-८६) इति एकादेशस्यासिद्धत्वात् षत्वं न प्राप्नुयादिति वाच्यम् । संप्रसारणङीट्सु प्रातिपदिकेषु वक्तव्य (का० ६-१-८६-१) इति असिद्धवद्भावस्य प्रतिषिद्धत्वात् । गमहनेत्यादिना (पा० ६-४-९८) उपधालोपः । नचासिद्धवदत्राभात् (पा० ६-४-२२) इति संप्रसारणस्यासिद्धवद्भावः । भिन्नाश्रयत्वात् । संप्रसारणं हि षष्ठ्येकवचने उपधालोपस्तु वसाविति भिन्नाश्रयत्वम् । स्रवन्तीः । स्रु गतौ । शप्श्यनोर्नित्यम् (पा० ७-१-८१) इति नुमागमः । शपः पित्त्वादनुदात्तत्वम् । शतुश्च लसार्वधातुकस्वरेणाद्युदात्तत्वम् । अतरः । यद्वृत्तयोगाद्निघातः ॥

अ हेः यातारं कम् अपश्यः इन्द्र The word यातृ occurs only here and in a context in which the normal sense is unsuitable. For the meaning of 'avenger' of BR, and Gr. the analogy of ऋणया, ऋणयावन्, is quoted, but या in the context there gives the meaning of following, not of avenging. Sāy.'s 'killer' is unsuitable. One wonders if the word might not have some connection with the later यातृ, husband's brother's wife; 'follower' might be the original meaning from which this later meaning is derived. The Brāhmana stories quoted by Sāy. embody later speculations about the legend that forms the background of the rc and therefore cannot help us much; but obviously the story was current in the poet's days that Indra ran over a large distance after killing Vrtra जघ्नुषः gen. s. cf जघ्निवस् pref. part. from हन्, न व च नवतिं च. The number 99 is a favourite with the Vedic poets, eleven objects, e g. पुरः, बाहून्, भोगान्, वृत्राणि &c., have been mentioned

as numbering 99. स्रवन्तीः (pres. part. f. of स्रु to flow) is used only here as a noun in the sense of a river; स्रवत् f. appears seven times in the same sense: cf. समुद्रं न स्रवतः आ विशन्ति III 46. 4, सप्त स्रवतः VII 67 8. श्येनः न भीतः अन्तरः रजांसि. The श्येन (from श्येत rosy white) is the king of birds: cf. श्येनो गृध्राणाम् IX. 96. 6; Gr. takes it to be either the falcon or the eagle; but it is most probably the former. श्येन and सुपर्ण have been distinguished in II 42. 2 (मा त्वा श्येनः उत् वधीत् मा सुपर्णः; सुपर्ण, on the other hand, appears to be the name of the श्येन who brought Soma in his talons to the earth from heaven across the aerial regions. The word भीतः is not a part of the simile; for the श्येन is, if at all, a paragon of impetuosity and thus only it is an epithet of Indra (X. 99, 1), and of the Maruts (X. 92. 6); the real point of comparison is the crossing of long distances across the aerial regions (रजांसि) and in this respect the श्येन referred to is *the* श्येन, the bringer of Soma from the heavens, cf. VIII 82. 9 (यं ते श्येनः पदा आभरत् तिरो रजांसि), X. 77. 2 (यं दिवः परि श्येनः मथायत् तिरः रजः) and X. 144. 4 (यं सुपर्णः परावतः श्येनस्य पुत्रः आ भरत्). The fear of Indra from the Ai. Br. appears to have been that Vrtra might not be dead, in the Taitt. Br. that it was a sin to have killed him.

Tr. What avenger (follower?) of the dragon didst thou see, Indra, that after having killed him fear overtook thee, that in thy fright thou crossedst nine and ninety rivers, and the aerial regions like the Falcon (of yore)?

Verse 15

इन्द्रः । यातः । अवऽसितस्य । राजा । शमस्य । च । शृङ्गिणः ।
इन्द्रः यातः अवऽसितस्य राजा शमस्य च शृङ्गिणः
वज्रऽबाहुः ॥ सः । इत् । ऊँ इति । राजा । क्षयति । चर्षणीनाम् ।
वज्रऽबाहुः सः इत उ राजा क्षयति चर्षणीनाम्
अरान् । न । नेमिः । परि । ता । बभूव ॥ १५ ॥
अरान् न नेमिः परि ता बभूव [* यातोऽव * सेत्]

वज्रबाहुरिन्द्रः शत्रौ हते सति निःसपत्नो भूत्वा यातो गच्छतो जङ्गमस्या-वसितस्य एकत्रैव स्थितस्य स्थावरस्य शमस्य शान्तस्य शृङ्गराहित्येन प्रहरणादाव-प्रवृत्तस्याश्वगर्दभादेः शृङ्गिणः शृङ्गोपेतस्यौग्रस्य महिषबलीवर्दादेश्च राजाभूत्। सेदु स एवेन्द्रश्चर्षणीनां मनुष्याणां राजा भूत्वा क्षयति निवसति। ता तानि पूर्वोक्तानि जङ्गमादीनि सर्वाणि परिबभूव व्याप्तवान्। तत्र दृष्टान्तः। अरान्न नेमिः। यथा रथ-चक्रस्य परितो वर्तमाना नेमिरराख्याभौ कीलितान्काष्ठविशेषान्व्याप्नोति तद्वत्। यातः। या प्रापणे। याति गच्छतीति यात्। लटः शतृ सावेकाच इति विभक्तेरुदा-त्तत्वम्। स.। सोऽचि लोपे चेदिति (पा० ६-१-१३४) संहितायां सोर्लोपः। ता। शेश्छन्दसि बहुलमिति शेर्लोपः। बभूव। भवतेर्लिटो णलि भवतेरः (पा० ७-४-७३) इत्यभ्यासस्यात्वम्। कृताकृतप्रसङ्गितया वुगागमस्य नित्यत्वाद्वृद्धेः पूर्वं वुगागमः। यद्वा। इन्धिभवतिभ्यां च (पा० १-२-६) इति लिटः किस्वाद्वृद्ध्यभावः। न चासिद्धवदत्रा भादिति (पा० ६-४--२२) तस्यासिद्धत्वादुवङादेश शङ्कनीयः। वुग्वुटावुवङ्यणोः सिद्धौ भवतः (पा० ६-४-२२-१४) इति तस्य सिद्धत्वात्। तिङ्ङतिङः इति निघातः॥

यातः अवसितस्य. यात् (या) is a moving thing and अवसित (from सा-सो with अव to be unyoked, to take rest) is a thing at rest; cf. अवसान a resting place; अवसा rest. The same sense of contrast is expressed by जगत् स्था II 29. 4 &c; with this rc cp. इन्द्रं परे अवरे मध्यमासः इन्द्रं यान्त अवसितासः इन्द्रं इन्द्रम्। क्षियन्तः उत युद्धमानाः इन्द्र नरः वाजयन्तः हवन्ते IV. 25 8 शमस्य च शृङ्गिणः The word शम 'quiet' 'passive' occurs here and in I 33 15, which is by the same rsi. The explanation शान्त given by Sāy. appears to be justified by the context here as well in I. 33. 15 where शम वृषभं occurs by way of contrast to निम्नेन वृषभेण 13. It is not to be derived from शम् (शशमते or शमायते) but from शम्-शाम्यति which does not occur in the RV, but probably is to be seen in श (योः). The irregular samdhi of स:+ vowel is mentioned by the ऋक्प्रा. at 172–3; there are altogther twenty-seven passages where it occurs, e g. सोपमा I. 31. 15, सास्मै II. 17. 6; 18. 2, सोत II. 24. 1 &c The इत् is emphatic. क्षयति from क्षि; to dwell; or rule over, governs the geni. चर्षणीनाम्; cf. राय क्षयति I. 51. 14; अमृतस्य क्षयथः I. 112. 3; रयीणां क्षयत् X. 106. 7. चर्षणीनाम्. वृष् to be active and कृष् to till are cognate roots from which we get चर्षणि and कृष्टि, which have both the same sense of 'an agricultural settlement' 'a tribe'

'a people.' The ṛṣis constantly refer to the five tribes of the Aryans. अरान् न नेमिः. The simile of the spokes and the rim recurs in I. 141. 9 (अरान् न नेमि. परिभूः अजायथाः); V. 13. 6 (नेमिः अरान् इव परिभूः): also II 5. 3 (नेमिः चक्रमिव परि अवत). परि ता बभूव. परि + भू to envelope, to surround (with protection); cf. विश्वतः परिभूः आसि I. 99. 6; (ते) परिभुवः परि भवन्ति विश्वतः I. 164. 36; विश्वा जातानि परि ते बभूव X. 121. 10. ता(=तानि) refers to all the things mentioned in *abc*. The Samdhi यातोऽव० falls under प्रातिः rule 139.

Tr. Indra is king of what moves and what stays, of what is passive and is armed with horns. He alone as king rules over the peoples; he encompasses these all (with his protection) as does the rim the spokes.

No. 3

MANDALA I SŪKTA 48

The hymn belongs to the sixth group of hymns in Mandala I, that of प्रस्कण्व of the कण्व family, consisting of seven hymns. The metre of this hymn is the बार्हत प्रगाथ, which is a composite stanza of eight lines, the first four constituting a बृहती stanza (8, 8, 12, 8) and the second a सतोबृहती (12, 8, 12, 8).

सह वामेनेति षोडशर्चं पञ्चमं सूक्तम्। प्रस्कण्व ऋषिः। बार्हतत्वादयुजो बृहत्यो युजः सतोबृहत्यः। उषा देवता। सह षोळशोपस्यं त्वित्यनुक्रमणिका। प्रातरनुवाक उपस्ये क्रतौ बार्हते छन्दसीदं सूक्तम्। अथोषस्य इति खण्डे सूत्रितम्। प्रत्यु अदर्शि सह वामेनेति बार्हतमिति। तथाश्विनशस्त्रेऽप्येतत्सूक्तम् (आ० ४-१४)। प्रातरनुवाकन्यायेन (आ० ६-५) इत्यातिदिष्टत्वात्॥

Verse 1

सह । वामेन । नः । उषः । वि । उच्छ । दुहितः । दिवः ॥
सह वामेन नः उषः वि उच्छ दुहितः दिवः
सह । द्युम्नेन । बृहता । विभावरि । राया । देवि । दास्वती ॥१॥
सह द्युम्नेन बृहता विभावरि राया देवि दास्वती

हे दुहितर्दिवो द्युदेवतायाः पुत्रि उष उषःकालदेवते नोऽस्मदर्थं वामेन धनेन सह व्युच्छ प्रभातं कुरु । हे विभावर्युषोदेवते बृहता प्रभूतेन द्युम्नेनान्नेन सह व्युच्छ । हे देवि त्वं दास्वती दानयुक्ता सती राया पशुलक्षणेन धनेन सह व्युच्छ । उच्छ उच्छी विवास । दुहितर्दिवः । सुबामन्त्रिते पराङ्गवत्स्वर इत्यत्र परमपि छन्दसि (पा० २-१-२-६) इति वचनाद्दिव इत्यस्य पूर्वाङ्गवद्भावे सत्यामन्त्रितस्य चेति षष्ठ्यामन्त्रितसमुदायस्याद्यष्टमिके सर्वानुदात्तत्वम् । बृहता । बृहन्महतोरुपसंख्यानमिति विभक्तेरुदात्तत्वम् । विभावरि । भा दीप्तौ । आतो मनिन्क्वनिब्वनिप् । वनो-रचेति ङीप् । तत्संनियोगेन नकारस्य रेफादेशः । संबुद्धो ह्रस्वत्वम् । दास्वती । दुदाञ् दाने । भावे असुन् प्रत्ययः । *दाः दानमस्या अस्तीति दास्वती । मादुपधाया इति मतुपो वत्वम् । उगितश्चेति ङीप् ॥

वामं॑ न सह॑ वि॑ उच्छ. वाम (from वन् to seek, long for) adj. dear, lovely; n. wealth; cf. II. 38. 10; IV. 30. 24; VII. 71. 2 उच्छ is derived by European scholars from वस् to shine, from उच्छ् by Pān.; but उच्छ् has no forms for the perfect and aorist bases and apparently forms like उवास, ऊष, ऊषिवस् अवस्वन्, उवास presuppose a root वस् which gives exactly the same sense as the root in forms like उच्छ, उच्छति. As in the case of सवितृ the poets always make punning references to the root-meaning of उषस् and in I. 48. 3; 113. 10, 13, the forms व्यूषुः, उवास, are contrasted with व्युच्छान्, व्युच्छात्. The European grammarians are therefore right in assuming a common root वस् (with a weak base उच्छ्) in all these forms. दुहितर् दिवः. Single or compound epithets of nouns in the the voc. case are also unaccented. द्युम्ने॑न (from द्यु॒ to shine) also gives the sense of wealth, but of wealth characterised by splendour, also glory. राया॑ (रै, रयि, from रा to give) also means wealth, which comes out of gifts. In IV. 2. 7, रयिः has been personified and given the epithet दास्वान्. Geld. translates वाम as 'good luck' and द्युम्न as 'lustre', but has himself observed in a foot-note that the prayer for Daksinā permeates the entire hymn. The poet is consciously distinguishing the different terms for wealth as representing different aspects of it. दास्वती (f. of दास् gift + वत्); cf. दक्षाय्य. य. दास्वते II. 4. 3, (अयं)

*तदस्यास्ति । पा० ५-२-९४ इत्यादर्शः ।

वज्रः टाखते, X. 4. 2. विभावरि. From roots ending in आ poss. adjectives are formed by the addition of the terms. मन् and वन्; e. g. सुदामन्, सुधीवन्, भूरिदावन्, घृतपावन्, and the fem. of °वन् is °वरी. विभावरी, shining, brilliant.

Tr. Shine on us with riches, Dawn, daughter of heaven, with great wealth, and, bounteous as you are, shining goddess, with bounty.

Verse 2

अश्वऽवतीः । गोऽमतीः । विश्वऽसुविदः । भूरिं । च्यवन्त । वस्तवे ॥

अ॑श्ववतीः गो॑मतीः विश्वसुवि॑दः भू॑रि च्यवन्त व॑स्तवे

उत् । ईरय । प्रति । मा । सूनृताः । उषः । चोद । राधः ।

उ॑त ईरय प्र॑ति मा सूनृ॑ताः उषः॑ चो॑द रा॑धः

मघोनाम् ॥ २ ॥

मघो॑नाम्

अश्वावतीर्बहुश्वोपेता गोमतीर्बहुभिर्गोभिर्युक्ता विश्वसुविदः कृत्स्नस्य धनस्य सुष्टु लम्भयित्र्य उषोदेवता वस्तवे प्रजानां निवासाय भूरि प्रभूतं यथा भवति तथा च्यवन्त प्रयताः । हे उषोदेवते मा प्रति मामुद्दिश्य सूनृताः प्रियाहितवाच उदीरय ब्रूहि । मघोनां धनवतां संबन्धि राधो धनं चोद । अस्मदर्थं प्रेरय । अश्वावतीः । मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ (पा० ६-३-१३१) इति पूर्वपदस्य दीर्घत्वम् । वा छन्दसीति । पूर्वसवर्णदीर्घनिषेधस्य पाक्षिकस्योक्तेः पूर्वसवर्णदीर्घत्वम् । च्यवन्त । च्युङ् गतौ । लङि बहुलं छन्दस्यनाङ्योगेऽपीत्यडभावः । वस्तवे । वस निवासे । तुमर्थे सेसेनिति तवेन्प्रत्ययः । नित्वादाद्युदात्तत्वम् । ईरय । ईर गतौ कम्पने च । हेतुमति णिच् । चोद । चुद संचोदने चौरादिकः । लोटि छन्दस्युभयथा (पा० ३. ४. ११७) इति । शप आर्धधातुकत्वात् णेरनिटीति णिलोपः । शपः पित्त्वादनुदात्तत्वे धातुस्वरः । पादादित्वान्निघाताभावः । मघोनाम् । षष्ठीबहुवचने श्वयुवमघोनामतद्धितेः (पा० ६-४-१३३) इति संप्रसारणम् ॥

अ॑श्ववतीः (nom. pl., adj. to उषस॰). The lengthening of श comes under प्रातिः 548, where it is stated that अश्व as the first member of a compound has its final lengthened, when य and व follow, the exceptions being अश्वित् IX. 61. 3, अश्वत् coming at the end of a

pāda (cf. गोमत अश्ववत् VII. 46 5), अश्वयूपाय, अश्वयुज- and अश्वयोगाः. **विश्व-सुविदः** (विश्वस्य सुविदः) has the accent on विद्, and therefore it is not a बहु°; सु is an उपसर्ग as in सुकृत्, सुकृत्वन्, सुग, सुनर, सुनर्मन्; there is another word सुविदत्र which is an exact equivalent of सुविद्; विश्वविद् itself occurs (=विश्वं विन्दति, cf. IX. 28. 3; 64. 7; 86. 29 &c.); other complex verbal nouns with विश्व as first member exist, e. g. विश्वा-युपोषस्, विश्वायुवेदस् (from आयु + पुष्, विद्); सु is similarly inserted in दंसुपत्नी- IV. 19. 7 and देवसुमतिम् X. 98. 5; and therefore there is no need to derive the form, as Bloomfield and Geld. do, from *विश्व-वसुविदः by haplology. The dawns are here mentioned as many: the past ones have been mentioned in *ab*; the one in sight is adderssed in *cd*; cf. (This dawn) परायतीना अनु एति पाथः आयतीना प्रथमा शश्वतीनाम् I. 113. 8; also ईयुः ते ये पूर्वतरम् अपश्यन्. ...ओ ते यन्ति ये अपरीषु पश्यान् 11. अश्वावतीः, गोमतीः are forms of nom. pl.: the same expression occurs in I. 123. 12 and VII 41. 7. **भूरि च्यवन्त वस्तवे.** भूरि (from भू or बहु? cf. उपरि) 'much': in some places 'often'. (अ)च्यवन्त from च्यु (1), P to set in motion; (2) reflex. A to set oneself in motion, to exert oneself, or (3) pass. A. to be set in motion; for (1) cf. यानि च्यवं, ईशे (अहमिन्द्र) एषाम् I. 165. 10; for (2) cf. अग्निः सोम- वरुणः ते च्यवन्ते X. 124 4; for (3) उत च्यवन्ते अच्युता, I. 162. 8. also अच्युतच्युत् II. 12. 9; (2) fits in our passage. वस्तवे inf. from वस् to shine; see on सनवे I. 32. 12. **सूनृताः उ त ईरय.** ईर् with उत् occurs altogether in 26 places; Gr. gives ten different meanings to it; there are two broad divisions under which the passages fall, ईर् with उत् (i) II. A to go forth, to rise up; (ii) caus. P. set in motion, activity &c., to utter, to raise up; cf. उत् ईर्ध्व अत पतिवती X. 85. 21: उत् ईर्ध्वम् I. 113. 16, उत् उ ब्रह्माणि ऐरत VIII. 23. 1; उत् ईरता सूनृताः उत पुरधीः I. 123. 6; आस्रिया वाचं उदीरयन्ति (मरुतः) I. 168. 8; वचोविदं वाचं उदीरयन्तीम् VIII. 111. 16; उत वाचं ईरयति हिन्वते IX. 72. 1; चोदयतं सूनृता-, पिन्वत धियः, उत् पुरन्धीः ईरयतम् X. 30. 2. सूनृता (f. of सूनृत identical in sense and derivation with सूनर meaning 'handsome, lovely') The derivation and adj sense is lost sight of in the substantive meaning acquired by the word, the beautiful one, viz. beautiful speech or दक्षिणा although the adj sense is to be found in expressions like सूनृते उष, सूनृताना गिराम्, सूनृता मघानि. From I. 123. 6 and X.

39. 2, quoted above, and IX. 97 36; VIII 79. 1. X. 55. 13, 14; IV. 50, 11; VII. 64 5; VII. 67. 5; VII. 97. 9, where वाक्, धी, पुरंधि, or सूनृता occur together, it has been held by Gr. that पुरंधि stands for the हवि and सूनृता in these passages for दक्षिणा, which together with धी (the hymn) form the essentials of sacrifice. Geld. takes पुरंधि as दक्षिणा and सूनृता as (i) दक्षिणा or (ii) an auspicious hymn of praise, or both together with a *double entendre*. The former interpretation is preferable. The word here in a hymn of wealth should certainly give the idea of दक्षिणा and the words प्रति मा, like अस्मद्यक् (सूनृताः ईरयन्ती) VII. 79. 5, are decisive. चोद राधः मघोनाम्. मघोनाम् from gen pl. of मघवन् (मंह्), which becomes मघोन् before vowel termi. beginning from acc. pl. There is another base मघवत् from which only four forms are met with: मघवान्, मघवद्-भि -भ्य, मघवत्सु. मघं means gift and मघवा a liberal giver; cf. II. 27. 17 मघोनः भूरिदाव्नः. राध (cf. Avestan rādans) (1) gift; (2) generosity, favour; for (1) cf दाता राधः स्तुवते काम्य वसु II. 22. 3; for (2) तव राधः सोमपीथाय हर्षते 3. 51. 7; मादयस्व सुते सचा शवसे शूर राधसे I. 81. 7, नहि नु ते महिमनः...विघ्न न राधसोराधसः VI. 27. 3. The second meaning suits our passage. चुद 1 P. A to impel something; to urge a person, cf. इन्द्र राधसे पीतय चोदयामि VIII 68. 7; मघोनाम् राधः चोद VII. 96 2. चोद is accented because it comes in the beginning of a sentence, the vocative not counting.

Tr. Rich in horses and cattle, excellent obtainers of every (blessing), they (dawns in the past) have exerted themselves much to bring light. Send on gifts to me, Dawn; whet the liberality of givers.

Verse 3

उवासं । उषाः । उच्छात् । च । नु । देवी । जीरा । रथानाम् ।
उवा॑स॒ उषा॑ उ॒च्छा॑त् च॒ नु॑ देवी॑ जी॒रा॑ र॒थाना॑न्
ये । अस्याः । आऽचरणेषु । दध्रिरे । समुद्रे । न । श्रवस्यवः ॥३
ये॑ अ॒स्याः॑ आऽच॑रणेषु॒ द॒ध्रि॒रे॒ स॒मु॒द्रे॑ न॑ श्रव॑स्य॒वः॑

उषा देव्युवास । पुरा निवासमकरोत् । प्रभातं कृतवतीत्यर्थः । च नु अद्याप्युच्छात् । व्युच्छति । प्रभातं करोति । कीदृशी देवी । रथानां जीरा प्रेरयित्री । उषःकाले हि रथाः प्रेर्यन्ते । अस्या उषस आचरणेष्वागमनेषु ये रथा दध्रिरे धृताः सज्जीकृता भवन्ति । तेषां रथानामिति पूर्वत्रान्वयः । रथप्रेरणे दृष्टान्तः । अवस्यवो धनकामाः समुद्रे न । यथा समुद्रमध्ये नावः सज्जीकृत्य प्रेरयन्ति तद्वत् । उवास । वस निवासे । णलि लित्यभ्यासस्योभयेषाम् (पा० ६-१-१७) इत्यभ्यासस्य संप्रसारणम् । लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वम् । उच्छात् । लेट्याडागमः । इतश्च लोप इतीकारलोपः । तुदादित्वाच्छप्रत्ययः । आगमानुदात्तत्वे प्रत्ययस्वरः । उषा इत्यस्य वाक्यान्तरगतत्वात्तदपेक्षयास्य निघातो न भवति । समानवाक्ये निघातशुष्मदस्मदादेशा वक्तव्या-(पा० ८-१-१८-५) इति वचनात् । जीरा । जु इति गत्यर्थः सौत्रो धातुः । जोरी च (उ० २-२३) इति रक् प्रत्ययः । अस्याः । इदमोऽन्वादेश इत्यशादेशोऽनुदात्तः । विभक्तिरपि सुप्त्वादनुदात्तेति सर्वानुदात्तत्वम् । आचरणेषु । चर गत्यर्थः । ल्युट् च (पा० ३-३-११५) इति भावे ल्युट् । लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वम् । दध्रिरे । धृङ् अवस्थाने । लिटः कित्त्वादनुणाभावे यणादेशः । चित्त्वादन्तोदात्तत्वम् । यच्छब्दयोगादनिघातः । अवस्यवः । श्रूयत इति श्रवो धनम् । असुन् । तदात्मन इच्छन्तीति अवस्यवः । सुप आत्मनः क्यच् । क्याच्छन्दसीत्युप्रत्ययः ॥

उवा'स उषा' उच्छा'त् च नु' Mark the pun on the root-meaning of उवस्. उवास (in the past), नु (now); उच्छात् subj. 3 s. र'थानाम् जीरा'. जीर (from जि-जिन्व to quicken; cf. अजिर, इषिर, स्थिर) (1) impetuous (2) inciting to activity. It is used only here in sense (2). आ'चरणेषु from आ (= अर्वाक् this side) + चरण (going: cf. सूर्यस्य चरणम् III. 5. 5; नंदीना चरणे X. 39. 9) in-coming, arrival. ये' समुद्रे' न' अवस्य'वः दध्रिरे. अवस्यु (from desid. base अवस्य from अवस् [अु] glory, fame) bent on fame, ambitious. From this derivative meaning it has acquired other senses: (i) to compete for victory in a race; cf. अवस्यं अश्व I. 117. 9, अर्वन्तः न अवस्यवः IX. 10. 1: अवस्यवः वाजं चकानाः II. 31. 7 (ii) to race; इयेनाः इव अवस्यतः V. 46 13; वयो न अवस्यवः II. 31. 1: (iii) to seek or win a victory or prize in a race or competition, to seek or win in competition with others; cf. अस्य रथः अवस्यात् V. 37. 3; (इधिक्रावा) इषः अवस्यात्, IV. 40. 2; इन्द्र यत् चित्रं अवस्याः (may you win) अनु द्यून् II. 13. 13. The sense of glory having been suppressed in the secondary senses, Old. is, it appears, wrong in supposing the rivers in I. 125. 4 as seeking

glory (श्रवस्यवः); they are described there as racing. श्रवस्यवः in our passage also is probably to be understood as meaning 'racers' or 'racing' (boats). The रथाः are by implication श्रवस्यवः, but श्रवस्यवः being the principal word in the simile cannot be understood as an epithet of ये (रथाः), as Geld. appears to suggest. दधिरे pass. perf. 3 pl. from धृ to hold, to support. धृ is used matephorically in various ways: मनो दधार, X. 60. 8; विश्वः यस्य व्रते जनः दाधार (every one holds himself-abides-by his (laws) IX. 35. 6; इन्द्रः देवेषु चित् महि त्यजः (spear) धारयाते (subj.- may hold in readiness) X. 144. 6; there is no exact parallel for our passage, but the meaning of दधिरे from the context may be 'are held in readiness' (*Geld.*), '*follow their paths*' (*Gr.*), or better, making the passage conform to IX 35. 6, 'are restrained or regulated'. The simile clause will read when expanded: यथा श्रवस्यवः अस्याः आचरणेषु समुद्रे दधिरे तथा.

Tr. Usas has dawned before and may the goddess dawn now and quicken our chariots, which, like racing (boats or sailors) on the sea, regulate themselves by her coming.

Verse 4

उषः । ये । ते । प्र । यामेषु । युञ्जते । मनः । दानाय । सूरयः ॥
उषः ये ते प्र यामेषु युञ्जते मनः दानाय सूरयः
अत्र । अह । तत् । कण्वः । एषाम् । कण्वतमः । नाम ।
अत्र अह तत् कण्वः एषाम् कण्वतमः नाम
गृणाति । नृणाम् ॥ ४ ॥
गृणाति नृणाम्

हे उषस्ते तव यामेषु गमनेषु सत्सु ये सूरयो विद्वांसो दानाभिज्ञा दानाय धनादिदानार्थं मनः स्वकीयं प्रयुञ्जते प्रेरयन्ति। दानशीला उदाराः प्रभवः प्रातःकाले दातुमिच्छन्तीत्यर्थः। एषां दातुमिच्छतां नृणां तन्नाम दानविषये लोकप्रसिद्धं नाम कण्वतमोऽतिशयेन मेधावी कण्वो महर्षिरत्राह। अत्रैवोषःकाले गृणाति। उच्चारयति। यो दातुमिच्छति यश्च नामग्रहणेन दातारं प्रशंसति तावुभावप्युषःकाल एव तथा कुरुत इत्युषसः स्तुतिः। गृणाति। गॄ शब्दे। क्रैयादिकः। ष्वादीनां ह्रस्वः (पा०

७-३-८०) इति ह्रस्वत्वम् । नृणाम् । नामि नृ च (पा० ६-४-६) इति दीर्घप्रतिषेधः । नृ चान्यतरस्याम् (पा० ६-१-१८४) इति विभक्तेरुदात्तत्वम् ॥

ते यामंषु यामः coming (from या; cf. क्षेम, भाम, यक्ष्म, शुष्म, सोम, स्तोम); cf. चित्रो वः यामः (मरुतः) I. 166. 4; (इन्द्रस्य अश्वौ) यामेषु शोभेते IV. 32. 23. सूरयः. सूरिः (from सू? स्वर्-सूर्') is a constant epithet of the gods and also denotes the 'patron' of the Vedic poet; 'our patron' he is called (नः I. 73. 5; अस्माकास. I. 97. 3), he is contrasted with the poet (वयं ते स्याम सूरयः गृणन्तः IV. 29. 5); he is of noble birth (सुजातासः V. 6. 2); he is a liberal giver (ददतः I. 73. 5); a man may be rich and may pose as a Sūri, another who is a real Suri may not give himself airs (असुन्वन् सूरि. चित् ओहते I. 176. 4; अन्यः न इत् सूरिः ओहते भूरिदावत्तरो जनः VIII. 5. 31). दाना य मंनः प्र युञ्जते. (प्र) युज् to yoke; hence (meta.), apply oneself or something for something; cf. मनः उत युञ्जते धियः V. 81. 1; धियः युनजते VII. 27. 1; ब्रह्म युजे X. 13. 1. अंत्र अंह तंत्. अंह is used with all classes of words including prepositions, the negative and comparative particle न, and other emphatic particles like इत् or घ. तत् is an adv. meaning 'then' (राजा मे वीर तन्वः तत् आसीः X. 95. 5); 'therefore' (अद्या तत् उच्छ गृणते मघोनि I. 113. 17) and as a narrative particle with a somewhat undefined sense; cf. I. 116. 2. अत्र here or now. कंण्व. कंण्वतमः The superlative degree is used with nouns in RV; cf. मातृतमा most motherly, वृत्रतरम् a greater Vrtra. The poet's name is given as प्रस्कण्व in the सर्वानुक्रमणी. नामं गृणाति is idiomatic (cf. नाम गृणीमसि II. 33. 8; X. 84. 5) from गृ to praise. एषाम् cannot be ordinarily expected to come after ये; तेषाम् would have been better; and between ये and एषाम् one does not expect तत् (therefore); तत् cannot well be regarded as an adj. to नाम, because the sense of the sentence is complete without it Here is then one of the numerous instances of anacoluthon in the RV. As regards relative clauses formally left incomplete see on I. 25. 7.

Tr. There are patrons (of priestly singers) who at thy approach apply their minds to the giving of bounty; for this just now Kanva, excellent scion of the Kaṇvas, glorifies their name.

Verse 5

आ । घ । योषाऽइव । सूनरी । उषाः । याति । प्रऽभुञ्जती ॥
आ घ योषेव सूनरी उषाः याति प्रभुञ्जती
जरयन्ती । वृजनम् । पद्वत् । ईयते । उत् । पातयति ।
जरयन्ती वृजनम् पद्वत् ईयते उत् पातयति
पक्षिणः ॥ ५ ॥
पक्षिणः

उषा देवी प्रभुञ्जती प्रकर्षेण सर्वं पालयन्त्यायाति । घ प्रतिदिनमागच्छति खलु । तत्र दृष्टान्तः । सूनरी सुष्ठु गृहकृत्यस्य नेत्री योषेव गृहिणीव । कीदृश्युषाः । वृजनं गमनशीलं जङ्गमं प्राणिजातं जरयन्ती जरां प्रापयन्ती । असकृदुषस्यावृत्तायां वयोहान्या प्राणिनो जीर्णा भवन्ति । किं च उषःकाले पद्वत् पादयुक्तं प्राणिजातमीयते । निद्रां परित्यज्य स्वस्वकृत्यार्थं गच्छति । किं च इयमुषाः पक्षिण उत्पातयति पक्षिणो हयुषः-काले समुत्थाय तत्र तत्र व्रजन्ति । घ । ऋचि तुनुघेत्यादिना (पा०६-३-१३३) संहितायां दीर्घः । सुष्ठु नयतीति सूनरी । नृ नय । अच इतीप्रत्ययः । गतिसमासे कृद्ग्रहणे गति-कारकपूर्वस्यापि ग्रहणम् (परि० २८) इति वचनात्कृदिकारादक्तिनः (पा० ४-१-४५) इति ङीष् । परादिश्छन्दसि बहुलमित्युत्तरपदाद्युदात्तत्वम् । निपातस्य चेति पूर्वपदस्य दीर्घः । प्रभुञ्जती । भुज पालनाभ्यवहारयोः । लटः शतृ । रुधादित्वाच्छ्नम । श्नसो-रल्लोप इत्यकारलोपः । उगितश्चेति ङीप् । शतुरनुन इति नद्या उदात्तत्वम् । वृजनम् । वृजी वर्जने । वर्ज्यत इति वृजनं प्राणिजातम् । कृपृवृजिमन्दिनिधाञ्भ्यः क्युः (उ० २-८१) इति क्युप्रत्ययः । किच्चाल्लुप्तधगुणाभावः । योरनादेशे प्रत्ययस्वरः । पद्वत् । पत् पादः तदस्यास्तीति पद्वत् । झय इति मतुपो वत्वम् । व्यत्ययेन मतुप उदात्तत्वम् । न च स्वरविधौ व्यञ्जनमविद्यमानवत् (प० ६९) इति व्यञ्जनस्याविद्य-मानवत्त्वे सति ह्रस्वनुड्भ्यां मतुबिति (पा०६-१-१७६) मतुप उदात्तत्वमिति वाच्यम् । ह्रस्वादित्येव सिद्धे पुनर्नुड्ग्रहणसामर्थ्यादेषा परिभाषा नाश्रीयत इति वृत्तावुक्तम् (का० ६-१-१७६) । इतरथा हि मरुत्वानित्यत्रापि मतुप उदात्तत्वं स्यात् ॥

घ is an enclitic particle like ह, with which it is cognate. अ ह is more emphatic and accented. घ as a rule appears with a lengthened vowel as घा; cf. प्रा. 502 and पा. VI. 3. 133, the exceptions being I. 112. 19 and X. 25. 10; ह is probably a later form and as a rule has no lengthened final, the exceptions being IV. 31. 5 and V. 41. 7. यो'षेव सून'री. सूनर (cf. सूनृत, classical

सुन्दर) lovely. योषा is (i) a young lady, married or unmarried; or (ii) a mistress, the complement of जार (lover); cf. (i) तं ते मात्रा परि योषा जनित्री (असिञ्चत्) III. 48. 2 ; पीप्यानाऽइव योषा III. 33. 10 ; (ii) मर्यो न योषा अभ्येति पश्चात् I. 115. 2 ; योषा जारमिव प्रियम् IX. 32. 5. **प्रभुञ्जती'.** प्रभुज् to rejoice (also to enjoy); cf. येन जनाः उभये भुञ्जते विश. II. 24. 10. **पद्वंत् वृंजनम् जरंयन्ती ईयते.** There are three different जॄ-जॄः (i) जॄ-गॄ to sing ; cf. एषः स्यः कारुः जरते VII. 68. 9 ; (ii) जॄ-गॄ (cf. जागृ) to wake up, to enliven ; to wake up to activity : cf. सं जागृवद्भिः जरमाणः इध्यते X. 91. 1 ; (iii) जॄ to decay, to become old. Causal verbal forms occur from none of them ; Causal pre. part. जरयत् (m. and f.) occurs seven times. In II. 9. 2 (अजुर्यः जरयन्), IX. 16. 1 (अजुर्य जरयन्तम्), I. 92. 10 (आयुः जरयन्ती) and in I. 199. 1 where जरिमा immediately follows and indicates the sense of जरयन्ती, the meaning is absolutely clear from the context ; it is (iii). In the case of our passage Old. has approved of Geld.'s suggestion that the word should be understood to convey a '*double entendre*' and combine senses (ii) and (iii), but in his translation Geld. drops (iii). Of the remaining, VII. 75. 5 gives no clue to the real meaning, but in I, 124. 10, where Usas is being addressed for blessings the epithet जारयन्ती (Pp. जरयन्ती) must be complimentary like the preceding सुनृते and it should yield sense (ii). In our passage, likewise, on account of the antithesis between पद्वत् वृजनं, on the one hand, and पक्षिणः, on the other (cf. X. 127. 5), there should be a correspondence in sense between जरयन्ती and पातयति and जरयन्ती should therefore denote sense (ii). पद्वत् वृजनम् reminds one of the poetical पद्वत् अवसं (the four-legged nourishment = the Cow) I. 140. 9 ; X. 169. 1 ; cf. also पद्वन्तः ग्रामासः as opposed to पक्षिणः X. 127. 5 ; द्विपद् refers to men; चतुष्पद् to cattle and apparently पद्वत् will include both human beings and animals, but excludes birds. वृजन with the accent on the first syllable occurs only here ; everywhere else it is वृजंन. One does not know if the accent makes a difference here, but ordinarily it does ; the word वृजंन would require a detailed examination (See on I. 184. 6) ; here it is ultimately the context

which must determine the meaning, and it appears to be 'group, totality'. ईयते from ईं 2, 4 A to go quickly; cf. IV. 7. 8 दूतः ईयसे (of Agni); the speed of उषस् is referred to in VII. 75. 4 (अपाद् एति प्रथमा पद्वतीनाम्); VI. 59. 6 (अपाद् इयं पूर्वा अगात् पद्वतीनाम्); also I. 152. 3 (पञ्च क्षितीः परि सद्यः जिगाति). पातयति. पत् always means 'to fly' in the RV; cf. पतत्र, पत्त्र, पत्मन् &c.

Tr. Rejoicing, Usas comes like a beautiful young lady; she moves swiftly, waking to activity the entire pedestrian population; she makes the birds fly.

Verse 6

वि । या । सृजति । समनम् । वि । अर्थिनः । पदम् । न ।
वि॑ या॑ सृज॑ति स॑मनम् वि॑ अर्थि॑नः प॒द॑म् न॑
वेति । ओदती ॥ वयः । नकिः । ते । पप्तिऽवांसः । आसते ।
वेति ओ॑दती व॑यः न॑किः॑ ते प॑प्तिवां॑सः आसते
विऽउष्टौ । वाजिनीऽवति ॥ ६ ॥
व्यु॑ष्टौ वाजिनीवति [*व्य ; **नकिष्टे]

या देवता समनं समीचीनचेष्टावन्तं पुरुषं विसृजति प्रेरयति। गृहारामादिचेष्टाकुशलान्पुरुषानुषःकालः शयनादुत्थाप्य स्वस्वव्यापारे प्रेरयतीति प्रसिद्धम्। किं च। उषा अर्थिनो याचकान् विसृजति। तेऽप्युषःकाले समुत्थाय स्वकीयदातृगृहे गच्छन्ति। ओदत्युषोदेवता पदं स्थानं न वेति। न कामयते। उषःकालः शीघ्रं गच्छतीत्यर्थः। हे वाजिनीवत्युषोदेवते ते व्युष्टौ त्वदीये प्रभातकाले पप्तिवांसः पतनयुक्ता वयः पक्षिणः नकिरासते। न तिष्ठन्ति। किन्तु स्वस्वनीडाद्विनिर्गत्य गच्छन्तीत्यर्थः। सृजति। सृज विसर्गे। तुदादित्वाच्छः। तस्य ङित्त्वाल्लघूपधगुणाभावः। प्रत्ययस्य पित्त्वादनुदात्तत्वे विकरणस्वरः। यङ्लुत्तयोगादनिघातः। ओदती। उन्दी क्लेदने। उनत्ति सर्वं नीहारेणेत्योदत्युषाः। शतरि व्यत्ययेन शप्। व्यत्ययेनानुनासिकलोपे लघूपधगुणः। उगितश्च (पा० ४-१-६) इति ङीप्। आगमानुशासनस्यानित्यत्वान्नुमभावः। शपः पित्त्वादनुदात्तत्वम्। शतुरनुदात्तत्वे धातुस्वरेणाद्युदात्तत्वम्। नच शतुरनुमः (पा०६-१-१७३) इति नद्या उदात्तत्वम्। अन्तोदात्ताच्छतुः परस्यास्तद्विधानात्। नाकिष्टे। युष्मत्तत्ततक्षुष्वन्तःपादम् (पा० ८-३ १०३) इति षत्वम्। पप्तिवांसः पत्लृ गतौ। लिटः क्वसुः। क्रादिनियमात् प्राप्त इट् वस्वेकाजाद्धसामिति (पा० ७-२-६७) नियमान्न प्राप्नोति तत्क्रियते। सर्वविधीनां छन्दसि विकल्पितत्वात्।

तनिपत्योश्छन्दसि (पा० ६-४-९९) इत्युपधालोपः । द्विर्वचनेचीति स्थानिवद्भावाद् द्विर्भावः । प्रत्ययस्वरः । वाजिनीवति । वाजोऽन्नमस्या अस्तीति वाजिनी क्रिया । मत्वर्थीय इनिः । ऋन्नेभ्यः (पा० ४-१-५) इति ङीप् । तादृशी क्रिया यस्याः सा । तदस्यास्तीति मतुप् । संज्ञायामिति मतुपो वत्वम् ॥

वि॑ या॑ सृज॑ति स॑मनम्. For the clause with या cf. I. 25. 7. In only this passage Gr. understood the word as 'traffic' (adopted by Peterson) in his Dict, but he abandoned the meaning in his translation. समन means 'meeting', or 'encounter' in the following senses: (i) a concourse of men, a festive gathering: cf. बह्वृता समने X. 55. 5; सम् अमुवः (unmarried girls) न समनेषु अञ्जन् (decked out); (ii) a rendez-vous; cf आचरन्ती समना इव योषा, VI. 75. 4; (iii) battle; cf. नः समने पर्षथः X. 143. 4; here it gives sense (i). वि॑ आर्थि॑नः (सृजति). सृज् with वि (primarily) to let flow; (hence,) to set in activity; cf. अति वि सृज स्पश IV. 4. 3; अमर्तं विसृजानः VII. 28. 2. अर्थिन् is derived from अर्थ n. which means 'day's work'; cf. कत् वः अर्थ गन्त I. 38. 2; अर्थ इत्यै I. 113. 6: 124. 1; अर्थिन् one having a day's work to do; cf. अर्थ इत् वै उ अर्थिनः आ जाया युवते पतिम् I. 105. 2, विश्वस्य अर्थिन. सखा पूषा X 26 8; the falcons returning home are spoken of as अर्थिनः इनासः X 127. 5 पद॑म् न॑ वेति ओ॑दती. पदं वी to follow in the footsteps of; cf. पदं देवस्य नमसा व्यन्त VI. 1. 4; पदवीः कवीनाम् III. 5. 1; पदं नी to give the lead; cf. धीरासः कवय पदं नयान्ति I. 146. 4. ओदती has been derived by Sāy. and European scholars from उद् 7 P. but उद् never occurs as a root of the first conj. and even then the pre part. f. without penultimate न् is surprising The word occurs once more and that is in VIII. 69. 2, where, as Pischel rightly points out (Ved. St. I 195f), it forms an antithesis to योयुवतीनाम् (rejecting). Pischel, as is usual with him, finds an indecent meaning in ओदती, deriving it from उद्, but it is possible to understand ओदती there as well as in our passage as meaning 'wistful, full of longing'; the root may be ओद् 6 P. (or उद्, 1 P. but not the same as उद्-उनत्ति.) The न is to be connected, not with पदं, but with ओदती or even वेति, which turns the expression into something like an उत्प्रेक्षा; cf. आ इत् उ निम्नं न रीयते I. 30. 2; यवं न वित्वेषि VII. 3. 4; विद्वान् पदस्य गुह्या न वोचत् VII. 7. 87; मरुत्वन्तं न वृजसे VIII. 76. 1; वृषा क्रीळन्तं मिमते न

गावः IX. 97. 9. पादु॰ अस्य निर्णिजः न मुच्यते X. 27. 24 &c. Cf. I. 116. 1. चित् also is used to give the sense of an उत्प्रेक्षा; cf. परशुं चित् वि तपति शिम्बलं चित् विवृश्चति III. 53. 22. In this sense न generally precedes the predicate. This is only a conjectural interpretation; scholars have differed among themselves about the interpretation of the passages with न, quoted above; nobody, however, has suggested this meaning for न. पत्निवां सः, perf. part. from पत् to fly. नकिः is a substantive, rather a pronoun, from न, it has no forms of declension except नकीम्, which is used as an adv. in the sense of 'never'; from मा similarly we have माकिः and माकीम्. द्युष्टौ (from वि+वस्); द्यु has the जात्य स्वरित् which is due to the अनुदात्त being superimposed on an उदात्त, the वि having the उदात्त and उ having the अनुदात्त. वाजिनिवति. वाजिनी occurs only twice in III. 6. 1 and IV. 61. 1, as an epithet of घृताची (the sacri. ladle) and सरस्वती; it appears in derivatives like वाजिनीवती (epithet of उषस्, घृताची, सरस्वती &c.), वाजिनीवत् (epithet of इन्द्र, अश्व &c) or वाजिनीवसु, an epithet of इन्द्र and अश्विनौ. The word वाजिनी in these latter words must be understood as an adj, used as a substantive, meaning दक्षिणा, and वाजिनीवत् ultimately gives the same sense as वाजवत् or वाजिन्. वाज m. the booty, prize of the race, and hence दक्षिणा, because war-words are always transferred to the sacrifice : acc. to Geld. वाजिनीवत्=वाजी except in X. 75. 8.

The क्षैप्र Samdhi of वि॰ + अर्थि नः involves a coalescence of उदात्त with the following अनुदात्त; the result is an independent स्वरित, but, this being immediately followed by an उदात्त, there is a sudden return from the स्वरित pitch to the अनुदात्त, called कम्प. नकिः + ते becomes नकिष्टे, i. e. the विसर्ग is changed to ष् and the following त् to ट्; the change (नति) has been noted at प्रा॰ 351-352, which says that नकि. followed by a monosyllabic word and तनूषु undergoes नति; cf. VIII. 31. 17 (नकिष्टे), 20. 12 (नकिष्टनूषु).

Tr. (It is she) who starts the festive party and sends the worker (to his day's work); she follows the footsteps (of the Sun), as it were, because of eagerness. No bird who has flown rests at thy bursting forth into day, O goddess rich in gifts.

Verse. 7

एषा । अयुक्त । पराऽवतः । सूर्यस्य । उत्ऽअयनात् अधि ।
एषा अयुक्त परावतः सूर्यस्य उत्ऽअयनात् अधि
शतम् । रथेभिः । सुऽभगा । उषाः । इयम् । वि । याति । अभि ।
शतम रथेभिः सुऽभगा उषाः इयम् वि याति अभि
मानुषान् ॥ ७ ॥
मानुषान

एषोषा देवी शतमयुक्त । स्वकीयानां रथानां शतं योजितवती । सुभगा सौभाग्ययुक्तेयमुषा परावतो दूरस्थात् सूर्यस्योदयनादधि सूर्योदयस्थानादधिकादद्युलोकान्मानुषानभि मनुष्यानुद्दिश्य रथेभिः शतसंख्याकैर्युक्तै रथैर्वि याति विशेषेण गच्छति । अयुक्त । लुङि झलो झलि (पा० ८-२-२६) इति सिचो लोपः । उदयनात् । उदेत्यत्रेत्युदयनम् । इण् गतौ । अधिकरणे ल्युट् । कृदुत्तरपदप्रकृतिस्वरत्वम् । सुभगा । शोभनो भगो यस्याः सा । आद्युदात्तं द्व्यचश्छन्दसि (पा०४-३-१५०) इत्युत्तरपदाद्युदात्तत्वम् । मानुषान् । मनोः पुत्रा मानुषाः मनोर्जातावञ्यतौ षुक् च (पा०४-१-१६१) इत्यञ् षुगागमश्च त्रिस्वादाद्युदात्तत्वम् ॥

परावतः अयुक्त. Feminine nouns are formed from some upasargas and अर्व in the sense of regions; e. g. परावत् far-off regions: अवावत् near regions; so also प्रवत् (slope), उद्वत् (highland), निवत् (lowland), संवत् (plain). युज्, primarily, to harness the horses to the chariot; cf. एषा गोभिः युजाना; hence, to come on chariot; cf. एषा स्या युञ्जाना पराकात् VII. 75. 4. सूर्यस्य उद यनात् अधि. अधि governs the abl. in the sense of 'departing from', 'from', 'born of', 'better than'; cf. दिवः रोचनात् अधि (आ गहि) I. 6. 9; हर्म्येभ्यः आधि VII. 76. 2; विराजः अधि पूरुष. (जातः) X. 90. 5; इद अग्ने सुधितं दुर्धितात् अधि I. 140. 11. शतम् रथेभिः, शतं should have been शतेन, but usage has sanctioned the ungrammatical construction; cf. शतं with केतेभिः III. 60. 7; ऊतिभिः IV. 31. 3; IX. 52. 5; पूर्भिः VI. 48. 8; VII. 3. 7. वि याति. या with वि to go over, to go across: cf. पर्वतान् वि ययुः VIII. 7. 23; द्रुहः वि याहि III. 31. 19; वि पर्वतान् अयातम् I. 116. 20.

Tr. She comes on chariot from remote regions, from the place where the Sun rises. On a hundred chariots this lovely Uṣas goes over (the distance) towards men.

Verse 8

विश्वम् । अस्याः । ननाम । चक्षसे । जगत् । ज्योतिः । कृणोति ।
विश्वम अस्याः ननाम चक्षसे जगत् ज्योतिः कृणोति
सूनरी ॥ अप । द्वेषः । मघोनी । दुहिता । दिवः । उषाः ।
सूनरी अप द्वेषः मघोनी दुहिता दिवः उषाः
उच्छत् । अपः । स्रिधः ॥ ८ ॥
उच्छत अप स्रिधः

विश्वं सर्वं जगत् जङ्गमं प्राणिजातमस्या उषसश्चक्षसे प्रकाशाय ननाम । प्रह्वीभवति । रात्रौ तमसि निमग्नाः सर्वे जनास्तान्निवारयित्रीमुषसमुपलभ्य नमस्कुर्वन्तीत्यर्थः । कुतः । यस्मादेषा सूनरी सुष्ठु नेत्री अभिमतफलस्य प्रापयित्र्युषाः ज्योतिष्कृणोति सर्वं प्रकाशयति । किंच मघोनी मघवती धनवती दिवो दुहिता द्युलोकसकाशादुत्पन्नैषा द्वेषो द्वेष्टॄनपोच्छत् अपवर्जयति । तथा स्रिधः शोषयितॄनपोच्छत् । अपवर्जयति । तस्मादिष्टप्राप्त्यनिष्टपरिहारहेतुभूतामुषोदेवतां विश्वं जगन्नमस्करोतीत्यर्थः । अस्याः । इदमोऽन्वादेश० (पा० २-४-३२) इत्यशादेशोनुदात्तः । विभक्तिश्च सुप्त्वादनुदात्तेति सर्वानुदात्तत्वम् । ननाम । संहितायामन्येषामपि दृश्यते (पा० ६-३-१३५) इत्यभ्यासस्य दीर्घत्वम् । तुजादित्वे हि तूतुजान इत्यादाविव पदकालेऽपि दीर्घः श्रूयते । ज्योतिः । इणः षः (पा० ८-३-३९) इत्यनुवृत्ताविसुसोः सामर्थ्ये (पा० ८-३-४४) इति विसर्जनीयस्य षत्वम् । द्वेषः । द्विष् अप्रीतौ । अन्येभ्योऽपि दृश्यन्ते (पा० ३-२-७६) इति विच् । लघूपधगुणः । मघोनी । मघं वनति संभजत इति मघोनी । श्वन्नुक्षन्नित्यादिना (उ० १-१५७) मघवञ्शब्दः कनिन्प्रत्ययान्तो निपातितः । स्त्रियामृन्नेभ्यो ङीबिति ङीप् । भसंज्ञायां श्वयुवमघोनामतद्धित (पा० ६-४-१३३) इति संप्रसारणम् । उच्छत् । उच्छी विवासे विवासो वर्जनम् । छन्दसि लुङ्लङ्लिटः (पा० ३-४-६) इति वर्तमाने लङ् । बहुलं छन्दस्यमाङ्योगेऽपीत्यडागमाभावः । स्रिध । स्रिधु शोषणे । क्विप् चेति क्विप् ॥

अस्याः चक्षसे जगत् ननाम. चक्षस् (चक्ष् ; cf. चक्षुः) n. (i) eye; glances ; cf. येन चक्षसा त्वं पश्यसि I. 50: 6 ; पश्यन् मन्ये मनसा चक्षसा, X. 130: 9 ; अस्य चक्षसा पारिपाति उक्षा IX. 93. 3. (ii) light : cf. योषा जारस्य चक्षसा

विभाति (of उषस्) I. 92 11; वि यत् आवः चक्षसा सूर्यस्य I. 113. 9. जगत् (from गा) the movable, animate world, often contrasted with the immovable, inanimate world (स्थातृ, तस्थिवस्, स्थाः) cf. सूर्यः आत्मा जगतः तस्थुषः च I. 115. 1; स्थातुः च सत्यं जगतः च धर्माणि I. 195. 3; जगतः स्थातुः उभयस्य यः वशी (सविता) III. 53. 6. नानाम acc. to प्रा० 583. ज्योतिः कृणोति सूनरी. The pāda is repeated in VII. 81. 1. कृणोति from कृ (orig. स्कृ. cf. सस्कृ, परिष्कृ; 8 P. only in two places, which are prob. late, 5 P. elsewhere); अप द्वेषः उच्छत् अप स्निधः (उच्छत्). A distinction has been made here between द्वेषस् (from द्विष्) and स्निध् स्निध् is understood by Gr. as synonymous with द्विष् because the SV reads पुनानो घनन्नप द्विषः for RV. II. 27. 1, पुनानो घनन् अप स्निधः, while he takes the root स्निध् to mean 'to fail'. Geld. understands स्निध् f. also as 'failure', 'disappointment'. The root स्निध् is understood in this sense because it occurs in negative expressions like (अश्मभिः अव्यथिभिः) अस्रिधानैः पतत्रिभिः VII. 69. 7; (शिवेभिः तरणिभिः) अस्रिधाद्भिः पायुभिः VIII. 60. 8 and it has been taken to be synonymous with प्रयुच्छ्, which appears in similar contexts (cf. अप्रयुच्छद्भिः पायुभिः I. 143. 8); but a stronger and more positive meaning is required for the word in contexts like अस्रेधन्तः इतन वाज अच्छ III. 29. 9; न स जीयते मरुतः न हन्यते न स्रेधति न व्यथते न रिष्यति... ऋषिं वा यं राजानं सुषूदथ (invest with office) V. 54. 7; cf. VII. 69. 7 above; निर्निर्वासा अति स्निधः I. 36 7. ईयिवांस अति स्निधः III. 9. 7 &c. स्निध् app. means 'to be hindered' and the noun means 'hindrance' or 'hinderer'; cf. मा यज्ञः स्निधत् VII. 34. 17; मा स्रेधत सोमिनः VII. 32. 9; विराजासि अति स्निधः III. 10. 7. अस्रेधत् is an epithet of मरुतः, उषाः &c. Verbal nouns like द्वेषस्, स्निध्, अराति, अभिमाति give the sense of both abstract and concrete nouns, preferably the latter.

Tr. All things that move have bowed before her light; the lovely one makes light. May Usas, the beautiful daughter of heaven, shine away enemies and obstuctors.

Verse 9

उषः । आ । भाहि । भानुना । चन्द्रेण । दुहितः । दिवः ॥

उ॑षः आ॑ भाहि॑ भानु॑ना॑ चन्द्रे॑ण॑ दुहि॑तः॑ दिवः॑

आऽवहन्ती । भूरि । अस्मभ्यम् । सौभगम् । व्युऽउच्छन्ती ।

आव॑हन्ती भू॑रि अस्म॑भ्यम् सौ॑भगम् व्युच्छ॑न्ती

दिविष्टिषु ॥ ९ ॥

दि॑विष्टिषु

हे दिवो दुहितर्द्युलोकस्य पुत्रि उष उषोदेवते चन्द्रेण सर्वेषामाह्लादकेन भानुना प्रकाशेन आ समन्तात् भाहि । प्रकाशस्व । किं कुर्वती । दिविष्टिषु दिवसेषु भूरि प्रभूतं सौभगं सौभाग्यमस्मभ्यमावहन्ती संपादयन्ती । तथा व्युच्छन्ती तमांसि वर्जयन्ती । उषः । षाष्ठिकमामन्त्रिताद्युदात्तत्वम् । दुहितर्दिवः । परमपि च्छन्दसीति दिव इत्यस्य परस्य षष्ठ्यन्तस्य पूर्वामन्त्रिताङ्गवद्भावे सति षष्ठ्यामन्त्रितसमुदायस्याष्टमिकं सर्वानुदात्तत्वम् । आवहन्ती । ङ्योष्यादेशौ पित्त्वादनुदात्तौ । शतुश्चादुपदेशाल्लसार्वधातुकस्वरेणानुदात्तत्वम् । धातुस्वरः शिष्यते । समासे कृदुत्तरपदप्रकृतिस्वरत्वम् । भूरि । भवति न विनश्यतीति भूरि अदिशदिभूशुभिभ्य क्रिन् (उ० ४-६५) इति क्रिन् । नित्त्वादाद्युदात्तत्वम् । सुभगस्य भावः सौभगम् । सुभगात्मन्त्रे (पा० ५-१-१२९) इत्युत्राव्रादिषु पाठादञ्प्रत्ययः । हृद्भगसिन्ध्वन्ते पूर्वपदस्य च (पा० ७-३-१९) इत्युभयपदवृद्धौ प्राप्तायां सर्वे विधयश्छन्दसि विकल्पयन्त इति वचनादत्रोत्तरपदवृद्धिर्न भवति इति वृत्तावुक्तम् (का० ७-३-१९) । व्युच्छन्ती । उच्छी विवासे । विवासो वर्जनं तौदादिकः । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे विकरणस्वरः । दिविष्टिषु । दिवशब्देन दिविष्ट आदित्यो लक्ष्यते । तस्येष्टय एषणानि गमनानि येषु दिवसेषु ते दिविष्टयः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ॥

चन्द्रेण भानुना, चन्द्र (from चन्द्-श्रन्द्) shining, gleaming, cf. चन्द्रं हिरण्यम् X. 107. 7; चन्द्रेण राधसा I 135. 4; चन्द्राः आपः I. 121. 9. भानु (भा) light, lustre. दिविष्टिषु from दिव् + इष्टि (यज्); the clue to the correct interpretation of the word is given by the simile होतारः न दिवियाज X. 97 26; here दिवि cannot mean 'in heaven'; it must mean 'in day-time' or rather दिविदिवि 'day after day.' दिविष्टि therefore has been understood by Max Muller as 'daily sacrifice'; Geld. follows him; Gr.'s interpretation (दिव् heaven + इष्ट from इष्) 'wishing for heaven,' 'prayer' has to be abandoned.

Tr. Shine uswards, Usas, heaven's daughter, with thy shining light, bringing to us plenty of good luck aud shining on our daily sacrifices.

Verse 10

विश्वस्य । हि । प्राणनम् जीवनम् । त्वे इति । वि । यत् ।
विश्वस्य हि प्राणनम् जीवनम् त्वे वि यत्
उच्छसि । सूनरि ॥ सा । नः । रथेन । बृहता । विभाऽवरि ।
उच्छसि सूनरि सा नः रथेन बृहता विभावरि
श्रुधि । चित्रऽमघे । हवम् ॥ १० ॥
श्रुधि चित्रमघे हवम्

हे सूनरि उषोदेवि विश्वस्य सर्वस्य प्राणिजातस्य प्राणनं चेष्टनं जीवनं प्राणधारणं च त्वे हि त्वय्येव वर्तते । यद्यस्मात्त्वं व्युच्छसि तमो वर्जयसि । हे विभावरि विशिष्टप्रकाशयुक्ते सा तादृशी त्वं नोऽस्मान्प्रति बृहता प्रौढेन रथेनायाहीति शेषः । तथा हे चित्रामघे विचित्रधनयुक्ते उषोदेवते नोऽस्मदीयं हवमाह्वानं श्रुधि । शृणु । प्राणनम् । अन चेष्टायाम् । ल्युट् च (पा० ३-३-११५) इति भावे ल्युट् । योरनादेशः । समासेऽनिते । (पा० ८-४-१९) इत्युपसर्गस्थान्निमित्तादुत्तरस्य नकारस्य णत्वम् । नन्वनितेरितीटा निर्देशात्कथमन चेष्टायामित्यस्य णत्वम् । तर्हि जीवनस्य पृथगुपादानात्तेनैव धातुना चेष्टा लक्ष्यते । समासे कृदुत्तरपदप्रकृतिस्वरत्वम् । संहितायामेकादेशस्वरेणैकादेशस्योदात्तत्वम् । त्वे । सुपां सुलुगिति सप्तम्याः शे आदेशः । उच्छसि । उच्छी विवासे । तौदादिकः । सिपः पित्त्वादनुदात्तत्वे विकरणस्वरः । निपातैर्यद्यदिहन्त० (पा० ८-१-३०) इति निघातप्रतिषेधः । सूनरी । सुष्ठु नयतीति सूनरी । नृ नय इत्यस्मादच इः (उ० ४-१३८) इत्यौणादिक इप्रत्ययः । गतिसमासे कृदग्रहणं गतिकारकपूर्वस्यापि ग्रहणात्कृदिकारादक्तिन इति ङीष् । निपातस्य च (पा० ६-३-१३६) इति पूर्वपदस्य दीर्घत्वम् । परादिश्छन्दसि बहुलमित्युत्तरपदाद्युदात्तत्वे प्राप्ते आमन्त्रितस्य च (पा० ८-१-१९) इत्याष्टमिको निघातः । विभावरि विशिष्टा भा यस्याः सा । छन्दसीवनिपौ (पा० ५-२-१०९-२) इति मत्वर्थीयो वनिप् । वनोरचेति ङीप् । तत्संनियोगेन नकारस्य रेफादेशश्च । श्रुधि । श्रुशृणुपृकृवृभ्यश्छन्दसि (६-४-१०२) इति हेर्धिरादेशः । बहुलं छन्दसीति विकरणस्य लुक् । हेरपित्त्वेन प्रत्ययस्वरेणान्तोदात्तत्वम् । पादादित्वान्निघाताभावः । मघमिति धननाम । चित्रं मघं यस्याः सा चित्रमघा । अन्येषामपि दृश्यत इति संहितायां पूर्वपदस्य दीर्घत्वम् । हवम् ह्वेञ् स्पर्द्धायां शब्दे च । भावेऽनुसर्गस्य (पा० ३-३-७५) इत्यप्प्रत्ययः । तत्संनियोगेन संप्रसारणं च ॥

त्वे = त्वयि. सा (त्व). This idiomatic use of तत् as adj. to another pronoun is common to the Vedic and classical

languages; cf. सः त्वम् I. 36. 2; तं त्वा I. 4. 9; तं मा I 23. 23. तस्मै ते VIII. 48. 13; तस्य मम VI. 50. 15 तस्य ते VI. 49. 13 रथेन श्रुधि gives the meaning of रथेन आगत्य शृणु; cf. अयुक्त in 7. The lengthening in चित्रामघे is acc. to पा. 5?8; the short vowel preceding मघ and वसु in a compound (excepting वसुवसु X. 76. 8 and comp. in °मघस्य cf. V. 33. 6) is lengthened. चित्र (from चित् to shine, to distinguish oneself) wonderful, distinguished; cf. epithets like चित्र-क्षत्र,-दृशीक,-भानु.

Tr. In thee resides the breath and life of everything at the time when, beautiful one, thou shinest. This being so (सा त्वं) (come) on thy chariot (and) listen, shining one, to our invocation, oh giver of wonderful gifts.

Verse 11

उषः । वाजम् । हि । वंस्व । यः । चित्रः । मानुषे । जने ॥ तेन ।
उ॒षः॑ वा॒ज॒म् हि॒ वं॒स्व॒ यः॑ चि॒त्रः॑ मा॒नु॒षे॒ ज॒ने॒ ते॒न॒
आ । वह । सुऽकृतः । अध्वरान् । उप । ये । त्वा । गृणन्ति ।
आ॑ वह॒ सु॒ऽकृ॒तः॑ अध्व॒रा॒न् उ॒प॒ ये॑ त्वा॒ गृ॒ण॒न्ति॒
वह्नयः ॥ ११ ॥
व॒ह्न॒यः॑

[* रॉं उष

हे उषः वाजं हविर्लक्षणमन्नं हि श्रुतिषु प्रसिद्धं वंस्व याचस्व । स्वीकुर्वित्यर्थः । यो वाजश्चित्रश्चायनीयो मानुषे मनुष्ये जने जाते यजमाने वर्तते । तं वाजमिति पूर्वत्रान्वयः । तेन कारणेन सुकृतः सुष्ठु कृतवतो यजमानानध्वरान् हिंसारहितान् यागानुपावह प्रापय । ये यजमाना वह्नयो यज्ञनिर्वाहकास्त्वा त्वां गृणन्ति स्तुवन्ति । तान सुकृत इति पूर्वेण संबन्धः । एतदुक्तं भवति । यजमानैः प्रत्तं हविः स्वीकृत्य पुनरपि तेषां यज्ञं संपादयेति । वाजम् । व्रज गतौ । कर्मणि घञ् । अजिव्रज्योश्च (पा० ७-३-६०) इत्यत्र चशब्दस्यानुक्तसमुच्चयार्थत्वाद्व्राजो वाज्यमित्यत्रापि कुत्वाभाव इति वृत्तावुक्तत्वात्कुत्वाभावः । कर्षात्वत (पा० ६-१-१५९) इत्यन्तोदात्तत्वे प्राप्ते वृषादित्वादाद्युदात्तत्वम् । वंस्व । वनु याचने । अत्र याचनवाचिना धातुना तदुत्तरभावी स्वीकारो लक्ष्यते । बहुलं छन्दसीति विकरणस्य लुक् । अनुदात्तत्वाल्लुसार्वधातुकानुदात्तत्वे धातुस्वरः । हि च (पा० ८-१-३४) इति निघातप्रतिषेधः । सुकृतः ।

सुकर्मपोपेत्यादिना (पा० ३-२-८९) करोतेर्भूतार्थे क्विप्। तुगागमः। कृदुत्तरपद-प्रकृतिस्वरत्वम्। अध्वरान्। धरो हिंसा नास्त्यस्मिन्निति बहुव्रीहौ नञ्सुभ्याम् (पा० ६-२-१७२) इत्युत्तरपदान्तोदात्तत्वम्। अध्वरानित्यस्येप्सिततमत्वात्कर्तुरीप्सिततमम् (पा० १-४-४९) इति कर्मसंज्ञा। सुकृत इत्यस्य त्वकथितं च (पा० १-४-५१) इति नीवह्योर्हरतेश्च (पा० १-४-५१) इति द्विकर्मकेषु वहतेः परिगणितत्वात्। अध्वरानित्यत्र नकारस्य संहितायां दीर्घादटीति रुत्वम्। आतोऽटि नित्यमिति पूर्व-स्याकारस्य सानुनासिकता। गृणन्ति। गृ शब्दे। क्र्यादिभ्यः श्ना। प्वादीनां ह्रस्व इति ह्रस्वत्वम्। श्नाभ्यस्तयोरात इत्याकारलोपः। प्रत्ययस्वरः। यद्वृत्तयोगादनिघातः॥

वाजम् वंस्व. वाज (from वज् the root in उर्ग्, ओजस्) (1) a deed of might or heroism, battle, competition, race; (2) the prize of victory, daksinā: from (2) we have the denom. वाजय, (a) to compete, emulate, for the prize of victory, (b) to urge on to effort as in a race or competition; the deriv. also means वाजिन् (1) a glorious fighter, a hero, (2) a war. horse, a race-horse. वन् (i) to seek, to long for, to accept; (ii) to distribute, to give; (iii) (a) to overpower (b) to win; for (1) cf. (अग्नीषोमा) वननं गिरः I. 93. 9; (अश्विना) युवं श्रियं वनथः IV. 44. 2: कीरेः चित् मन्त्रं मनसा वनोषि (of अग्नि) I. 33. 13; for (ii) अग्नि नः वनते रयिम् VI. 16. 28 (अग्नि.) राये वाजाय वनते मघानि III. 19. 1; for (iii) cf. शूरो वः शूरं वनते VI. 25. 4; स ईं स्पृधः वनते VI 20 9; वनुष्यतः वनुयाम I 132. 1; क्षत्रं नः अश्वः वनतां हविष्मान् I. 162. 22; नः वार्याणि वंस्व VIII. 23. 27; 60. 14. (iii b) suits here, and in this sense वन् gives nearly the same sense as सन्; वाजं सानिष्यन् IX. 90. 1; वाजं सानिता X. 61. 9; वाजसनिम् III. 51. 2; वाजसाः and वाजसातिः. सुकृतः अध्वरान् उप आवह. अध्वर (from अ and ध्वृ to harm) the sacrifice (in which there is no harm or evil done, the holy). Geld. understands सुकृतः (the pious patron) as geni. to अध्वरान्, आ वह as meaning 'come on chariot' and तान् being supplied after *d*. The sense attributed by Geld. to आवह is unusual in the RV; he himself does not mention it in his Glossary and therefore it has to be abandoned. Gr. understands सुकृतः as denoting the gods here and two mere passages. In none of them there is a compelling reason to understand it so; on the other hand in I. 47. 8, composed by the same poet, (इषं पृञ्चन्ता सुकृते सुदानवे) so also in I. 92. 3 (इषं वहन्ती सुकृते सुदानवे), the

word refers to the patron, and that is the meaning which is wanted here. 'Bring us patrons and gifts'—that is what the poet is harping upon. अश्वगन् उप by Samdhi becomes अश्वराँ उप; cf. I. 25. 11. तेन (वाजेन सह). वह्नयः (from वह् to carry, to lead) carrier of oblations (fire, priest), of men (horse), leader of horses (charioteer).

Tr. Do give us, Usas, such gifts as would excite wonder among the human beings. With them bring pious (patrons) to the sacrifices, to the priests that praise thee.

Verse 12

विश्वान् । देवान् । आ । वह । सोमऽपीतये । अन्तरिक्षात् । उषः ।
विश्वान् देवान् आ वह सोमपीतये अन्तरिक्षात् उषः
त्वम् ॥ सा । अस्मासु । धाः । गोऽमत् । अश्वऽवत् । उक्थ्यम् ।
त्वम् सा अस्मासु धाः गोमत् अश्ववत् उक्थ्यम्
उषः । वाजम् । सुऽवीर्यम् ॥ १२ ॥
उषः वाजम् सुवीर्यम् *[वाँ आ] **[येन्त०]

हे उषस्त्वं सोमपीतये सोमपानायान्तरिक्षादन्तरिक्षलोकाद्विश्वान्सर्वान्देवान् आवह अस्मदीयदेशं प्रापय। हे उषः सा तादृशी त्वं गोमत् गोमन्तं बहुभिर्गोभिर्युक्तमश्वावदश्वैरुपेतमुक्थ्यं प्रशस्यं सुवीर्यं शोभनवीर्योपेतं वाजमन्नमस्मासु धाः। निधेहि। स्थापयेत्यर्थः। धाः। दधातेरुछन्दसि लुङ्लङ्लिट इति प्रार्थनायां लुङ्। गातिस्थेति (पा० २-४-७७) सिचो लुक्। बहुलं छन्दस्यमाङ्योगेऽपि (पा० ६-४-७५) इत्यडभावः। गोमत्। अश्वावत्। मन्त्रे सोमाश्वेन्द्रियेति मतुपि दीर्घत्वम्। उभयत्र सुपां सुलुगिति विभक्तेर्लुक्। उक्थ्यम उक्थं स्तोत्रं तत्र भवमुक्थ्यम्। भवे छन्दसीति यत्। सर्वे विधयश्छन्दसि विकल्प्यन्त इति। यतोऽनाव इत्याद्युदात्तत्वाभावे तित्स्वरितमिति (६-१-८५) स्वरितत्वम्। उषः। आमन्त्रिताद्युदात्तत्वम्। पादादित्वान्निघाताभावः। सुवीर्यम्। शोभनं वीर्यं यस्य। वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वम्॥

सोमपीतये (सोमस्य पीतिः); the accent is shifted to the first member, as the second member is a verbal noun in ति, acc. to Pān. VI. 2. 42 (द्वासीप्रादिगद); cf. वस्यइष्टये I. 25. 4, पुरो हितिः VII. 61. 7. धाः subj. from aor. of धा to place, to confer. उक्थ्यम्. Mark the जात्य स्वरित on क्थ्य, which is the result of the coalescence of उदात्त

an older and a following अनुदात्त. For the कम्प cf. 6. उक्थ्य comes from उक्थ (वच्) práise and means worthy of praise. Cf. उक्थ्यो रथः IV. 36. 1; उक्थ्यो दूत· I. 17. 5; उक्थ्यं as an epithet of वाजम् occurs also in X. 11. 5; 140. 1. सुवीर्यम्. वीर्य (from वीर) means wealth of valiant men, man-power, also a heroic deed. In words like सुवीर, पुरुवीर, विप्रवीर, क्षयद्वीर, etc. the word वीर signifies valiant sons rather than valiant men, so that सुवीर्य signifies 'accompanied by abundance of valiant sons.' सुवीर्य is a बहु०, but as in the case of अ so also in the case of सु the accent is on the last member of the बहु० compound.

Tr. Bring all the Gods, Usas, from the aerial regions for the draught of Soma and, coming thus, confer, Usas, on us a praiseworthy gift, rich in cows, horses and excellent sons.

Verse 13

यस्याः । रुशन्तः । अर्चयः । प्रति । भद्राः । अदृक्षत ॥ सा ।
प॑स्याः रु॑शन्तः अर्च॑यः प्र॑ति भद्राः॑ अ॑दृक्षत सा॑

नः । रयिम् । विश्वऽवारम् । सुऽपेशसम् । उषाः ददातु ।
नः रयि॑म् विश्व॑ऽवारम् सुपे॑शसम् उषाः॑ ददातु

सुगम्यम् ॥ १३ ॥
सु॑गम्यम्

यस्या उषसोऽर्चयः प्रकाशा रुशन्तः शत्रून्हिंसन्तो भद्राः कल्याणाः प्रत्यदृक्षत प्रतिदृश्यन्ते सा तथाभूतोषा नोऽस्मभ्यं रयिं ददातु। कीदृशं रयिम्। विश्ववारं विश्वस्य वारकम्। यद्वा। विश्वैर्वरणीयम्। सुपेशसम्। पेश इति रूपनाम। शोभनरूपोपेतं सुगम्यं सुष्टु गन्तव्यम्। यद्वा। सुगम्यमिति सुखनाम। तद्धेतुत्वात्तात्स्थव्यम्। रुशन्तः। रुश रिश हिंसायाम्। शतरि तुदादित्वाच्छः। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे सति शिष्टत्वाद्विकरणस्वरे प्राप्ते व्यत्ययेनाद्युदात्तत्वम्। अदृक्षत। दृशेः कर्मणि लुङि झस्यादादेशः। च्लेः सिच्। न दृशः (पा० ३-१-४७) इति क्सप्रतिषेधः। एकाच इतीट्प्रतिषेधः। लिङ्सिचावात्मनेपदेषु (पा० १-२-११) इति सिचः कित्त्वाल्लघूपधगुणाभावः। सृजिदृशोर्झल्यमकिति (पा० ६-१-५८) इत्यमागमाभावश्च। कित्त्वादेव षत्वकत्वषत्वानि। अडागम उदात्तः। यद्वृत्तयोगादनिघातः।

विश्ववारम् । विश्वं वृणोतीति विश्ववारः । वृञ् वरणे । कर्मण्यण् । यद्वा विश्वैर्वियत इति विश्ववारः । कर्मणि घञ् । मरुद्वृधादित्वात्पूर्वपदान्तोदात्तत्वम् । सुगम्यम् । सुष्ठु गन्तव्यः सुगमः । गमेर्धत्रर्थे कविधानमिति कप्रत्ययः । गमहनेत्यादिनोपधालोपः । तत्र भवं सुगम्यत् । भवे छन्दसीति यत् । यतोऽनावः (६-१-२१३) इत्याद्युदात्तत्वम् ॥

रुशन्तः अर्चयः भद्राः प्रति अदृक्षत. रुशत् means shining or brilliant. M. M. take it to mean red, but in the context in which the word occurs, this meaning appears to be not suitable; cf. आमासु चित् दधिषे पक्वम् अन्तः पयः कृष्णासु रुशत् रोहिणीषु, "you have deposited in the raw (cows) cooked milk, the shining (रुशत्) in the black and in the red," I. 62. 9 Here obviously रुशत cannot mean red. Similarly, the lustre of the sun has been mentioned as रुशत् I. 115 5. Further if रुशत् occurs in compounds like रुशद्गो or रुशत्पशु or रुशद्वत्सा all these are epithets of the Usas and the cows and calves are ethereal (and imaginary) ones, forming a part of the retinue of Usas; cf. also रुशन्तम् अग्निम् VI. 1. 3. रुशत् अनीकम् IV. 11. 1. Gr., Old., Geld. are all against M. M.'s interpretation. अर्चि m. occurs as frequently as अर्चिः n. It means flame or lustre; cf उषसः अर्चिभिः IV. 37 8 भद्र (from भन्द्) shining, lovely, also auspicious. प्रति gives the sense of 'in front'. अदृक्षत is pass. aor 3 pl from दृश्. विश्ववारम् सुपेशसम् रयिम्. From the accent विश्ववार will be seen to be a बहु० (वार from वृ to choose, valuable things): विश्वाः वाराः यत्र तत्, containing all kinds of valuable things; so Gr. and Old. Say. gives an equally satisfactory explanation. Words in the मरुद्वृधादि class have the accent on the last syllable of the first member; and as विश्ववार is included there, it is possible to explain it as विश्वैः वियते इति "longed for by all". सुपेशस् beautiful, from पेशस् n. ornament; cf. यज्ञस्य पेशः II. 3. 6, अध्वरस्य पेशः VII. 46. 1; श्रेष्ठ वः पेश. अधि धायि दर्शतम् IV 36. 7. सुपेशस् appears as an epithet of वधूः (X. 27. 12), युवतिः (X. 114 3), रथः (I. 49. 2) and गिरः (II 35. 1). सुगम्यम् (from सु+गमा from गम्.) auspicious. गमा means a path and so सुगमा means शिवा पन्थानः (*bon voyage*); सुगमाय साधु is सुगम्यम्.

Tr.—Whose shining, auspicious lustre has been seen in front of us, may that Usas bestow on us wealth, consisting

of all precious things of lovely appearance, and of good augury for life's journey.

Verse 14

ये । चित् । हि । त्वाम् । ऋषयः । पूर्वे । ऊतये । जुहूरे ।
ये चित् हि त्वाम् ऋषयः पूर्वे ऊतये जुहूरे
अवसे । महि ॥ सा । नः । स्तोमान् । अभि । गृणीहि । राधसा ।
अवसे महि सा नः स्तोमान् अभि गृणीहि राधसा
उषः । शुक्रेण । शोचिषा ॥ १४ ॥
उषः शुक्रेण शोचिषा [* जुहूरेवसे; ∞ स्तोमाँ अभि]

हे महि महिते पूजनीये वा उषोदेवते त्वां ये चिद्धि ये खलु प्रसिद्धाः पूर्वे चिरंतना ऋषयो मन्त्रद्रष्टार ऊतये रक्षणाय । अव इत्यन्ननाम । अवसे । अन्नाय च जुहूरे जुह्विरे आहूतवन्तः । सूक्तरूपैर्मन्त्रैः स्तुतवन्त इत्यर्थः । हे उषः सा तादृशी त्वं राधसास्माभिर्दत्तेन हविर्लक्षणेन धनेन शुक्रेण शोचिषा दीप्तेन तमो निवारयितुं समर्थेन तेजसा चोपलक्षिता सती तेषामृषीणामिव नोऽस्माकं स्तोमानभि स्तुतीरभिलक्ष्य गृणीहि । सम्यक् स्तुतमिति शब्दय । अस्मदीयाभिः स्तुतिभिः संतुष्टा भवेत्यर्थः । ऊतये । अवतेः क्तिनि ज्वरत्वर (पा० ६-४-२०) इत्यादिना वकारस्योपधायाश्चोट् । ऊतियूति (पा० ३-३-९७) इत्यादिना क्तिन्नुदात्तो निपातितः । जुहूरे । ह्वेञ् स्पर्द्धायां शब्दे च । लिट्यभ्यस्तस्य च (पा० ६-१-३३) इति द्विर्वचनात्पूर्वमेवाभ्यस्तकारणभूतस्य ह्वयतेः संप्रसारणम् । अभ्यस्तस्य यो ह्वयतिः । कश्चाभ्यस्तस्य ह्वयतिः । यस्तस्य कारणम् (का० ६-१-३३) इति व्याख्यातत्वात् । परपूर्वत्वे हल (पा०६-४-२) इति दीर्घत्वम् । द्विर्वचनादीनि इरयो रे (पा०६-४-७६) इतीरेचो रेआदेशः । चित इत्यन्तोदात्तत्वम् । यद्वृत्तयोगादनिघातः । तत्र हि पञ्चमीनिर्देशेऽपि व्यवहितेऽपि कार्यं भवतीत्युक्तम् (का० ८-१-६६) । महि । मह पूजायाम् औणादिक इप्रत्ययः । कृदिकारादक्तिन इति ङीष् । संबुद्धावम्बार्थेति (पा० ७-३-१०७) ह्रस्वत्वम् । स्तोमान् । संहितायां नकारस्य रुत्वाद्युक्तम् (पा० ८-३-९)) नित्त्वादाद्युदात्तत्वम् । गृणीहि । गृ शब्दे क्रैयादिकः । शिति प्वादीनां ह्रस्व इति ह्रस्वत्वम् । राधसा । राध्नोत्यनेनेति राधः । असुनो नित्त्वादाद्युदात्तत्वम् । उषः । पादादित्वादाट्टमिकनिघाताभावे पाष्टिकमामन्त्रिताद्युदात्तत्वम् ॥

ऊतये अवसे जुहूरे. ऊति is from अव् to protect or to aid, and is therefore equal to अवस्. ये चित् हि; cf. I. 25. 1. जुह्वे, perf. 3

pl. from हे, is irregular for जुह्विरे or it might be understood to be from the root हू (हवते), to call, from which the regular form would be जुहुविरे. महि (voc.) equal to महति from मही=महती, f. of मह. There is a third word मह् used in the same sense. अभि गृणीहि, from गृ to praise. अभि गृ to approve, or honour or reward something with something: cf. यः नः गिरः युक्तेन अभि गृणाति V. 27. 3. अ. इद्धि स्तोमान् अभि स्वर अभि गृणाहि I. 10. 4; अभि यज्ञं गृणीहि नः I. 15. 3. शुक्रेण शोचिषा. Both words are derived from शुच् (शोचति or °ते) to shine. शोचिः lustre, flame or light and शुक्र brilliant, dazzling. The classical शुक्ल is derived from it.

Tr. Although ancient sages might have invoked thee, great Usas, for aid and protection, (invoked by us now), honour our hymns of praise with wealth and brilliant lustre.

Verse 15

उषः । यत् । अद्य । भानुना । वि । द्वारौ । ऋणवः । दिवः ॥
उ॑षः यत् अद्य॑ भानु॑ना॑ वि॑ द्वा॑रौ ऋण॑वः दिव॑ः
प्र । नः । यच्छतात् । अवृकम् । पृथु । छर्दिः । प्र । देवि ।
प्र॑ नः यच्छतात् अवृक॑म् पृथु॑ छर्दि॑ः प्र॑ देवि
गोऽमतीः । इषः ॥ १५ ॥
गो॑मतीः इ॑षः

हे उषः त्वमद्यास्मिन्प्रभातसमये, यद्यस्माद्भानुना प्रकाशेन दिवोऽन्तरिक्षस्य द्वारौ द्वारभूतौ पूर्वापरदिग्भागावन्धकारेणाच्छादितौ व्यृणवः विश्लिष्य प्राप्नोषि तस्मात्त्वं नोऽस्मभ्यं छर्दिस्तेजास्वि गृहं प्रयच्छतात्। देहि। कीदृशं छर्दिः। अवृकं हिंसकरहितम्। पृथु विस्तीर्णम्। अपि च हे देवि देवनशीले गोमतीर्बहुभिर्गोभिर्युक्ता इषोऽन्नानि प्रेत्युपसर्गस्यावृत्तेर्यच्छतादित्यनुपज्यते। प्रयच्छतात् देहि। त्वदागमनस्यास्मद्रक्षणार्थत्वादस्मदभीष्टं गृहादिकं प्रयच्छेत्यर्थः। छर्दिरिति गृहनाम। छर्दिश्छदिरिति तन्नामसु पाठात्। ऋणवः। ऋण गतौ। छान्दसे लङि सिपि तनादित्वादुप्रत्ययः। ततो व्यत्ययेन शपि गुणावादेशौ। शपः पित्त्वादनुदात्तत्त्व उप्रत्ययस्वरः शिष्यते। यद्वृत्तयोगादनिघातः। दिवः। ऊडिदमित्यादिना विभक्तेरुदात्तत्वम्। प्र नः। उपसर्गाद्बहुलमिति बहुवचनान्नसो णत्वाभावः। यच्छतात्। दाण् दाने। शपि पाघ्रेत्यादिना यच्छादेशः। अवृकं नास्ति वृकोऽस्मिन्निति बहुव्रीहौ नञ्सुभ्यामित्यु-

त्तरपदान्तोदात्तत्वम् । पृथु प्रथ प्रख्याने । प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्च (उ० १-२९) इति कुप्रत्यय संप्रसारणं च । छर्दिरिति गृहनाम । उच्छृदिर् दीप्तिदेवनयोः। अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिः (उ० २-१०९) इतीसिप्रत्ययः । लघूपधगुणः । प्रत्ययस्वरः ॥

वि॑ ऋण्वः वि + ऋ, 5 U., to open ; द्वारा ऋण्वति I. 28. 6 : नाकं ऋण्वथः I. 139 4 ; वारं ऋण्वति I. 128. 6. प्र॑ यच्छतात् = यच्छ (or यच्छतु) from यम्. अवृक॑म् पृथु॑ छर्दि॑ः. वृ॑क from व्रश्च 'one' who tears to pieces, hence a wolf, or, metaphorically, a rapacious man. अवृक॑ is used as a बहु० and hence the accent is shifted to the last syllable 'अविद्यमानः वृकः यस्य or यस्मिन्'; and hence 'proof against a rapacious person'. पृथु (from प्रथ्) broad, extensive. छर्दिः is understood by Gr. as a later and corrupt form for the original छदिः and this mainly on metrical grounds. Theories apart, च्छृद् and छद् appear to be cognate forms meaning to shelter or to cover ; cf. ममाणि ते वर्मणा छादयामि VI. 75. 18 ; तत् देवस्य सवितुः छर्दिः वृणीमहे IV. 53. 1 ; अस्मभ्यं....छर्दिः यन्नम् अदाभ्यं VIII. 5. 12. गो॑मतीः इ॑षः. इष् is derived from the root इष (इषति or इष्यति) to set in action, to send, to strive ; Geld. from इष्-इच्छति. Whatever the etymology, इष् means food or nourishment and is used often in pl. ; cf. तस्य प्र इष दीदियुः I 36. 11 ; इषा नेता III. 23. 2 ; इषा वोढा VII. 69. 1.

Tr. At this time Usas, when thou hast opened out the doors of heavens by thy light, grant to us an ample harm-proof shelter ; grant, oh goddess, nourishment with plenty of cows.

Verse 16

सम् । नः । राया । बृहता । विश्वऽपेशसा । मिमिक्ष्व । सम् ।
सं॑म नः राया बृहता विश्व॑ऽपेशसा मिमिक्ष्व सं॑म्

इळा॑भिः । आ ॥ सम् । द्युम्ने॑न । विश्वऽतुरा । उषः । महि ।
इ॑ळा॑भिः आ॑ सं॑म् द्युम्ने॑न विश्वतु॑रा उषः महि

सम् । वाजैः । वाजिनीऽवति ॥ १६ ॥
सं॑म् वा॑जैः वाजिनीवति

हे उषो नोऽस्मान्वाया धनेन संमिमिक्ष्व । संसिञ्च । संयोजयेत्यर्थः । कीदृशेन धनेन । बृहता प्रभूतेन विश्वपेशसा । पेश इति रूपनाम । बहुविधरूपयुक्तेन । तथेळाभिरा । गोभिश्चास्मान्संमिमिक्ष्व । इळेति गोनाम । इळा जगतीति (नि० १-१) तन्नामसु पाठात् । आकार· समुच्चये पदान्ते वर्तमानत्वात् । उक्तं च । एतस्मिन्नेवार्थे देवेभ्यश्च पितृभ्य एत्याकार (नि० १-४) इति । किंच हे महि महनीये उषोदेवते द्युम्नेन यशसा संमिमिक्ष्व । द्युम्नं द्योततेर्यशो वान्नं वेति यास्कः (नि० ५-५)। कीदृशेन द्युम्नेन । विश्वतुरा । सर्वेषां शत्रूणां हिंसकेन । तथा हे वाजिनीवति अन्नसाधनभूतक्रियायुक्ते वाजैरन्नैरस्मान् संमिमिक्ष्व । अन्नं वै वाजः (श. ब्रा. ९-३-४-१) इति श्रुत्यन्तरात् । राया । ऊडिदमित्यादिना विभक्तेरुदात्तत्वम । बृहता । बृहन्महतोरुपसंख्यानमिति विभक्तिरुदात्ता । विश्वपेशसा । विश्वानि पेशांसि यस्यासौ विश्वपेशाः । बहुव्रीहौ विश्वं संज्ञायाम् (पा० ६-२-१०६) इति व्यत्ययेनासंज्ञायामपि पूर्वपदान्तोदात्तत्वम् । यद्वा । मरुद्वृधादिर्द्रष्टव्यः । मिमिक्ष्व । मिह सेचने । व्यत्ययेनात्मनेपदम् । लोटि बहुलं छन्दसीति शपः श्लुः । द्विर्भावहलादिशेषौ ढत्वकत्वषत्वानि । प्रत्ययस्वरस्य *सविशिष्टत्वात्स एव शिष्यते । पूर्वपदस्यासमानवाक्यस्थत्वान्निङ्निमित्तिङ इति निघातो न भवति । समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्या इति वचनात् । विश्वतुरा । तूर्वतीति तूः । तुर्वी हिंसार्थः । क्विप् चेति क्विप् । राल्लोप इति वलोपः । विश्वेषां तूर्विश्वतूः । समासस्येत्यन्तोदात्तत्वम् । वाजिनीवति । वाजोऽन्नमस्या अस्तीति वाजिनी क्रिया तादृशी क्रिया यस्याः सा तथोक्ता ॥

सं॒म् मि॑मिक्ष्व॑ स म् इ॑ळाभिः आ॑(मिमिक्ष्व). मिमिक्ष्व is accented because it comes in the beginning of a पाद. मिमिक्ष्व acc. to Gr. is impera. s. from मिमिक्ष्, perfect base of मिह–मिघ् (cf. मेघ) to sprinkle with Macdonell derived it from मिक्ष् to mix: a third root with which it can be connected is म्यक्ष्. So far as the sense is concerned म्यक्ष् (to be situated, to suit, to belong to) is out of question. मिक्ष् 'to season', 'to mix' also apparently is not satisfactory. But it makes the form regular. The धातुपाठ does not, however, recognize any मिक्ष् and the actual forms derived from it could very well be explained from the perfect base of मिश्र् to mix. Sāy. and M. M. are for मिह्; Macd. and Geld. for मिक्ष्. सं + मिश्र् would do quite well; cf. श्रियसे कं भानुभिः सं मिमिक्षिरे I. 87. 6. इळा along with इड् has acquired associations of holiness although इड् and इष् are used sometimes in an identical

*आदर्शे सति शिष्टत्वात् इति पाठः ।

manner; cf. इष्कृत and इळाकृत. इळा is the sacrificial offering and has been personified as a goddess and अग्नि is spoken of as her son: cf. III. 29. 3; also as her father in VI. 52. 16. Bergaigne (I. 323–25) has shown that इळा represents (a liquid) offering as well as the prayer accompanying it; and this explains its sanctity and deification. आ gives the meaning of च; cf. देवेभ्यः च पितृभ्यः आ X. 16. 11; इन्द्रात् भा कः चित् भयते X. 92. 8. अनेद्यः अव- आ इषः दधानः I. 165. 12; यः शतं आ सहस्रं अवपत् II. 14. 7. विश्वतु॑रा (द्युम्नेन). विश्वतुर (विश्व + तॄ–तुर Gr.) occurs only here but विश्वतूर्ति occurs in II. 3. 8. तॄ to cross; hence, to overpower, to carry through etc. मिमिक्ष्वा is acc. to प्रा० 465.

Tr. Shower on us abundant wealth which assumes all lovely forms; shower on us food: shower on us all-conquering splendour; shower on us, great Usas, the prize of heroic deeds (दक्षिणा), oh bountiful one.

No. 4

MANDALA I — SŪKTA 49

उषो भद्रेभिरिति चतुर्ऋचं षष्ठं सूक्तम् । अत्रानुक्रम्यते । उषश्चतुष्कमानुष्टुभं त्विति । कण्वपुत्रः प्रस्कण्वकृषिः । तुह्यादिपरिभाषयेदमुत्तरं चानुष्टुभम् । पूर्वत्रोषस्यं त्वित्युक्तत्वादिदमपि सूक्तमुषस्यम् । प्रातरनुवाकस्योषस्ये क्रतावानुष्टुभे छन्दस्येतत्-सूक्तम् । सूत्र्यते हि उषो भद्रेभिरित्यानुष्टुभम् (आ० ४-१४) इति । आश्विनशस्त्रेऽ-प्येतत्सूक्तम् । प्रातरनुवाकन्यायेन (आ० ६-५) इत्यतिदेशात् ॥

Verse 1

उषः । भद्रेभिः । आ । गहि । दिवः । चित् । रोचनात् । अधि ।
उ॑षः भद्रे॑भिः आ॑ गहि दि॒व॑ः चित् रोचना॑त् अ॑धि
वहन्तु । अरुणऽप्सवः । उप । त्वा । सोमिनः । गृहम् ॥ १ ॥
व॑हन्तु अरुण॑प्सवः उ॑प त्वा सोमि॑नः गृह॑म्

हे उष उषोदेवते भद्रेभिर्भन्दनीयैः शोभनैर्मार्गैर्दिवोऽन्तरिक्षलोकात् । रोचनाद्रोचमानाद्दीप्यमानात् । अधिरुपर्यर्थः । उपरिवर्तमानात् । चिदिति पूजितार्थः । पूजितादेवंविधान्तरिक्षलोकात् । आगहि आगच्छ । हे उषः अरुणप्सवोऽरुणवर्णा गावः सोमिनः सोमयुक्तस्य यजमानस्य गृहं देवयजनरूपं यज्ञगृहं त्वा त्वामुपवहन्तु प्रापयन्तु । गहि । गमेर्लोटि बहुलं छन्दसीति शपो लुक् । हेरपित्त्वेन ङित्त्वेऽनुदात्तोपदेशेत्यादिनानुनासिकलोपः । अतो हेरिति लुग्न भवति । असिद्धवदत्रा भादित्यनुनासिकलोपस्यासिद्धत्वात् । रोचनात् । रुच दीप्तौ । अनुदात्तेतश्च हलादेरिति युच् । योरनादेशे चित इत्यन्तोदात्तत्वम् । अरुणप्सवः । प्सा भक्षणे । प्सान्ति भक्षयन्ति स्तनं पिबन्ति इति प्सवो वत्साः । औणादिकः कुप्रत्ययः । आतो लोप इटि चेत्याकारलोपः । अरुणाः प्सवो यासां तास्तथोक्ताः । अत्र वत्सानामारुण्यप्रतिपादनान्मातॄणामपि तथात्वं गम्यते । पैतृकमश्वा अनुहरन्ते मातृकं गावोऽनुहरन्ते (म० १-३-२१-५) इति गोनर्दीयः । तासां चोषोवाहनत्वं निघण्टावुक्तम् । अरुण्यो गाव उषसामिति । अरुणशब्दोऽर्चेश्च (उ० ३-७) इति उनन्प्रत्ययान्तः । तृणाख्यायां चित् (उ० ३-५९) इत्यतश्चिदित्यनुवृत्तेरन्तोदात्तः । स एव बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन शिष्यते ॥

भद्रेभिः Geld. supplies rays (from अर्चयः I. 48.13). One naturally thinks of horses; cf. भद्राः अश्वाः सूर्यस्य I. 115. 3. दिवः चित् रोचनात् अधि अधि from; cf. I. 48. 7, रोचन (रुच् to shine) light, light-regions; cf. सूर्यस्य रोचनात् I. 14. 9; नाकस्य रोचने I. 19. 6; सूर्यस्य रोचने III. 22. 3. चित् is slightly emphatic here; 'from *those*' &c. अरुणप्सवः अरुण ruddy. प्सु (food) is certainly derived from प्सा to eat in अ-प्सु (VII. 4. 6 मा अप्सवः परि सदाम मा अदुवः). Gr. derives it from भस् in this form as well in ऋतप्सु, पृषितप्सु, विश्वप्सु, वृषप्सु and अहुतप्सु and takes it to mean 'appearance'. This meaning is certainly out of place in the case of most of these epithets. ऋतप्सु is an epithet of the अश्विनौ, वृषप्सु of रथ and मरुतः; अहुतप्सु of मरुतः; पृषितप्सु is an epithet of श्येनः, वयः, अश्वाः and विश्वप्सु of यज्ञ, हव and ब्रह्म. The meaning of food can very well do in विश्वप्सु and the word is connected in sense with विश्वंपस्न्य, which everybody is agreed on deriving from प्सा to eat. ऋतप्सु is to be connected with ऋतपा· VII. 20. 6; I. 113. 12; VI. 3. 1, ऋत being the holy drink, Soma; cf. ऋतस्य धाराः I. 67. 7; ऋतस्य गाः I. 84. 16; ऋतस्य दोहनाः IX. 75. 3 &c; here also it is from प्सा. From the rest of the words it would appear that प्सु is something which may be described

as manly (वृष), as unbent (अहुत), as besprinkled with water (प्रुषित), and ruddy (अरुण), and it belongs to श्येन, वयः, अश्वाः, रथः, and मरुतः The sense of 'neck (the outside of the gullet)' will do in all these passages for प्रु and it is also connected with प्सा, because it is what swallows.

Tr. Come hither, Usas, with thy auspicious (steeds) from the light-regions of heaven itself. May (thy) ruddy-necked (steeds) carry thee to the house of the soma-sacrificer.

Verse 2

सुऽपेशसम् । सुऽखम् । रथम् । यम् । अधिऽअस्थाः । उषः ।
सुपेऽशसम् सुऽखम् रथम् यम् अधि॑ऽअस्थाः उषः
त्वम् ॥ तेन । सुऽश्रवसम् । जनम् । प्र । अव । अद्य । दुहितः ।
त्वम् तेन सुऽश्रवसम् जनम् प्र अव अद्य दुहितः
दिवः ॥ २ ॥
दिवः

हे उषस्त्वं यं रथमध्यस्था अधितिष्ठसि । कीदृशं रथम् । सुपेशसं शोभनावयवं शोभनरूपयुक्तं वा । पेश इति रूपनामेति यास्कः (नि० ८-११) । यद्वा शोभनहिरण्ययुक्तम् । पेशः कृशनम् (नि० १-२) इति तन्नामसु पाठात् । सुखं शोभनेन खेनाकाशेन युक्तं विस्तृतमित्यर्थः । यद्वा । सुखहेतुभूतम् । अथवा सुखमिति क्रियाविशेषणम् । सुखं यथा भवति तथेत्यर्थः । हे दिवो दुहितर्द्युलोकसकाशादुत्पन्ने उषोदेवते तेन रथेनाद्यास्मिन्काले सुश्रवसं शोभनहविर्युक्तं जनं यजमानं प्राव । प्रकर्षेण गच्छ । सुपेशसम् । पिश अवयवे । अस्मादसुन्प्रत्ययः । निस्वादाद्युदात्तः पेशस्शब्दः। शोभनं पेशो यस्यासौ सुपेशाः । आद्युदात्तं व्यच्छन्दसीत्युत्तरपदाद्युदात्तत्वम् । अध्यस्थाः । तिष्ठतेश्छन्दसि लुङ्लङ्लिट इति वर्तमाने लुङि गातिस्थेति सिचो लुक् । अडागम उदात्तः । यद्वृत्तयोगादनिघात । तिङि चोदात्तवतीति गतेरनुदात्तत्वम् । तेन । अन्येषामपि दृश्यत इति संहितायां दीर्घः । सुश्रवसम् । श्रव इत्यन्ननाम । श्रूयत इति सतः (नि० १०-३) इति यास्कः । सुपेशसमितिवदुत्तरपदाद्युदात्तत्वम् । अव । अव रक्षणगतिप्रीतितृप्तीत्युक्तत्वादवावतिर्गत्यर्थः । दुहितर्दिवः । परमपि च्छन्दसीति षष्ठ्यन्तस्य पूर्वामन्त्रिताङ्गवद्भावे सति पदद्वयसमुदायस्याष्टमिकं सर्वानुदात्तत्वम् ॥

सुखं रथम् ख n. is the hub (or wheel-box) of the chariot in which the axle turns ; cf. अङ्घि खम् I. 156. 3 ; खे अरान् इव खेदया (hammer) VIII. 77. 3 ; खे रथस्य खे अनसः खे युगस्य VIII. 91. 7. सुख (शोभनं खं यस्य) is exclusively an epithet of a chariot in the RV ; it occurs fourteen times in this sense ; cf. (ऋभवः) तक्षन् नासत्याभ्या सुखं रथम् I. 20. 3. सुश्रवसम् जनम्. श्रवस् is a hymn of praise or a sacrificial offering (cf. निरुक्त 10. 3 quoted by Sāy.) ; for (i) cf. कामहे सु पुरुध श्रवांसि X. 59. 2 ; देवेषु अक्रत श्रवः X 155. 5 ; for (ii) cf. स्तीर्णं बर्हिः स्वर्णरे श्रवांसि दधिरे परि V. 18. 4 ; दिविश्रवः दधीमहि दिवि स्तोमं मनामहे V. 35. 8 ; (ये मरुतः) श्रवः मदन्ति (cf. ऊर्जं मदन्ति VII. 49. 4) यज्ञियाः V. 52. 7 ; (मरुतः) यज्ञेषु श्रवसा मदन्ति VII. 57. 1. तेना is noted at प्रा० 469.

Tr. On that lustrous, well-hubbed chariot on which thou hast mounted, Usas, daughter of heaven, come today to the aid of the man who offers hymns of praise (or oblations).

Verse 3

वयः । चित् । ते । पतत्रिणः । द्विऽपत् । चतुःऽपत् । अर्जुनि ॥
वयः चित् ते पतत्रिणः द्विपत् चतुष्पत् अर्जुनि
उषः । प्र । आरन् । ऋतून् । अनु । दिवः । अन्तेभ्यः । परि ॥३॥
उषः प्र आरन् ऋतून् अनु दिवः अन्तेभ्यः परि [तूँरनु]

हे अर्जुनि शुभ्रवर्ण उष उषोदेवते ते तव ऋतूँरनु गमनान्यनुलक्ष्य द्विपत् द्विपात् मनुष्यादिक चतुष्पत् गवादिकं तथा पतत्रिणः पतत्रवन्तः पक्षोपेता वयश्चित् पक्षिणश्च दिवोऽन्तेभ्य आकाशप्रान्तेभ्यः पर्युपरि प्रारन् प्रकर्षेण गच्छन्ति । रात्रावन्धकारेणाभिभूताः सर्वे प्राणिनस्त्वदागमनानन्तरं चेष्टावन्तो भवन्तीत्यर्थः । पतत्रिणः । पत्लृ गतौ । पतत्यनेनेति पतत्रम् । अभिनक्षीत्यादिना । (उ० ३-१०५) अत्रन् प्रत्ययः । ततो मत्वर्थीय इनिः । द्विपत् । द्वौ पादावस्येति संख्यासुपूर्वस्य (पा० ५-४-१४०) इति पादशब्दस्यान्त्यलोपः समासान्तः । अयस्मयादित्वेन भत्वात् पादः पत् (पा० ६-४-१३०) इति पद्भावः । द्वित्रिभ्यां पाद्दन्मूर्द्धसु बहुव्रीहौ (पा० ६-२-१९७) इति उत्तरपदान्तोदात्तत्वम् । चतुष्पत् । चत्वारः पादा अस्य । स्वरव्यतिरिक्तं पूर्ववत् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । इणः ष इत्यनुवृत्तौ इदुदुपधस्य चाप्रत्यय (पा० ८-३-४१) इति विसर्जनीयस्य षत्वम् । न च *परत्वेनास्यासिद्धत्वात्

* नास्य सिद्धत्वात् इत्यादर्शः ।

कुप्वोः कः पौ च (८-३-३७) इति उपध्मानीयादेशः शङ्कनीयः। येननाप्राप्तिन्यायेन (प० ५८) तस्यापवादत्वात्। अपवादस्तु परमपि पूर्वं बाधत एवेति वृत्तावुक्तम्। आरन्। ऋ गतौ। छन्दसि लुङ्लङ्लिट इति वर्तमाने लुङि सर्तिशास्त्यर्तिभ्यश्चेति च्लेरङादेशः। ऋदृशोङि गुण इति गुणः। आडागमः। ऋतून्। ऋ गतौ। अस्मादौणादिको भावे कुप्रत्ययः। अनु। अनुर्लक्षणे (पा० १-४-८४) इत्यनोः कर्मप्रवचनीयत्वम्। कर्मप्रवचनीययुक्ते (पा० २-३-८) इति द्वितीया। संहितायां दीर्घादटि समानपादे इति नकारस्य रुत्वम्। अत्रानुनासिकः पूर्वस्य तु वेति रेफः पूर्वस्य वर्णस्य सानुनासिकत्वम्। दिवः। ऊडिदमिति विभक्तिरुदात्ता। अन्तेभ्यः। पञ्चम्याः परावध्यर्थ इति विसर्जनीयस्य सत्वम्॥

पतत्रिणः वयः पतत्रिन् winged from पतत्रम् wing. The expression recurs in I. 155. 5; VI. 62. 6; VII. 65. 7; X. 143. 5. द्विपत चतुष्पत. Both these are neuter nouns signifying the two-footed and the four-footed creation; cf. शम् नः भूत द्विपदे शम् चतुष्पदे VI. 74. 1. यथा शम् असत् द्विपदे चतुष्पदे I. 114. 1; also 121. 3 etc. अर्जुनि (Voc.) white, silver-coloured. ऋतून् अनु प्रआरन्. ऋतु is the season of the year or the proper time for the sacrifice or other recurring matters; cf. पिब सोम ऋतून् अनु. I. 15. 5. प्रारन् from ऋ with प्र to go forth, to rush forth; cf. मरुतः प्रारत I. 39. 5; शर्धः प्रारत IV. 1. 12. ये प्रारुः III. 7. 1. दिवः अन्तेभ्यः परि; cf. मो षु देवाः अदः स्वः अव पादि दिवः परि I. 105. 3; (ये मरुतः) पप्तुः .... अन्तान् दिवः बृहतः सानुनः परि V. 59. 7. The Samdhi ऋतूँरनु is according to प्रति० 289.

Tr. Even birds and bipeds and quadrupeds, oh white Usas, go forth punctually at thy hour from the ends of heaven.

Verse. 4

व्युच्छन्ती। हि। रश्मिऽभिः। विश्वम्। आऽभासि। रोचनम्॥
व्युच्छन्ती हि रश्मिभिः विश्वम् आभासि रोचनम्

ताम्। त्वाम्। उषः। वसुऽयवः। गीःऽभिः। कण्वाः।
ताम् त्वाम् उषः वसुयवः गीर्भिः कण्वाः

अहूषत॥ ४॥
अहूषत

हे उषो व्युच्छन्ती तमो वर्जयन्ती त्वं रश्मिभिः स्वकीयेस्तेजोभिर्विश्वं सर्वं भूतजातं रोचनं रोचमानं प्रकाशयुक्तं यथा भवति तथाभासि । आ समन्तात्प्रकाशयसि । हि यस्मादेवं तस्मात्तां तादृशीं त्वां वसूयवः वसुकामाः कण्वा मेधाविन ऋत्विजः कण्वगोत्रोत्पन्ना वा महर्षयो गीर्भिः स्तुतिलक्षणैर्वचोभिरहूषत । स्तुतवन्तः इत्यर्थः । कण्व इति मेधाविनाम । कण्व ऋभुरिति तन्नामसु पाठात् । आभासि । भा दीप्तौ । अदादित्वाच्छपो लुक् । सिपः पित्त्वादनुदात्तत्वे धातुस्वरः । हि चेति निघातप्रतिषेधः । तिङि चोदात्तवतीति गतेरनुदात्तत्वम् । रोचनम् । रुच दीप्तौ । अनुदात्तेतश्च हलादेरिति युच् । चित इत्यन्तोदात्तत्वम् । वसूयवः । वसु धनमात्मन इच्छन्तः । सुप आत्मनः क्यच् । अकृत्सार्वधातुकयोर्दीर्घः । क्याच्छन्दसीत्युप्रत्ययः । गीर्भिः । सावेकाच इति विभक्तेरुदात्तत्वम् । कण्वाः । कण शब्दार्थः । अशिप्रुषिलटिकणीत्यादिना क्वनप्रत्ययः । नित्वादाद्युदात्तत्वम् । अहूषत । ह्वेञो लुङि हूः संप्रसारणमित्यनुवृत्तौ बहुलं छन्दसीति संप्रसारणम् । परपूर्वत्वे हल इति दीर्घत्वम् । च्लेः सिच् । एकाच इतीट्प्रतिषेधः । संज्ञापूर्वकस्य विधेरनित्यत्वाद्गुणाभावः ॥

वसूयवः The lengthening of सु is according to प्राति. 553. वसुयु from वसूयति, वसु आत्मानं इच्छति. अहूषत Aor. 3 pl. from ह्वे 1A.

Tr. Verily, when then shinest, thou lightest up the entire aerial region with thy rays. Thee, thus shining, O Usas, the Kanvas, desirous of wealth, invoke with prayers.

No. 5

MANḌALA I SŪKTA 116

This Sūkta and 117–125 and rks 1–5 of 126 and IX. 74 are ascribed to Kakṣivat, son of Dīrghatamas by Uśij, a servant-girl, by Kātyāyana; Kakṣivat calls himself an औशिज, I. 119. 4; 122, 4, and a पज्रिय I. 116. 7: 117. 6; 120. 5; of the family of the पज्राः and कक्षीवन्तः I. 126. 4, 5, but his connection with दीर्घतमस् in the manner stated by the सर्वा० is not supported by the RV. कक्षीवत् himself is a legendary figure in the RV like मनु and वसिष्ठ (cf. I. 18. 1; 112. 11; IV. 26. 1; VIII. 9. 10, X. 25. 10; 61. 16; 143. 1) and so is औशिज (IV. 21. 6, 7: V. 41. 5 &c.) The historical कक्षीवत्, the recipient of the bounties of king Svanaya Bhāvya, recorded in I. 126 refers to his family as the पज्राः and

कक्षीवन्तः and naturally glorifies his ancestor in I. 116. 7 and 117. 6. The hymn is addressed to the Asvins, whose cult appears to have rested very much, like that of the modern नृसिंह-सरस्वती, on the miracles attributed to them. About fifty-two whole hymns have been addressed to them in the RV, which would show their popularity and in most of them there is a repetition of these miracles. Obviously some of these passages merely condense what occurs with greater detail elsewhere; but the discrepancies in these passages are worth looking into, as they are likely to give clues for distinguishing the earlier from the later version of a legend: see notes on rc 11.

सप्तदशेऽनुवाके पञ्च सूक्तानि । तत्र नासत्याभ्यामिति पञ्चविंशत्यृचं प्रथमं सूक्तम् । उशिक्संज्ञायामङ्गराजस्य महिष्या दास्यां दीर्घतमसोत्पादितः कक्षीवानस्यं सूक्तस्य ऋषिः । त्रिष्टुप् छन्दः । आश्विनौ देवता । तथा चानुक्रान्तम् । नासत्याभ्यां पञ्चाधिका कक्षीवान्दैर्घतमस उशिक्प्रसूत आश्विनं वा इति । तुह्मादिपरिभाषयेदमादीनि पञ्च सूक्तान्यश्विदेवत्यानि । प्रातरनुवाकस्याश्विने क्रतौ त्रैष्टुभे छन्दसि इदमादीनि त्रीणि सूक्तानि । अथाश्विन इति खण्डे सूत्रितम् । ग्रावाणेव नासत्याभ्यामिति त्रीणि (आ० ४-१५) इति । आश्विनशस्त्रे चैतानि शस्यानि प्रातरनुवाकन्यायेन (आ० ६-५) इत्यतिदिष्टत्वात् ॥

Verse 1

नासत्याभ्याम् । बर्हिःऽइव । प्र । वृञ्जे । स्तोमान् । इयर्मि ।
अभ्रियाऽइव । वातः ॥ यौ । अर्भगाय । विऽमदाय । जायाम् ।
सेनाऽजुवा । निऽऊहतुः । रथेन ॥ १ ॥

नासत्याभ्याम् बर्हिरिव प्र वृञ्जे स्तोमान् इयर्मि
अभ्रियेव वातः यौ अर्भगाय विमदाय जायाम्
सेनाजुवा न्यूहतुः रथेन × [माँ]

बर्हिरिव यथा कश्चिद्यजमानो यागार्थं बर्हिः प्रवृञ्जे प्रकर्षेणान्यूनानतिरिक्तं यागाय पर्याप्तं दर्भं वृङ्क्ते छिनत्ति । संपादयतीति यावत् । एवमहं नासत्याभ्यामश्विभ्यां स्तोमान्स्तुतीरियर्मि । संपादयामि । एतदेव विशदीक्रियते । अभ्रियेव । यथाभ्रियाण्यभ्रेषु मेघेष्ववस्थितान्युदकानि वातो वायुर्वर्षणार्थं बहुशः प्रेरयति एवमहमश्विभ्यां स्तोत्राणीयर्मि । बहुशः प्रेरयामि । कीदृशावाश्विनौ । अर्भगाय बालाय स्वयंवरलब्ध-

भार्याय विमदायैतत्संज्ञाय राजर्षये मध्येमार्गं स्वयंवरार्थमागतैस्तामलभमानैरन्यैर्नृपैः सह योद्धुमशक्नुवतेपि तस्मै सेनाजुवा शत्रुसेनायाः प्रेरकेण शत्रुभिर्दुष्प्रापेण रथेन यावश्विनौ जायां भार्यां *परैरनाक्रान्तां न्यूहतुः शत्रून्निहत्य तदीयं गृहं प्रापयामासतुः। ताभ्यामित्यर्थः। नासत्याभ्याम्। सत्सु भवौ सत्यौ। न सत्यावसत्यौ। न असत्यौ नासत्यौ। नञ्राण्नपादित्यादिना नञः प्रकृतिभावः। अव्ययपूर्वपदप्रकृतिस्वरत्वम्। बृञ्जे। बृजी वर्जने। आदादिकः। इदित्त्वान्नुम्। लोपस्त आत्मनेपदेष्विति तलोपः। इयर्मि। ऋ गतौ। जौहोत्यादिकः। अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वम् अभ्यासस्यासवर्ण इतीयङ्। अभ्रियेव। समुद्राभ्रादुघ इति भवार्थे घः। घस्येयादेशः। शेश्छन्दसि बहुलमिति शेर्लोपः। अर्भगाय। अर्तिगृभ्यां भन (उ० ३-१५२) इत्यर्तेर्भन्। अर्भ एवार्भकः। संज्ञायां कन्। (पा० ५-३-८७)। छान्दसो गकारः। अपर आह। अर्भमल्पं गायति शब्दयतीत्यर्भगः। कै गै शब्दे। गापोष्टक्। (पा० ३-२-८)। आतो लोप इटि चेत्याकारलोपः। तदेतत्पदकृतः शाकल्यस्याभिमतम्। सेनाजुवा। जु इति सौत्रो धातुर्गत्यर्थः। अस्मादन्तर्भावितण्यर्थात् क्विब्वचिप्रच्छीत्यादिना क्विब्दीर्घौ। तन्वादित्वादुवङ् (पा० ६-४-७७)। न्यूहतुः। वह प्रापणे। लिट्यृतुसि यजादित्वात्संप्रसारणम्। यद्वृत्तान्नित्यमिति निघातप्रतिषेधः॥

ना॑ सत्याभ्याम् बर्हि॑: इव प्रवृञ्जे. नासत्य, like दस्र, is a constant epithet of the अश्विनौ. It is derived from न and असत्य i. e. not deceitful, true. Later नासत्य and दस्र were treated as their names. वृज् to strew, to spread. बर्हिरिव प्रवृञ्जे. Here is another regular उत्प्रेक्षा, chanting of the hymn itself being likened to the spreading of the grass. स्तो॑मान् इयर्मि. स्तोम (स्तु) a hymn, in later ritual, a hymn set to music. इयर्मि, from ऋ 3 P., to set in activity, to send forth; cf. वाचं नाव इव इयर्ति II. 42. 1. सुष्टुतिं इयर्ति VIII. 12 9. अभ्रि॑येव वा॑तः. अभ्रियाणि storm-clouds. अ॑र्भगाय विमदा॑य. अर्भग occurs only here and probably means the same as अर्भक॑ (but the accent differs), which means, extremely young, cf. नहि वः अस्ति अर्भकः देवासः न कुमारकः VIII. 30. 1; also 69. 15; विमद (pr. n.) appears about seven times in the legends of the Aśvins; in other places as the name of a Vedic poet. In I 51. 3 इन्द्र is mentioned as bringing wealth to विमद. In I. 112. 19: 117. 20; X. 35. 7; 65. 12 the Aśvins bestow a wife or wives on him. In VIII. 9. 15 Vimada along with Vatsa is mentioned as being protected with the

*परैरनुक्रान्ताम् इत्यादर्शः।

healing remedies of नासत्यौ. In X. 39. 7, the bride of विमद has been mentioned as the योषा or योषणा (beloved) of पुरुमित्र, I. 117. 20 and X. 39. 7 ; and her name has been mentioned as कमधू in X. 65. 12. Another विमद apparently is mentioned in the tenth Mandala as the author of hymns 20 to 26 and the सर्वानुक्रमणी styles him as the son of इन्द्र. It is probably this Vimada who might have been referred to in I. 51. 3. सेनाजुवा (from सेना and जू to move violently, to drive, to send ; cf. (नभोजू , वयोजू , वसूजू , यातुजू) occurs only here and the meaning is far from clear. सेना means army as well as a weapon like the javelin or arrow ; it prob. means सेना इव जवते इति " rushing forth like an arrow ". रथेन न्यूहथुः न्यूहथुः from वह् with नि to bring home ; cf. पत्नीः विमदाय न्यूहथुः I. 112. 19 ; पेदवे अश्व न्यूहथुः I. 117. 9 ; भुज्युं निवहन्ता I. 119. 4 ; इषं ऊर्जं दाशुषे नि वहन्ति VI. 65. 3. *cd* contain a description of a miracle, which is continued in *ab* of rc 2.

Tr. I as it were spread the holy grass for the true ones (Aśvins); I send forth hymns as the wind the storm-clouds ; (to those Aśvins) who, darting forth like arrows, brought home on their chariot the bride for the young Vimada.

Verse 2

वीळुपत्मंऽभिः । आशुहेमंऽभिः । वा । देवानाम् । वा । जूतिऽभिः ।
वीळुपत्मभिः आशुहेमभिः वा देवानाम वा जूतिभिः
शाशदाना ॥ तत् । रासभः । नासत्या । सहस्रम् । आजा ।
शाशदाना तत् रासभः नासत्या सहस्रम आजा
यमस्य । प्रऽधने । जिगाय ॥ २ ॥
यमस्य प्रधने जिगाय

वीळुपत्मभिः । वीळु इति बलनाम । बलवदुत्पतनैः आशुहेमभिः शीघ्रगमनैः । वाशब्दः समुच्चये । हे नासत्याश्विनौ एवंभूतैरश्वैश्च देवानामिन्द्रादीनां जूतिभिः प्रेरणैश्च शाशदाना शाशयमानयोरत्यर्थं प्रेर्यमाणयोर्युवयोर्वाहनभूतो यो रासभः प्रजापतिना दत्तः स यमस्य वैवस्वतस्य प्रीतिकरे प्रधने प्रकीर्णधनोपेते आजा आजौ संग्रामे तच्छत्रूणां सहस्रं जिगाय जितवान् । वैवस्वतो हि बहूनां मरणहेतुना संग्रामेण

तुष्टो भवति । यद्वा । जेतव्यत्वेन प्रजापतिना निहितसृक्सहस्रं शीघ्रगमनयुक्तो रासभो जिगाय जयेनालभत । अन्येभ्यो देवेभ्यः पूर्वमेवाजिं प्राप्य युवां जयं प्रापयामास । तथा चास्मिन्नर्थे प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छत् (ऐ० ब्रा० ४-७) इत्यादिकं ब्राह्मणमनुसन्धेयम् । वीळुपत्मभिः । वीळु बलवत्पतन्तीति वीळुपत्मानः । आशुहेमभिः । आशु शीघ्रं हिन्वन्ति गच्छन्तीत्याशुहेमानः तैः । हि गतौ वृद्धौ च । अन्येभ्योऽपि दृश्यन्त इति मनिन् । कृदुत्तरपदप्रकृतिस्वरत्वम् । जूतिभिः । ऊतियूति-जूतीत्यादिना क्तिन उदात्तत्वम् । शाशदाना । शदॢ शातने । अत्र गत्यर्थो धातूनामनेकार्थत्वात् । अस्माद्यङ्लुन्ताल्लटः शानच् । तस्य च्छन्दस्युभयथेत्यार्धधातुकत्वात् श्यन्भावः । अतोलोपयलोपौ । अभ्यस्तानामादिरित्याद्युदात्तत्वम् । सुपां सुलुगिति षष्ठ्याः पूर्णसवर्णदीर्घः । आजा । तेनैव सूत्रेण ङादेशः । जिगाय । जि जये । सन्लिटोर्जेरित्यभ्यासादुत्तरस्य कुत्वे गकारः ॥

वीळुपत्मभिः आशुहेमभिः. अश्वैः or विभिः is to be supplied after this, preferably the latter, the word पत्मन् would refer to the peculiar carriers of the Aśvins that have been described as winged. They have been mentioned as ककुहः in I. 181. 5; 184. 3; IV. 44. 2; V. 73. 7; 75. 4; VIII. 6. 48; and as वयः in I. 46. 3; 104. 1; 118. 5; I. 118. 5; IV. 43. 6 etc. वीळु (इ) strong, firm cf. वीड्वङ्ग I. 118. 9; वीळू आयुधा I. 39. 2. वीळु चित् आरुजत्नुभिः I 6. 5: व्रीळु चित् दृढा ऋजन् I. 71. 2. पत्मन् = पत्र, wing. आशुहेमा (आशु + हि + मन्), a verbal noun from हि to urge, to drive; the word occurs in four other passages as an epithet of Agni or अपाम् नपात् and Gr. and Geld. in these passages understand the word आशु in the sense of race-horses as elswhere, e. g. I. 37. 14, II. 34. 3 etc. देवानाम् वा जूतिभिः शाशदाना. जूति instigation or backing. शाशदाना pass. perf. part from शद् to be victorious or triumphant; cf. इन्द्रः प्र खा मर्तं अतिरत् शाशदानः I. 33. 13; त्वया वरुणः मित्रः अर्यमा शाशद्रे I. 141. 9. Here is an adjectival clause which hangs on the preceding and completes the legend begun in 1 *c d*; cf. I. 48. 6 and 13. The second distich introduces a new miracle. तत् is may be connected with सहस्रम्; it is rather to be understood as an introductory adverb with an undefined sense, cf. I. 32. 12; I. 13. 17; VII. 86. 2; X. 95. 5; 118. 2. रासभः यमस्य आजा प्रधने सहस्रम् जिगाय. The ass of the Aśvins is barely referred to in I. 34.

9; I. 162. 21; III. 54 5 and VIII. 85. 7, besides other passages. I. 162. 21 contains a somewhat bathetic glorification of a war-horse, who has been mentioned as taking the place of the ass of the Aśvins. In III. 53. 5 there is apparently a humorous reference to the ass. In IX 85. 7 it is not in a tournament but on an every day visit that the ass is yoked to their chariot; this would appear also from I. 62. 21 and III 53. 5 and खिल 1. 2. 5; so then from the RV itself very little is known about the race run by Aśvins' ass. The ऐ. ब्रा. (४. ७–८) and the कौषी. ब्रा. (१८. १) mention this race as figuring in Sūryā's marriage. आजा is loc. s. of आजि (अज्) a race, usually the chariot race, and hence, battle; cf. हिन्वन्ति अश्वं अरणं न नित्यं ज्यावाजं परिणयन्ति आजौ III 53. 24. धियः आजिं न जग्मुः IV. 41. 8. प्रधन means here a tournament acc. to Gr. and Geld, supposed to be either arranged by Yama or for him; in either case between आजे and प्रधने there cannot be much distinction. प्रधन occurs in four other places. In X. 102. 5 (मुद्गलः गवां सहस्रं प्रधने जिगाय) and 154. 3, (ये युध्यन्ते प्रधनेषु) where it occurs in the loc, it has been taken to mean a battle, while in I. 169. 2 (प्रधनस्य सातौ) and X. 99. 4 (प्रधन्यासु गोषु) it clearly means the prize of war. It would appear that the first meaning is due to a misunderstanding. The loc. shows 'occasion' and in all passages the word should mean the prize of victory. यमस्य has been connected with आजौ or प्रधने, and Yama is supposed to have started the tournament. There is no authority in the two Brāhmanas for bringing in the name of Yama. यम appears in the RV in four places as meaning a charioteer and once as nose-string; cf. यमिष्ठासः सारथयः I. 55. 7; सं या रश्मा इव यमतुः यमिष्ठा (मित्रावः) VI. 67. 1; रथानां यमं VIII. 103. 10; वाजिनं यमं इन्द्रं VIII. 24. 22. In V. 61. 2 (नसोः यमः) it means the nose-string. यमस्य निधने therefore would mean 'on account of the prize for chariot-driving'.

Old. thinks that *ab* contain a description of how the competitors of the Aśvins ran the race, their several means being birds, horses and the speed that belongs to Gods. शाशदान he understands as "over-confident" (cf. VII. 98. 4 साक्षाम नान्

बाहुभिः शाशदानान्; 10. 24 मायया शाशदानां स्त्रियम्). He thinks that the original शाशदानाः has been changed to शाशदाना (du.) by a misunderstanding which is intelligible in an Aśvin hymn. As an alternative explanation he suggests that *ab* might contain the several attempts of the Aśvins themselves and *cd* the successful one with their रासभ. Geld. points out that the part. शाशदाना can take the place of a verb acc. to Pān. III. 2. 106.

The Aśvins have about a thousand (actually 568) verses composed in their honour in the ṚV. The legend about the chariot-driving competition tries to explain how they came to have so many rks addressed to them.

Tr.—Triumphing either on account of your (steeds) with strong wings that were spurred to activity, or on account of the backing of the gods. Then (again), your ass, O true ones, won the thousand (rks) by way of prize in a chariot-driving competition.

Verse 3

तुग्रः । ह । भुज्युम् । अश्विना । उदऽमेघे । रयिम् । न । कः ।
तुग्रः ह भुज्युम् अश्विना उदमेघे रयिम् न कः
चित् । ममृऽवान् । अव । अहाः ॥ तम् । ऊहथुः । नौभिः ।
चित् ममृवान् अव अहाः तम ऊहथुः नौभिः
आत्मन्ऽवतीभिः । अन्तरिक्षप्रुत्ऽभिः । अपऽउदकाभिः ॥ ३ ॥
आत्मन्वतीभिः अन्तरिक्षप्रुद्भिः अपोदकाभिः *[वाँ]

अत्रेयमाख्यायिका। तुग्रो नामाश्वितोः प्रियः कश्चिद्राजर्षिः स च द्वीपान्तरवर्तिभिः शत्रुभिरत्यन्तमुपद्रुतः सन् तेषां जयाय स्वपुत्रं भुज्युं सेनया सह नावा प्राहीषीत्। सा च नौर्मध्येसमुद्रमतिदूरं गता वायुवशेन भिन्नासीत्। तदानीं स भुज्युः शीघ्रमाश्विनौ तुष्टाव। *स्तुतौ च तौ सेनया सहितमात्मीयासु नौष्वारोप्य पितुस्तुग्रस्य समीपं त्रिभिरहोरात्रैः प्रापयामासतुरिति। अयमर्थः इदमादिकेन तृचेन प्रतिपाद्यते। हशब्दः प्रसिद्धौ। तुग्रः खलु पूर्वं शत्रुभिः पीडितः सन् तज्जयार्थमुदमेघे। उदकैर्मिह्यते सिच्यते †इत्युदमेघः समुद्रः। तस्मिन् भुज्युमेतत्संज्ञं प्रियं पुत्रमवाहाः।

*तौ च स्तुतौ इत्यादर्शः। †त्युदकमेघ इत्यादर्शः।

नावा गन्तुं पर्यत्याक्षीत् । तत्र दृष्टान्तः । मघवान् म्रियमाणः सन्धनलोभी कश्चिन्मनुष्यो रयिं न । यथा धनं परित्यजति तद्वत् । हे आश्विनौ तं च भुज्युं मध्येसमुद्रं निमग्नं नौभिः पितृसमीपमूहथुः । ऊहथुः प्रापितवन्तौ । कीदृशीभिः । आत्मन्वतीभिरात्मीयाभिः । युवयोः स्वभूताभिरित्यर्थः । यद्वा §धृतिरात्मा । अवधारणवतीभिरित्यर्थः । अन्तरिक्षप्रुद्भिः । अतिस्वच्छत्वादन्तरिक्षे जलस्योपरिष्टादेव गन्त्रीभिः । अपोदकाभिः सुश्लिष्टत्वादपगतोदकाभिः । अप्रविष्टोदकाभिरित्यर्थः । उदमेवे । मिह सेचने । कर्मणि घञ् । न्यङ्क्वादीनां च (पा० ७-३-५३) इति कुत्वम् । उदकस्योदः संज्ञायाम् (पा० ६-७-५७) । थाथादिनोत्तरपदान्तोदात्तत्वम् । मघवान् । मृङ् प्राणत्यागे । लिटः क्वसुः । क्वादिनियमात्प्राप्तस्येटो वस्वेकाजाद्धसामिति नियमादभावः । अहाः । ओहाक् त्यागे । लुङि तिपि च्लेः सिच् । आगमानुशासनस्यानित्यत्वात्सागिटौ न क्रियेते । बहुलं छन्दसीतीडभावः हल्ङ्याब्भ्य इति तिलोपः । रुत्वविसर्गौ । यद्वा मन्त्रे घसेति च्लेर्लुक् । च्लेर्लुप्तत्वादिण् न क्रियते । नौभिः । सावेकाच इति विभक्तेरुदात्तत्वम् । आत्मन्वतीभिः । आत्मना मतुप् । मादुपधाया इति वत्वम् । अनो नुट् । नलोपः । ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वम् । अन्तरिक्षप्रुद्भिः । प्रुङ् गतौ । क्विप् चेति क्विप् ॥

तुग्रः ह भुज्युम् अव अहाः. The story of भुज्यु, son of तुग्र, abandoned by his father in a flooded river (अर्णस्), has been referred to in I. 112. 6. 20, here in three rks, and in eight more places. The story is told in fulness here and in I. 182. 5, 6,. 7. Irn some of the descriptions of the rescue भुज्यु's father is not mentioned at all. Sāy. says that तुग्र had sent his son with an army across the sea, not that be had cast him away; but तुग्र himself has been mentioned as having been received by the Aśvins once more into their favour 117. 14. Further, he had wounded his son with a त्यजस् (weapon? 119. 9) and he had cast him away, अवविद्ध VII. 69. 7, जाहित VIII. 5. 22. This explains why he was for sometime banished from their favour by the Aśvins. Instead of the father दुरेवासः (wicked) सखायः have been mentioned in VII. 69. 7 as casting भुज्यु into the sea. After the rescue भुज्यु is brought home (अस्तं 116. 5 ; VIII. 5. 22), to his elders (पितृभ्य आ I. 119. 8); that means by this time the father had repented and the Aśvins had readmitted him to their favour. The वृक्ष in VI. 62. 6 and the रथ (117. 15) are metaphoricals expres-

§धृतिरात्मा । धारणवतीभिः इत्यादर्शः

sions like the नावः here for the winged horses. अहाः is irregula Aor. 3 S, the terminatio n त् being dropped after the base अहास् (S variety). उदमेघे (मिह्-मिघ्); Gr.; in a down-pour of rain Geld.. in a mass of water. A large expanse of water can certainly be spoken of as a cloud. ममृवांन्, perf. part. from मृ, ought to mean 'one that has died', but it actually means 'one that is dying' cf. X. 39. 9 (ममृवांसं रेभं उत् ऐरयतम्). The simile of a dying man throwing away his money shows the insensate nature of the father's act rather than his love for his son. आत्मन्वंतीभिः Sāy.'s rendering ('your own') misses the point. आत्मन्वंती नौः (an animate ship) is a poetic expression for a bird as पद्वत् अवसं (the four-legged food) is for the cow; cf. I. 182. 5, आत्मन्वंतं प्लवम्. अन्तरिक्षप्रुद्भिः (from प्रु, later प्लु) to go swiftly, to stream, to flow swiftly or with undulations. अपोदक water-tight.

Tr. Oh Aśvins, Tugra abandoned Bhujyu in a (vast) cloud of water as should a dying (miser his hoards); you carried him (to a safe place) in water-tight animate boats plying in the sky.

Verse 4

तिस्रः । क्षपः । त्रिः । अहा । अतिव्रजद्भिः । नासत्या ।
तिस्रः क्षपः त्रिः अहा अतिव्रजद्भिः ना सत्या
भुज्युम् । ऊहथुः । पतद्भिः ॥ समुद्रस्य । धन्वन् । आर्द्रस्य ।
भुज्युम् ऊहथुः पतद्भिः समुद्रस्य धन्वन् आर्द्रस्य
पारे । त्रिभिः । रथैः । शतपद्भिः । षट्ऽअश्वैः ॥ ४ ॥
पारे त्रिभिः रथैः शतपद्भिः षट्ऽअश्वैः ॥

हे नासत्यौ सेनया सहोदके निमग्नं भुज्युं तिस्रः क्षपस्त्रिसंख्याका रात्रीस्त्रिरहा त्रिवारमावृत्तान्यहानि च अतिव्रजद्भिरतिक्रम्य गच्छद्भिरेतावन्तं कालमतिव्याप्य वर्तमानैः पतद्भिः पतद्भिस्त्रिभिस्त्रिसंख्याकै रथैरूहथुः। युवामूहवन्तौ। क्रोति चेदुच्यते। समुद्रस्याम्बुराशेर्मध्ये धन्वन् धन्वनि जलवर्जितप्रदेशे आर्द्रस्योदकेनार्द्रीभूतस्य समुद्रस्य पारे तीरदेशे च। कथंभूतै रथैः। शतपद्भिः शतसंख्याकैश्चक्रलक्षणैः पादैरुपेतैः। षळश्वैः षड्भिरश्वैर्युक्तैः। तिस्रः। त्रिचतुरोः स्त्रियामिति त्रिशब्दस्य तिस्रादेशः। स

चान्तोदात्तः । अचि र कृत इति रेफादेश उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वम् । क्षपः । विभक्त्यन्तस्य छान्दसं ह्रस्वत्वम् । यद्वा । शस्यात् इति योगविभागादधातोरप्याकारलोपः । अहा । शेश्छन्दसि बहुलमिति शेर्लोपः । पतङ्गैः । पत्लृ गतौ । पतेरङ्गच् (उ० १-११८) । धन्वन् । धविर्गत्यर्थः । इदित्वान्नुम् । कनिन्युवृषीत्यादिना कनिन् । सुपां सुलुगिति सप्तम्या लुक् । शतपद्भिः । शतं पादा येषाम् । संख्यासुपूर्वस्येति पादशब्दस्यान्त्यलोपः समासान्तः । अयस्मयादित्वेन भत्वात् पादः पदिति पद्भावः । यद्वा । पादसमानार्थः पच्छब्दः प्रकृत्यन्तरं द्रष्टव्यम् ॥

तिस्रः क्षपः त्रिः अहा अति व्रजद्भिः. क्षपः from क्षप् night; cf. पूर्वीः क्षपः (many nights) IV. 16. 19. त्रिः अहा must give a meaning corresponding to तिस्रः क्षपः and it is proposed to read त्री for त्रिः or to understand त्रि. तिस्रः as nine (days and night); but Old. points out that त्रिः does occur elsewhere in the sense of त्री (णि) or त्रयः 'taken thrice'; cf. III. 56. 5, 8 (सिन्धवः त्रिः, त्रि रोचनानि); also IV. 1. 7; 53. 5; VIII. 49. 9. अति (व्रजद्भिः) throughout, extending over. धन्वन् = धन्वानि waste land, desert. धन्वन् (धन्व् to flow, to run), cf. अकर्धन्वानि अत्येतवै V. 83. 10. आर्द्रस्य पारे. आर्द्र from अर्द् to wet; cf. आर्द्रात् आ शुष्कं II. 13. 6. शतपद्भि. षळश्वै. त्रिभि. रथैः It is difficult to harmonize this account with that in I. 182. 6, where four boats have been mentioned. The boats metaphorically stand for the chariots to which the bird-horses of the Aśvins are yoked. In शतपद्भिः the word शत is not to be understood seriously; it stands for "many".

Tr. You carried Bhujyu, Oh Aśvins, with birds that flew throughout three nights and three days, with three chariots of six horses and a hundred legs, across the wet (sea) on to the sands of the sea.

Verse 5

अनारम्भणे । तत् । अवीरयेथाम् । अनास्थाने । अग्रभणे । समुद्रे ॥
अनारम्भणे तत् अवीरयेथाम् अनास्थाने अग्रभणे समुद्रे

यत् । अश्विनौ । ऊहथुः । भुज्युम् । अस्तम् । शतऽअरित्राम् ।
यत् अश्विनौ ऊहथुः भुज्युम् अस्तम् शतारित्राम्

नावम् आतस्थिऽवांसम् ॥ ५ ॥
नावम् आतस्थिवांसम्

*अश्विनौ अनारम्भण आलम्बनरहिते समुद्रे तत्कर्मावीरयेथाम् विक्रान्तं कृतवन्तौ युवाम्। अनारम्भणत्वमेव स्पष्टीकरोति। अनास्थाने। आस्थीयतेऽस्मिन्नित्यास्थानं भूप्रदेशः। तद्रहिते। स्थातुमशक्ये जल इत्यर्थः। अग्रभणेऽग्रहणे। हस्तेन ग्राह्यं शाखादिकमपि यत्र नास्ति तस्मिन्नित्यर्थः। किं पुनस्तत्कर्म। भुज्युं समुद्रे मग्नं शतारित्रां बह्वरित्राम्। यैः काष्ठैः पार्श्वतो बद्धैर्जलालोडने सति नौः शीघ्रं गच्छति तान्यरित्राणि। ईदृशी नावमातस्थिवांसमास्थितवन्तमारूढवन्तं कृत्वा अस्तम्। गृहनामैतत्। पितुस्तुग्रस्य गृहं प्राति यदूहथुः तत्प्रापणमन्वैर्दुःशकं युवां समुद्रमध्ये कृतवन्तावित्यर्थः। अनारम्भणे। आरभ्यत इत्यारम्भणम्। कृत्यल्युटो बहुलमिति कर्मणि ल्युट्। नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम्। अवीरयेथाम्। शूरवीर विक्रान्तौ। चुरादिरात्मनेपदी। अनास्थानाग्रभणयोः पूर्ववल्ल्युट्स्वरौ। अयं तु विशेषः। ह्वयहीर्भ इति भत्वम्। अस्तम्। अस्यतेऽस्मिन्सर्वमित्यस्तं गृहम्। असिहसीत्यादिना तन्प्रत्ययः। शतारित्राम्। ऋ गतौ। अर्तिलूधूसू (पा० ३-२-१८४) इति करण इत्रप्रत्ययः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्॥

अनारम्भणे अनास्थाने अग्रभणे समुद्रे अवीरयेथाम. The scene of Aśvin's exploit has been described in nearly the same words in I. 182. 6: (अनारम्भणे तमसि). आरम्भण is the same as the later आलम्बन support; cf. आरम्भणं कतमत्स्वत् X. 81. 2; also वाचारम्भणं विकारो नामधेयम् छा. उ. VI. आस्थान in अनास्थान is used like अधिष्ठान in X. 81. 2, meaning 'a place to stand on.' अग्रभण without anything to catch at; from ग्रभ्, which is an older form of ग्रह्. वीरयते to act the part of a hero, to perform a heroic deed; cf. इमं इन्द्रं अनु वीरयध्वम् X. 103. 6. अस्तं ऊह. थुः, अस्तं 'home' often used with इ, गा or नक्ष् 'to go home'. In the Asvin legend अस्तं वह् appears here and in VIII. 3. 23. शतारित्रा.म्. अरित्र (ऋ) an oar; cf. अरित्रं वा दिवः पृथु (your oar is broader than heaven) I. 44. 8. The expression शतारित्रा नौः here would correspond with शतपद् रथः in verse 4 and the legs of the winged horses of the Aśvins form the ores of the metaphorical boats.

Tr. It was an exploit performed on the sea without a support, without a place to stand on, without a thing to catch at, when you, Aśvins, carried Bhujyu home, seated on a hundred-oared boat.

---

*आदर्शे हे आश्विनौ इति पाठः।

Verse 6

यम् । अश्विना । ददथुः । श्वेतम् । अश्वम् । अघऽअश्वाय । शश्वत् ।
यं॑म अश्विना ददथुः श्वेत॑म अ॑श्वम अघा॑श्वाय श॒श्व॒त्
इत् । स्वस्ति ॥ तत् । वाम् । दात्रम् । महि । कीर्तेन्यम् । भूत् ।
इ॑त् स्वस्ति॑ त॑त वाम् दा॒त्र॑म म॑हि॑ कीर्ते॑न्यम् भूत्
पैद्वः । वाजी । सदम् । इत् । हव्यः । अर्यः ॥ ६ ॥
पैद्व॑ः वाजी॑ स॒दम् इ॑त् ह॒व्यः अर्य॑ः

अत्रेदमाख्यायते । पेदुर्नाम कश्चित् स चाश्विनौ तुष्टाव । तस्मै प्रीतौ कंचित् श्वेतवर्णमश्वं दत्तवन्तौ । स चाश्वस्तस्य प्रौढं जयं चकारेति । एतदत्र प्रतिपाद्यते । अश्विनौ युवामघाश्वायाहन्तव्याश्वाय पेदुनाम्ने राजर्षये यं श्वेतवर्णमश्वं ददथुः दत्तवन्तौ सोऽश्वस्तस्मै स्वस्ति जयलक्षणं मङ्गलं शश्वदित् नित्यमेव चकार । वां युवयोस्तद्दात्रं दानं महि महदतिगम्भीरम् अत एव कीर्तेन्यं सर्वैः कीर्तनीयं प्रशस्यं भूत् अभूत् । तस्मात् पैद्वः पेदोः संबन्धी पतनशीलः शीघ्रगामी वाय्यः शत्रूणां प्रेरयिता युद्धेषु प्रेरयितव्यो वा वाजी वेजनवान् सोऽश्वः सदमित् सदेव हव्योऽस्माभिरव्याह्वातव्यः । दात्रम् । ददातेर्भाव औणादिकस्त्रप्रत्ययः । महि मह पूजायाम् । इन् सर्वधातुभ्य इतीन् । कीर्तेन्यम् । कृत संशब्दने । कृत्यार्थे तवैकेन्केन्यत्वन इति केन्यप्रत्ययः । कृत इद्धातोरितीत्वम् । भूत् । बहुलं छन्दस्यमाङ्योगेऽपीत्यडभावः । पैद्वः पेदोः संबन्धी । तस्येदमित्यण् । छान्दसो वर्णलोपः । हव्यः । ह्वयतेरचो यदिति । यत् । बहुलं छन्दसीति संप्रसारणम् । गुणो धातोस्तन्निमित्तस्यैवेत्यवादेश । अर्यः । ऋ गतौ अदन्याद्यश्च (उ० ४-११९) इत्यौणादिको यत् । व्यत्ययेनान्तोदात्तत्वम् ॥

Miracle no. 4. पेदु received from the Aśvin's a white horse which is described in I. 117. 9 as आशुं अश्वं सहस्रसा वाजिनं अपतीतं अहिहनं श्रवस्यं तरुत्रं. He is called अर्यः जोहूत्रं (cf. अर्य. हव्यः) in 118 9. In IX. 88. 4 सोम is mentioned as पैद्वः न अहिनाम्नां (of serpentine nature or form) हन्ता. So then it is this serpent-killing faculty of the horse of पेदु which has been emphasised in *d.* अघाश्वाय. अघ and अंहस् are cognate words. अघ means one who does harm; cf. अघः वृकः I. 42. 2; अघाः अतायः VI. 48. 16; अघाय रिपवे I. 189. 5. शश्वत् इत् स्वस्ति. स्वस्ति n. or f. (from सु + अस्ति) a blessing. शश्वत् (1) perpetual, lasting; (2) every, entire; cf. (1) शश्वते वीर्याय III. 32. 5; प्रथमा शश्वतीनाम् I. 113. 8. (2) शश्वते पणिं VI

61. 1; शश्वती नारी VIII. 1. 34. दात्रं = दानं. कीर्तेन्यं = कीर्तनीयं; एन्य is an older termination than अनीय; cf. वरेण्य (वृ), जेन्य (जि) also द्विषेण्य, युधेन्य, दृशेन्य, दिदृक्षेण्य etc. सदं इत् त = सदैव; cf. सदं इत् पाहि I. 27. 3. सदं इत् दह I. 36. 20 etc. अर्यः ह्व्यः cf. अर्यः जोह्वत्र 118. 9, also चर्कृत्यं अर्यः IV. 38. 2. अर्य. geni. s. from अरिः अरि, Gr. pious; Old. Árya; Geld. rich or powerful. In any case it refers to the patron, the sacrificer. ह्व्यः from हु to invoke.

Tr. The white horse which you gave, Aśvins, to him whose horse was mischievous, was a lasting blessing; that great gift of yours was one that ought to be glorified; the horse of Pedu is always an object of invocation to the patron.

Verse 7

युवम् । नरा । स्तुवते । पज्रियाय । कक्षीवते । अरदतम् । पुरम्ऽ
धिम् ॥ कारातरात् । शफात् । अश्वस्य । वृष्णः । शतम् ।
कुम्भान् । असिञ्चतम् । सुरायाः ॥ ७ ॥

युव'म नरा स्तुवते' पज्रिया य कक्षी'वते अरदतम् पु'रं-
धिम् कारोतरा'त् शफा'त् अ'श्वस्य वृ'ष्णः शत'म्
कुम्भा'न् असिञ्चतम् सु'रायाः *[म्भाँ]

अत्रेयमाख्यायिका । कक्षीवान्नृषिः पुरा तमसा तिरोहितज्ञानः सन् ज्ञानार्थमश्विनौ तुष्टाव । तस्मा अश्विनौ प्रभूतां धियं दत्तवन्ताविति । तदाह । हे नरा नेतारावश्विनौ युवं युवां पज्रियाय । पज्रा इत्याङ्गिरसाख्या । पज्रा वा अङ्गिरस इत्वाज्ञातत्वात् । तेषां कुले जाताय कक्षीवते । कक्षा रज्जुरश्वस्य । तद्वते तत्संज्ञाय । स्तुवते युवयोः स्तुति कुर्वते मह्यं पुरंधिं प्रभूतां धियं बुद्धिमरदतम् व्यलिखतम् । यथा सर्वार्थगोचरा भवति तथा कृतवन्तावित्यर्थः । अपि च कारोतरात् । कारोतरो नाम वैदलश्चर्मवेष्टितो भाजनविशेषः यस्मिन्सुरायाः स्रावणं क्रियते । लुप्तोपममेतत् । कारोतरादधा सुरायाः संपादकास्तां स्रावयन्ति एवमेव युवां वृष्णः सेचनसमर्थस्य युष्मदीयस्याश्वस्य शफात् खुरात् सुरायाः शतं कुम्भान् असंख्यातान्सुराघटानसिञ्चतम् । अक्षारयतम् । यद्वा । सिञ्चतिः पूरणार्थः । कारोतरस्थानीयायुष्मदीयाश्वखुरात् या सुरा प्रवहति तयासंख्यातान् घटानसिञ्चतम् । अपूरयतम् । ये जनाः सौत्रामण्यादिकर्मणि युष्मद्यागाय सुरां याचन्ते तेषामित्यर्थः । स्तुवते । स्तौतेर्लटः शतृ । अदादित्वाच्छपो लुक् । शतुरनुम इति विभक्तेरुदात्तत्वम् । पज्रिया । पज्र-

शब्दातच्छैषिको घच्। कक्षीवते। आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवदिति निपातनात्कक्ष्याशब्दस्य संप्रसारणं वत्वं च। अरदतम्। रद विलेखने। पुरंधिम्। पुरंधिर्बहुरिति यास्कः (नि० ६-१३)। पृषोदरादित्वात्पुरंधिभावः। यद्वा। पुरं पूरयितव्यं सर्वविषयजातमस्यां धीयतेऽवस्थाप्यत इति पुरंधिर्बुद्धिः। कर्मण्यधिकरणे चेति दधातेः क्विः प्रत्ययः। तत्पुरुषे कृति बहुलमिति बहुलवचनादलुक्। इदं तु व्युत्पत्तिमात्रम्। वस्तुतः पृषोदरादिरेव। असिञ्चतम्। षिचिर् क्षरणे। तौदादिकः। शेमुचादीनामिति नुम्॥

A mention of कक्षीवत् (son of उशिज्), whose family name is पाज्रिय (an off-shoot of the Angiras family) occurs in I. 18 1; 51. 13; 112. 11; 117. 6; IV. 26 1, VIII. 9. 10, IX. 74. 8; X. 25. 10; 61. 16; 143. 1; he appears to have been already a mythical figure. I. 51. 13 describes इन्द्र as giving the little वृचया to him. In IX. 74. 8 he is mentioned as being a hundred years old and X. 143. 1 mentions him as having been rejuvenated by the Aśvins. पुरन्धिम अरदतम्. रद् to tear, to grind; hence, open up (way, stream, gifts); cf. अध्वनः रदन्ति VII. 60. 4. नः सनि रदः VI. 61. 6; सिन्धून अरदत् X. 89. 7. पुरंधि (पृ, धा) Gr. wealth, Geld. blessing. But between the two there is little distinction, as wealth is a blessing; the two meanings form one common denotation; cf. सः नः पुरन्ध्यां भुवत् (may he be the cause of our wealth) I. 5. 3; (अश्विनौ) पुरन्धिं उप सृजथः I. 180. 6; for another sense see notes on सूनृता I. 48. 2. In rc. 13 it is either a proper name or an adj. अश्वस्य कारोतरात् शफात्. The horse's hoof has been metaphorically styled a कारोतर; cf. अश्व्यः वारः in I. 32. 12. कारोतर occurs only here and has been explained as a bamboo strainer covered with leather by Sāy. This miracle has been mentioned also I. 117. 6, only the सुरा is called there मधु It would appear that सुरा was not prohibited in those days; in later ritual although सुरा does appear to have a place in the sacrifice the manner how सुरा is used itself shows that its use was probibited; but although it was not prohibited, its use was regared as a vice cf. सुरा मन्युः। वैभिदिकः VII. 86. 6; दुर्मदासः न सुरायाम् VIII. 2 12.

Tr. You, Oh heroes, carved out a fortune for Kakṣīvat of Pajra (पज्र) family, who praised you, from the hoof of your

mighty horse, which proved a varitable liquor-strainer, you poured down a hundred pitchers of liquor.

Verse 8

हिमेन । अग्निम् । घ्रंसम् । अवारयेथाम् । पितुऽमतीम् । ऊर्जम् ।
हिमेन अग्निम घ्रंसम अवारयेथाम् पितुऽमतीम ऊर्जम्
अस्मै । अधत्तम् ॥ ऋबीसे । अत्रिम् । अश्विना । अवऽनीतम् ।
अस्मै अधत्तम् ऋबीसे अत्रिम् अश्विना अवनीतम्
उत् । निन्यथुः । सर्वऽगणम् । स्वस्ति ॥ ८ ॥
उत् निन्यथुः सर्वगणम् स्वस्ति

अत्रेदमाख्यानम् । अत्रिमृषिमसुराः शतद्वारे पीडायन्त्रगृहे प्रवेश्य तुषाग्निना बाधिषत । तदानीं तेन ऋषिणा स्तुतावश्विनावग्निमुदकेनोपशमय्य तस्मात्पीडागृहादविकलेन्द्रियवर्गं सन्तं निरगमयतामिति । तदेतत्प्रतिपाद्यते । हे अश्विनौ हिमेन हिमवच्छीतितेनोदकेन घ्रंसं दीप्यमानमग्नेर्बाधनार्थमसुरैः प्रक्षिप्त तुषाग्निमवारयेथाम् । युवां निवारितवन्तौ । शीतीकृतवन्तावित्यर्थः । अपि चास्मा असुरपीडया कार्श्यं प्राप्तायात्रये पितुमतीम् । पितुरित्यन्ननाम । अन्नयुक्तमूर्जं बलप्रद रसात्मकं क्षीरादिकमधत्तम् । पुष्ट्यर्थं प्रायच्छतम् । ऋबीसेऽपगतप्रकाशे पीडायन्त्रगृहेऽवनीतमवाङ्मुखतयासुरैः प्रापितमत्रिं सर्वगणम् । गणः समूहः । सर्वेषामिन्द्रियाणां पुत्रादीनां वा गणेनोपेतं स्वस्ति अविनाशो यथा भवति तथोन्निन्यथुः । तस्माद्गृहादुद्गमय्य युवां स्वगृहं प्रापितवन्तौ । यद्वा । हिमेन शीतेन वृष्टयुदकेनाग्निमग्निवत्तीक्ष्णं घ्रंसम् अहर्नामैतत् । सामर्थ्यान्निदाघकालीनमहरवारयेथाम् । तस्याह्नस्तैक्ष्ण्यं निवारितवन्तौ । अपि चास्मा अग्नये पितुमतीं चरुपुरोडाशादिलक्षणान्नोपेतमूर्जं बलकरं रसात्मकमुपस्तरणाभिघारणात्मकं घृतमधत्तम् । वृष्टयुत्पादनेनाग्नेर्यागार्थं हवीषि निष्पादितवन्तावित्यर्थः । ऋबीसेऽपगततेजस्के पृथिवीद्रव्येऽवनीतमोषधीनामुत्पादनायाधस्तान्नीतम् । पार्थिवाग्निना परिपक्वा उदकेन क्लिन्ना ह्योषधिवनस्पतयो विरोहन्ति । अत्रिं हविषामत्तारमोषधिवनस्पत्यादीनां वा । एवंविधमग्निं सर्वगणं व्रीह्याद्योषधिगणोपेतं हे अश्विनौ युवां स्वस्ति अविनाशो यथा भवति तथोन्निन्यथुः । व्रीह्याद्योषधिवनस्पतिरूपेण भूमेरुपरिष्टान्नीतवन्तौ । कारणात्मना पार्थिवाग्नौ वर्तमानं सर्वमोषधिवनस्पत्यादिकमश्विनौ प्रवर्षणेन व्यक्तीकृतवन्तावित्यर्थः । अयं पक्षो यास्केन हिमेनोदकेनेत्यादिनोक्तः (नि० ६-२६) । पितुमतीम् । हस्वनुड्भ्यां मतुबिति मतुप् उदात्तत्वम । ऋबीसे । अत्र यास्कः । ऋबीसमपगतभासमपाचित-

आसमपहृतभासं* वेति (नि० ६-३५)। पृषोदरादित्वादभिमतरूपस्वरसिद्धिः। अत्रिम्। अद भक्षणे। अदेस्त्रिनि चेति चशब्दात्त्रिप्। अवनीतम्। गतिनन्तर इति गतेः प्रकृतिस्वरत्वम्। स्वरित इ अस भुवि। भावे क्तिन्। छन्दस्युभयथेति सार्वधातुकत्वादस्तेर्भूभावाभावः॥

अत्रि is another sage whom the Aśvins rescued. In one place (X. 39. 9) he has been identified with सप्तवध्रि. In other places (V. 78. 4; VIII. 73. 3) they may not be identical. अत्रि was hurled into a furnace (ऋबीस I. 116. 8; 117. 3; X. 39. 9; X. 78. 4 or तप्त I. 112. 7; 118. 7 or घर्म and this was converted into the मधुमन्तं घर्मं (heated drink) I. 180. 4 or according to another version the fire was cooled by means of हिम (VIII. 73. 8) or the furnace was made of agreeable warmth I. 112. 7; X. 39. 9; VIII. 73. 8. In VI. 50. 10 and VII. 71. 5 अत्रि is saved from a great darkness (महः तमसः, अंहमः तमसः). घ्रंसं' अग्निं' Sāy. understands घ्रंस as an adjective or in the alternative he understands अग्नि as अग्निवत् तीक्ष्णं and घ्रंस as meaning a summer day. Geld. treats अग्निं as equivalent to अग्नेः the acc. being due to attraction; but घ्रंस is only a stronger synonym of अग्नि; it occurs in three other places: V. 34. 3, यः अस्मै घ्रंसे उत् वा यः ऊधनि सोमं सुनोति भवति द्युमान्; V. 44. 7; सूर्यः घ्रंस रक्षन्ते परि विश्वतः गयं अस्माकं शर्म वनवत्; VII. 69. 4; परि घ्रंसं ओमना वां वयः गात्. The last passage has a reference to the अत्रि story and the winged horse of the Aśvins is described as surrounding the घ्रंस with protection. घ्रंस = dazzling lustre. Hence it appears necessary to understand घ्रंसं as a substantive in apposition to अग्निम्. पितुमंतीं ऊर्जं. पितु (from पा-प्या-प्यै) food; पितुमत् nourishing. ऊर्ज् nourishment or a nourishing liquid, strength; cf. ऊर्जं पिन्वताम् VI. 70. 11; ऊर्जं सरध्यै I. 63. 8; ऊर्जो नपात् I. 58. 8. ऋबीसं अवनीतम्. ऋबीस occurs in connection with the अत्रि legend and occurs in four places only. Gr. understands it as a hot fissure in the earth or crater; Geld. a smouldering fire. Since ऋबीस is otherwise mentioned as घर्मं तप्तं 112. 7 or घर्मं परितप्तं 119. 7, it cannot be a mere abyss; since अवनीताय and अवगोहन् are mentioned in connection with it, it must be something like a pit. So the ऋबीस

*आदर्शे गतभासं वा इत्यधिकम्।

must be something like a hot pit or पीडायन्त्रगृहं as Sāy. styles it. सवंगणं is a बहु० (सर्व. गणः यस्य) with all his followers intact. स्वस्तिं adv.

Tr. You kept away the fire, the dazzling lustre, with snow (frost); you provided a nourishing food for him; you took out, oh Aśvins, Atri, hurled into a fire-pit, safely and with all followers intact.

Verse 9

परा । अवृतम् । नासत्या । अनुदेथाम् । उच्चाऽबुध्नम् । चक्रथुः ।
प'रा अवृत'म् नासत्या अनुदेथाम् उच्चा'बुध्नम् चक्रथुः
जिह्मऽबारम् ॥ क्षरन् । आपः । न । पायनाय । राये । सहस्राय ।
जिह्म'बारम् क्ष'रन् आ'पः न पाय'नाय राये' सह'स्राय
तृष्यते । गोतमस्य ॥ ९ ॥
तृ'ष्यते गो'तमस्य

अत्रेदमाख्यानम् । कदाचिन्मरुभूमौ वर्तमानस्य स्तोतुर्गोतमस्य ऋषेः समीपं देशान्तरे वर्तमानं कूपमुत्खायाश्विनौ प्रापयताम् । प्रापय्य च तं कूपं स्नानपानादिसौकर्यायोपरिमूलमधोबिलमवास्थापयतामिति । तदेतदाह । हे नासत्या सत्यस्वभावौ सत्यस्य नेतारौ नासिकाप्रभवौ वा एतत्संज्ञावश्विनौ युवामवृतम् । कूपनामैतत् । अवस्तात्तं कूपं परानुदेथां गोतमस्य ऋषेः समीपं प्रेरितवन्तौ । तदनन्तरं तं कूपमुच्चाबुध्नम् । उच्चैरुपरिष्टाद्बुध्नो मूलं यस्य स तथोक्तः । जिह्मबारम् । जिह्ममधस्ताद्वर्तमानतया वक्रं बारं द्वारं यस्य स तथोक्तः । एवंगुणविशिष्टं चक्रथुः । युवामकृषाथाम् । तस्मात्कूपात्तृष्यते पिपासतो गोतमस्य पायनाय पानार्थमापो न आपश्च । अयं नशब्दश्चार्थे । क्षरन् । प्रवाहरूपेण निरगमन् । कीदृशस्य । राये हवींषि दत्तवते । सहस्राय सहनशीलाय । यद्वा । सहस्रसंख्याकाय राये धनाय । एतत्संख्यधनलाभार्थं चाक्षरन् । अनुदेथाम् । णुद प्रेरणे । तौदादिकः । जिह्मबारम् द्वारशब्दस्य पृषोदरादित्वात् बारादेशः । क्षरन् । क्षर संचलने । बहुलं छन्दस्यमाङ्योगेऽपीत्यडभावः । शपः पित्त्वादनुदात्तत्वम् । तिङो लसार्वधातुकस्वरेण धातुस्वर । पायनाय । हेतुमति णिच् । शाच्छासाह्वेति युक् । भावे ल्युट् । राये । रा दाने । राति ददादीति रायः । रातेर्डैः (उ० २-६६) । ऊडिदमिति विभक्तेरुदात्तत्वम् । तृष्यते । त्रितृषा पिपासायाम् । श्यन् । लटः शतृ । श्यनो नित्वादाद्युदात्तत्वम् । षष्ठ्यर्थे चतुर्थी वक्तव्या (पा० २-३-६२-१) इति चतुर्थी ॥

तृदन्तवत. इत्यादर्शः ।

अवतं प'रा अनुदेथाम्. A similar miracle has been ascribed to the Maruts in I. 85. 10-11 ; (ऊर्ध्वं नुनुद्रे अवतं...जिह्मं नुनुद्रे अवत तया दिशा आसिञ्चन् उत्सं गोतमाय तृष्णजे). There is a material difference between that and this one. Here is a treasure tilted up and made to pour down wealth. It does not appear anywhere else in the Aśvin legends. अवत a well ; cf. आवृतास. अवतासः न कर्तृभिः तनूषु ते ऋतवः इन्द्र भूरयः I. 55 8. परा नुद् to push up. **उच्चा' बुध्नं जिह्म'बारम्** बुध्न is the bottom and बार is the opening or mouth, cf. modern बारि. बार occurs also in नीचीनबार (from वृ) V. 85 3. जिह्म crosswise or flat on the ground. It occurs in the expression जिह्मानां ऊर्ध्वः उपस्थे वर्धते in I. 95. 5 and अपां नपात् आ हि अस्थात् उपस्थं जिह्मानां ऊर्ध्वः II. 35. 9, also जिह्मश्ये चरितवे उषाः अजीग. I. 113. 5. (उष has wakened to movement him who was lying flat). **आ'पः न पायनाय क्षरन्.** This is a लुप्तोपमा which can well be regarded as an उत्प्रेक्षा. पायनम् occurs only here : to cause to drink. **रायें' सहस्राय तृ'ष्यते गो'तमस्य.** रायें तृष्यते गोतमस्य सहस्राय is the prose order.

Tr. You pushed up, oh true ones, the (treasure-) well ; you caused its bottom to go up and its mouth to be flat on the ground, letting flow as it were waters from which to supply (water to) drink, that the thousand followers of Gotama might have the wealth for which they were thirsting.

Verse 10

जुजुरुषः । नासत्या । उत । वव्रिम् । प्र । अमुञ्चतम् । द्रापिम्ऽ-
जुजुरु'षः नासत्या उत' वव्रिं'म् प्र' अमुञ्चतम् द्रापिं'म्-
इव । च्यवानात् ॥ प्र । अतिरतम् । जहितस्य । आयुः । दस्रा ।
मिव च्य'वाना'त् प्र' अतिरतम् जहि'त'स्य आ'यु'ः दस्रा
आत् । इत् । पतिम् । अकृणुतम् । कनीनाम् ॥ १० ॥
आ'त् इ'त् प'तिम् अकृणुतम् कनी'नाम्

अत्रेदमाख्यानम् । वलीपलितादिभिरुपेतो जीर्णाङ्गः पुत्रादिभि' परित्यक्तश्च्यवनाख्य ऋषिरश्विनौ तुष्टाव । स्तुतावश्विनौ तस्मा ऋषये जरामपगमय्य पुनर्यौवनमकुरुतामिति । तदेतदाह । हे नासत्यावश्विनौ जुजुरुषो जीर्णाच्च्यवानाच्च्यवनाख्यादृषेः सकाशाद्वव्रिं कृत्स्नं शरीरमावृत्यावस्थितां जरां प्रामुञ्चतं प्रकर्षेणा-

मोचयतम् । तत्र दृष्टान्तः । द्रापिमिव । द्रापिरिति कवचस्याख्या । यथा कश्चित्-कवचं कृत्स्नशरीरव्यापकं धृत्वा पश्चात् शरीरात्पृथक् करोति तद्वत् । उतापि च हे दस्रा एतत्सज्ञौ दर्शनीयौ वाश्विनौ जहितस्य पुत्रादिभिः परित्यक्तस्य ऋषेरायुर्जीवनं प्रातिरतम् । प्रावर्धयतम् । प्रपूर्वस्तिरतिर्वर्धनार्थः । आदित् । अनन्तरमेव युवानं सन्तं कनीनां कन्यानां पतिं भर्तारमकृणुतमकुरुतम् । जुजुरुषः । जॄष् वयोहानौ । लिटः क्वसुः । बहुलं छन्दसीत्युत्वम् । द्विर्भावः । पञ्चम्येकवचने वसोः संप्रसारणमिति संप्रसारणम् । शासिवसिघसीनां चेति षत्वम् । वाव्रिम् । वृञ् वरणे । आदृगमहन इति किप्रत्ययः । जहितस्य । ओहाक् त्यागे । कर्मणि निष्ठा । तस्य छन्दस्युभयथेति सार्वधातुकत्वाद्यक् । तस्य बहुल छन्दसीति श्लुः जहातेश्च (पा० ६-४-११६) इतीत्वम् । कनीनाम् । रयेर्मतौ बहुलमिति बहुलवचनात्कन्याशब्दस्यात्र संप्रसारणम् ॥

जुजुरुषः Geni. s. of जुजुर्वस् Perf. Pass. from जॄ–जुर् to be old. वाव्रिम् from वृ (1) covering or (2) clothing; cf. for (1) cf. प्र च्यवानात् जुजुरुषः वाव्रिम् अत्कं (veil or garment) न मुञ्चथः V. 74. 5; for (2) cf वाव्रिम् वसाना I. 164. 7. The story of the rejuvenated Cyavāna appears in I. 117. 13; I. 118. 6; VII. 68. 6; 71. 5; X. 39. 4 also V. 74. 5. जहितस्य आयुः प्र अतिरतम्. जहित is an irregular p. p. from हा 3 P.; cf. VIII. 5. 22 also VIII. 1. 13. For आयुः Old. proposes to read आयु for metrical reasons. No change in the text of the Rgveda can be justified for any reason, much less for theoretical reasons which stand on shaky grounds, cf. Appendix on Vedic Metres. प्र + तॄ to urge forward, to prolong, in the case of life; cf. मनीषा प्र तिरसि IV. 40. 1. यज्ञं प्र तिर III. 17. 2; cf. I.25.12. दस्रा. दस्र and नासत्य are the constant epithets of the Aśvins and it was thought later that they were their names; it is possible, by the peculiar use of Vedic (एकशेष) to use any one of these nouns in the dual number to signify both the Aśvins, but दस्र in any case appears to have been used as an epithet because it is very often accompanied by the word अश्विना–नौ. दस्र (दंस्) miracle-worker; cf. दंसासि in 25. कनीनाम् = कन्यानाम्.

Tr. You removed the outer shell of the aged Cyavāna like an armour, oh, true ones; you extended the life of a man who was abandoned, oh miracle-workers, and subsequently you made him the husband of young maidens.

Verse 11

तत् । वाम् । नरा । शंस्यम् । राध्यम् । च । अभिष्टिऽमत् ।
तत् वाम् नरा शंस्यम् राध्यम् च अभिष्टिम॑त्
नासत्या । वरूथम् ॥ यत् । विद्वांसा । निधिम्ऽइव । अप॑ऽ-
नासत्या वरूथम् यत् विद्वांसा निधिमिव अप॑-
गूळ्हम् । उत् । दर्शतात् । ऊपथुः । वन्दनाय ॥ ११ ॥
गूळ्हम् उत् दर्शतात् ऊपथुः वन्दनाय

अत्रेदमाख्यानम् । वन्दनो नाम कश्चिदृषिः । स चासुरैः कूपे निखात उत्तरीतुमशक्नुवन्नश्विनावस्तौत् । तमश्विनौ कूपादुन्निन्यतुरिति । तदाह । नरा आरोग्यस्य नेतारौ हे नासत्यावश्विनौ वां युवयोः संबन्ध्यभिष्टिमदभ्येषणयुक्तमाभिमुख्येन प्राप्तव्यं तथा वरूथं वरणीयं कामयितव्यं तत्कर्म शंस्यम् । अस्माभिः प्रशंसनीयम् । राध्यम् । आराधनीयं च । किं पुनस्तत्कर्म । विद्वांसा जानन्तौ युवां निधिमिव निक्षिप्तं धनमिवापगूळ्हमरण्ये निर्जने देशे कूपमध्येऽसुरैर्निगूढं वन्दनाय वन्दनमृषिं दर्शतादध्वगैः पिपासुभिर्द्रष्टव्यात्कूपादुदूपथुः । उदहार्ष्टम् । एवं यदेतत्कूपादुद्धरणं तदित्यर्थः । शंस्यम् । शंसु स्तुतौ । अस्माण्ण्यन्तादचो यदिति यत् । यतोऽनाङ इत्याद्युदात्तत्वम् । अभिष्टिमत । अभिपूर्वादिष गतावित्यस्माद्भावे क्तिन् । मन्त्रे वृषेति क्तिन उदात्तत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते । शकन्ध्वादित्वात्परूपत्वम् । तादौ चेति तु गतिस्वरस्य सर्वविधीनां छन्दसि विकल्पितत्वादप्रवृत्तिः । ततो मतुप् । अन्तोदात्तादुत्तरस्य तस्य ह्रस्वनुड्भ्यामित्युदात्तत्वम् । वरूथम् । वृञ्भ्यामूथन् । विद्वांसा । सुपां सुलुगिति विभक्तेराकारः । अपगूळ्हम् । गुहू संवरणे । कर्मणि निष्ठा । यस्य विभाषेतीट्प्रतिषेधः । ढत्वधत्वष्टुत्वढलोपदीर्घाः । गतिरनन्तर इति गतेः प्रकृतिस्वरत्वम् । दर्शतात् । भृमृदृशीत्यादिनातच् । ऊपथुः । ष्टुवप् बीजतन्तुसंताने । लित्यथुसि यजादित्वात्संप्रसारणम् । द्विर्वचनादि । वन्दनाय । क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थी ॥

The story of वन्दन occurs altogether seven times in the RV, once in I. 112. 6, 8 (यामिः उत् वन्दनं ऐरयतं) (उत् वन्दनं ऐरतं दंसनाभिः) by कुत्स आङ्गिरस, once in X. 39. 8 (by घोषा काक्षीवती) and in five hymns of कक्षीवत् (I. 116. 11; 117. 5; 118. 6; 119. 6, 7). I. 112. 5 agrees with I. 118. 6; ईर with उत् must mean here 'to restore to life or energy' 'to exalt' cf. जीवं उदीरयन्ती मृतं कंचन बोधयन्ती I. 115. 8; उदीरय कवितमं कवीनाम् V. 42. 3; also VIII. 19. 6; X. 11. 6; there is no ques-

tion here of raising from a pit. In I 119. 6, 7 (प्रदीर्घेण वन्दनः तारि आयुषा, युवं वन्दने निर्ऋतिं जरण्यया–'smitten with decay'–रथं न सं इन्वथः–'have set right' there is mention of his life having been lengthened. Now remain only four passages of कक्षीवत्, ours and I. 117. 5 (सुषुप्वांसं न निर्ऋतेः उपस्थे सूर्यं न दस्रा तमसि क्षियन्तम् शुभे रुक्मं न दर्शतं निखातं उत् ऊपथुः आश्विना वन्दनाय). I have to submit that in neither of these two passages is there any mention of the rescue of वन्दन from a pit. I would translate the latter as follows: 'Sleeping on the lap of evil fate, dwelling in darkness, oh miracle-workers, like the sun,—a wonderful sight it was,—you have poured for Vandana buried gold made visible.' There is an anaclouthon and the acc. in *a, b* are left hanging without connection. Better to say this than that the poet uses deliberately in two places the dative for the acc. निखातं रुक्मं न दर्शनम् (visible) उद् ऊपथुः has a parallel in our passage and in I. 117. 12 (हिरण्यस्य इव कलशं निखातं उत् ऊपथुः दशमे अहन्) where there is a reference to the rescue of रेभ who is floating on water (उदनि विप्लुतं), and not at all in a pit. वप् with उद् occurs here and in VIII. 66. 4 (वसु दाशुषे उद्वपन्ति) and in X. 39. 8. It would appear that X. 39. 8 rests on a misinterpretation and misunderstanding of the story of वन्दन as stated in I. 116-119 and stands alone in the use of उद्वप् in the sense of 'hauling up'. The expressions निधिं, हिरण्यस्य कलशम्, रुक्मं, उत् ऊपथुः apparently give the idea of conferring a highly valued and unexpected blessing. **रा॑ ध्यं आभिष्टिम॑त् व॑रूथं** राध्यं (राध् to succeed, to bring about, to acquire) worthy of acquisition. Elsewhere it is an epithet of उक्थ, वसु, सुविदत्र. अभिष्टिमत् (अभिष्टि from अभि+अस्; Sāy. apparently derives it from इष्, but cp. सः इत् उ श्रवोभिः युज्यं चित् अभि असत्–may he attain—I. 156. 2; विश्वा जातानि अभि आसि तानि; VI. 25. 5, विश्वानि सन्ति अभ्यस्तु मह्ना II. 28. 1) affording help. **अ॑पगूळ्हं निधिं मिव दर्शता॑त् व॑न्दनाय उ॑त् ऊपथुः** अपगूढं from गूह् with अप् to conceal; cf. अमृतां मर्त्येभ्यः अपगूहन् X. 17. 2. दर्शतात् उत् ऊपथुः presents a difficulty but connecting it with I. 117. 5 (निखातं दर्शतं उदूपथुः) the abl. दर्शतात् would mean 'from a visible place' i. e. visibly; cf. अन्तात्; पराकात् I. 30. 21 and प्राचः (abl.) II. 15. 3 used adverbially.

Gr. translates *cd*: 'as you hauled up for Vandana from the *pit* (दर्शत wrongly for ऋश्यद : cf. X 39. 8) the hidden thing like a treasure'; Geld. translates similary, leaving out दर्शतात् translated by Gr. as 'pit'. For Old the hauling up *for* Vandana is app. the hauling up *of* V. himself (cp. Sāy.): he accepts Gr.'s suggestion that दर्शतात् is corrupt for ऋश्यदात् Ludwig would see a pun in वन्दनाय which is = वन्दनं + वन्दनाय ('to your praise or glory').

Tr. When you, the knowing (gods), poured out visibly a buried treasure as it were for Vandana (i. e. conferred an unexpected blessing on V.), that was, O heroes, a praiseworthy and helpful protection rendered by you, worthy of acquisition, oh true gods.

Verse 12

तत् । वाम् । नरा । सनये । दंसः । उग्रम् । आविः । कृणोमि ।
तत् वाम् नरा सनये दंसः उग्रम् आविः कृणोमि ।
तन्यतुः । न वृष्टिम् ॥ दध्यङ् । ह । यत् । मधु । आथर्वणः ।
तन्यतुः न वृष्टिम् दध्यङ् ह यत् मधु आथर्वणः ।
वाम् । अश्वस्य । शीर्ष्णा । प्र । यत् । ईम् । उवाच ॥ १२ ॥
वाम् अश्वस्य शीर्ष्णा प्र यत् ईम् उवाच ।

अत्रेयमाख्यायिका । इन्द्रो दधीचे प्रवर्ग्यविद्यां मधुविद्यां चोपदिश्य यदि इमामन्यस्मै वक्ष्यसि शिरस्ते छेत्स्यामीत्युवाच । ततोऽश्विनावश्वस्य शिरश्छित्वा दधीचः शिरः प्रच्छिद्यान्यत्र निधाय तत्राऽऽर्द्रं शिरः प्रत्यधत्ताम् । तेन च दध्यङ् ऋचः सामानि यजूंषि च प्रवर्ग्यविषयाणि मधुविद्याप्रतिपादकं ब्राह्मणं चाश्विनावध्यापयामास । तदिन्द्रो ज्ञात्वा वज्रेण तच्छिरोऽच्छिनत् । अथाश्विनौ तस्य स्वकीयं मानुषं शिरः प्रत्यधत्तामिति शाट्यायनवाजसनेययोः प्रपञ्चेनोक्तम् । तदेतत्प्रतिपाद्यते । नरा हे नरौ अश्विनौ वां युवयोः संबन्ध्युग्रमुद्भूर्णमन्यैर्दुःशकं दंसः । कर्मनामैतत् । युवाभ्यां पुरा कृतं तत्कर्म सनये धनलाभार्थमाविष्कृणोमि । प्रकटीकरोमि । तत्र दृष्टान्तः । तन्यतुर्न । यथा मेघस्थ शब्दो वृष्टिं मेघान्तर्वर्तमानमुदकं प्रवर्षणेन सर्वत्र प्रकटयति तद्वत् । किं तत्कर्म । अथर्वणः पुत्रो दध्यङ् एतत्संज्ञ ऋषिरश्वस्य

शीर्ष्णा युष्मत्सामर्थ्येन प्रतिहितेन शिरसा वां युवाभ्यामीमिमां *मधु मधुविद्यां यद्ध यदा खलु प्रोवाच प्रोक्तवान् । तदानीमश्वस्य शिरसः संधानलक्षणं पुनर्मानुषस्य शिरसः प्रतिसंधानलक्षणं च यद्भवदीयं कर्म तदाविष्कृणोमीत्यर्थः । सनये । षणु दाने । खनिकषिकस्यञ्जयसिवसिध्वनिस्तनिवनिसनिग्रन्थिचरिभ्यश्चेतीप्रत्ययः । तन्यतुः । तनु विस्तारे । ऋतन्यञ्जीत्यादिना यतुच् । यद्वा । स्तन शब्दे । बाहुलकात्यतुच् । छान्दसः सलोपः । वृष्टिम् । वृष्यते सिच्यतेऽनेनेति वृष्टिः । मन्त्रे वृषेत्यादिना क्तिन उदात्तत्वम् । आथर्वणः । अपत्यार्थेऽण्यन् (पा० ६-४-१६७) इति प्रकृतिभावाट्टिलोपाभावः । शीर्ष्णा । शीर्षे छन्दसि (पा० ६-१-६०) इति शिरःशब्दपर्यायः शीर्षन्शब्दोऽन्तोदात्तो निपात्यते । अलोपे सत्युदात्तनिवृत्तिस्वरेण पविभक्तेरुदात्तत्वम् ॥

The story of दध्यच्, showing how he discloses the mystery of the Soma to the Aśvins with a horse's head (अश्व्यं शिरः), occurs in I. 117. 21; 118. 9; IX. 68. 5. Sāy. gives details of the story in his comm.

सनये उग्रम् दंसः आविः कृणोमि. सनिः gain; cf. व्युच्छन्ती नः सनये धियो धाः VI. 75. 5; सनये धनानाम् I. 31. 8; 124. 7. उग्र mighty, powerful; cf. उग्रः अर्वा VII. 56. 23; यं कामये तंतं उग्रं करोमि X. 125. 5. आविः manifest or visible, as opposed to गुहा (X. 54. 5); गुह्यम् (III. 55. 15), अपीच्यम् (VIII. 47. 13); with भू, cf. I. 31. 3 etc. and with कृ, cf. स्पार्हा वसूनि आविः कृण्वन्ति उषसः I. 123. 6. दंसस् miracle, miraculous power; cf. दंसना-ना, दंसु, दंसिष्ठः. तन्यतुः thunder. The same simile occurs in त्वं धियं मनोयुजं सृज वृष्टिं न तन्यतुः X. 100. 3. प्र यद् मंधु ईम् उवाच. ईम् accusative of an old dem. pron. इ appearing in this invariable form in all the three genders. Here it is n. In V. 1. 3. in our selection, it is f. and in V. 1. 4 and III. 9. 4 it is m. यत् is either superfluous or we should take it as यत मधु, ईम् (= तत्) यत् प्रोवाच तत् &c.

Tr. I shall, in order to gain thereby, make manifest, as does thunder rain, that powerful miracle wrought by you, oh heroes, namely, that Dadhyac, son of Atharvan, proclaimed to you the mystery of the sweet drink (Soma) with a horse's head.

---

* आदर्शे मधु इति नास्ति ।

Verse 13

अजोहवीत् । नासत्या । करा । वाम् । महे । यामन् । पुरुऽभुजा ।
अजोहवीत् नासत्या करा वाम् महे यामन् पुरुभुजा
पुरम्ऽधिः ॥ श्रुतम् । तत् । शासुःऽइव । वध्रिऽमत्याः । हिरण्य-
पुरंधिः श्रुतम् तत् शासुरिव वध्रिमत्याः हिरण्य-
ऽहस्तम् । अश्विनौ । अदत्तम् ॥ १३ ॥
हस्तम् अश्विनौ अदत्तम्

वध्रिमती नाम कस्यचिद्राजर्षेः पुत्री नपुंसकभर्तृका । सा पुत्रलाभार्थमश्विना-वाजुहाव । तदाह्वानं श्रुत्वाश्विनावागत्य तस्यै हिरण्यहस्ताख्यं पुत्रं ददतुः । तदे-तदाह । पुरुभुजा बहूनां पालकौ प्रभूतहस्तौ वा । हे नासत्यावश्विनौ महे महनीये पूजनीये यामन्यामनि । याति गच्छतीति याम स्तोत्रम् । तस्मिन्सति करा अभिमत-फलस्य कर्तारौ वां युवां पुरंधिर्बहुधीः वध्रिमती । वध्रिः पुत्रोत्पादनाशक्तः षण्डकः । तद्वती एतत्संज्ञा राजपुत्री अजोहवीत् । पुनःपुनः स्तुत्या पुत्रलाभार्थमाहूतवती । युवां च वध्रिमत्यास्तदाह्वानं श्रुतम् । अशृणुतम् । तत्र दृष्टान्तः । शासुरिव यथा शासुराचार्यस्य वचनं शिष्योऽवहित सन्नकाग्र्येण शृणोति तद्वत् । श्रुत्वा च हे अश्विनौ तस्यै हिरण्यहस्तं सुवर्णमयपाणिं हितरमणीयपाणिं वा एतत्संज्ञं पुत्रमदत्तं प्रायच्छतम् । अजोहवीत् । ह्वयतेर्यङ्लुगन्ताल्लुङ् । यङो वेति तिप ईडागमः । करा । करोतेः पचाद्यच् । सुपां सुलुगिति विभक्तराकारः । यामन् । आतो मनिन् क्वनिब्व-निपश्वेति मनिन् । सुपां सुलुगिति सप्तम्या लुक् । श्रुतम् । लङि बहुल छन्दसीति विकरणस्य लुक् । बहुलं छन्दस्यमाङ्योगेऽपीत्यडभावः । शासुः । शास्तुः । शासु अनुशिष्टौ । शंसिशसिशासीत्यादिना (उ० २-९४) सञ्ज्ञायां तृन् इडभावः । छान्दसस्तलोपः ॥

The rc involves several problems: Is there one miracle described or two? Is पुरंधि a proper noun or an adj.? X. 39. 7 (*युवं हवं वध्रिमत्या अगच्छतम् युवं सुषुतिं चक्रथुः पुरंधये*) is apparently dealing with the same matter; but since we have rejected the version of X. 39 in regard to 11 we are free to reject it even here. To understand there to be two miracles in this rc we have to regard the first as ending with शासुरिव and the second as beginning with वध्रिमत्याः, towards the end of *c*, which is unnatural: further the genitive वध्रिमत्याः is evidently to be connected with

नत् or शासुः so that वध्रिमती alone ought to be the person rescued. For the name being deferred to *cd*, cp. 6, 8, 9 &c. If we accept the version of X. 39. 7. पुरंधि is helped with an easy delivery and वध्रिमती with a son. पुरंधि is not mentioned anywhere else. The story of वध्रिमती is referred to in I. 117. 24; VI. 62. 7; X. 39. 7; 65. 12; besides खिल 1. 3. 4 and our passage. In the खिल the अश्विन्s themselves beget the son. अजाहवीत् नासत्या करा वाम् Compare with this अजोहवीत् आश्विना तौग्र्यः वा, I. 117. 15; अजोहवीत् अश्विना वर्तिका वा, 16. Old. concludes from the resemblance that करा must be in the nominative and he connects करा with कड (hoarse) of the शतपथ ब्राह्मण; but that a god should hear a hoarse voice cannot be a miracle, and the objection pointed out above against पुरंधि being a pr. n. holds here also. Then again, the कडा is not mentioned elsewhere. Geld. understands कर as 'hand'; but कर occurs only twice in the RV, here and in X. 67. 6 (इन्द्रः करेण इव वि चकर्त रवेण). It is doubtful if it means in the latter a hand; on the other hand, in the compounds सुतेकरासः X. 71. 9 and सत्याकरः I. 78. 4 कर means 'active' or probably 'skilful'; that is also the meaning of the word करणा, the epithet of the अश्विन्s I. 119. 7. Sāy.'s interpretation is therefore nearer truth than Geld.'s. महे या मन. महे loc. of मह=महत्; the word occurs very often in the RV. and Geld.'s difficulty about it is surprising He takes it as dative of मह् and supplies अवसे after it. For यामन् see notes on I. 25. 20. पुरुभुजा=पुरुभोजसा (VIII. 22. 16) from भुज् to enjoy, to derive benefit from; also to suffer; cf.: (i) येन जनाः भुञ्जते II. 24. 10; वित्ते एषां ये भुञ्जते V. 42, 9: मा अहं राजन् अन्यकृतेन भोजम् II. 28. 9; there is no authority for the meaning 'to confer benefit' or 'to protect'. पुरंधि, पुरं (fulness from पॄ) दधाति, liberal. श्रुतं म तत् शासुरिव वध्रिमत्याः. वाध्रिमती (from वधि castrated, impotent, as opposed to वृषन्; cf. I. 32. 7: also वृषेव वधीन् आभि वष्टि ओजसा II. 25. 3) wife of an unmanly husband. शासुः order; cf. अस्य शासुः उभयासः सचन्ते I. 60. 2; शासुरिव is a clear instance of an उत्प्रेक्षा.

Tr. O true ones who enjoy many (powers), in a powerful appeal, a liberal woman invoked you, the active

ones. You listened to that (prayer) of the impotent man's wife as though it were a command: you gave (her) Hiranyahasta, oh Aśvins.

Verse 14

आस्रः । वृकस्य । वर्तिकाम् । अभीके । युवम् । नरा । नासत्या ।
आस्रः वृकस्य वर्तिकाम् अभीके युवम् नरा नासत्या
अमुमुक्तम् ॥ उतोऽइति । कविम् । पुरुऽभुजा । युवम् । ह ।
अमुमुक्तम् उतो कविम् पुरुभुजा युवम् ह
कृपमाणम् । अकृणुतम् । विऽचक्षे ॥ १४ ॥
कृपमाणम् अकृणुतम् विचक्षे

वर्तिका चटकसदृशस्य पक्षिणः स्त्री । तामरण्ये वर्तमानेन शुना ग्रस्तां पुरा किलाश्विनावमोचयताम् । तदेतदाह । हे नरा नेतारौ नासत्यावश्विनौ युवं युवामभीकेऽभिगते वृकवर्तिकयोः संग्रामे वृकस्य विकर्तकस्य शुन आस्र आस्याद्वर्तिकां चटकसदृशीममुमुक्तम् । अमोचयतम् । यास्कस्त्वाह । पुनःपुनर्वर्तते प्रतिदिवसमावर्तत इति वर्तिकोषाः । तां वृकेणावरकेण सर्वजगत्प्रकाशेनाच्छादयित्रा सूर्येण ग्रस्तां तदीयमुखादश्विनावमुञ्चताम् । उतो अपि च पुरुभुजा महाबाहू प्रभूतहस्तौ वा युवं ह युवां खलु कृपमाणं स्तुवन्तं कविमेतत्संज्ञमन्धमृषिं विचक्षे विशेषेण द्रष्टुं समर्थमकृणुतम् अकुरुतम् । आस्रः । पद्दन्नित्यादिना आस्यस्यासन्नादेशः । अल्लोपो न इत्यकारलोप उदात्तनिवृत्तिस्वरेणोडिदमिति विभक्तेरुदात्तत्वम् । अमुमुक्तम् । मुचेरन्तर्भावितण्यर्थाल्लुङि बहुलं छन्दसीति विकरणस्य श्लुः । कृपमाणम् । कृपिः स्तुतिकर्मा तुदादिषु द्रष्टव्यः । विकरणस्वरे प्राप्ते कृषादीनां चेत्याद्युदात्तत्वम् । विचक्षे । तुमर्थे सेसेनिति सेन्प्रत्ययः । स्कोः संयोगाद्योरिति सलोपः ॥

युव'म्=युवाम्. वृ'कस्य आस्नः अभी'के व'र्तिकां अमुमुक्तम्. The story of the rescue of the quail (वर्तिका) occurs in I. 117. 16; 118. 8; X. 93. 13; also in 112. 8. अमुमुक्तम् imperf. from perf. base. अभीक an encounter in battle; the locative form अभीके is used in the sense of 'in the face of', 'in front of'; with मुच् or पा or उरुष्य it has the sense of 'from the clutches of'; cf. उरुष्येव अभीकं कः IX. 95. 5; अमुमुक्तं तूर्वतं दुरितात् अभीके VI. 50. 10; पाहि वाज्रिवः दुरितात् अभीके I. 121. 14; त्यजसः अभीके उरुष्यतम् IV. 43. 4. कृ'पमाणं कवि'म् वि'चक्षे

अकृणुतम्. Sāy. takes कवि as a pro. n., unnecessarily. This poet is not mentioned anywhere else apparently, but in I. 119. 7 there is a reference to a विप्र (poet) and in the next rc occurs the expression कृपमाणम् (क्षेत्रात् आ विप्रं जनथः विपन्यया....अगच्छतम् कृपमाणम् वरावति). In I. 118. 7 Kaṇva (a poet) has his eye restored to him by the Aśv. and in I. 47. 5 and VIII. 7. 18 Kaṇva is mentioned as having been helped by the gods. कृपमाण (from कृप् to be piteous). विचक्षे infinitive in से from चक्ष्; cf. अंधा तमांसि दुधिता विचक्षे नृभ्यः चकार IV. 16. 4.

Tr. You rescued, oh heoric Aśvins, the quail from the wolf's jaw; and further, oh Gods that enjoy many (powers), you made the sorrowful poet see.

Verse 15

चरित्रम् । हि । वेःऽइव । अच्छेदि । पर्णम् । आजा । खेलस्य ।
चरित्रम् हि वेः-इव अच्छेदि पर्णम् आजा खेलस्य
परितक्म्यायाम् ॥ सद्यः । जङ्घाम् । आयसीम् । विश्पलायै ।
परितक्म्यायाम् सद्यः जङ्घाम् आयसीम् विश्पलायै
धने । हिते । सर्तवे । प्रति । अधत्तम् ॥ १५ ॥
धने हिते सर्तवे प्रति अधत्तम्

अगस्त्यपुरोहितः खेलो नाम राजा। तस्य संबन्धिनी विश्पला नाम स्त्री संग्रामे शत्रुभिश्छिन्नपादासीत्। पुरोहितेनागस्त्येन स्तुतावश्विनौ रात्रावागत्यायोमयं पादं समधत्ताम्। तदेतदाह। आजा आजौ संग्रामेऽगस्त्यपुरोहितस्य खेलस्य संबधिन्या विश्पलाख्यायाश्चरित्रं चरणं वेरिव वेः पक्षिणः पर्णं पतत्रमिवाच्छेदि हि। पुरा छिन्नमभूत्खलु। हे अश्विनौ युवामगस्त्येन स्तुतौ सन्तौ परितक्म्यायाम्। परितक्म्या रात्रिः परित एनां तकतीति यास्कः (नि० ११-२५)। एनामुभयतः सूर्यो गच्छतीति तस्यार्थः। रात्रावागत्य सद्यस्तदानीमेव हिते शत्रुषु निहिते धने जेतव्ये विषयभूते सति सर्तवे सर्तुं गन्तुं विश्पलाया आयसीमयोमयीं जङ्घां जङ्घोपलक्षितं पादं प्रत्यधत्तम्। संधानमेकीकरणं कृतवन्तावित्यर्थः। चरित्रम्। अर्तिलूधूसूखनसहचर इत्र इति करण इत्रः। आजा। सुपां सुलुगिति विभक्तेर्डादेशः। आयसीम्। अयःशब्दाद्विकारार्थे प्राणिरजतादिभ्योऽञ् (पा० ४-३-१५४)। टिड्ढाणञ्द्वयसज्दघ्मञ्जयः इति ङीप्॥

विश्पला is also mentioned in I. 112. 10 : 117 11 ; 118. 8 ; X. 39. 8. In I. 117. 11 अश्विनौ have set right (सम् अरिणीतम्) विश्पला because of अगस्त्य whose patron खेल was according to Sāyana. Pischel was the first to point out that विश्पला was a mare and not the wife of खेल. Her leg was broken while running a race and the Aśvins gave her an iron one. विश्पलावसु (I. 182. 1) as an epithet of अश्विनौ points to the same thing. **खेलस्य आजा' प'रितक्म्यायाम्**. आजा loc. s. of आजि. खेलस्य आजा in the race run by खेल आजि m. race ; Gr. takes it to be f. here only ; but it is unnecessary परितक्म्या (तक्रू to run, to rush forward ; cf. नक्तः श्येनः IX. 67. 15 ; सर्गतक्त III. 34 4 ; it is to be found also in words like तक्व, तकवान्, तक्वन्) is a noun as well as an adj ; cf. शम्य, सुम्य, पस्त्य also गव्या, यव्या, पस्त्या, कक्ष्या etc. As adj it occurs in I. 36. 6 (परितक्म्ये धने), V. 30. 14 (परितक्म्या रात्रि·), V. 30. 13 (परितक्म्यायाः अक्तोः) and means requiring a good deal of running about, tumultuous ; as a noun in f. it occurs in seven passages ; e. g. IV. 41. 6 ; 43. 3 ; V. 31. 11 ; VI. 21. 9 etc In all these the meaning of "running about," "confusion," "tumult of battle," "mélée," does quite well ; cf. का परितक्म्या आसीत् X. 108. 1 "what was the ado about ?" वेः इव पर्ण'म. पर्ण (from पत् ; cf. कर्ण from कृत्) wing. **चरि'त्रम्** (from चर्) leg ; cf. यम् अध्वानं अप वृङ्क्ते चरित्रैः, X. 117. 7 ; मा रक्षन्तु विस्रसः चरित्रात् VIII. 48. 5. **धने हिते' स'र्तवे**. सर्तवे inf. (really dative of सर्तु verb. n. from सृ). हितं धनं is the same as प्रधनं ; see notes on verse 2 (यमस्य प्रधने). धने हिते occurs in numerous places, e. g. I. 40. 2 (त्वा इत् उपब्दे धने हिते) ; I. 132. 5 (धने हिते तरुष्यन्त श्रवस्यव.) ; धनेषु हितेषु in VIII. 16. 5. **प्र'ति अधत्तम्**. धा with प्रति to restore, as an eye or leg ; cf. कण्वाय चक्षु प्रत्यधत्तं I. 118. 7.

Tr. In the race run by Khela, in the mélée, the leg (of विश्पला) was broken like the wing of a bird ; you restored an iron leg to Viśpalā that she might run for the wager.

Verse 16

शतम् ।	मेषान् ।	वृक्ये ।	चक्षदानम् ।	ऋज्रऽअश्वम् ।	तम् ।	
शत'म	मेषा'न	वृक्ये'	चक्षदान'म	ऋज्र'श्वम	त'म्	

पिता । अन्धम् । चकार ॥ तस्मै । अक्षी इति नासत्या । वि-

पिता अन्धम् चकार तस्मै अक्षी नासत्या वि-

चक्षे । आ । अधत्तम् । दस्रा । भिषजौ । अनर्वन् ॥ १६ ॥

चक्षे आ अधत्तम दस्रा भिषजौ अनर्वन्

वृषागिरः पुत्र ऋज्राश्वो नाम राजर्षिः । तस्य समीपेऽश्विनोर्वाहनभूतो रासभो वृकी भूत्वाऽवतस्थे । स च तस्या आहारार्थमेकोत्तरशतसंख्यान्पौरजनानां स्वभूतान्मेषान् शकलीकृत्य प्रददौ । ऋज्राश्वः शतमेकं च मेषानिति मन्त्रान्तरे दर्शनात् । एवं पौराणामार्हते प्रवृत्ते पिता शापेन नेत्रहीनमकरोत् । तेन स्तूयमानावश्विनावस्मद्वाहननिमित्तेऽमस्यान्ध्य जातमिति जानन्तौ तस्मा अक्षिणी प्रायच्छतामिति । तदेतदाह । अत्र तच्छब्दश्रुतेर्यच्छब्दाध्याहारः । य ऋज्राश्वः शतं शतसंख्याकान्मेषान्वृक्य आत्मना पोषिताय वृकस्त्रियै शकलीकृत्य प्रादात्तं चक्षदानम् । क्षदतिरत्तिकर्मात्र शकलीकरणार्थः । शकलीकृत्य दत्तवन्तमृज्राश्वं पिता शापेनान्धं दृष्टिहीनं चकार । कृतवान् । हे नासत्या सत्यस्वभावौ सत्यस्य नेतारौ वा भिषजौ देवानां वैद्यभूतौ । अश्विनौ वै देवानां भिषजौ (ऐ० ब्रा० १-१८) इति श्रुतेः । दस्रा दर्शनीयावेतत्संज्ञौ वा हे अश्विनौ अनर्वन्नर्वणौ द्रष्टव्यं प्रति पितृशापाद्गमनरहिते । अक्षी चक्षुषी । विचक्षे विविधं द्रष्टुं समर्थे तस्मै ऋज्राश्वाय आ अधत्तं व्यधत्तम् । अकुरुतम् । वृक्ये । वृकोऽरण्यश्वा । तस्य स्त्री वृकी । जातेरस्त्रीविषया (पा० ४-१-६३) इति ङीष् । जसादिषु छन्दसि वावचनमिति चतुर्थ्यैकवचनस्याडभावे यणादेश उदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वम् । चक्षदानम् । क्षदेर्लिटः कानच् । चित्स्वर । अक्षी । ईच द्विवचने (पा० ७-१-७७) इति परत्वादक्षशब्दस्येकारान्तादेशः । स चोदात्तः । तस्मिन्कृते सकृद्गतौ विप्रतिषेधे (प० ४०) इति परिभाषया पुनर्नुम् भवति । विचक्षे । चक्षेः संपदादिलक्षणो भावे क्विप् । अनर्वन् । ऋ गतौ । अस्मादन्येभ्योऽपि दृश्यन्त इति दृशिग्रहणस्य विध्यन्तरोपसंग्रहार्थत्वाद्भावे वनिप् । अर्वं गमनं विषयं प्रत्येतयोर्नास्तीति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । सुपां सुलुगिति द्विवचनस्य लुक् । छान्दसो नलोपाभावः ।

The name of ऋज्राश्व appears in I. 100, 16, 17; 117, 17, 18. I. 100 is ascribed to ऋज्राश्व, son of वृषागिर्; his mare is spoken of as the wonder of the people; but there is no reference to the story as related here or in I. 117. Sāyana has given the story of ऋज्राश्व as it can be conceived from the other passages. ऋज्र

* ऋ सं. १-१७-१८.

ruddy or brown; an epithet of हरि IX. 97. 9; VIII. 68. 15; of अश्व I. 174. 5 etc. It is used also without a substantive, to denote a horse in VII. 18. 23; VIII. 66. 18, etc. वृक्ये चक्षदानम्. वृक्ये = वृक्यै "to a she-wolf." चक्षदान perf. par. from क्षद् to serve as food. विचक्षे. infin. from चक्ष् in ए (dative of verb. n. विचक्ष्). We have to supply ज्योतिः before it; cf. ज्योतिः अन्धाय चक्रथुः विचक्षे I. 117. 17. भिषजौ physicians. It is a frequent epithet of अश्विनौ, but it occurs also as an epithet of रुद्र; cf भिषक्तमम् त्वा भिषजा शृणोमि II. 33. 4; also of the आप.; cf. यूयं हि स्थ भिषजः मातृतमाः, VI. 50. 7. अनर्वन् (from ऋ to encounter as a rival + वन्; cf. ऋक्वन्, वग्वन्, शुभ्वन्, स्तुभ्वन्, forms in व, वन also occur; cf. अनर्वम् दात्रम् I. 185. 3; अनर्वा अदितिः II. 40. 6. अनर्वणः युवा X. 92. 14) 'without a rival,' 'unrivalled'. देवस्वामी *on* निरुक्त IV. 27 *explains* अप्रत्यृतम् अन्यस्मिन्, which is यास्क's explanation, by स्वतन्त्र इत्यर्थः; Gr. 'not to be overpowered'; in the loc., used adverbially in the sense of "in security." Geld. takes it as adj. to अक्षी in the sense of matchless, but is also prepared to take it as loc. used adv. Sāyana also takes it as an adj. to अक्षी.

Tr. Ŗjrāśva, having served a hnndred rams as food for a she-wolf, was deprived of his eye-sight by his father; to him, oh true ones, you gave eyes to see that were unrivalled, oh wonder-working physicians.

Verse 17

आ । वाम् । रथम् । दुहिता । सूर्यस्य । कार्ष्मेऽइव । अतिष्ठत् ।
आ वाम् रथम् दुहिता सूर्यस्य कार्ष्मेव अतिष्ठत्
अर्वता । जयन्ती ॥ विश्वे । देवाः । अनु । अमन्यन्त । हृत्ऽ-
अर्वता जयन्ती विश्वे देवाः अनु अमन्यन्त हृ-
भिः । सम् । ऊँ इति । श्रिया । नासत्या । सचेथे इति ॥१७॥
द्भिः सम् उ श्रिया नासत्या सचेथे

सविता दुहितरं सूर्यास्यां सोमाय राज्ञे प्रदातुमैच्छत्। तां सूर्यां सर्वे देवा वरयामासुः। तेऽन्योन्यमूचुः। आदित्यमवधिं कृत्वाजिं धावाम। योऽस्माकं मध्य

उज्जैष्यति तस्येयं भविष्यतीति। तत्राश्विनावुदजयताम्। सा च सूर्या जितवतोस्तयो रथमारुरोह। अत्र प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छत् (ऐ० ब्रा० ४-७) इत्यादिकं ब्राह्मणमनुसंधेयम्। इदं चाख्यानं सूर्याविवाहस्य स्तावकेन *सत्येनोत्तभिता भूमिरिति सूक्तेन विस्पष्टयिष्यते। हे अश्विनौ वां युवयो रथं कार्ष्मेव। कार्ष्मशब्दः काष्ठवाची। यथा काष्ठमाजिधावनस्यावधितया निर्दिष्टं लक्ष्यनाशुगामी कश्चित्सर्वेभ्यो धावद्भ्यः पूर्वं प्राप्नोति एवमेव सर्वेभ्यः पूर्वमर्वता शीघ्रमवधिं प्राप्नुवता गुष्मदीयेनाश्वेन करणभूतेन युवाभ्यां जयन्ती जीयमाना सूर्यस्य सवितुर्दुहिता अतिष्ठत्। आरूढवती। विश्वे सर्व इतरे देवा एतदारोहणस्थानं हृद्भिर्हृदयैरन्वमन्यन्त। अन्वजानन्। तदानीं हे नासत्यावश्विनौ श्रिया ऋक्सहस्रलाभरूपया संपदा कान्त्या वा युवां संसचेथे। संगच्छेथे। जयन्ती। व्यत्ययेन कर्मणि शतृप्रत्ययः। हृद्भिः। पद्दन्नित्यादिना हृदयशब्दस्य हृद्भावः। सचेथे। षच समवाये। स्वरितेत्त्वादात्मनेपदम्॥

The bridal procession of सूर्या, daughter of सवितृ, has been described in the marriage hymn, X. 85, in 6–16. अश्विनौ are mentioned as वरा, and सोम the वधूयु and अग्नि as the पुरोगव in the bridal procession in X. 85. 8, 9; in verse 12, she mounts their car to go to her husband (सूर्या आ अरोहत् प्रयती पतिम्); वर is mentioned as distinct from वधूयुः (bridegroom) or जारः (lover) in X. 85. 9 and and IX. 101. 14; in two more places where the word occurs (I. 83. 2; V. 60. 4) the वर dresses himself well and has a pleasing appearance. वर is therefore the best man; on the other hand in I. 119. 5 and IV. 44. 6 the अ० are mentioned as husbands of Sūryā, cf. Bergaigne, II 486. सूर्या's mounting of the car of the Aśvins or her वहतु (bridal procession) is referred to in I. 34. 5; 117. 13; 118. 5; and in ऐतरेय ब्रा० 4. 7. कार्ष्मेव अर्वता जयन्ती. This is a simile from the race. कार्ष्म is taken to be the winning post by Sāyana and Geld. suggests that it may be a display-stand near the winning post, indicating the winning point; but the meaning of the word can be specified with the help of the two passages, besides ours, where it occurs, viz. IX. 36. 1, कार्ष्मन् वाजी नि अक्रमीत् and IX. 74. 8, अध श्वेतं कलशं गोभिः अक्तं आ वाजी अक्रमीत् ससवान्; the winning horse treading on the कार्ष्म forms the

* ऋ. सं. १०-८५-१.

simile for the Soma pouring into the pitcher. Obviously the कार्ष्मन् is a circle drawn (कृष्) on which the horse must tread in order to be a winner. Sūryā steps triumphant into the chariot of the Aśvins as though she were stepping into the winning circle with her chariot. श्रिया॑ सं॑ सचेथे. सं सच् to be joined on to, to obtain, to meet: cf. नियुद्भि॑. सचसे X 8. 6; उषसः सूर्येण सचन्त X. 11 ।. 7; क्रतेन सचेथे I. 152. 1; एहि सं सचावहै VI. 55. ।. श्रीः is used in the ṚV. much as in later literature in the sense of splendour, beauty, good-luck, and there is a peculiar idiomatic use of it, for which see I. 184. 3. उ is an enclitic particle having a certain emphasis; it is always represented in the pada-text by ऊँ इति; cf. I 32. 15 (सेदु राजा).

Tr. The daughter of Sūrya mounted your chariot as though she were treading on the winning circle, victorious with her horse; all the gods approved in their hearts; you obtained great glory, indeed, oh true gods.

Verse 18

यत् । अयातम् । दिवःऽदासाय । वर्तिः । भरत्ऽवाजाय । अश्वि-
य॑त् अ॑यातम् दि॑वदासाय वर्ति॑ भर॑द्वाजाय अश्वि-
ना । हयन्ता ॥ रेवत् । उवाह । सचनः । रथः । वाम् । वृषभः ।
ना॒ ह॑यन्ता रेव॑त् उवाह॒ सच॑नः र॑थः वाम् वृ॒षभः॑
च । शिंशुमारः । च । युक्ता ॥ १८ ॥
च॒ शिंशुमा॑रः च॒ यु॒क्ता॑

हे अश्विनौ हयन्ता स्तुतिभिराह्रयमानौ युवां भरद्वाजाय संश्रियमाणहविर्लक्षणान्नाय यजमानाय दिवोदासायैतत्संज्ञाय राजर्षयेऽभीष्टं फलं दातुं वर्तिस्तदीयं गृहं यद्यदायातम् अगच्छतं तदानीं रेवद्धनयुक्तमन्नं वां युवयोः सचनः सेवनो रथ उवाह। तस्मै दिवोदासाय प्रापयामास। अपि च तस्मिन् रथे वृषभोऽनड्वान् शिंशुमारो ग्राहश्च परस्परविरुद्धावपि स्वसामर्थ्यप्रकटनाय युक्ता। वाहनतया संयुक्तावास्ताम्। दिवोदासाय। दिवश्च दासे षष्ठ्या अलुक् वक्तव्यः (का० ६-३-२१) इत्यलुक्। दिवोदासादीनां छन्दस्युपसख्यानमिति पूर्वपदाद्युदात्तत्वम्। भरद्वाजाय। भृञ् भरणे।

अस्माद्व्यत्ययेन कर्मणि शतृप्रत्ययः । शतुश्छन्दस्युभयथेत्यार्धधातुकत्वेन लसार्वधातुकानुदात्तत्वाभावात्प्रत्ययाद्युदात्तत्वम् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । हयन्ता । ह्वेञः कर्मणि लटो व्यत्ययेन शतृ । बहुलं छन्दसीति संप्रसारणम् । शपि गुणे छान्दसोऽयादेशः । रेवत् । रयिशब्दान्मतुप् । रयेर्मतौ बहुलमिति संप्रसारणम् । छन्दसीर इति मतुपो वत्वम् । रयिशब्दाच्च (का० ६-१-१७६) इति मतुप उदात्तत्वम् । सचनः । षच सेवने । अनुदात्तेतश्च हलादेरिति युच् । युक्ता । सुपां सुलुगिति विभक्तेराकारः ॥

The story of दिवोदास occurs in I. 112. 14: यामिः महा अतिथिग्वं कशोजुवं दिवोदासं शम्बरहत्ये आवतम् and in I. 119. 4 यासिष्ट वर्ति. वृषणा विजेन्यं दिवोदासाय महि चेति वा अव. ; as to how दिवोदास was protected in the battle with शम्बर does not appear anywhere. The शम्बर myth is mentioned in about fourteen passages in the RV, while दिवोदास appears in about seventeen passages He is mentioned as अतिथिग्व, as भरद्वाज, as the son of वध्र्यश्व and as the father of सुदास् (VII. 18. 25). He is a special protégé of Indra, and Indra is mentioned as killing शम्बर for him. भरद्वाजाय वर्तिः. वर्ति. n. (या)-from वृत् to go on a round with या or परि या or आ या, once with नियम्, another time with वह्; this expression occurs with one exception (X. 122. 6, said of Agni) only in connection with the अश्विनौ. हयन्ता from हि-हिनोति-(5 U.) to drive quickly. सचनः from सच् (Old. and Sāyana), Geld. from चन, 'having the same wish, sympathetic'. सचन occurs only once more in VI. 39. 1 (सचनस्य मघवा). The रथ is called सचनावत् in (VIII. 22. 2): cf. वचन, VI 39. 1 and वचनावत् IX 68 1. शिंशुमारः (classical शिशुमार) a dolphin, शिंशुमार occurs only here.

Tr. When on your rounds you went in haste to Divodāsa, the pious worshipper, your ever-present chariot carried you; a bull and a dolphin were yoked (to it).

Verse 19

रयिम् । सुऽक्षत्रम् । सुऽअपत्यम् । आयुः । सुऽवीर्यम् ।

रयि'म सुक्षत्र'म स्वपत्य'म आ'युः सुवी'र्यम्

नासत्या । वहन्ता ॥ आ । जह्नावीम् । सऽमनसा । उप । वाजैः ।
नासत्या वऽहन्ता आ जह्नाऽवीम् सऽमनसा उऽप वाऽजैः
त्रिः । अह्नः । भागम् । दधतीम् । अयातम् ॥ १९ ॥
त्रिऽः अऽह्नः भाग्म् दऽधतीम् अयातम्

हे नासत्यावश्विनौ सुक्षत्रं शोभनबलं रयिं धनं स्वपत्यं शोभनैः पुत्रादिभिरुपेतं सुवीर्यं शोभनवीर्योपेतमायुः । अन्ननामैतत् । एवंगुणविशिष्टमन्नं च वहन्ता धारयन्तौ युवां समनसा समानमनस्कौ सन्तौ जह्नावीं जह्नोर्महर्षेः संबन्धिनीं प्रजामायातम् । आभिमुख्येनागच्छतम् । कीदृशीम् वाजैर्हविर्लक्षणैरन्नैरुपेताम् । अह्नः । अहरहःशब्देन तत्रानुष्ठेयः सोमयागो लक्ष्यते । तस्य प्रातःसवनादिरूपेण त्रिस्त्रिधा विभक्तं भागमंशं दधतीं बिभ्रतीम् । अनुसवनं हविर्भिर्यजमानामित्यर्थः । सुक्षत्रम् । बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । सुवीर्यम् । वीरवीर्यौ चेति बहुव्रीहावुत्तरपदादुदात्तत्वम् । जह्नावीम् जह्नुशब्दात्तस्येदमित्यर्थेऽण् । टिड्ढाणञ् इति ङीप् । जाह्नवीम् । ह्रस्वदीर्घयोर्विनिमयः पृषोदरादित्वात् । उक्तं च वर्णागमो वर्णविपर्ययश्च (का० ६-३-१०९) इति । अत एव मध्योदात्तत्वम् ॥

जह्नावी is mentioned only in one more passage, III. 58. 6 : पुराणं ओकः सख्यं शिवं वां युवो नरा द्रविणं जह्नाव्याम्. Geld. understands जह्नावी in the latter passage as the race of जह्नु, the ancestor of the कुशिकाः ; Sāy. also understands जह्नावी in our passage as being used for descendants of जह्नु. The ताण्ड्यब्रा० mentions (21. 12. 2) a war between the clan of the Vrcivats and the Jahnus, the former are mentioned in VI. 27. 5-7 and appear to be subjects belonging to शरु ; cf. वृचीवन्तः शरवे पत्यमाना., rc. 6. वृचीवन्तः a kingly family according to Geld., demons according to Grassman ; in any case there is no mention of any connection between them and the Jahnus.

Tr. You went with accordant minds to the descendants of Jahnu that offered you a portion (in the sacrifice) thrice a day, carrying with you wealth accompanied by power and progeny and long life accompained by abundance of man-power.

Verse 20

परिऽविष्टम् । जाहुषम् । विश्वतः । सीम् । सुऽगेभिः । नक्तम् ।
परिऽविष्टम् जाहुऽषम् विश्वऽतः सीम् सुऽगेऽभिः नऽक्तम्

ऊहथुः । रजःऽभिः ॥ विऽभिन्दुना । नासत्या । रथेन । वि ।
ऊहथुः रजोभिः विभिन्दुना नासत्या स्थेन विः
पर्वतान् । अजरयू इति । अयातम् ॥ २० ॥
पर्वतान् अजरयू अयातम् [* ताँ]

जाहुषो नाम कश्चिद्राजा । विश्वतः सर्वतः परिविष्टं शत्रुभिः परिवृतं तं राजानं हे नासत्यावश्विनावजरयू जरारहितौ नित्यतरुणौ युवां विभिन्दुना विशेषेण सर्वस्य भेदकेनात्मीयेन रथेन नक्तं रात्रौ सुगेभिः सुष्ठु गन्तुं शक्यै रजोभि रञ्जकैर्मार्गैर्-ऊहथुः । तस्माच्छत्रुसमूहान्निरगमयतम् । सीमित्येतत्पादपूरणम् । निर्गतेन तेन सह पर्वतान् शत्रुभिरारोढुमशक्यान् शिलोच्चयान् व्ययातम् । विशेषेणागच्छतम् । परि-विष्टम् । विश प्रवेशने । कर्मणि निष्ठा । गतिरनन्तर इति गतेः प्रकृतिस्वरत्वम् । सु-गेभिः । सुदुरोरधिकरण इति गमेर्डः । विभिन्दुना । भिदिर् विदारणे । औणादिक उप्रत्ययो नुमागमश्च । अजरयू । न जरा अजरा । तामात्मन इच्छतः । सुप आत्मनः क्यच् । न च्छन्दस्यपुत्रस्येति ईत्वदीर्घयोर्निषेधः । क्याच्छन्दसीत्युप्रत्ययः ॥

The story of जाहुष appears only in VII. 71. 5 (जाहुष शिथिरे धातं अन्तः) which appears to be a summary statement of the present rc. परिविष्ट from विष् to surround ; cf. दृढिः न जिह्वा परिविष्टं आशत्, X. 68. 6. सीम् is an expletive, also used for slight emphasis, cf. विश्वतः सीम् I. 33. 9 ; 100. 14 ; विश्वस्मात् सीम्, IV. 28. 4. सीम् is also used in the sense of him or her : cf. परि सीम् (अग्निं) नयन्ति, I. 95. 2 ; प्र सीम् आदित्यः असृजत् II. 28. 4. सुग easy to cross or accessible ; cf. सुगः पन्थाः I. 41. 4 ; सुगान् पथः III. 30. 10. विभिन्दु from भिद्, which cuts a way before it. It occurs only once more in VIII. 2. 41, where it is an epithet of Indra. अजरयु (जरयु is from जरयति-जरा आत्मनः इच्छति) unageing ; it occurs only here ; the form अजर is of frequent occurrence, also अजुर्य. वि अयातम् from या with वि to cross over or pass over ; see notes on I. 48. 7. Geld. understands *cd* as mentioning a new feat which is referred to in I. 117. 16 (वि जयुषा ययथुः सानु अद्रेः), also VI. 62. 7 (वि जयुषा रथ्या यातं अद्रिम्) and X. 39. 13 (ता वार्तिः यातं जयुषा वि पर्वतम्). Sāyana connects it with the rescue of जाहुष. Since जाहुष is taken by aerial regions (रजोभिः), the passage through mountains is obviously not necessary for the rescue.

Tr. When Jāhuṣa was completely surrounded you carried him (to a safe place) at night by the aerial regions (made)

easy to cross. With your car that cuts a path before it, oh true one, you, the unageing, passed across the mountains.

Verse 21

एकस्याः । वस्तोः । आवतम् । रणाय । वशम् । अश्विना । सनये ।
एकस्याः वस्तोः आवतम् रणाय वशम् अश्विना सनये
सहस्रा ॥ निः । अहतम् । दुच्छुनाः । इन्द्रऽवन्ता । पृथुऽश्रवसः ।
सहस्रा निः अहतम् दुच्छुनाः इन्द्रवन्ता पृथुश्रवसः
वृषणौ । अरातीः ॥ २१ ॥
वृषणौ अरातीः

हे अश्विनौ वशमेतत्संज्ञमृषिमेकस्या वस्तोरेकस्याह्नो रणाय रमणीयाय सहस्रा सहस्रसंख्याकाय सनये धनलाभायावतम् । अरक्षतम् । स ऋषिः प्रशंसति यहं यथा सहस्रसंख्यं धनं लभते तथा रक्षितवन्ताविति यावत् । अपि च हे वृषणौ कामानां वर्षितारावश्विनौ इन्द्रवन्ता इन्द्रेण संयुक्तौ युवां दुच्छुना दुष्टसुखान् दुःखस्य कर्तॄन्पृथुश्रवसो विस्तीर्णयशसोऽरातीः शत्रून्निरहतं निःशेषेणावधिष्टम् । यद्वा । कानीतस्य पृथुश्रवः संज्ञस्य राज्ञः शत्रूनिति योज्यम् । सहस्रा । सुपां सुलुगिति चतुर्थ्या डादेशः । अहतम् । लङि थसस्तम । अनुदात्तोपदेशेत्यादिनानुनासिकलोपः । दुच्छुनाः । शुनमिति सुखनाम । दुष्टं सुखं यासां तास्तथोक्ताः । परादिश्छन्दसि बहुलमित्युत्तरपदाद्युदात्तत्वम् ॥

वश as a protégé of the Aśvins is mentioned in I. 112. 10, our passage, VIII 8. 20; X. 40. 7; 50. 9. वश अश्व्य is the poet of VIII. 46. and his praise of the donations of पृथुश्रवस् कानीत form verses 21–24 of the hymn; there the poet's own name also is mentioned; and the gifts he received, as mentioned there, amount to षष्टि सहस्रा अश्व्यस्य अयुता असन उष्ट्रानां विंशति शता and much more. It is likely that this वश is identical with the वश in our passage. एकस्या वस्तोः, वस्तु (from वस् उच्छति to shine) morning the genitive वस्तोः occurs much oftener than the other forms and means 'in the morning;' cf. दोषा वस्तोः, at night and in the morning. वस्तोःवस्तोः, every morning (X. 40. 1). रणाय सहस्रा सनये. सहस्रा=सहस्राणि (Sāy. सहस्राय); it is governed by सनये which is in apposition to रणाय; cf. II. 23. 2. रण (from रण्) pleasure or joy or

longing; also battle, for which a soldier longs; cf. अस्मे पृश्निः महते रणाय (मरुत्वा त्वेष) I. 168. 9 : रणाय सोमं पिब III. 47. 1 ; रणं कृधि X. 112. 10. दुच्छुना (from दुस् + शुन luck) ill-luck; like other abstract nouns, e. g. अभिमाति, अराति, it is used concretely for evil-doers; cf. मा नः आभ्यः रीरधः दुच्छुनाभ्यः II 32. 2 ; मा नः अवसृजः दुच्छुनायै I. 189. 5.

Tr. You came to the help, O Aśvins, of Vaśa to his great delight so that he gained thousands in the course of a single morning. Accompanied by Indra, O mighty gods, you smote off the ill luck and the enemies of Prthuśravas.

Verse 22

शरस्य । चित् । आर्चत्कस्य । अवतात् । आ । नीचात् ।
शर॑स्य चित् आर्चत्क॑स्य अवता॑त् आ॑ नीचा॑त्
उच्चा । चक्रथुः । पातवे । वारिति वाः ॥ शयवे । चित् नाम-
उच्चा॑ चक्रथुः पा॑तवे वा॑ः शय॑वे चित् नाम॑-
त्या । शचीभिः । जसुरये । स्तर्यम् । पिप्यथुः । गाम् ॥२२॥
त्या॑ श॑चीभिः ज॑सुरये स्तर्य॑म् पिप्यथुः गा॑म्

आर्चत्कस्य ऋचत्कपुत्रस्य शरस्य* चित् । एतत्संज्ञस्यापि । स्तोतुः पिपासितस्य पातवे पानार्थं नीचान्नीचीनाददवताल्कूपात् उच्चा उच्चैरुपरिष्टाद्वारुदकं हे अश्विनौ युवाम् । आ चक्रथुः । आभिमुख्येन कृतवन्तौ । तथा हे नासत्यावश्विनौ शचीभिः युष्मदीयैः कर्मभिः परिचरणैर्जसुरये श्रान्ताय शयवे चित् शयुनाम्ने ऋषये स्तर्यं निवृत्तप्रसवां गामग्निहोत्रार्थस्य पयसो दोग्ध्रीं पिप्यथुः । पयसा युवामापूरितवन्तौ । पातवे। पा पाने । तुमर्थे सेसेनिति तवेन्प्रत्ययः । जसुरये । जसु हिंसायाम् । जसिसहोरुरिन् (उ० २-७२) । स्तर्यम् । स्तीर्यते आच्छाद्यते प्रसवसामर्थ्याभावेनेति स्तरीः । अविनृस्तृतन्त्रिभ्य ईः (उ० ३-१५७) इतीकारप्रत्ययः । वा छन्दसीत्यभि पूर्वत्वस्य विकल्पितत्वादभावे यणादेशः । उदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वम् । पिप्यथुः । प्यायी वृद्धौ । लिटि व्यत्ययेन परस्मैपदम । लित्यङोश्च (पा० ६-१-२९) इति पीभावः ॥

The mention of शर as a liberal patron, occurs in VIII. 70. 13, 14 ; but he appears to be different from शर, the son of

* आदर्शे चित् इति न दृश्यते ।

ऋचन्क. There is no reference to this legend of शर elsewhere. उच्चा adv. = उच्चै:. वा: water. The story of शयु's cow occurs in I. 117. 20; 118. 8; 119. 6; VI. 62. 7 etc. अवतं well; cf. आवृनास: अवतास: न कर्तृभि: तनूषु ते क्रतव: इन्द्र भूरय: I. 55. 8. जसुरि from जस् to famish cf. जसुरये वृकाय V. 13. 5: जसुरि श्येनं IV. 38. 5. स्तर्यम् from स्तरी sterile. पिप्यथु: from पि (पिन्व्)—(प्यै) (i) to swell; (ii) to cause to swell, to cause to yield milk; cf. गौ: पयोभि: प्यते, I. 164. 28; (ii) धेनुं ऊधनि पिप्यत II. 34. 6; (meta.) त्वा इन्द्रं अपीप्यन् VIII. 99. 1.

Tr. You made the water to rise high from its depth from the well that Śara, the son of Ṛcatka, might drink (from it). For Śayu, who was in a state of exhaustion, you, O true ones, caused a sterile cow to swell (with milk).

Verse 23

अवस्यते । स्तुवते । कृष्णियाय । ऋजुऽयते । नासत्या ।
अवस्यते स्तुवते कृष्णिया'य ऋजुयते नासत्या
शचीभिः ॥ पशुम् । न । नष्टम्ऽइव । दर्शनाय । विष्णाप्वम् ।
श'चीभिः पशु'म् न' नष्ट'मिव दृ'शनाय विष्णाप्व'म
ददथुः । विश्वकाय ॥ २३ ॥
ददथुः वि'श्वकाय

अवस्यते अवनं रक्षणमात्मन इच्छते स्तुवते स्तुतिं कुर्वते कृष्णियाय । कृष्णो नाम कश्चित् तस्य पुत्राय । ऋजूयत आर्जवमिच्छते विश्वकायैतत्संज्ञाय ऋषये । हे नासत्यौ युवां शचीभिरात्मीयैः कर्मभिर्विष्णाप्वं नाम विनष्टं पुत्रं दर्शनाय दर्शनार्थं ददथुः । दत्तवन्तौ । तत्र दृष्टान्तः । पशुं न नष्टमिव । एक उपमार्थीयः पूरकः । यथा कश्चिद्विनष्टं पशु स्वामिनो दृष्टिपथ प्रापयति तद्वत् । अवस्यते । अवस्शब्दात् सुप आत्मन क्यच् । शतुरनुम इति विभक्तेरुदात्तत्वम् । कृष्णियाय कृष्णशब्दादपत्यार्थे छान्दसो घच् ॥

विश्वक: कार्ष्णि: is the author of VIII. 86. 3 according to the सर्वानुक्रमणिका, but the poet there refers to himself as विश्वक and refers also to the एधतु (prosperity) which the Aśvins have vouchsafed to Viṣnāpū युव हि ष्म पुरुभुजा इमं एधतुं विष्णाप्वे ददथु: वस्यइष्टये

ता वां विश्वक॰ हवते तनूकृथे. इमं एषतुं indicates the contemporaneity of विष्णापू and विश्वक. I. 116. 23; 117. 7, and X. 65. 121, where the story of विश्वक and विष्णापू appears, are then of later date than VIII. 86. 3. विष्णापू is probably a patron and not a lost son of विश्वक. In I. 117. 7 and X 65. 12 विष्णापू is mentioned as given to विश्वक as a milch-cow, while in our passage the joy of the acquisition of a patron is only likened to that of the discovery of a lost cow. अवस्यते from अवस्यति, अवः आत्मानं इच्छति. ऋजूयते from ऋजूय to act in a straightforward manner; cf. ऋजूयन्तं मर्तं अनु व्रतं रक्षति I. 136. 5.

Tr. To Viśvaka, the son of Krsna, who wanted help, who offered you praise, and lived a holy life, you, oh true gods, by your powers gave Visnāpū, like a lost animal to (its owner's) sight.

Verse 24

दश । रात्रीः । अशिवेन । नव । द्यून् । अवऽनद्धम् । श्रथितम् ।
द॰श रा॰त्रीः अ॰शिवेन न॰व द्यू॰न् अ॰वऽनद्धम् श्रथित॰म्
अप्ऽसु । अन्तरिति ॥ विऽप्रुतम् । रेभम् । उदनिं । प्रऽवृक्तम् ।
अप्॰सु॰ अन्तः वि॰प्रुतम् रेभ॰म् उद॰नि प्र॰वृक्तम्
उत् । निन्यथुः । सोममिऽव । स्रुवेण ॥ २४ ॥
उ॰त निन्यथुः सो॰ममिव स्रुवे॰ण [*प्स्व]

पुरा खलु रेभमृषिं पाशैर्बद्ध्वा सुराः कूपे कस्यचिद्दिवसस्य सायंकाले प्रचिक्षिपुः । स चाश्वनौ स्तुवन् दशरात्रीर्नवाहानि च कूपमध्ये तथैवावतस्थे । दशमेऽहनि प्रातरश्विनौ तं कूपादुदतारयतामिति । तदाह । अप्सु कूपान्तर्वर्तमानास्वन्तर्मध्येऽसुरैः पातितमशिवेन दुःखहेतुना दाम्नावनद्धं बद्धं श्रथितं शत्रुभिर्हिंसित दश रात्रीर्दशसंख्याका निशाः नव द्यून् नवसंख्याकान्यहानि च । अत्यन्तसंयोगे द्वितीया एतावन्तं कालं तत्रैव कूपेऽवास्थितमत एव उदन्युदके विप्रुतं विप्रुतं व्याक्षिप्तसर्वाङ्गम् । प्रवृक्तम् । लुप्तोपममेतत् । प्रवृञ्जनेन संतप्तं घर्ममिव व्यथया सन्तप्यमानमेवभूत रेभं हे अश्विनौ युवां उन्निन्यथुः । तस्मात्कूपादुन्नीतमुत्तीर्णं कृतवन्तौ । तत्र दृष्टान्तः । सोममिव यथाग्निहोत्रहोमार्थमभिषुतं सोमरसं कूपसदृशेऽग्निहोत्रस्थालीमध्ये वर्तमानं स्रुवेणाध्वर्युरुन्नयति ऊर्ध्वं नयति तद्वत् । अवनद्धम् । णह बन्धने । कर्मणि

निष्ठा । नहो धः (पा० ८-२-३४) । झषस्तथोर्धोऽध इति निष्ठातकारस्य धत्वम् । गतिरनन्तर इति गतेः प्रकृतिस्वरत्वम् । श्रथितम् । श्रथ हिंसार्थः । निष्ठा । विप्रुतम् । प्लृङ् गतौ । अवनद्धवत्प्रत्ययस्वरौ । कपिलकादित्वाल्लुत्वविकल्पः । उदनि । पद्दनित्यादिना उदकशब्दस्योदनभावः ॥

The story of रेभ appears in I. 112. 5—निवृतं (Gr restrained, Geld. sunken) सितं (bound) अद्रयः ; 117. 4—दुरेवैः गूढ विप्रुतं ; 117. 12, दशमे अहनि ; 118. 6—उदैरतम् ; 119. 6—परिप्लुतेः (from oppression) उरुष्यथ ; X. 39. 9—गुहा हितं ममृवांसं. He was tied hand and foot and hurled into water, from where he was rescued by the Aśvins on the tenth day, for which the poet (I. 117. 12) naturally asks, "Where were you engaged in the mean-while?" श्रथितं विप्रुतं प्र वृक्तम्. श्रथ to shatter, to smite down ; विप्रु to float. प्रवृक्त Geld., made hot or burnt (cf. प्रवर्ग्य), possibly also hurled down ; Gr, hurled down or sunken. वृज् with प्र occurs only I. 116. 1 (बर्हिः प्र वृञ्जे) ; VII. 2. 4 (अग्नौ बर्हिः प्र वृ), 39. 2 (बर्हिः प्र वावृजे) and V. 30. 15 (प्रवृजे यः वर्म आसीन्), besides our passage. In the last it means 'to set on fire' and it refers to the प्रवर्ग्य rite ; but elsewhere it means 'offer' ; so that here the meaning must be determined by the context ; in अपवृज्, निवृज, परावृज् the word means 'to throw.'

Tr. You took out, as one takes out the Soma with the ladle, Rebha, hurled into water, as he lay floating for ten nights and nine days in it, fettered and smitten by an evil-doer.

Verse 25

प्र । वाम् । दंसांसि । अश्विनौ । अवोचम् । अस्य । पतिः ।
प्र वाम् दंसांसि अश्विनौ अवोचम् अस्य पतिः
स्याम् । सुऽगवः । सुऽवीरः ॥ उत । पश्यन् । अश्नुवन् । दीर्घम् ।
स्याम् सुऽगवः सुऽवीरः उत पश्यन् अश्नुवन् दीर्घम्
आयुः । अस्तम्ऽइव । इत् । जरिमाणम् । जगम्याम् ॥ २५ ॥
आयुः अस्तमिव इत् जरिमाणम् जगम्याम्

एवमनेन सूक्तेनाश्विनोर्महिमानं प्रशस्याधुना मन्त्रद्रष्टा स्वाभीष्टं प्रार्थयते। हे अश्विनौ वां युवयोर्दंसांसि पुरा कृतानि कर्माणि प्रावोचम्। इत्थमुक्तवानस्मि। सोऽहं सुगवः शोभनगोयुक्तः सुवीरः शोभनवीरश्च भूत्वास्य राष्ट्रस्य पतिरधिपतिः स्यां भवेयम्। उतापि च पश्यन्। अक्षिभ्यां पश्यन्। उपलक्षणमेतत्। सर्वैरिन्द्रियैः स्वस्वविषयदर्शनसमर्थैर्दीर्घं वर्षशतरूपेणायतमायुर्जीवितं चाश्नुवन् प्राप्नुवन्नहमस्तमिव यथा गृहं स्वामी निष्कण्टकं प्रविशति एवं जरिमाणं जरां जगम्याम्। कण्टकराहित्येन प्राप्नुयाम्। वृद्धः संश्चिरकालं निवसेयमित्यर्थः। स्याम्। अंस्तेः प्रार्थनायां लिङ्। यासुट्। श्नसोरल्लोप इत्यकारलोपः। अश्नुवन्। अशू व्याप्तौ। व्यत्ययेन शतृ। जरिमाणम्। जृष् वयोहानौ। अस्मादौणादिक इमनिच्। जगम्याम्। गमेः प्रार्थनायां लिङि। बहुलं छन्दसीति विकरणस्य श्लुः॥

दं'सस् n. a wonderful deed; a miracle. अस्य' पं'तिः. अस्य stands for राष्ट्रस्य acc. to Sāy., for the property owned by the poet acc. to Geld. Being emphasised, it is accented. सुग'वः from सु + गो. अं'स्तम् home; cf. rc. 5. *d*. Old age brings repose like home.

Tr. O Aśvins, I have spoken of the miracles wrought by you; may I become the owner of this, blessed with cattle and offspring, and seeing and enjoying a long life, may I attain old age as one attains one's home.

No. 6

MANDALA I SŪKTA 184

यस्य नि·श्वसितं वेदा यो वेदेभ्योऽखिलं जगत्। निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्॥ १॥ द्वितीयाष्टकमध्यस्थश्चतुर्थोऽध्याय आदरात्। व्याख्यातः सायणार्येण पञ्चमो व्याकरिष्यते॥ २॥ तत्र ता वामिदीं प्रथममण्डलस्य चतुर्विंशेऽनुवाके पञ्चमं सूक्तम्। पूर्वसूक्ते षळित्युक्तत्वात्सूक्तसंख्यानुवर्तत इति परिभाषितत्वात् षळृक्चम्। ऋषिश्चान्यस्मादिति परिभाषयागस्त्यं तथाश्विनं वा इत्युक्तत्वाज्जुह्वादिपरिभाषयेदमप्याश्विनम्। अनादेशपरिभाषया त्रैष्टुभम्। ता वामित्यनुक्रान्तम्। युवोरजांसीत्यादीनां पञ्चसूक्तानां तृतीयवर्जितानां प्रातरनुवाकाश्विनशस्त्रयोर्विनियोग उक्तः। तत्रेदं पञ्चमम्॥

Verse 1

ता । वाम् । अद्य । तौ । अपरम् । हुवेम । उच्छन्त्याम् । उषसि ।
वह्निः । उक्थैः ॥ नासत्या ॥ कुह । चित् । सन्तौ । अर्यः ।
दिवः । नपाता । सुदासःऽतराय ॥ १ ॥

ता तौ रक्षकत्वेन प्रसिद्धौ वां युवामद्यास्मिन्यागदिने हुवेम आह्वयाम इत्याशीः । तथापरमपरस्मिन्नपि दिने तौ युवां हुवेम । अपरमित्येतदपरस्मिन्नित्यर्थे समभिव्याहारात् अद्या च नो मृळयतापरं च । (ऋ० २-२९-२) इत्यादि मन्त्रान्तरे तथा दर्शनाच्च । अपरयागं प्रत्यपीति वा । कस्मिन्काले । उषस्युषोदेवतायामुच्छन्त्यां तमो विवासयन्त्या सत्याम् । उषःकाले हि प्रातरनुवाकाश्विनशस्त्रे प्रयुज्येते । उक्ते काले हे नासत्या असत्यरहितौ दिवो नपाता द्युलोकस्य न पातयितारौ । नप्तृस्थानीयौ वा कुहचित्सन्तौ कुत्रचिद्देशे वर्तमानौ युवां वह्निः स्तुतेर्वोढार्य ईरयिता स्तुतेरोश्वगे वा । इदृशोऽहं होता सुदास्तरायात्यर्थं शोभनहविर्दात्रे यजमानाय तदर्थम् तौ युवामुक्थैः शस्त्रैः हुवेमेति संबन्धः । अत्राख्यातं पदमेकवचनतया नेतव्यम् । वह्निरर्यशब्दौ वा बहुवचनत्वेन नेतव्यौ । अथवा वाक्यद्वयम् । यस्माद्वह्निरयं होतोक्तगुणकौ युवां शंसति तस्माद्वयं यजमानास्तौ युवामाह्वयाम इति ॥

The hymn is the fifth and last of the hymns to the Aśvins ascribed to अगस्त्य. नासत्या दिवः नपाता. Geld.'s suggestion (V. S. III. 372) that this is a separated द्वंद्व compound, is fantastic. नपात् (cf. L. nepos, Lith. Nepatis, grandson ; cf. नप्तृ) means child or progeny. ता. वाम् अद्य (हुवेम) ता in the sense of the well-known ; cf. तं त्वा नृम्णानि बिभ्रतम् IX. 48. 1, also I. 36. 6. अपरम् adv., in the future, contrasted with अद्य or नूनम् ; cf. स त्वं नो अद्य सुमना: उत अपरं यक्षि देवान् I. 36. 6. ; मा ते भयं जरितारं नूनम् विदत् मा अपरम् I. 189. 4 ; नमः पुरा ते वरुण उत नूनम् उत अपरम् II. 28. 8. व्युच्छन्त्याम् उषसि वह्निः उक्थैः (हवते). This sentence is both elliptical and parenthetical. The Vedic poet is very fond of parenthesis. Gr. proposes to read वह्नी, making it adj. to अश्विनौ and an object to हुवेम. No change is admissible in the Vedic text. वह्नि is a carrier (वोढा) of either oblations or of men and hence signifies the fire or the priest or the horse ; cf. सोमस्य मा तवसं वह्निं चकर्थ III. 1. 1 ; वह्निं यशसं विदथस्य केतु

(अग्निं) I 60. 1; ये त्वां वहन्ति वह्नयः I. 14. 6; आशिष्ठाः वह्नयः अनु शृण्वन्ति II. 24. 13. उक्थ (वच्) hymn of praise; cf. उक्थ्य I. 48. 12. कुह'चित् स'न्तौ. कुह् (कु+ह; cf. इह, also कुत्र, क)+चित् = कुत्रापि. अर्यः सुदा'स्तराय (हुवेम). अर्यः abl. from अरि a patron or a rich lord; see notes on I. 116. 6; सुदाः liberal.

Tr. Wherever you may be, may we, oh true children of heaven, invoke you, well-known (protectors as you are), today and may we invoke you in future—the fire at break of dawn (also) invokes you with hymns of praise—for the sake of him (our patron) who is more liberal than a rich lord.

Verse 2

अस्मे इति । ऊँ इति । सु । वृषणा । मादयेथाम् । उत् । पणीन् ।
हतम् । ऊर्म्या । मदन्ता ॥ श्रुतम् । मे । अच्छोक्तिऽभिः ।
मतीनाम् । एष्टा । नरा । निऽचेतारा । च । कर्णैः ॥ २ ॥

* स्मे ; णीँ हँ

हे वृषणा कामानां वर्षकावश्विनौ युवामस्मे उ अस्मास्वेव सु मादयेथाम्। सुष्ठु तृप्यतम्। अस्मभ्यं तर्पयतमभिमतम्। तथा पणीन्वणिजो लुब्धकानयष्टून् उत्* उन्मूल्य हतम्। नाशयतम्। कीदृशौ युवाम्। ऊर्म्याम्। रात्रिनामैतत्। रात्रौ मदन्तौ। मादयन्तौ। यद्वा ऊर्मिरिति सोमनाम। ऊर्मिर्यस्ते पवित्र आ (ऋ० ९-६४-११) इत्यादिषु तथा प्रयोगात्। अस्मदीयेन सोमेन मदन्तौ। तादृशौ युवां मे ममाच्छोक्तिभिराभिमुख्यकरैर्निर्मलवेदवाक्यै रचिताः। मतीनाम्। कर्मणि षष्ठी। मननसाधनाः स्तुतीः कर्णैराकर्णनसाधनैः श्रोत्रैः श्रुतम्। शृणुतम्। हे नरा नेतारौ युवां खल्वेष्टान्वेष्टारावस्मत्स्तुतीनां तथा निचेतारा लब्धानां तासां संचयकर्तारौ। निरित्येष समित्येतस्य स्थाने। यस्मादेवंविधौ तस्माच्छृणुतमिति॥

अस्मे उ सु The final vowel of अस्मे is a प्रगृह्य; the short उ is always given as ऊँ in Pp. Here it is lengthened according to प्रा० 449; the change of सु to षु is noted at प्रा० 322. The samdhi पणीँ हँतं is noted at प्रा० 288. The ऊर्मि, wave or flood, is of the

* आदर्शे उत् इति नास्ति।

Soma. एष्टा नरा मे अच्छोक्तिभिः मतीनां श्रुतम्. एष्टा du. of आ + इष्ट, from यज् or इष्; अच्छोक्ति from अच्छ + उक्ति a speech addressed to (अच्छ), an invocation; cf. मंहिष्ठं अच्छोक्तिभिः मतीनां बृहद्भ्यै, I. 67. 3. मति a prayer; cf. मन्म. Geld. construes अच्छोक्तिभि· with एष्टा; Sāyana एष्टा निचेतारा च नरा; Geld. मदन्ता निचेतारा च श्रुतम्. निचेतारा from चि with नि to listen or observe attentively; cf. काव्या नि चिकेथे V. 66. 4; निदानं नि चिक्यु: X. 114. 2.

Tr. O virile gods, do gladden us; rejoicing in the flow of Soma, overthrow the niggardly people; oh heroes to whom sacrifice is offered, hear my prayers on account of my appeals, listening attentively with your ears.

Verse 3

श्रिये । पूषन् । इषुकृताऽइव । देवा । नासत्या । वहतुम् ।
सूर्यायाः ॥ वच्यन्ते । वाम् । ककुहाः । अप्ऽसु । जाताः ।
युगा । जूर्णाऽइव । वरुणस्य । भूरेः ॥ ३ ॥

सविता सूर्यो दुहितरं सूर्याख्यां प्रदातुमना देवानाहूय सामर्थ्यसमीक्षणायाजिं परिकल्प्य य इमं जेष्यति स एषां कन्यकामृक्सहस्रकल्पं स्तोत्रं च लभत इत्यकल्पयत्। तमग्निः प्रथममजयत्तमन्वश्विनावपि जित्वाग्निं प्रधृष्य ऋक्सहस्रं कन्यकां चालभेताम्। तत इन्द्र उषाश्चाजयताम्। तौ च तैरन्यादेभिः प्रार्थितौ स्वशस्त्रस्य कंचित्कंचिद्भागं तेभ्यः परिकल्प्य सूर्यां स्वरथे धारयतामिति। अयमितिहासो ब्राह्मणे प्रजापतिर्वै सोमाय राज्ञे (ऐ० ब्रा० ४-७) इत्यत्राम्नातोऽस्माभिः प्रथमाष्टमे आ वां पतित्वं सख्याय (ऋ० १-११९-५) इत्यत्र प्रपञ्चितः। अत्राह। हे पूषन् पोषक सूर्य एतच्चन्द्रस्याप्युपलक्षणं सूर्याचन्द्रमसोरेवाश्वित्वात्। सूर्याचन्द्रमसावित्येके (नि० १२-१) इति यास्केनोक्तत्वात्। अतः पूषन्नित्युक्ते हे पोषकावश्विनावित्युक्तं भवति। हे पोषकौ हे नासत्या असत्यरहितौ देवा देवौ युवां श्रिये श्रेयसे। शस्त्रस्य कन्यायाश्च लाभायेत्यर्थः। इषुकृतेव। इवशब्द एवार्थे। आजिधावनायेषुवच्छीघ्रमृजुगामिनौ कृतावेव सन्तौ। सूर्याया एतन्नामिकायाः सवितुः पुत्र्याः। कर्मणि षष्ठी। सूर्यां वहतुं रथे धारयितुमाजिमुदजयतामित्यर्थः। यस्मादेवं तस्मादप्सु जाताः कर्मसु संपादिताः ककुहाः शस्त्ररूपाः स्तुतयो भूरेरविच्छिन्नप्रवाहस्य वरुणस्य फलप्रतिबन्धकपाप-

निवारकस्य यागस्य सिद्ध्यर्थं तत्संबन्धिन्यौ वां प्रति वक्ष्यन्ते होत्रादिभिः । युवामेव शश्वत्तमत्रैर्यागकाले च स्तुवन्तीत्यर्थः । युग जूर्णेव जीर्णानि युगानीव । इवशब्दः संप्रत्यर्थः । पुरातना यागकाला यथा तद्वदद्यतना अपीत्यर्थः । पूर्वकाले यथा युवामेव स्तुवन्ति तद्वदिदानीमपीति तात्पर्यम् ॥

ab describe the Aśvins as forming a fitting equipage of Sūryā and *cd* visualise the movements of their car. *ab* are addressed to पूषन् by way of a compliment to him. The Vedic poets often insert in hymns to one god such compliments to another; e. g. there is a reference to Mitra in a hymn to Varuṇa (I. 25. 6); Indra is referred to in a hymn to Viṣṇu (I. 154.6); in an invocation to उषासानक्ता, पृथिवी is indirectly addressed and द्यौः brought in by implication (II. 31. 5); cf. II. 38. 10 (*b*). The rc refers to Sūryā's wedding and पूषन् plays an interesting rôle in it. The bridal procession of Sūrya is described in X. 85. 6-16; rc 14 there runs thus : यत् अश्विना पृच्छमानौ अयातम् त्रिचक्रेण वहतुं सूर्यायाः । विश्वे देवा अनु तत् वां अजानन् पुत्रः पितरौ अवृणीत पूषा. In VI. 58. 4, पूषन् has been described as given (as son) to सूर्या by the gods. पूषा had originally come as a suitor to the स्वयंवर according to the Brāhmana narration. Sāy. and Lud. unnecessarily understand पूषन् as an epithet of अश्विनौ and Gr. changes it to यातम्. A verb has to be supplied in *ab*; but this kind of ellipsis is of common occurrence in the RV; cf. त्वं अर्यमा सत्पतिः यस्य संभुजम् II. 1. 4; सं नः वृष्टिं दिवः परि. .सः नः सहस्रिणीः इषः II. 6. 5; तं त्वा स्तोमेभिः उदभिः न वाजिनं II. 13. 5; तस्मै एतं अतरिक्षे न वातं II. 14. 3; मा नः वधैः वरुण ये ते इष्टौ एनः कृण्वन्तं असुर श्रीणन्ति II. 28. 7 : आपः अग्निं यशसा सं हि पूर्वीः III. 1. 10, &c. The word श्रिये is often used in an idiomatic way to mean "with resulting glory," "and it was a splendid sight," etc; cf. हिरण्यैः शिप्राः शुभ्राः व्यञ्जत श्रिये VIII. 7. 25; अचेतिकेतुः उषसः पुरस्तात् श्रिये VII. 67. 2; श्रिये चित् प्रतरं आ वावृधुः नरः V. 55. 3. This श्रिये accompanies a statement and does not stand by itself. Old. therefore is not right in taking it by itself. श्रिये cannot be the साधर्म्यवाचकपद as Pischel thinks. इषुकृतेव (n. du. of इषुकृत्) from कृत्-कृन्त् according to Gr., from कृ according to Old., Pis. The presence of this simile here has baffled interpreters; Roth substitutes इष्कृता from

कृ with इष् to beautify; but Pischel and Old. are against the change. Pischel takes it to mean 'archers' and Old. as 'two men who get ready the arrow (for the lucky hit)'. इषुकृता इव might be understood as archers who form part of an equipage. To the Vedic poet's mind Sūryā is inseparably associated with the image of the Aśvins by her side; cf. VIII. 29. 8 in our selection. देवा' ना सत्या. Pischel takes both to be vocative, which is wrong; Old. takes नासत्या, as voc. and देवा as nom., which is justifiable, as नासत्या even as a voc. would be accented in the beginning of a Pāda; but it is improbable that in देवा नासत्या one should be nom. and the other vocative. वच्यन्ते वां ककुहा: युगा' जूर्णे'व व'रुणस्य. I. 46. 3 (वच्यन्ते वा ककुहासः जूर्णाया अधि विष्टपि) offers the key to the interpretation of this line ककुह is the peculiar animal yoked to the car of the Aśvins; being winged, it is spoken of as a वि (bird). वच्यन्ते from वञ्च् to spring forth, cf. अच्छा त्वा वच्यते मतिः I. 142. 4; आ वच्यस्व चम्वोः पूयमानः (सोम) IX. 97. 2. जूर्णा (from जॄ, जुर् to decay, to grow old). विष्टप् in I. 46. 7 corresponds to जूर्णानि युगानि in our passage; only वच्यन्ते as a verb denoting motion governs युगा as the object. विष्टप् f. occurs in antithesis with or as a parallel expression to मूर्धन् (VIII. 32. 3; X. 62. 12), सानु (X. 123. 2), वर्ष्मन् (VIII. 32. 3) and therefore means 'top' 'crest', or 'ridge'. जूर्णा विष्टप् presupposes समुद्रस्य before it; cf. VIII. 34. 13; 97. 5; IX. 12. 6; IV. 7. 14. (समुद्रस्य) जूर्णा विष्टप् (the battered crest of waves) by a poetic fancy is spoken of here as जूर्णानि युगानि, because the wave is crooked like the yoke of the old-fashioned bullock-cart of to-day. Old. was the first to suggest the interpretation.

The verse has been variously interpreted; *ab*: Pischel (V.S. I. 18) 'O Pūsan and O divine Nāsatyā, (you came) to secure luck like two archers to Sūryā's marriage'; Old. 'Good luck, Pūsan! Like two arrowmen (that make ready their arrow for a lucky hit, you made ready), oh Nāsatyas, as gods the bridal procession of Sūryā'; Geld. "O Pūsan, the divine Nāsatyā came to Sūryā's marriage to be distinguished like two arrow-smiths;" *d*: Old. '(The Kakuhas gallop) like the battered

yokes of the great V.;' Geld. 'The yokes are battered like those of V.'

Tr. The true gods (went), O Pūsan, to the bridal procession of Sūryā as two archers (forming an equipage)—and it was a glory to see them. Your winged animals, born in waters, (oh Aśvins) spring on to the battered yokes (as it were) of the mighty Varuna.

Verse. 4

अस्मे इति । सा । वाम् । माध्वी इति । रातिः । अस्तु ।
स्तोमम् । हिनोतम् । मान्यस्य । कारोः ॥ अनु । यत् । वाम् ।
श्रवस्या । सुदानू इति सुऽदानू । सुऽवीर्याय । चर्षणयः ।
मदन्ति ॥ ४ ॥

हे माध्वी मधुपूर्णपात्रयुक्तावश्विनौ वां युवयोः संबन्धिनी सा प्रसिद्धा रातिर्दानमस्मे अस्माकमस्तु भवतु । तदर्थं मान्यस्य मननीयस्य कारो स्तोतुरगस्त्यस्य स्तोमं स्तुतिं हिनोतम् प्रीणयतम् । हे सुदानू शोभनफलदानौ वां युवां श्रवस्या कीर्तेरन्नस्य वेच्छया यद्यस्मात्सुवीर्याय यजमानाय शोभनबलाय वा चर्षणयो मनुष्या ऋत्विग्रूपा अनु मदन्ति । अनुक्रमेण माद्यन्ति । युवाभ्यां सह स्वयं वा ॥

माध्वी occurs as an epithet of Aśvins here and in three other places. It is also an epithet in I. 90. 6, 8 of ओषधीः and गावः cf. मधु वाताः ऋतायते ... माध्वीः नः सन्तु ओषधीः; मधुमान् नः वनस्पतिः—माध्वीः गावः भवन्तु नः, where माध्वी is used as an equivalent of मधुमत्. **मान्यस्य कारोः स्तोमम् हिनोतम्.** मान्य son of मान or a descendant of मान. This last cycle of hymns in Mandala I is of the मान्याः from the numerous references in it; cf. I. 165. 14, 15; 117. 5; 182 8; 189. 8. कारु a poet: cf. कारुः अहं ततः भिषक् उपलप्रक्षिणी नना IX. 112. 3. हि to urge on, to inspire. **अनु यत् वाम् मदन्ति.** अनु मद् to greet with praise or loud acclamations; cf. सूरिं वाजैः अनु मदन्ति I. 173. 7, यं दधिक्राम् अनुमदन्ति IV. 38. 3, सविता रेभैः अनुमद्यमानः VII. 63. 3; अग्निः देवैः अनुमद्यमानः X. 98. 8. **श्रवस्या'** f. instru. 'with emulation'; see notes on I. 48. 3.

Tr. O you givers of sweet (blessings), may that (well-known) generosity of yours be directed towards us. Inspire the song of the poet of the family of the Mānas at the time when, O liberal givers, the clans vie in offering you their greetings in order that they may have an abundance of manly sons.

Verse 5

एषः । वाम् । स्तोमः । अश्विनौ । अकारि । मानेभिः । मघऽ-
वाना । सुऽवृक्ति । यातम् । वर्तिः । तनयाय । त्मने । च ।
अगस्त्ये । नासत्या । मदन्ता ॥ ५ ॥

हे अश्विनौ हे मघवाना हविर्लक्षणान्नवन्तौ वां युवाभ्यामेष स्तोमः स्तोत्रं सुवृक्तिः सुष्ठु पापवर्जनं यथा भवति तथा। यद्वा सुसमाप्तिः । अकारि कृतः। कीदृशोऽयम । मानेभिर्मानैर्हविष्प्रदानरूपैः* संहितः। हे नासत्यासत्यरहितौ युवामगस्त्य एतन्नाम्नि महर्षौ मयि मदन्ता मादयन्तौ सन्तौ वर्तिर्गृहं यज्ञसंबन्धि यातम् प्राप्नुतम् । किमर्थम् । तनयाय पुत्रादिलाभाय त्मन आत्मने च हिताय ॥

सुवृक्ति (from सु + वृज्; Roth's derivation from सु + ऋक्ति from अर्च् is not necessary and not supported by Pp: वृज् is usually the verb accompanying an offering of बर्हिः; cf. I. 116. 1); the form सुवृक्ति appears six times, always at the end of a pāda: it may be treated as a special form of the instru. (so Gr., Old.) or as an adv.; cf. with गृणीते V. 41. 10; प्र युञ्जते I. 186. 9; बाधे I. 61. 2; 'with an excellent offering (spreading) of the holy grass', which is an invitation to the sacrifice. तनयाय त्मने च. तनय (from तन् to stretch, from the metaphor of weaving) continuity of line, progeny. त्मन् (cf later आत्मन्) self; cf. त्मना तना "for self and children" X. 148. 1; वर्तिः यातः तनयाय त्मने च VI. 49. 5. अगस्त्ये मदन्ता. मद् to enjoy or intoxicate oneself with the Soma.

Tr. This hymn has been chanted for you, O bountiful Aśvins, by the Mānas with excellent spreading of *barhis*. Come on your rounds to us, to the advantage of ourselves and our children, rejoicing at the (sacrifice of) Agastya, oh true ones.

Verse 6

अतारिष्म । तमसः । पारम् । अस्य । प्रति । वाम् । स्तोमः ।
अश्विनौ । अधायि ॥ आ । इह । यातम् । पथिऽभिः । देवऽ-
यानैः । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥ ६ ॥

हे अश्विनौ युवयोः प्रसादादस्य तमसस्तमनहेतोः श्रेयःप्रतिबन्धरूपस्य दुःखस्य पारं पर्यन्तभूमिमतारिष्म । उत्तीर्णाः स्म । हे अश्विनौ वां प्रति स्तोमः स्तोत्रमधायि । अकारीत्यर्थः । युवां देवयानैर्देवगन्तव्यैर्मार्गैरिहास्मद्यज्ञ आ यातम् आगच्छतम् । शिष्टो व्याख्यातः ॥ इषमन्नं वृजनं बलं जीरदानुं चिरकालजीवनं च विद्याम लभेमहि* ॥

अतारिष्म तमसः पारम् अस्य. This line is repeated from I. 92. 6 *a*, where it introduces a description of dawn अस्य, being emphatic, is accented. पथिभिः देवयानैः. देवयान serving as the way to the gods; also directing themselves to the gods. The expression occurs in III. 56. 5, IV. 37. 1, etc. विद्याम इषम वृजनम् जीरदानुम. This is the refrain of the Agastya cycle. इषु (adj.) Gr. equipped with sacrificial drink; Geld. hospitable, fulfilling the desires of. Geld. argues that इषु is synonymous with भोजन, इषय् with भुज् and so इष is with भोज. Besides the अगस्त्य refrain the word इष occurs only in the compound गविषः, which means, 'desirous of cows'; cf. गाविष. न सत्वा; this meaning will have to weigh with us. जीर comes from जॄ–गॄ lively, active; cf. जीरं दूतम् I. 44. 11; जीराः उक्षणः I. 135. 9. दानु is from दा or possibly from an old root which is lost, in the sense of dripping or oozing; cf. दिवः दानुः (dew or rain) I. 54. 7; दिव्येन दानुना (dew) X. 43. 7; also without दिव्य VIII. 25. 6; I. 136. 3. जीरदानु quick to drop (gifts). वृजन m. Gr. strength or fulness of power; Geld. either 'patron' or 'a group of sacrificers', or 'a party'; वृजन prob. signifies 'society', 'company', 'comrades' in expressions like अन्त. पश्यन् वृजना इमा अवराणि X. 96. 7 (cf. विचिन्वन् बन्धून् इमान् अवरान्

*अथ चरणो बहुशः समाम्नातः । परं भाष्यकृता १–१६६–१५ किं च १–१६५–१५ इत्यत्रैव व्याख्यातः । तत्र च केवलं जीरदानुं जयशीलदानम् इति व्याख्यातम् । एतावानेव भेदः ।

X. 97 17); यत् वा अवमे वृजने मादयासे I. 101. 8; वृत्रं सिसक्ति अन्यः वृजनेषु विप्रः VI. 68. 3; दिवे दिवे इषं स्तोतृभ्यः वृजनेषु कारवे II. 24. 7.

Tr. We have come to the end of this darkness; we have offered a hymn to you, oh Aśvins; come hither by the paths which gods take. May one obtain a sympathetic company which is quick in dropping gifts

---

No. 7

MANDALA II SŪKTA 23

The hymn belongs to the cycle of गृत्समद hymns, which constitutes the second Mandala. गृत्समद is mentioned as the son of शुनहोत्र. Although there is no direct verification of this relationship, in the hymns themselves there is frequent reference to the गृत्समदाः and शुनहोत्राः. The deity of the hymn is ब्रह्मणस्पति in the case of rc 1, 5, 9. 11, 17, 19; बृहस्पति of the rest. Between the two gods बृहस्पति and ब्रह्मणस्पति there is no real difference, बृह् and ब्रह्मन् both standing for prayer.

तृतीयेऽनुवाके दश सूक्तानि। तत्रेदमेकोनविंशत्यृचं गार्त्समदं प्रथमं सूक्तम्। अत्रेयमनुक्रमणिका। गणानामेकोना ब्राह्मणस्पत्यं ह बार्हस्पत्यास्तु दृष्टलिङ्गाः पञ्चदश्यन्त्ये त्रिष्टुभाविति। पञ्चदश्येकोनविंशी च त्रिष्टुभौ। शिष्टा जगत्यः। यासु बृहस्पतिशब्दः श्रूयते ता बार्हस्पत्याः। शिष्टा ब्राह्मणस्पत्याः। प्रवर्ग्येऽभिष्टव एतत्सूक्तम्। स्पृष्ट्वोदकमिति खण्डे सूत्रितम्। गणानां त्वा प्रथमश्च यस्य (आ० ४-६) इति।

Verse 1

गणानाम्। त्वा। गणऽपतिम्। हवामहे। कविम्। कवीनाम्।
उपमश्रवःऽतमम्॥ ज्येष्ठऽराजम्। ब्रह्मणाम्। ब्रह्मणः। पते।
आ। नः। शृण्वन्। ऊतिःऽभिः। सीद। सदनम्॥ १॥

हे ब्रह्मणस्पते ब्रह्मणोऽन्नस्य परिवृढस्य कर्मणो वा पते पालयितः गणानां देवादिगणानां सबन्धिन गणपतिं स्वीयानां पतिम् । कवीनां क्रान्तदर्शिनां कविम् । उपमश्रवस्तमम् । उपमीयतेऽनयेत्युपमा । सर्वेषामन्नानामुपमानं श्रवोऽन्नं यस्य स तथोक्तः । अतिशयेनोपमश्रवा उपमश्रवस्तमः । उपमः । माङ् माने । आतश्चोपसर्गे करणेऽङ्प्रत्ययः । ङ्याप्पोः संज्ञाछन्दसोरिति ह्रस्वत्वम् । ज्येष्ठराजम् । ज्येष्ठाः प्रशस्यतमाः । तेषां मध्ये राजन्तं ब्रह्मणां मन्त्राणां स्वामिनं त्वा त्वां हवामहे । अस्मिन्कर्मणि आह्वयामः । किं च नोऽस्माकं स्तुतीः शृण्वन् त्वमूतिभिः पालनैर्हेतुभूतैः सादनम् । सीदन्त्यस्मिन्निति सदनम । यज्ञगृहमासीद । उपविश ॥

गणा'नाम् ग'णपतिम . With the expression compare गवा गोत्रम 18; नृणां नृपते II. 1. 1. ब्रह्मणस्पति is a leader of his own followers (गण) who have been described in I. 62. 3 as consisting of the अङ्गिरसः; in IV. 50. 5 they are spoken of as ऋक्वता गणेन and as ऋक्वभिः; in X. 14. 2; बृहस्पति is mentioned as अङ्गिरः in our hymn, rc 18; also as गाथानी in I. 190. 1; Geld.'s meaning, choir-leader, however, is unacceptable The Maruts form another गण and they also are styled as ऋक्वाणः (singers) V. 52. 1; 60. 8 and are spoken of as the मारुतो गणः. They are not a choir; neither is the गण of ब्र० one; the warlike nature of ब्र० can be seen from rks 13, 14, 18. उपम'श्रवस्तमम् कवि'म्. उपम highest; cf. उपमम् केतुम् VIII. 30. 3; उपमम् श्रवः I. 110. 5; उपमम् राधः X. 28. 3; उपमश्रव occurs in X. 33. 6, 7 in the sense of 'having the highest renown'. ब्र'ह्मणाम् ज्येष्ठरा'जम्. ब्रह्मन् (from बृह् to be great or sublime) the power or mystic principle underlying prayer, or prayer itself. ज्येष्ठ superlative from a word derived from the root ज्ञि-ज्या-जिनाति-जीयते, to invade or overpower. ऋवि; cf. I. 48. 14. The स of सदन is changed to सा according to प्रा० 523, it being the tenth syllable.

Tr. We invoke thee, Brahmanaspati (Lord of Prayer), as the leader of thy followers (अङ्गिरसः), as the most illustrious poet among poets, as thy seniormost lord of prayers; listen to us with thy protection and take thy seat in this hall.

Verse 2

देवाः । चित् । ते । असुर्य । प्रऽचेतसः । बृहस्पते । यज्ञियम् ।
— • | • ००– • |०– ·|०० – •

भागम् । आनशुः ॥ उस्राःऽइव । सूर्यः । ज्योतिषा । महः ।
विश्वेषाम् । इत् । जनिता । ब्रह्मणाम् । असि ॥ २ ॥

असुर्यं असुराणां हन्तः हे बृहस्पते प्रचेतसः प्रकृष्टज्ञानास्ते त्वदीया देवाश्चित् देवा अपि यज्ञियं यज्ञार्हं भागमानशुः । प्राप्नुवन् । यद्वा प्रचेतस इति बृहस्पतेर्विशेषणम् । प्रकृष्टज्ञानवतस्ते तव संबन्धिनो देवा इति योजनीयम् । यद्वा प्रचेतसः । विभक्तिविपरिणामः । प्रचेतसि त्वयि सति देवा यज्ञियं भागमानशिरे । कर्मविघ्नकारिणामसुराणां रक्षोघ्नमन्त्रैरपाकरणात । न वै ब्रह्मण्वद्रिष्यति (ऐ० ब्रा० १-१३) इति श्रवणात् । ज्योतिषा तेजसा महो महनीयः सूर्य उस्रा इव । उस्राः किरणाः । स्फायितञ्चीत्यादिना रक्प्रत्ययः । यथा किरणान् जनयति तथा विश्वेषां सर्वेषां ब्रह्मणां मन्त्राणां जनिता जनयितैवासि । जनिता मन्त्र इति निपातनाण्णिलोपः ॥

असुर्य from असुर (अस्) ; the word असुर is very often associated with the words प्रचेतस् I. 24. 14 ; IV. 53. 1 ; VIII. 90. 6 and माया V. 63. 3, 7 ; X. 138 3 etc. वरुण, इन्द्र, सवितृ, अग्नि, सोम and रुद्र are styled as असुराः. असुर्य is an epithet of Indra in IV. 16. 2 ; X. 105. 11 etc. and probably means godlike or divine. असुर्य is an abstract noun also meaning the power of a mighty god. Towards the end of the Rgvedic period असुर came to signify an evil genius or demon, e. g in VIII 96. 9 ; X 82. 5 ; 183. 3. प्रचेतस् (from चित्-कित्) observant, wise. उस्रा' इव सूर्यः ज्यो'तिषा महः. उस्रा इव is either in apposition to महः, both being in the acc., or महः should be taken as adj. to सूर्यः. Old.'s suggestion that it is gen. s. appears to be indefensible. उस्र· can be a gen. from उस्र् but उस्राः cannot possibly be a gen. form. उस्रा f. dawn. मह great ; cf. महः विष्णु (I. 61. 7) ; इन्द्रः (I. 121. 11) ; अग्निः (I. 146. 5). महस् lustre ; cf. अक्तुना महोभिः II. 10. 3 ; महोभिः रोचमानाः IV. 14. 1.

Tr. O divine Brahaspati, the gods indeed obtained a share in the sacrifice through thee, the wise God. As (the great) Sūrya by his lustre has begotten that lustre, namely, the dawns, you are the begetter of all prayers whatsoever.

Verse 3

आ । विऽबाध्य । परिऽरपः । तमांसि । च । ज्योतिष्मन्तम् ।
रथम् । ऋतस्य । तिष्ठसि ॥ बृहस्पते । भीमम् । अमित्रऽदम्भनम् ।
रक्षःऽहनम् । गोत्रऽभिदम् । स्वःऽविदम् ॥ ३ ॥

हे बृहस्पते परिरपः । परितो रपः पापरूपं रक्षः । यद्वा रप लप व्यक्तायां वाचि क्विप् । परिवदतो निन्दकान् तमांसि च विबाध्य तेजसा निराकृत्य ज्योतिष्मन्तं ज्योतिषा तद्वन्तमृतस्य यज्ञस्य प्रापकं भीमं शत्रूणां भयंकरममित्रदम्भनं शत्रूणां हिंसकम् । तदेवाह । रक्षोहणं रक्षसां हन्तारं गोत्रभिदं मेघानां भेत्तारं स्वर्विदं स्वर्गस्य लम्भकं रथमातिष्ठसि । अधितिष्ठसि ॥

परिर पः विबा'ध्य. परिरप् (cf. classical लप्) Gr. whisperers of evil words; Geld. quibbles, evasions, excuses. The word appears only here and verbal forms of रप् with परि do not occur. विबाध् to chase away; cf. ध्वरसः विबाधसे rc 5; यक्ष्मं विबाधध्वे X. 97. 12; तम. विबाधन्ते VI. 65. 2. ऋत'स्य र'थम्. ऋत the true and holy, the Law, the eternal order of the universe, the sacrifice, which conforms to it; cf. ऋतस्य गोपा. as an epithet of अग्नि, सोम, वरुण etc.; ऋतस्य पन्थाः (I. 124. 3; 46. 11 etc) referring to the sacrifice; ऋतस्य सदनम्, योनि or नाभि. referring to the sacrificial hall or altar; the sacrifice is very often likend to a रथ; cf. II. 18. 1; I. 102. 5, 9; I. 129. 1; II. 35. 7, 8; VII. 32. 11 etc. and hence Agni is called ऋतस्य धूर्षद् I. 143. 7. गोत्राभि'दम् स्वर्वि'दम्. गोत्र a herd of cows; बृहस्पति is, like इन्द्र, mentioned as having broken open the fastnesses where the cows were concealed by the Panis. The अङ्गिरसः are often associated with them, cf. I. 51. 3; X. 86. 23, बृहस्पति himself being mentioned as an अङ्गिरस् in rc 18. स्व. light or sun. विद् to obtain. Indra is the real स्वर्विद्; he triumphs over the powers of darkness and frees light or the sun from the clutches of वृत्र.

Tr. Banishing the whisperings about (of the wicked) and the darkness (of the heart,) thou mountest the luminous

terrible car of the Eternal Order, which brings ruin on the enemy, kills the evil spirits, shatters the hidings of the cows and obtains light (for man)

Verse 4

सुनीतिऽभिः । नयसि । त्रायसे । जनम् । यः । तुभ्यम् । दा-
शात् । न । तम् । अंहः । अश्नवत् ॥ ब्रह्मऽद्विषः । तपनः ।
मन्युऽमीः । असि । बृहस्पते । महि । तत् । ते । महिऽत्व-
नम् ॥ ४ ॥

हे बृहस्पते सुनीतिभि. । *शोभना नीतयो येषु ते सुनीतयः सन्मार्गाः । तैर्जनं नयसि । अपेक्षितफलं प्रापयसि । त्रायसे । जनमापद्भ्यो रक्षसि च । यो यजमानस्तुभ्यं हविर्लक्षणमन्नं दाशात् प्रयच्छेत् । दाशृ दाने । लेट्यडागमः । तमंह. पापं पापरूपं दारिद्र्यं वा नाश्नवत् । न प्राप्नुयात् । अश्नोतेर्लेटि व्यत्ययेन परस्मैपदम । अडागमः । ब्रह्मद्विषो ब्राह्मणानां मन्त्राणां वा द्वेष्टुस्तपनस्तापकोऽसि । किं च मन्युमीर्मन्योः क्रोधस्य परेषां ज्ञानस्य वा हिंसकोऽसि । मीङ् हिंसायाम् । क्विप् । ते तव तत्तादृशं महि महत्प्रभूतं महित्वनं माहात्म्यमस्ति ॥

दा'शात्. Subj. from दाश् to give, to make an offering, to sacrifice ; cf. यस्मै त्वं (अदिते) ददाश I. 94. 15 ; वाम् घृतेन दाशति I. 93. 10. अग्नये समिधा हविर्भि. दाशेम VII. 14. 1. अं'हः न' अश्नवत् अंहः evil, ill-luck; cf. न एनम् अंहः अश्नोति III. 59. 2 अश्नवत् inj. from अश् to attain. मन्युमी': मन्युः wrath. मी-(मिनाति, also but rarely मिनोति and मीयते), to do harm, to curtail (life), to obstruct, to confound, cf. जरिमा श्रियं मिनाति I. 179. I ; दस्योः आयुः अमिनात् III. 49. 2 ; व्रतं मिनन्ति II. 24. 12. महित्वन'म् abstract noun from महि great ; cf. मर्त्यत्वन्, वृत्रत्वन्, सखित्वन्, पतित्वन्, जनित्वन्, वसुत्वन्; त्वन् represents an older form of the termination त्व.

Tr. Thou leadest by good directions ; thou rescuest men : him who makes thee offerings, no harm can touch. Thou art a tormenter and the nullifier of the wrath of him who hates the priest. Great is that greatness of thine, O Brahaspati.

Verse 5

न । तम् । अंहः । न । दुःऽइतम् । कुतः । चन । न । अरातयः ।
तितिरुः । न । द्रुयाविनः ॥ विश्वाः । इत् । अस्मात् । ध्वरसः ।
वि । बाधसे । यम् । सुऽगोपाः । रक्षसि । ब्रह्मणः । पते ॥५॥

हे ब्रह्मणस्पते सुगोपाः सुष्ठु पालयिता त्वं यं जनं रक्षसि पालयसि तं जनमंहः आहन्तव्यं दुःखं न बाधते । दुरितं तत्कारणं पापं च न बाधते । अरातयो हिंसकास्तं जनं कुतश्चन सर्वासु दिक्षु न तितिरुः । तिरतिर्हिंसाकर्मा । लिट् । न हिंसन्ति । तथा द्रुयाविनः । मनस्पन्याक्रियायां चान्यदित्येतदद्रुधं येषामस्ति ते द्रुयाविनो वञ्चकाः । तेऽपि तं जनं न बाधन्ते । किंच †अस्मात् ध्वरसो हिंसिका विश्वाः सर्वाः सेनास्तदर्थं वि बाधसे । विशेषेण बाधस एव ॥

दुरित'म् distress, danger, ill-luck. अरा'ति (from ऋ or अ + रा or रै) an enmity, hence enemy. द्रुयावि'नः न' तितिरुः. द्रुयाविन् double-dealer, untruthful; cf. तस्य द्रुयाविनः अवशंसस्य I. 42. 4. तितिरुः from तॄ to overpower: cf. तुर्याम् दस्यून् तन्नाभिः V. 70. 3. तुर्याम अरातीः VI. 4. 5. ध्वर'सः (ध्वृ) Gr. Geld. beguilement and therefore beguilers; Sāy. destruction, destroying armies.

Tr. Neither evil nor distress from any quarter, neither enemies nor double-dealers, get the better of him. Thou drivest all destructive forces from him whom thou protectest as his guardian angel, oh Brahmanaspati.

Verse 6

त्वम् । नः । गोपाः । पथिऽकृत् । विऽचक्षणः । तव । व्रताय ।
मतिऽभिः । जरामहे ॥ बृहस्पते । यः । नः । अभि । ह्वरः ।
दधे । स्वा । तम् । मर्मर्तु । दुच्छुना । हरस्वती ॥ ६ ॥

† आदर्शे अस्मात् इति नास्ति ।

हे बृहस्पते त्वं नोऽस्माकं गोपाः पालयिता पथिकृत् सन्मार्गश्च भवसि । विचक्षणो विशेषेण द्रष्टा सर्वज्ञस्त्वम् । तव व्रताय त्वत्संबन्धिने यज्ञाय मतिभिः स्तोत्रैर्जरामहे । स्तुमः । जरतिः स्तुतिकर्मा । यः पुमान् नोऽस्मानभि अभिलक्ष्य द्वरः । हृ कौटिल्ये । भावेऽसुन् । कौटिल्यं दधे विदधाति तं स्वा स्वीया दुच्छुना दुर्बुद्धिर्हरस्वती वेगवती सती मर्मर्तु । मोचयतु । मृङ् प्राणत्यागे । अन्तर्भावितण्यर्थस्य यङ्लुकि लोटि रूपम् ॥

गोपाः, meta. for protector. पथिकृत; cf. इदं नमः पूर्वेभ्यः पथिकृद्भ्यः X. 14. 15. विचक्षणः (from चक्ष्) observant, wise. जरामहे (from जॄ doublet of गॄ, जागृ) to be awake, to be active; cf. ऊधः न नग्नाः जरन्ते VIII. 2. 12, प्रातः जरेथे जरणा इव X. 40. 3. द्वरस् (हृ) wiles. हरस्वती (हरस् (i) glow, rays, from हृ-धृ-हृणीते; (ii) grip from हृ-हरते) wrathful or gripping; the first is to be preferred. The word occurs only here. ममर्तु impera. of frequ. of मृ in causal sense.

Tr. Thou art our watchful shepherd; we shall be active with our songs in furtherance of thy ordinances. If there is a man who lays his trap at us, may his own ill-fate in wrath kill him, oh Bṛhaspati.

Verse 7

उत । वा । यः । नः । मर्चयात् । अनागसः । अरातिऽवा ।
मर्तः । सानुकः । वृकः ॥ बृहस्पते । अप । तम् । वर्तय । पथः ।
सुऽगम् । नः । अस्यै । देवऽवीतये । कृधि ॥ ७ ॥

* सोरा

उत वा अपि च हे बृहस्पते अरातीवाभिमुखमागमनवान् सानुकः समुच्छ्रितः । सानु समुच्छ्रितमिति यास्कः (नि० २-२४) । वृकः । वृक आदाने । धनादीनामादाता । यो मर्तो मनुष्योऽनागसोऽपराधहीनान्नोऽस्मान् मर्चयात् । मर्चयतिर्हिंसाकर्मा । हिंस्यात् । तं मर्तं पथो वैदिकान्मार्गादपवर्तय । निवर्तय । नोऽस्माकमस्यै देववीतये । देवानां वीतिं सोमभक्षणमर्चयतीति देववीतिर्यज्ञः । अस्यै देववीतयेऽस्मै यज्ञाय नोऽस्माकं सुगं सुष्ठु गन्तव्यं मार्गं कृधि । कुरु । यज्ञानुष्ठानाय सुमतिं देहीत्यर्थः ॥

मर्चयात् Subj. from मृच् to do harm; cf. द्वयेन मर्चयति I. 147. 4, 5, रिषूणां मृचा VII. 67. 9. अरातीवा (Pp. °तिवा) from अराति abs. n. (ill-will) + वन्, an enemy. सानुकः वृक. सानुक is derived by Sāy. from सानु, from सन् by Roth and Gr.; Old. objects to both and has other explanations to offer; Geld. leaves the word untranslated. The word occurs only here सानुक is apparently a forerunner of later forms like भानुक, चादुक, and Roth's explanation 'greedy' might be accepted. सुगं cf. I. 116. 20. देवंवीति. a feast (वीतिः) for the gods, the sacrifice. तत्पु° compounds of which the latter member consists of verbal nouns in ति have the accent on the first member; cf. वंस्य इष्टि I. 25. 4.

Tr. And further, if there be an inimical man, a veritable greedy wolf, who wants to do us harm, turn him away from his path, Bṛhaspati; make the way safe for this sacrifice of ours.

Verse 8

त्रातारम् । त्वा । तनूनाम् । हवामहे । अवस्पर्तः । अधिऽवक्तारम् । अस्मऽयुम् ॥ बृहस्पते । देवऽनिदः । नि । बर्हय । मा । दुःऽएवाः । उत्ऽतरम् । सुम्नम् । उत् । नशन् ॥ ८ ॥

* हेव

अवस्पर्तः उपद्रवेभ्यः पारयितः । यद्वा अवसा रक्षणेनापद्भ्यः पारयितः हे बृहस्पते तनूनामङ्गानां पुत्रादिनां वा त्रातारं पालयितारमधिवक्तारमस्मासु पक्षपातेनाधिकं वक्तारमस्मयुं हविष्प्रदानस्मान् कामयमानं त्वां हवामहे। अस्मिन्कर्मण्याह्वयामः। किं च देवनिदो देवनिन्दकानसुरान्निबर्हय विनाशय। दुरेवा दुष्टगमना दुर्बुद्धयः शत्रव उत्तरमुत्कृष्टतर सुम्नं सुखं मा उन्नशन्। मा व्याप्नुवन्तु ॥

तनूनाम्, from तनू f. body: or one's self; cf. V. 80. 4 and VII. 86. 2. अवस्पर्तः voc. of अवस्पर्तृ, from स्पृ with अव to save, to protect; cf. त्वं नः अस्याः अमतेः उत क्षुधः अभिशस्तेः अव स्पृधि VIII. 66. 14; अभिशस्तेः अवस्परत् VI. 4. 2, 4. अधिवक्तारम् from वच् with आधि to befriend; cf. (सुगः वः पन्थाः) तेन आदित्यः आधि वोचत नः II. 27. 6; तत्र (आजौ) नः आधि वोचतम् VII. 83. 2; यत् वः वस्थं यत् छर्दिः तेन नः आधिवोचत VIII. 67. 6. आधि

चोचत् ऊतये X. 63. 11. अस्मयु म् 'well-disposed to us'; desiderative adj. in यु; cf. वाजयु, सुम्नयु, धीरयु, अश्वयु, वधूयु, वृषयु, वसूयु, &c., from a base in य, e. g. वाजय, सुम्नय, वीरय &c. नि॰ बर्हय to smite down; cf. नि रक्षः बर्हय I. 133. 5. दुरे॰वाः (from दुः + एव Gr. manner, way; Geld. wish, inclination, ardour) evil-minded. उ॰त्तरं सुम्न॰म् higher happiness or well-being (than ours, or in the absolute sense). मा॰ उ॰त् नशन् injunct. from नश् with उत् to reach, to attain; cf. उत् अस्य बाहू...दिवः अन्तान् अनशाम् VII. 45. 2.

Tr. We invoke thee as the protector of our selves, oh protector, as one who would befriend and love us. Smite down, Brhaspati, the revilers of gods. Let not evil-minded persons attain to a higher well-being (than ours).

Verse 9

त्वया । वयम् । सुऽवृधा । ब्रह्मणः । पते । स्पार्हा । वसु ।
मनुष्या । आ । ददीमहि ॥ याः । नः । दूरे । तळितः । याः ।
अरातयः । अभि । सन्ति । जम्भय । ताः । अनम्नसः ॥ ९ ॥

*योऽभि

हे ब्रह्मणस्पते सुवृधा सुष्ठु वर्धयित्रा त्वया हेतुना वयं स्पार्हा स्पृहणीयानि वसु धनानि । मनुष्या । सुपां सुलुगिति चतुर्थीबहुवचनस्याकारः । मनुष्येभ्यो दातृभ्य आददीमहि । गृह्णीमहि । आङ्ग्रो दोऽनास्यविहरण इत्यात्मनेपदम् । दूरे दूरदेशे या अरातयः याश्च तळितोऽन्तिकेऽरातयो नोऽस्मानभि सन्ति । अभिभवन्ति । अनम्नसः कर्महीनान् ता अरातीस्तान् शत्रून् जम्भय । नाशय । जभि नाशने चुरादिः । अत्र निरुक्तम् । त्वया वयं सुवर्धयित्रा ब्रह्मणस्पते स्पृहणीयानि वसूनि मनुष्येभ्य आददीमहि याश्च नो दूरे तळितो याश्चान्तिकेऽरातयोऽदानकर्माणो वा दानप्रज्ञा वा जम्भय ता अनम्नसोऽप्न इति रूपनाम (नि॰ ३-११) इति ॥

सुवृ॰धा from वृध् to give strength or prosperity, to inspire; cf. ते न वर्धन् VI. 51. 11; अथ नः वर्धय गिरः III. 29. 10. स्पार्हा॰ मनुष्या॰ वसु स्पार्ह covetable or coveted, like वसु it is seen to qualify गधसः, रत्नं, श्रियः, इषः, ऊतयः &c. मनुष्या(णि) (from मनुष्) human; Roth's emendation मनुष्याः is indefensible. वसु n. acc. pl. तळि॰तः adj. f. nom. pl. 'near'; cf. दूरे चित् सन् तळित् इव अति रोचसे I. 94 7.

अनप्रसः जम्भय. जम्भ् to bite, to devour : cf. श्वा नु अस्य जम्भिषत् X. 86. 4. शुनः जम्भयतम् I. 182. 4. अनप्रस् from अप्रस् (i) activity ; cf. उषः यत् अग्निं समिधे चकर्थ...तत् देवेषु चकृषे भद्रं अप्रः I. 113. 9 ; or (ii) active ; cf. अग्नेः अप्रसः समित् अस्तु भद्रा X. 80. 2 ; अनप्रस- is used predicatively to show the result of the जम्भन.

Tr. With thee for our excellent strengthener, Lord of Prayer, may we obtain covetable human belongings. Whatever enemies there are far and near, munch them (so that they are made) inactive.

Verse 10

त्वया । वयम् । उत्ऽतमम् । धीमहे । वयः । बृहस्पते । पप्रिणा ।
सस्निना । युजा ॥ मा । नः । दुःऽशंसः । अभिऽदिप्सुः । ईशत ।
प्र । सुऽशंसाः । मतिऽभिः । तारिषीमहि ॥ १० ॥

हे बृहस्पते पप्रिणा । प पालनपूरणयोः । आदृगमहनेति किन्प्रत्ययः । छान्दसो यणादेशः । कामानां पूरकेण सस्निना शुद्धेन युजा सहायेन त्वया हेतुनोत्तमं वयो हविर्लक्षणमन्नं वयं धीमहे । धारयामः । धी धारणे । दैवादिकः । दुःशंसो दुःशंसनीयोऽभिदिप्सुरभिदम्भितुमभिभवितुमिच्छुः पुरुषो नोऽस्माकं मा ईशत । मा ईशिष्ट । ईश्वरो मा भवतु । ईश ऐश्वर्ये । लेट्यडागमः । वयं मतिभिः स्तोत्रैः सुशंसा शोभनशंसनोपेताः सन्तः प्र तारिषीमहि । प्रकर्षेण वर्धेमहि ॥

उत्तमं॒म् व॑यः धीमहे. वयः vital strength, life. धीमहे from धा (Sāy. धी) to hold, to receive, to attain ; the form धीमहे is found only here ; elsewhere we have धामह or धीमहि ; cf. I. 92. 13 ; 127. 5 ; III. 62. 10 &c ; Aufrecht reads धीमहि in our passage also, but Mss-evidence is overwhelmingly against him. प॑प्रिणा स॑स्निना युजा॑. पप्रि from पॄ-पिपर्ति or पृणाति to fill, to give generously ; cf. यो मे पृणात II. 30. 7 ; कः ईं स्तवत् कः पृणात् VI. 47. 15 , अन्धस. पप्रिः I. 52. 3. सस्नि (from सन् to give ; cf. वाजं सनेत् I. 5. 9 ; चत्वारि सहस्रा सनत् V. 30.14) a giver. युज् (युज्) a companion, an ally. दु॑:शं॑सः is contrasted with सु॑शं॑सः in *d*. दुःशंस one who speaks ill of men and gods ; सुशंस one who speaks well, cf. सुशंस. यः च दक्षते VII. 16. 6. अभिदिप्सु

(desid. of दभ्) desirous of causing harm. प्र तारिषीमहि inj. of प्र + तॄ to prosper; cf. उत्तिष्ठत प्र तरत सखायः X. 53. 8.

Tr. With thee for a generous and bountiful ally we have attained the highest vital strength, Brhaspati. Let not an impious and malignant (man) have power over us; men of gentle speech, may we prosper with our prayers.

Verse 11

अननुऽदः । वृषभः । जग्मिः । आऽहवम् । निःऽतपा । शत्रुम् । पृतनासु । ससहिः ॥ असि । सत्यः । ऋणऽयाः । ब्रह्मणः । पते । उग्रस्य । चित् । दमिता । वीळुऽहर्षिणः ॥ ११ ॥

हे ब्रह्मणस्पते अननुदः । अनु पश्चाद्दातीत्यनुदः । स यस्य नास्तीत्यननुदः । दात्रन्तरशून्य इत्यर्थः । अत एव वृषभः कामानां वर्षिता । आहवम् । आहूयतेऽत्रेत्याहवो युद्धम् । आङि युद्धे (पा० ३-३-७३) इत्यप्प्रत्ययः संप्रसारणं च । तद्युद्धं जग्मिर्गन्ता । आदृगमहनेति किन्प्रत्ययः । लिङ्वद्भावादाहवमित्यत्र षष्ठीप्रतिषेधः । शत्रुं शातयितारम् । निष्टपा नितरां तस्य तापकः । तृन्नन्तत्वात्षष्ठीप्रतिषेधः । निसस्तपावनासेवने (पा० ८-३-१०२) इति षत्वम् । तादौ च निटीति गतेः स्वरः । पृतनासु सग्रामेषु सासहिः शत्रूणामभिभविता । एतादृशस्त्वं सत्यः सत्यपराक्रमः सत्यप्रज्ञो वासि । ऋणया ऋणस्य यावयितासि । यु मिश्रणामिश्रणयोः । ण्यन्तस्य क्विपि णिलोपे लोपो व्योर्वलीति वलोपः । किं च उग्रस्य चित् ओजस्विनोऽपि दमितोपशमयिता वीळुहर्षिणो दृढहर्षस्य कामुकस्य नास्तिकस्य चिद्दमितासि ॥

अननुदः वृषभः . अनु + दा to tolerate, to allow, to yield; cf. यः शर्धते नानुददाति शृध्याम् II. 12. 10; तुभ्यं देवाः अनु अददुः सोमपेयम् V. 29. 5; दृळ्हा चित् अस्मै अनु दुः I. 127. 4. आहवं जग्मिः. जग्मिः (from perf. base of गम्) one who goes, a haunter, cf विश्वेषु जग्मयः (मरुतः) I. 89. 7; अपां जग्मिः (सोमः) I. 93. 22. निष्टपा (निः तप् + तृ) one who burns down. पृतना cf. अ पृतन्यत I. 33. 7. सासहिः from सह् to be victorious; cf. पृतनाषाट्, पृतनासह्य : with जग्मिः and सासहिः compare forms like विविचिः, तुतुजिः, दादृिः, दधिः, जर्भरिः, जतुर्गिः, अग्रिः, बभ्रिः, वाग्निः, वावाहिः. सत्यः ऋणयाः . सत्य never-failing; cf. सत्यधर्मन्, °शुष्म, °राधस्; सत्या नृणां देवहूतिः VI. 65. 5. With ऋण या cf. ऋणयावन्, ऋणचित्, one who pursues and exacts debts: the delt is metaphorically used

for sin. वीळुहर्षणः वीळु(ड्) is primarily an adj. meaning 'firm, strong, stubborn,' used along with स्थिर, दृढः cf. वीळुः अद्रिः, वीळू आयुधा, अनुव्रत· वीळो·. हृष् to rejoice, to be excited or (caus.) to excite; cf. इन्द्रः पुरः जर्हृषाण· वि दूधोत् VII. 21. 4; इन्द्रं जैत्राय हर्षय VIII. 15. 13.

Tr. Thou art an unyielding bull, a haunter of battles, a consumer of enemies, victorious in battles, an inexorable collector of debts, the subduer of even the powerful one whom the stubborn excite (to wrath).

Verse 12

अदेवेन । मनसा । यः । रिषण्यति । शासाम् । उग्रः । मन्यमानः । जिघांसति ॥ बृहस्पते । मा । प्रणक् । तस्य । नः । वधः । नि । कर्म । मन्युम् । दुःऽएवस्य । शर्धतः । ॥ १२॥

यः पुमान् अदेवेन देवानमन्यमानेन यद्वा आसुरवृत्तिविशिष्टेन मनसास्मान् रिषण्यति । हिनस्ति । दुरस्युर्द्रविणस्युर्वृषण्यतिरिषण्यतीति निपातितः । यश्चोग्रः पापचित्तो मन्यमान आत्मान बहुमन्यमान· पुमान् शासामुक्थस्य शंसितारम् । यद्वा अस्माकमाशसाम् । शासितॄणामुग्र इति वा योजनीयम् । अस्मान् जिघांसति । हन्तुमिच्छति । हन्तेः सनि अज्झनगमां सनीति दीर्घः । हे बृहस्पते तस्य वधः । वध्यतेऽनेनेति वध आयुधम् । नोऽस्मन्मा प्रणक् । *मा संपर्कयतु । पृची संपर्के श्नम्विकरणी । व्यत्ययेनामागमः । चादिलोप इति न निघातः । व्यत्ययेनाद्युदात्तः । किंच दुरेवस्य दुष्टगमनस्य शर्धतो बलवतः । यद्वा दुष्टाभिसन्धेर्वेगं कुर्वतस्तस्य मन्युं क्रोध ज्ञानं वा निकर्म । त्वत्प्रसादान्निराकुर्मश्च ॥

अदेव ungodly, impious रिषण्यति denom. from रिषन् or रिषण, to be derived from रिष् to injure or to be injured. शासाम् उग्रः मन्यमानः शास् f. Gr. Old., command; Geld. 'he who commands', besides our passage it occurs in शासा दुर्धीतुम् X. 20. 2 and ते चित् हि पूर्वी· अभि सन्ति शासा VII. 48 3. The meaning in all passages appears to be 'punishment', derived from the meaning of the root शास् in passages like अव्रतान् शासत् I. 51. 8, अयज्युं शास· I. 131. 4.

* आदर्शे 'मा संपर्कयतु' इति नास्ति ।

शासां उग्रः, Old., powerful by commands (to which he can exact obedience); Gr. takes the word to be शासा f. 'revilers'; Geld. 'powerful among those that command'; मन्यमानः with an adj. in the same case as itself gives the meaning 'thinking himself powerful &c,' cf. अमर्त्य मन्यमानं दासम् II. 2; अप्रतिः मन्यमानः V. 32. 3; महतः मन्यमानान् I. 178. 5; अमर्णः मन्यमानस्य III. 32. 4. प्रणक् is derived by European scholars from प्र + नश्; from पृच् by Sāy. The word occurs four times in the RV: I. 18. 3; II. 23. 13; VII. 56. 9 94. 8; in all case with a मा. The Pp. everywhere reads it as one word, which means that शाकल्य does not derive it from नश्, but from पृच्; for, प्र being accented and ण unaccented, it was possible to separate it into प्र and नक्. But the accent on प्र becomes unaccountable if प्रणक् comes from पृच्, and the pl. form नशान् occurs in our hymn, rc 8, in the same sense. नि कर्म, inj. from कृ with नि to humiliate; cf. मा नः नि क III. 33. 8. शर्धतः from शृध् to be defiant.

Tr. O Brhaspati, let not the weapon of him who, with an impious mind, is bent on harm and, regarding himself as powerful by his ability to punish, wishes to kill us reach us. May we humble the wrath of the defiant malefactors.

Verse 13

भरेषु । हव्यः । नमसा । उपऽसद्यः । गन्ता । वाजेषु । सनिता ।
धनंऽधनम् ॥ विश्वाः । इत् । अर्यः । अभिऽदिप्स्वः । मृधः ।
बृहस्पतिः । वि । ववर्ह । रथान्ऽइव ॥ १३ ॥

*प्स्वो ⅓; **थाँ

स बृहस्पतिर्भरेषु संग्रामेषु हव्यो योद्धृभिः स्वरक्षणार्थमाह्वातव्यो नमसोपसद्यः सर्वैर्नमसोपसदनीयः। किंच वाजेषु गन्ता। संग्रामेषु रक्षार्थं गमनशीलः। तथा धनंधनं सनिता संभक्ता दाता §वा। तृन्नन्तत्वात्षष्ठीप्रतिषेधः। तथार्यः स्वामी बृहस्पतिरभिदिप्स्वोऽभिभवनेच्छावतीर्विश्वा इत् सर्वा एव मृधो हिंसिकाः सेना रथानिव युद्धे वेगेन परकीयान्रथानिव वि ववर्ह। विशेषेण शिथिलीचकार। यद्वा इवशब्दश्चार्थे। रथांश्च वि ववर्ह। लडर्थे लिट्॥

§ आदर्शे वा नास्ति।

भरेषु from भृ=हृ to carry off (booty); cf. भरिषः (greedy of booty) coupled with गविषः, IV. 40. 2, or words like वाजंभर, पुष्टिंभर, सहस्रंभर. अर्यः gen. s., Gr. (Geld.) or acc. pl. (Old.) of अरि (Geld. rival or miser; Old. (also Berg.) poor or miser (from अ+रै or रा); Sāy. Old. point out that the ऐ० ब्रा० (IV.11. 6) explains the word as acc. pl. in rc 15. अरि is to be understood as adj. to मृधः f., meaning 'running counter, opposing'. अभिविप्रव॰। मृ॰धः. The जात्य स्वरित on प्रवः being followed by the उदात्त on मृ, there is a resulting कम्प (॰ ॰); मृध् f. like अराति, अभिमाति, &c. gives a concrete meaning 'enemy' from the root-meaning 'to ignore, to be unfriendly' cf. नहि वः ऊतिः पृतनासु (नं) मर्धति यस्मै अराध्वम् VII. 59. 4. रथाँ इव वि॰ ववर्हत्. बृह-बृह् with वि to tear asunder; cf. दृढानि चित् वि बृह VI. 45. 9; वि॰ बृहतम् विषूचीम् (अमीवाम्) VI. 74. 2. The chariots contemplated by the simile are the broken war-chariots.

Tr. (A god) to be invoked in battles, to be approached with salutation, the frequenter of battles, the winner of all kinds of wealth, Brhaspati has torn asunder, like so many (war-) chariots, all enemies bent on harm that oppose us.

Verse 14

तेजिष्ठया । तपनी । रक्षसः । तप । ये । त्वा । निदे । दधिरे ।
दृष्टऽवीर्यम् ॥ आविः । तत् । कृष्व । यत् । असत् । ते । उ-
क्थ्यम् । बृहस्पते । वि । परिऽरपः । अर्दय ॥ १४ ॥

*कथ्यं ।

हे बृहस्पते तेजिष्ठयातिशयेन तिग्मया तपनी तापकारिण्या हेत्या रक्षसो राक्षसांस्तप तापय। ये राक्षसा दृष्टवीर्ये युद्धेषु दृष्टपराक्रमं त्वा त्वां निदे निन्दाया विषयं दधिरे। कृतवन्तः। तान् तापयेति समन्वयः। ते तव उक्थ्यं सर्वैः प्रशंसनीयं यद्वीर्यमसत् पूर्वमासीत् तदधुना आविष्कृष्व प्रकटीकुरु। तेन च वीर्येण परिरपः परिवदतो निन्दकानसुरान् व्यर्दय। विशेषेण बाधस्व ॥

बार्हस्पत्ये पशावेषा हविषोऽनुवाक्या। प्रदानानामिति खण्डे सूत्रितम्। बृहस्पते अति यर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु। यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् (आ० ३-७) इति। एषैवा-

श्विनशस्त्रे परिधानीया । सूत्रितम । बृहस्पते अति यदर्यो अर्हादिति परिधानीया (आ० ६-५) इति ॥

तपनी' instru. = तपन्या, a burning weapon. निदे' दधिरे' have held out to censure. यत् अ'सत् ते उक्थ्य'म्. असत् subj. from अस्. उक्थ्य (वच् + थ + य) is predicative adj. वि' अर्दय cau. from ऋद् to be agitated, to disperse; cf. यस्य त्रित. वि ओजसा वृत्रम् विपर्वम् अर्दयत्. परिरापः acc. to प्रा० 585.

Tr. With thy exceedingly lustrous weapon of fire burn those who have censured thee, whose power has been felt. Manifest that in thee which was found worthy of praise. Scatter, oh Brhaspati, those that go about whispering (scandals).

Verse 15

बृहस्पते । अति । यत् । अर्यः । अर्हात् । द्युऽमत् । विऽभाति । क्रतुऽमत् । जनेषु ॥ यत् । दीदयत् । शवसा । ऋतऽप्रजात । तत् । अस्मासु । द्रविणम् । धेहि । चित्रम् ॥ १५ ॥

ऋतप्रजात सत्येनोत्पन्न हे बृहस्पते अर्यः श्रेष्ठो ब्राह्मणः सर्वान् कामानतीत्य यद्ब्रह्मवर्चसं तेजोऽर्हात् पूजयेत् । अर्ह पूजायां लेट्यडागमः । जनेषु ब्राह्मणेषु द्युमत् दीप्तियुक्तं क्रतुमत् ज्ञानोपेतं यद्ब्रह्मवर्चसं विभाति । विशेषेण दीप्यते । यच्च शवसा बलेन स्वाश्रय जनं दीदयत् । दीदयतिर्दीप्तिकर्मा । दीपयति । चित्र चायनीयं तद्ब्रह्मवर्चसरूपं द्रविणमस्मासु धेहि निधेहि । यद्वा अर्य उदारोऽपि त्वया दत्तं धनमतीव अर्हात् अर्हधीत । यच्च त्वदत्तं धनं जनेषु तव स्तोत्र कुर्वाणेषु दीप्तियुक्तं कर्मसाधनं च विभाति यच्च धनं शवसा अन्नादिसमृद्ध्या दीदयत् स्वाश्रयं दीपयति तादृशं धनमस्मासु धेहि । तथा च ब्राह्मणम् । बृहस्पते अति यदर्यो अर्हादित्येतया परिदध्यात्तेजस्कामो ब्रह्मवर्चसकामोऽतीवान्यान्ब्रह्मवर्चसमर्हति द्युमदिति द्युमदिव वै ब्रह्मवर्चसं विभातीति वीव वै ब्रह्मवर्चसं भाति यदीदयच्छवस ऋतप्रजातेति दीदायेव वै ब्रह्मवर्चसं तदस्मासु द्रविणं धेहि चित्रमिति चित्रमिव वै ब्रह्मवर्चसं ब्रह्मवर्चसी ब्रह्मयशसी भवति (ऐ० ब्रा० ४-११) इति ॥

अ'ति यत् अर्यः' अ'र्हात्. The word अर्य· here must be taken like the अर्यः in rc 13; cf. ऐ ब्रा० 4. 11. 6, अतीव वा अन्यान् अर्हति. अर्ह to

be worth; cf. शतं सवान् अर्हति X. 158. 2. अर्हात् is subj. अति beyond, more than. क्रतुमत. क्रतु (कृ) power, will-power; क्रतुमत् appears as an epithet of Indra, the Aśvins, the king, etc शवसा दीदयत्. शवस् (श्वि-शु-श्वा to swell) strength The shortening of सा is acc. to प्रा० 136. दीदयत् imperf. of दी-दीङ् to shine. अस्मासु धेहि = अस्मभ्यम् देहि. चित्रम् (from चित् to shine, to distinguish oneself) beautiful, wonderful.

Tr. Oh Brhaspati, born of the Eternal Law, give unto us wonderful wealth such as would be worth beyond the reach of our opponents and would appear to be full of glory and power amongst (our clans-) men and would shine with strength.

Verese 16

मा । नः । स्तेनेभ्यः । ये । अभि । द्रुहः । पदे । निरामिणः ।
रिपवः । अन्नेषु । जगृधुः ॥ आ देवानाम् । ओहते । वि । व्रयः ।
हृदि । बृहस्पते । न । परः । साम्नः । विदुः ॥ १६ ॥

*वोऽन्ने

हे बृहस्पते नोऽस्मान् स्तेनेभ्यः स्त्यानमस्ति येषु इति स्तेनाश्चौराः । तेभ्यो मा दाः । तान् दर्शयति । ये चौरा द्रुहः प्राणद्रोहस्य पदे स्थाने निरामिणो नितरां रमणशीला रिपवो हिंसकाः सन्तोऽन्नेषु परकीयेष्वभिजागृधुः । अभिकाङ्क्षन्ति । गृधु अभिकाङ्क्षायाम् । लिटि रूपम् । ये च देवानां वि व्रयो विशेषेण वर्जनम् । व्री व्ली इति धातू वर्जने वर्तेते । य एवं विद्वान् दक्षिणां प्रतिगृह्णाति नैन दक्षिणा व्लीनाति (तै० ब्रा० २-२-५-३) इत्येकस्य वर्जनार्थे दृष्टत्वादपरस्यापि वर्जनार्थत्वम् । तत् हृदि स्वकीये हृदय आ ओहते । आवहन्ति । देवानां यागान् स्तुतींश्च न करवाम इति मन्यन्त इति यावत् । तेभ्योऽस्मान् मा दा इति समन्वयः । ये पुमांसः साम्नः साममयात्त्वत्तः परः परस्तादन्यदुत्कृष्टं साम यद्रक्षोघ्नम् । साम वै रक्षोहेति । न विदुः न जानन्ति । किंतु सर्वसाधकं साम त्वामेव विदुषोऽस्मान् स्तेनेभ्यो मा दाः ॥

मा. न स्तेनेभ्यः (दाः) The verb has been dropped here and this is usual in the RV; see notes on I. 184 1*b*; 3*ab*. ये अभि द्रुहः

*आर्षेश दृष्टस्यापि इति पाठः ।

पदे॑ नि॑रामिणः. Several changes have been proposed in the text to make it yield a satisfactory sense; e. g. अभिद्रुहः, नि॑रामिष॰, but no change *is* admissible. द्रुहः पदे, offers a contrast to ऋतस्य पदे IV.5. 9; X. 117. 2. etc. and नमसः पदे VIII. 23. 9 and means "on the scene of treachery" or "in a place where treachery is enacted". निरामिणः (नि + रम् caus. to bring to a halt; cf. मा त्वा नि रीरमन् यजमानासः अन्ये). आ॑ देवा॑नाम् ओहते वि॑ व्र॑यः हृदि॑. व्रयः (from व्री, later व्ली व्रि-व्लीनाति to oppress, to bear down) Old. excessive power; Geld. weakness; Geld. in his notes has given an elaborate defence of his interpretation* and translates the expression as "they affirm the weakness of the gods and deny (the weakness) in their (own) hearts"; Old. "(who) in their hearts little mind the tyrannical power of the gods". The root ओह् with आ and वि has been obviously used in two distinct senses, which Old. overlooks, and the antithesis explains the accent of ओ॑हते. Roth, Gr. Macd. take the root to be ऊह, but it is certainly ओह and Geld. (V. S. III. by) relates it to Av. *aoj-aog*. Acc. to Gr. and Whitney ओहते is a form of 3 pl. and Old. and Geld. follow them, but of the fifteen places where ओहते occurs, only in four it is supposed to be in the pl.; of these in VII. 66. 12, we would expect the sing. acc. to Macd. VGS 194. (1); in V. 52. 11 where it occurs twice it will be seen below that it is sing.; there remains then only our passage. ओहते can be pl. only if another form without the conjugational sign. were in evidence. But there are none. If therefore it is sing., व्रयः ought to the subject. Now for the meaning of ओहते. ओह primarily means: (i) 'to acclaim with joy, pride or triumph'; cf. तत् वः अद्य सूनृ॑भिः मनामहे यत् वरुणः ओहते VII. 66. 12; यः रक्षसः ओहते तं नि यात V. 42. 10; then (ii) 'to feel or look triumphant; cf. क॰ वः सखित्वे ओहते VIII. 7. 31: ययोः शत्रुः नकि॑: अदेवः ओहते VIII. 59. 2; (iii) to show triumphantly as though one were some one or some thing; to look like; cf. ऋषि॰ कः विप्रः ओहते

* Geldner's interpretation is based on the meaning of the passive रम व्लीयते, while व्रय॰ would derive its meaning from the active sense.

VIII. 3. 14; स्रुचिः चित् ओहते I. 176. 4; अधः नरः नि ओहते अध नियुतः ओहते V. 52. 11; (iv) to vie with or look like another in respect of something; cf. एतेभिः नामभिः विष्टारः यज्ञ ओहते V. 52. 10; शवसा आगमिष्ठः देवान् ओहानः VI. 52. 5. In our passage आ and वि show varieties of the triumph of देवानां त्रयः; आ = आभिमुख्येन and वि = विष्वक्. न॑ परः सा॑म्नः विदुः परः adv. in form but adj. in the sense of "higher than": cf. न त्वत् हाता यजीयान् न काव्यैः परः अस्ति V. 3. 5. सामन् a Vedic song or melody, the weapon of ब्रः; they have nothing higher to oppose it. द्रुहस्पदे acc. to प्रा. 268; जागृधुः acc. to प्रा. 589.

Tr. Let us not (be prey) unto thieves who, as enemies stopping (waylaying) others in scenes of treachery, covet (other men's) food. The oppressive power of the gods triumphs directly and in diverse ways in their heart. They know of nothing higher than the Sāman (which is thy weapon), O Brhaspati.

Verese 17

विश्वेभ्यः । हि । त्वा । भुवनेभ्यः । परि । त्वष्टा । अजनत् ।
साम्नःऽसाम्नः । कविः ॥ सः । ऋणऽचित् । ऋणऽयाः । ब्रह्मणः ।
पतिः । द्रुहः । हन्ता । महः । ऋतस्य । धर्तरि ॥ १७ ॥

हे ब्रह्मणस्पते त्वष्टा प्रजापतिर्विश्वेभ्यो भुवनेभ्यः परि सर्वेभ्यो भूतजातेभ्य उत्कृष्टं त्वामजनद्धि। अजीजनत् खलु। ततस्त्वं साम्नःसाम्नः सर्वस्यापि साम्नः कविः। कु शब्दे। अच इरिति इप्रत्ययः। उच्चारयिता कर्तासि। यद्वा कविः क्रान्तदर्शी त्वष्टा साम्नः साम्नः सर्वस्यापि साम्नः सारेण त्वामजीजनत्। किंच स ब्रह्मणस्पतिर्महो महन ऋतस्य यज्ञस्य धर्तरि धारके यजमाने ऋणचित् स्तोतृकामऋणमिव चिनोतीति ऋणचित्। किंच ऋणयाः परूपस्य ऋणस्य यावयिता पृथक्कर्ता च। द्रुहः कर्मणो द्रोग्धुरसुरस्य हन्ता भवेति ॥

सा॑म्नःसाम्नः from each सामन्; it is an आम्रेडित; cf. धाविधावि I. 25. 1. Some scholars change कविः to कविम् and connect साम्नःसाम्नः as gen. to it; but the the Sāmaveda tradition makes out Tvastr as the composer of several Sāmans and the change is

unnecessary. महः ऋतस्य धर्तरि. महः might be either adj. to ऋतस्य or of धर्तरि, taking the latter to be equal to धर्ता. Old. has established in ZDMG 55. 302 f. that there are forms ending in तरि used in the nom.; cp. महः ऋतस्य गोपाः which occurs in VI. 49. 15; X. 8. 5.

Tr. Tvastr the poet has indeed fashioned thee from all the created beings, from each Sāman. This Lord of Prayer is the collector and pursuer of (moral) debts, the killer of enemies, the supporter of the great Law.

Verese 18

तवं । श्रिये । वि । अजिहीत । पर्वतः । गवाम् । गोत्रम् । उत्-
ऽअसृजः । यत् । अङ्गिरः ॥ इन्द्रेण । युजा । तमसा । परिऽवृ-
तम् । बृहस्पते । निः । अपाम् । औब्जः । अर्णवम् ॥ १८ ॥

* व्यं

अङ्गिर आङ्गिरस हे बृहस्पते गवामावारको बलेनाधिष्ठितः पर्वतस्तत्र श्रिय आश्रयणार्थं व्यजिहीत विवृतद्वारतामगच्छत् । ततस्त्वं यद्यदा गोत्रम् । इनित्रकटत्व-च्चश्चेति समूहार्थे त्रप्रत्ययः । गवां समूहमुदसृजः । निरगमयः । तदेन्द्रेण युजा सहा-येन युक्तस्त्वं तमसा वृत्रासुरेण परीवृतं परित आक्रान्तमपामर्णव स्थानभूतं मेघं निरौब्जः । नितरामधोमुखमकार्षीः ॥

Two exploits of Indra, viz. the liberation of the kine and that of the waters, are here attributed to बृ० as a companion of Indra. वि अजिहीत from हा with वि to open; cf. वि जिहीष्व वनस्पते योनिः सूष्यन्त्या इव V. 78. 5. अङ्गिर. The Angiras are semi-divine beings, of whom अ० is spoken of as the chief; see rc. 1; also X. 108 8, 10. निः औब्जः from नि. + उब्ज् to let loose; cf. अपा अर्णवम् निः औब्जत् I. 85. 9.

Tr. The mountain opened out, to thy glory, when thou releasedst the herd of cows, oh Angiras. With Indra for thy ally, thou letst loose the ocean of waters, enveloped in darkness, oh Brhaspati.

Verse 19

ब्रह्मणः । पते । त्वम् । अस्य । यन्ता । सुऽउक्तस्य । बोधि ।
तनयम् । च । जिन्व ॥ विश्वम् । तत् । भद्रम् । यत् । अवन्ति ।
देवाः । बृहत् । वदेम । विदथे । सुवीराः ॥ १९ ॥

हे ब्रह्मणस्पते ब्रह्मणां स्तोत्राणामधिपते अस्य जगतो यन्ता नियामकस्त्वं सूक्तस्यास्मदीयमिदं ब्राह्मणस्पत्य सूक्त बोधि बुध्यस्व । त्व तनयं पुत्रपौत्रादिलक्षणं सन्तान जिन्व । जिविः प्रीणनार्थः । लोटि रूपम् । प्रीणय । भवादृशा देवा यदवन्ति रक्षन्ति तत्तादृशं विश्वं सर्वं भद्रं कल्याण भवति । अतो वयं विदथेऽस्मिन्यज्ञे सुवीरा शोभनपुत्रपौत्राः सन्तो बृहत्प्रभूतमिदं स्तोत्रं वदेम ब्रूयाम ॥

यन्ता' बोधि. यन्ता from यम् to guide ; बोधि from भू 2. sing. The change from भूधि with an intervening बुधि to बोधि is quite intelligible. त'नयम् च जिन्व. तनय (from तन् to stretch or continue the thread or line) progeny. जिन्व from जि-जिन्व् to animate, to inspire ; cf. धियः जिन्वासि VIII. 84. 7 ; क्षत्रं जिन्वतम्, ब्रह्म जिन्वतम् VIII. 35. 16, 17. *d* is the refrain of the Grtsamadas ; *cd* appear as the refrain of II. 35. 15 ; the whole rc appears as II. 24. 16. विद'थे बृह'त् वदेम. Roth and Gr. have derived विदथ from विद् to find, Regnaud from विध् to sacrifice, Old. from वि+धा to ordain. The latter translates the line : "May we with valiant men mightily raise our voice at the determining of (ordinances etc.)". In V. S. II. 148, Geld. understands विदथ as सभा ; in his Glossar, however, he abandons the meaning of सभा and understands the word in the sense of wisdom, spiritual or priestly knowledge, the holy knowledge in actual use, i. e. sacrifice ; the wise or the counsels of the wise. His translation is : May we lead the great word as masters in wisdom. There is another refrain सुवीरास: विदथं आ वदेम which appears in I. 117. 25 ; II. 12. 15 ; VIII. 48. 14 (It is not mentioned by Bloomfield in his list of refrains, though mentioned as such on p. 123. of his RV repetitions) which ought to be considered in the explanation of विदथ here. If विदथम् आवदेम and विदथे बृहत् वदेम ought to give

a similar sense, विदथ must mean 'an assembly of wise men' (cf. विदथा कवीन्रां III. 1. 2; विदथे प्रशस्तः II. 77. 12), बृहत् adv. 'mightily' (cf. बृहत् गायन्त· अर्चेर VIII. 66. 1; बृहत् वाचं आशुषाणाः V. 36. 4) and आ वद् 'to address'. सुवीर valiant or powerful: this sense is to be distinguished from that of the बहु°; cf. सुवीरः सोमः, अग्निः, रयि· &c.

Tr. Oh, Lord of Prayer, guide this hymn of ours and inspire our children. Whatever the gods take under their protection becomes auspicious. As powerful men, may we discourse mightily in the assembly.

No. 8

MANDALA II. SŪKTA 28

इदमित्येकादशर्चं षष्ठं सूक्तम्। अत्रानुक्रम्यते। इदमेकादश वारुणमिति। पूर्वसूक्ते कूर्मो गार्त्समदो हि वेत्युक्तत्वादस्योत्तरस्य च कूर्मो गृत्समदो वा ऋषिः। त्रिष्टुप् छन्दः। वरुणो देवता। विनियोगो लैङ्गिकः। अत्र केचिदाहुः। इदमेकादशर्चं तु वारुणं भयपापनुत्। ऋणदारिद्र्यदुःस्वप्ननाशनं चेति शुश्रुम (ऋग्विधा° १-२५-१) इति।

Verse 1

इदम् । कवेः । आदित्यस्य । स्वऽराजः । विश्वानि । सान्ति ।
अभि । अस्तु । महा ॥ अति । यः । मन्द्रः । यजथाय । देवः ।
सुऽकीर्तिम् । भिक्षे । वरुणस्य । भूरेः ॥ १ ॥

कवेः क्रान्तदर्शिन आदित्यस्यादितेः पुत्रस्य स्वराजः स्वयमेव राजमानस्येश्वरस्य वा वरुणस्येदं हविः स्तोत्रं वा यजमानः करोतीति शेषः। स च विश्वानि सर्वाणि सान्ति द्वितीयभावविकारभाञ्जि भूतजातानि महा महिम्ना वरुणप्रसादालब्धेनाभ्यस्तु अभिभवतु। यो देवो द्योतमानो वरुणो यजथाय यष्ट्रे पुरुषाय अति अतिशयेन मन्द्रः स्तुत्यो हर्षयिता वा भवति तस्य भूरेर्भर्तुर्वरुणस्य सुकीर्तिं शोभनां स्तुतिं भिक्षे प्रार्थये। यद्वा वरुणस्येति तृतीयार्थे षष्ठी। तेन वरुणेन दातव्यां शोभनां कीर्तिमहं याचे॥

स्वराजः one who rules by himself. सन्ति those that exist. अभि अस्तु. अभि + अस् to surpass. महा = महिम्ना. अतिये यजथाय. मन्द्रः मन्द्र agreeable. सुकीर्ति from कृ-किर् to praise; cf. वीर्यस्य चर्किरन् I. 31. 5. भिक्ष् (old desid. of भज्) to seek, to pray for; it governs occasionally the geni. of the thing sought (cf. श्रवस. I. 94. 7; पित्वः I. 152. 6), but not of the person approached. Hence वरुणस्य must be connected with सुकीर्ति and not भिक्षे.

Tr. May this (hymn), addressed to the wise son of Aditi that rules by his own power, excel by its greatness all (hymns) that exist, to that god who is exceedingly agreeable to worship. I pray for the kind appreciation of the mighty Varuna.

Verse 2

तव । व्रते । सुऽभगासः । स्याम । सुऽआध्यः । वरुण । तुस्तुऽवांसः ॥ उपऽअयने । उषसाम् । गोऽमतीनाम् । अग्नयः । न । जरमाणाः । अनु । द्यून् ॥ २ ॥

हे वरुण स्वाध्यः शोभनाध्यानास्तुष्टुवांसः स्तुतवन्तो वयं तव व्रते त्वदीये परिचरणाख्ये कर्मणि वर्तमानाः सुभगासः स्याम। शोभनधना भवेम। अपि च गोमतीनां रश्मिभिर्युक्तानामुषसामुपायन उपागमने सत्यग्नयो न यथाग्नयोऽग्निहोत्रादिकमर्थं समिध्यन्ते एवमनु द्यून् अनुदिनं जरमाणास्त्वां स्तुवन्तो वयं दीप्यमाना भवेम ॥

सुभगास. lucky; cf. दक्षस्य सुभगत्वे II. 21. 6. स्वाध्यः (सु, आ, धी from धी-दीध्यति-ते) full of reverence; *contra* दुराध्य.. उप साम् उपायने. उपायन from इ with उप् to approach. जरमाणा = from जृ to wake up, अनु द्यून् from द्यु m. (cognate of दिव्, द्यौ, f.) day.

Tr. Full of reverence and of praise may we be happy under thy ordinances, oh Varuna, at the approach of the dawns, rich in kine, like fires waking to activity day after day.

Verse 3

तव । स्याम । पुरुऽवीरस्य । शर्मन् । उरुऽशंसस्य । वरुण । प्रऽनेत-
रिति ॥ यूयम् । नः । पुत्राः । अदितेः । अदब्धाः । अभि ।
क्षमध्वम् । युज्याय । देवाः ॥ ३ ॥

हे प्रणेतः सर्वस्य जगतः प्रकर्षेण नेतर्वरुण पुरुवीरस्य पुरुभिर्बहुभिर्वीरैरुपेतस्य यद्वा पुरूणां बहूनां शत्रूणां विशेषेण प्रेरकस्योरुशंसस्योरुभिर्बहुभिः स्तूयमानस्य तव शर्मन् शर्मणि सुखे गृहे वा स्याम। अदितेः पुत्रा मित्रादयः । परमपि च्छन्दसीति परस्य षष्ठ्यन्तस्य पूर्वामन्त्रिताङ्गवद्भावेनानुप्रवेशात् पदद्वयसमुदायस्याष्टमिकं सर्वानुदात्तत्वम् । अदब्धाः शत्रुभिरहिंसिता । एवंभूता हे देवा यूयं नोऽस्मान् कृतापराधान् युज्याय सख्यायाभि क्षमध्वम् । अस्माभिः कृतापराधं सहध्वम् ॥

पुरुवीर'स्य उरुशं'सस्य श'र्मन्. The accent in बहु० compounds with पुरु as first member is on the second member, except in the case of पुरु'णामन्. उरुशंस is an epithet of gods (उरु शस्यते) and of men (उरु शंसति). शर्मन् (from शृ, from which शरण or शरीर are derived and which is cognate with श्रि) (i) home; cf. पाहि नः शर्म वीरवत् IX. 64. 18; प्रिया शर्म पितॄणाम् IV. 46. 12; (ii) shelter, protection. शर्मन् is here loc. अभि क्षम् occurs with acc., dat., and loc. and therefore there does not appear to be any special meaning like Gr.'s 'to be favourable to' which it must denote here. यु'ज्य n. companionship; it is also an adj.

Tr. O Varuna, oh leader, may we be under thy protection, of thee who hast plenty of valiant men and art praised all over. O sons of Aditi to whom no harm can be done, show us forgiveness that we might be received in your companionship, ye gods.

Verse 4

प्र । सीम् । आदित्यः । असृजत् । विऽधर्ता । ऋतम् । सिन्धवः ।

वरुणस्य । यन्ति ॥ न श्राम्यन्ति । न । वि । मुचन्ति । एते ।
वयः । न । पप्तुः । रघुऽया । परिऽज्मन् ॥ ४ ॥ *ताँ ऋ

विधर्ता सेतुरिव जलस्य विधारयितादित्योऽदितेः पुत्रो वरुण ऋतं विधारणहेतुभूतं सत्यम्। यद्वा नदीनामुपादानभूतमुदकम् सीं सर्वतः प्रासृजत् प्रकर्षेण सृष्टवान्। अणोऽप्रगृह्यस्यानुनासिक इत्याकारः सानुनासिकः। तेन वरुणस्य ऋतेन सिन्धवः स्यन्दनशीला नद्यो यन्ति। गच्छन्ति प्रवहन्ति। एते सिन्धवो न श्राम्यन्ति श्रान्ति न प्राप्नुवन्ति न वि मुचन्ति उपरता न भवन्ति। अनलसाः सर्वदैकरूपेण प्रवहन्तीत्यर्थः। एतदेवोच्यते। वयो न वयः पक्षिण इव रघुया रघवः शीघ्रगामिनः परिज्मन् परिज्मनि भूम्याम्। पप्तुः पतन्ति। पत्लृ गतौ। लिटि्युसि तनिपत्योश्छन्दसीत्युपधालोपः। स्थानिवद्भावाद्द्विर्वचनादि। रघुया इत्यत्र सुपां सुलुगिति जसो याजादेशः॥

सीम् stands here for एता ; see on I. 116. 20. प्रा० 168 notes the absence of Samdhi between विधर्ता and ऋतम्; when a coalescence is possible and does not take place the first vowel is nasalised acc. to प्रा० 171 and Pān. VIII. 4. 57. विधर्ता one who divides or distributes ; cf. त्वं विधर्तः सचसे पुरंध्या II. 1. 3 ; वि अवनीः अधारयः II. 13. 7. न वि मुचन्ति are not unyoked for rest ; वि मुच् 'to rest oneself' is used intransitively here ; cf. मा आरे अस्मात् वि मुमुचः III. 41. 8. इह वा विमोचनं अस्तु IV. 46. 7. रघुया रघु (from रघ्; cf. classical लघु) swift ; denom. रघ्यति to go fast, from which verb. n. रघुया, term. of instru. dropped and used as adv. ; 'swiftly'. परिज्मन् पप्तुः. परिज्मन् (from परि+गम्-जम्) course ; term. of loc. dropped; cf. II. 38. 2. पप्तुः perf. of पत्.

Tr. The son of Aditi as the distributor let them run ; the rivers follow the eternal order of Varuṇa ; they never feel weary and never rest. They run swiftly like birds in their course.

Verse 5

वि । मत् । श्रथय । रश्मनांऽइव । आर्गः । ऋध्याम । ते ।

वरुण । खाम् । ऋतस्य ॥ मा । तन्तुः । छेदि । वयतः । धियम् ।
मे । मा । मात्रा । शारि । अपसः । पुरा । ऋतोः ॥ ५ ॥

हे वरुण मत् मत्सकाशात् रशनामिव रज्जुमिव आगो विहितानुष्ठानजनितं पापं विश्रथय शिथिलीकुरु । विमोचयेत्यर्थः । ते त्वत्संबन्धिन ऋतस्योदकस्य पूर्णां खां नदीम् । खा इति नदीनाम । तामृध्याम लभेमहि । अपि च धियं कर्म वयतः संन्तस्वतो मे मम तन्तुः कर्मसंततिः मा छेदि छिन्नो मा भूत् । नैरन्तर्येणेत्यर्थः । तथा ऋतोः समाप्तिकालात्पुरा पूर्वमपसः कर्मणो मात्रा शरीरं प्राच्योदीच्याङ्गलक्षणं मा शारि शीर्णं विकलं मा भूत् । शॄ हिंसायाम् । कर्मणि लुङ् । पुर ऋतोरित्यत्र ऋत्यक इति प्रकृतिभावः ॥

विं श्रथय (from श्रथ्, classical स्रथ् to loosen). With the simile cp. rc 6 and VII. 86. 5, ते ऋतंस्य खांम् ऋध्यांम. खा (from खन्) spring; occurs only in रायः खाम् VI. 36. 4. ऋध् to fulfil; cf. कर्म ऋध्याम I. 31. 8; स्तोमं ऋध्याम X. 106. 11; तन्वः कामं ऋध्याः III. 50. 1; fulfilling the spring of the law is giving its course full scope by one's conduct, conforming one's conduct to the eternal Law. Geld. regards *b*, *c*, *d* as saying the same thing, viz the continued exercise of the poetic faculty, in different metaphors; but Varuna's rta cannot surely be fulfilled by outbursts of poetry. वंयतः pre. part. from वे to weave. छेदि, शारि aor. inj. pass. 3 sing. पुरा ऋतोंः अपंसः मांत्रा मां शारि. ऋतु is the proper time for anything. अपंस् is an artist or artizan; अंपस् (first syll. accented) is work; Sāy. has not paid attention to this distinction made by accent. मात्रा (from मा to measure, hence to construct) (i) measure, (ii) structure, (iii) mass or extent. शॄ (शृणाति,) to shatter to pieces. अपसः मात्रा refers to the poet's composition.

Tr. Unloosen my sin from me like a rope. Let my actions further the spring of thy Law. Let not the thread of my song snap while I am weaving it. Let not the artist's structure fall to pieces before its time.

Verse 6

अपो इति । सु । म्यक्ष । वरुण । भियसम् । मत् । संऽराट् ।

ऋतऽवः । अनु । मा । गृभाय ॥ दामऽइव । वत्सात् । वि ।
मुमुग्धि । अंहः । नहि । त्वत् । आरे । निऽमिषः । चन ।
ईशे ॥ ६ ॥

*सम्राळ् **वोऽनु

हे वरुण भियसं भयं मत् मत्तः सु सुष्ठ अपो म्यक्ष । अपगमय । हे सम्राट् सम्यग्राजमान हे ऋतावः सत्यवन् यज्ञवन्वा वरुण माम्नु गृभाय । अनुगृहाण । छन्दसि शायजपीति श्नः शायजादेशः । हृग्रहोर्भ इति भत्वम । अपि च दामेव वत्सात् यथा दोग्धा वत्ससकाशाद्बन्धनीं रज्जु विमुञ्चति तथांहः पापं मत्सकाशाद्वि मुमुग्धि । विमुञ्च । छान्दसः शपः श्लुः । पृथक्कुरु । त्वदारे त्वत्तो दूरदेशे वर्तमानः त्वदन्य इत्यर्थः । त्वत्तोऽन्यः कश्चित् । निमिषश्चन निमेषस्यापि अक्षिपक्ष्मचलनस्यापि नहीशे । नेष्टे । त्वमेवेश्वर इत्यर्थः । लोपस्त आत्मनेपदेष्विति तलोपः ॥

म॑त् भिय॑सम् अ॑पो सु॑ म्यक्ष भिय॑स्॒ = भीः. सु corresponds with Marathi बरे, Hindi भला, Eng. please, Fr. bien अपो = अप + उ. म्यक्ष् be situated (Macd. ; Gr.'s ' to shine ' is due to wrong etymology ; Geld. to be joined on to, to suit) ; cf. (अग्नेः) अम्याक्षि सद्म सदने पृथिव्याः VI. 11. 5. अप म्यक्ष् to remove. ऋ॑तवः (in संहिता always ऋतावः) from ऋतवन् (that which is acc. to the Law) holy. अनुग्रभ् = अनुग्रह्. आरे॑ adv. (आरात् is another form) away from.

Tr. Do please remove my fear from me, holy king Varuṇa ; be gracious unto me ; like the rope from the calf remove evil from me. Without thee I have no power even to close my eyes

Verse 7

मा । नः । वधैः । वरुण । ये । ते । इष्टौ । एनः । कृण्वन्तम् ।
असुर । श्रीणन्ति ॥ मा । ज्योतिषः । प्रऽवसथानि । गन्म ।
वि । सः । मृधः । शिश्रथः । जीवसे । नः ॥ ७ ॥

हे वरुण नोऽस्मान् वधैर्हननसाधनैरायुधैर्मा । हिंसीरिति शेषः । हे असुर पापकृतां निरसितः ते त्वदीय इष्टौ यज्ञ एनो विहिताननुष्ठानेन जनितं पापं कृण्वन्तं कुर्वन्तं पुरुषं ये वधा भ्रीणन्ति हिंसन्ति तैरिति पूर्वत्र संबन्धः । भ्रीष् हिंसायां क्र्यादिकः । अपि च ज्योतिषो गृहे वर्तमानादग्नेः सौरप्रकाशाद्वा प्रवसथानि प्रवासान्मा गन्म । मा गच्छाम । सर्वदा गृहे वर्तमानः सूर्यं पश्यंश्चिरकालं जीवेयमित्यर्थः । गमेर्लुङि मन्त्रे घसेति च्लेर्लुक् । तथा नोऽस्माकं जीवसे जीवनाय मृधो हिंसकान् सु सुष्ठु वि शिश्रथः विश्लेषय । बाधस्वेत्यर्थः ॥

मा नः वधैः. A verb like हिंसीः has to be supplied ; ते इष्टौ* इष्टि (from इष् to set in motion, to urge, to incite) instance, command ; cf. इन्द्रस्य, आङ्गिरसा च इष्टौ I. 62. 3. भ्रीणन्ति occurs only here ; नैघ. II. 12 क्रूर्याकर्मा ; prob. to smite down. प्रवसथानि departure from, deprivation of ; occurs only here ; but other forms occur ; cf. प्रवासाइव प्रवसतः VIII. 29. 8 ; अप्रोर्णुवान् गृहपतिः VIII. 60. 19 ; to see the light of the day is to live ; not to see it is to die ; hence the prayer ज्योक् च सूर्यं दृशे I. 23. 21 ; ज्योक् पश्येम सूर्यम् IX. 4. 5 ; X. 37. 8.

Tr. Do not (strike) us, Varuna, with those weapons of thine that at thy instance smite down the sinner. May we not be away from light ; please rout our enemies that we may live.

Verse 8

नमः । पुरा । ते । वरुण । उत । नूनम् । उत । अपरम् । तुविऽजात । ब्रवाम ॥ त्वे इति । हि । कम् । पर्वते । न । श्रितानि । अप्रऽच्युतानि । दुःऽदभ । व्रतानि ॥ ८ ॥ *दूळभ

हे वरुण पुरा पूर्वस्मिन्काले ते तुभ्यं नमो नमस्कारप्रतिपादकं नम इति शब्दमवादिषम । उत अपि च नूनमद्यापि ब्रवाम । उत अपि च हे तुविजात बहुषु प्रदेशेषु प्रादुर्भूत वरुणापरभागामिन्यपि काले नमःशब्दं ब्रवाम उच्चारयाम । कस्मादिति चेदुच्यते । दूळभ दुर्दभ दम्भितुं हिंसितुमशक्य । दुरो दाशनाशदभध्वेषु (पा० ६- -१०९-५) इति रेफस्योत्वमुत्तरपदादेः षुत्वं च । कमित्येतत्पादपूरणम् । हि यस्मात्त्वे त्वयि पर्वते न शिलोच्चय इवाप्रच्युतान्यन्यैः प्रच्यावयितुमशक्यानि व्रतानि कर्माणि विधरणानि श्रितानि । आश्रितानि । तस्मादित्यर्थः ॥

तुविजात born mighty. तुवि mighty or many. ब्रवाम subj. त्वे'=त्वयि. दुर्दभ becomes दूळभ in the Vedic dialect, the ordinary Prakrit change of *r*+dental to lingual being observable here.

Tr, We have expressed our homage to thee before; we do it now and we shall do it in future, O mighty God. Indeed on thee rest unshakable thy laws as on a mountain, O god whom no one can do harm.

Verse 9

परा । ऋणा । सावीः । अध । मत्ऽकृतानि । मा अहम् ।
राजन् । अन्यऽकृतेन । भोजम् ॥ अविंऽउष्टाः । इत् । नु । भूयसीः ।
उषसः । आ । नः । जीवान् । वरुण । तासु । शाधि ॥ ९ ॥

हे वरुण ऋणा ऋणानि पित्रादिभिः कृतान्यस्माभिर्देयानि परा सावीः परा सुव । पराचीनं प्रेरय । षू प्रेरणे । छान्दसो लुङ् । अध अधुना मत्कृतानि मया निष्पादितानि ऋणानि परासुव । अपि च हे राजन् स्वामिन् वरुण अहमन्यकृतेनान्यैरर्जितेन धनेन मा भोजम् । भोगं मा लभेयम् । किं कारणमिति चेदुच्यते । भूयसीर्भूयस्यो बहुतरा उषसोऽव्युष्टा इन्नु सत्यमव्युष्टा एव । अपररात्रिपूत्थाय ऋणानि चिन्तयतो जाग्रतो मम व्युष्टा अप्यव्युष्टकल्पा आसन् । हे वरुण तासूषःसु नोऽस्मान् जीवान् जीवनवत आ शाधि । आ समन्तादनुशिष्टान् कुरु । ऋणान्यप-* हृत्य भोगपर्याप्तं धनं प्रयच्छेत्यर्थः ॥

अ'ध now or further. प'रा सावीः aor. inj. of परा+सू to drive away; cf. दुःष्वप्न्यं परा सुव V. 82. 4; यक्ष्मं परा सुवामि X. 137. 4. जीवा'न् आ' शाधि' जीव living; cf. जीवान् नः आधि धेतन VIII. 67. 5. आ शास् to to wish, cf. तत् आ शास्ते यजमानः हविर्भिः. I. 24. 11.

Tr. And further drive away all sins for which I am responsible. Let me not, oh king, suffer for other men's doings. Many dawns remain (still) undawned; wish us alive in them, Varuna.

---

*न्यपकृत्य इत्यादर्शः ।

Verse 10

यः । मे । राजन् । युज्यः । वा । सखा । वा । स्वप्ने । भयम् ।
भीरवे । मह्यम् । आह ॥ स्तेनः । वा । यः । दिप्सति । नः ।
वृकः । वा । त्वम् । तस्मात् । वरुण । पाहि । अस्मान् ॥१०॥

हे राजन् वरुण मे मदीयो युज्यो योजनसमर्थः पित्रादिर्वा सखा समानख्यानोऽन्यो बान्धवो वा स्वप्ने दृष्टं त्वद्विषय भयं भीरवे भयशीलाय मह्यं य आह ब्रूते । तथा स्तेनश्चौरो वा वृकोऽरण्यश्वा वा यो नोऽस्मान् दिप्सति जिघांसति । सनीवन्तर्धेति विकल्पनादिडभावः । दम्भ इच्चेतीत्वम् । हे वरुण त्वं तस्मात्सर्वस्मादस्मान्पाहि रक्ष ॥

There is a confusion of construction. When a friend appeared in a dream to announce a coming danger, the dream was apparently supposed to come out true. Protection is prayed for from the danger, not the friend; *c* mentions a real danger.

Tr. O king Varuna, if there is a companion or friend who announces, in a dream, a danger to me, fearful as I am,—or (in the waking state) if there is a thief who wishes to do us harm or a rapacious man,—protect us from (it or) him, Varuna.

Verse 11

मा । अहम् । मघोनः । वरुण । प्रियस्य । भूरिऽदात्रः । आ ।
विदम् । शूनम् । आपेः ॥ मा । रायः । राजन् । सुऽयमात् ।
अव । स्थाम् । बृहत् । वदेम । विदथे । सुऽवीराः ॥ ११ ॥

*जन्तुः

हे वरुण *मघोनः धनवतः प्रियस्यानुकूलस्य भूरिदात्रो भूरेर्बहुलस्य दातुराढ्यस्य

* आदर्शे भाष्यक्रमः 'हे वरुण प्रियस्य भूरिदात्रो भूरेर्धनस्य दातुर्धनवत आढ्यस्य पुरतः पुत्रादेर्दारिद्र्यमहं मा आ विदम् । आ वेदयानि ज्ञापयानि । हे राजन् सुष्ठु नियामकाद्धनादवयुत्य स्थितो मा भूवम् । शोभनपुत्रा यज्ञे गृहे वा वर्तमाना. प्रौढं स्तोत्रमुच्चारयाम । ' इति दृश्यते ।

स्याहं मा आ विदं मावेदयानि आवेदनं विज्ञापनं मा करवाणि । किं तदनावेद्यम् । आपेर्ज्ञातेः शून्यं शून्यं दारिद्र्यम् । वर्णलोपश्छान्दसः । यद्वा शून्यं गतं प्राप्तं दारिद्र्यम् दुओश्वि गतिवृद्ध्योः । श्वीदितो निष्ठायामितीट्प्रतिषेधः । यजादित्वात्संप्रसारणम् ओदितश्चेति नकारः । वृषादित्वादाद्युदात्तत्वम् । एतदुक्तं भवति । अरमदीयाः पुत्रादयः क्षुधिता इति प्रभुप्रभुसमीपेऽभिधाय याचमानो मा भूवामिति । हे राजन् सुयमात् । सुष्ठु नियम्यतेऽनेन पुरुषो गृह इति सुयमः । ईषद्दु सुष्वीति खल् तादृशाद्रायो धनान्माव स्थां अवयुत्य स्थितो मा भूवम् । वयं सुवीराः शोभनपुत्रा विदथे यज्ञे गृहे वर्तमानाः सन्तो बृहत प्रौढं स्तोत्रं वदेम उच्चारयाम. ॥

भूरिदा॑त्रः from भूरि + दा + वन्; cf. वि + जा + वन्, सुत + पा + वन्, ऋण + या + वन्. आपि॑· one who befriends; between आपि and सखि a distinction has been made in I. 26. 3; IV. 17. 17; 25. 5. आपि is mentioned on a par with पिता in I. 26. 3 and 31. 16, VI. 17. 17; the derivative sense appears to be present in आपिः अवसः वृतनस्य III. 51. 6; it is distinguished from स्तोतृभ्यः and जरित्रे in II. 38. 11; आपि is there a befriender, a patron. शू॑नम् (श्वि) want, dearth; cf. मा सख्युः शूनं आ विदे मा पुत्रस्य VIII. 45. 36. अव स्था only here occurs in the sense of 'to go without'.

Tr. Let me not, oh Varuna, experience a dearth of a bounteous, loving and liberal patron; let me not, oh king, be without easily manageable wealth. Powerful in the assembly, may we discourse mightily.

No. 9

MANDALA II SŪKTA 38

उदु ष्य इत्येकादशर्चं षष्ठं सूक्तं गार्त्समदं त्रैष्टुभं सवितृदेवताकम् । अत्रानुक्रमणिका । उदु ष्य एकादश सावित्रमिति । व्यूढे दशरात्रे षष्ठेऽहनि वैश्वदेवशस्त्र एतत्सूक्तं सावित्रनिविद्धानीयम् । व्यूळ्हश्चेति खण्डे सूत्रितम् । षष्ठस्योदु ष्य देव इति गार्त्समदम् (आ० ८-८) इति ।

Savitr is a morning god as well as an evening god. He is the 'impeller,' the power that lies behind the universal

order; puns on this elymological meaning abound in hymns to the god. His evening activity is graphically described in the following hymn; it is briefly described also in I. 35. 2 *ab*: आ कृष्णेन रजसा वर्तमानः निवेशयन् अमृतं मर्त्यं च.

Verse 1

उत् । ऊं इति । स्यः । देवः । सविता । सवाय । शश्वत्ऽतमम् । ततऽअपाः । वह्निः । अस्थात् ॥ नूनम् । देवेभ्यः । वि । हि । धाति । रत्नम् । अर्थं । आ । अभजत् । वीतिऽहोत्रम् । स्वस्तौ ॥ १ ॥

स्यः स देवो द्योतमानः सविता सवाय लोकानां प्रसवायानुज्ञायै शश्वत्तमं प्रतिदिनमुदस्थात् उत्तिष्ठति । कीदृशः सविता । तदपाः तत्प्रसवकर्मा । अपः अप्न (नि० २-१) इति कर्मनामसु पाठात् । वह्निर्वोढा जगताम् । किंच नूनं संप्रति देवेभ्यः स्तोतृभ्यो रत्नं धनं वि हि धाति । प्रयच्छति । हीति पूरणे । अथ अपि च वीतिहोत्रं कान्तयज्ञं यजमानं स्वस्तावविनाशे क्षेमेऽभजत् । भागिनं करोतु । यद्यपि स्वस्तिशब्दो विभक्त्यन्तनिर्दिष्टशब्दपरस्तथाप्यपर्यवसानादर्थपरो भवति ॥

सविता' सवाय. There is a pun on the root-meaning of सू 'to impel' here; also in IV. 53. 3, 6; IV. 54. 2 6; V. 51. 5; 82. 3–7, 9; VI. 71. 1–6; cp. similar puns on the root-meaning in उषस्, I. 48. 1 &c. शश्वत्तमम् adv. from शश्वत् adv. (i) ever recurring, (ii) again and again; also adj. every, continual; cf. शश्वत् इन्द्रः जिगाय I. 36. 16; शश्वत्तमं अवसे जोहवीति III. 62. 2. तदपाः from अपस् work (तत् अपः यस्य). वह्निः here, also in I. 3. 9; II. 17. 4 'driving in a chariot': cf. रथेष्ठाः II. 17. 3; वहमानः अश्वैः VII. 45. 1; also सुवह्मा. VI. 22. 7. वीतिहोत्रम् (from वीति partaking, enjoyment, from वी; and होत्रं offering; an epithet of the यजमान or अग्नि) whose offering is intended for enjoyment (eating); cf. वीतिराधस् and होत्रवाह्. अथ coming after हि indicates a corollary; cf. विद्म हि त्वा पुरुवसुं...अथ नः अविता अव I. 81. 8; सुशर्माणा स्ववसा हि भूतं अथ धत्तं यजमानाय शंयोः I. 93. 7 आ' अभजत् inj. from आभज् to give a share in; to grant; cf. नः वाजे आ

भज I. 43. 8. The augment should have been dropped: is it an oversight of the पदकार? Otherwise *d* should be thus translated, therefore he has (already) granted &c.

Tr. Yon god Savitr has risen to urge (the world to activity), going about in his chariot continually for that (exclusive) mission of his; he is indeed now distributing valuable things among gods; therefore may he grant welfare to the sacrificer.

Verse 2

विश्वस्य । हि । श्रुष्टये । देवः । ऊर्ध्वः । प्र । बाहवा । पृथुऽ-
पाणिः । सिसर्ति ॥ आपः । चित् । अस्य । व्रते । आ । निऽ-
मृग्राः । अयम् । चित् । वातः । रमते । परिऽज्मन् ॥ २ ॥

देवो द्योतमान सविता पृथुपाणिर्महत्करो विश्वस्य श्रुष्टये जगतः सुखाय ऊर्ध्वमुद्गतः सन् बाहवा बाहू प्रसिसर्ति प्रसारयति । आपश्चित् आपोऽप्यस्य व्रते प्रसवाख्ये कर्मणि सति । व्रतं कर्वरम् (नि० २-१) इति तन्नामसु पाठात । आ स्यन्दन्त इति शेषः । ताश्च निमृग्रा नितरां शोधयित्र्यो गङ्गादिरूपेण जगत्पावयन्तीत्यर्थः । अयं चिद्वान्तोऽयमपि वायु परिज्मन् परितो गते व्याप्तेऽन्तरिक्षे रमते ॥

श्रुष्टये for willing compliance: cf. विद्मेषा श्रुष्टिः सं एतु VII. 40. 1; स्तोमस्य श्रुष्टी रक्षसः दह VIII. 23. 14; श्रुष्टी inst. adv. willingly, readily. बाहवा (from बाहव m. ?) occurs also in V. 64. 2 and VII. 62. 5; they are mentioned as golden in I. 22. 5; 35 9, 10; VI. 71. 1, 4. 5. प्र सिसर्ति (from प्र सृ, used only here in causal sense) to stretch. व्रते आ निमृग्राः. The व्रतानि (ordinances) of सवितृ have been emphasised in this hymn; cf. rks 3. 6, 7, 9. निमृग्र submissive, from निमृज् to make one's own; cf. नि राधः अश्व्यं मृजे V. 52. 17; जनीः इव पतिः एक. समानः नि मामृजे पुर इन्द्रः VII. 26. 3. परिज्मन् loc. (from जम्-गम्) course; cf. नृवत् परिज्मन् नोनुवन्त (roar) वाता IV. 22. 4. परिज्मन् also means 'one who wanders around'; cf. वृष्टिं परिज्मा वातो ददातु VII. 40. 6. रमते from रम् to rest tranquil; cf. पर्वत चित् सरिष्यन् अरंस्त II. 11. 7; cf. also ṛc 3.

Tr. The broad-armed god, standing erect, stretches forth his arms that all might obey. The very waters are subservient to his commandments; and this wind itself rests in its course.

Verse 3

आशुऽभिः । चित् । यान् । वि । मुचाति । नूनम् । अरीरमत् ।
अतमानम् । चित् । एतोः ॥ अह्यर्षूणाम् । चित् । नि । अ-
यान् । अविष्याम् । अनु । व्रतम् । सवितुः । मोकीं । आ ।
अगात् ॥ ३ ॥

[*न्यं; **याँ अ

यान् गच्छन् सविताशुभिश्चिच्छीघ्रगामिभिरपि रश्मिभिर्वि मुचाति । विमुच्यते । नूनमिति पूरणः । अतमानं चित्सततं गच्छन्तमपि जनमेतोर्गमनाद्-रीरमत् उपरमयति । किंच अह्यर्षूणामहिमाहन्तारं शत्रुमर्षन्त्यभिगच्छन्ती-त्यह्यर्षवः । तेषामप्यविष्यां गमनेच्छां न्ययान् नियन्छति । सवितुः प्रेरकस्य सूर्यस्य व्रतं कर्मानु पश्चान्मोकी रात्रिः । मोकी शोकीति (नि० १-७) रात्रिनामसु पाठात् । आगात् आगच्छति । सवितुश्चेष्टोपरतौ रात्रिरागच्छतीति यावत् ॥

आशुभिः यान् वि मुचाति. आशुः a swift horse. यान् from pre. p. of या. विमुच् cf. II. 28. 4; it is subj. 3 s here. अतमानं एतोः अरीरमत् अत् to wander एतु (इ) journey. रम् caus. to stop. अह्यर्षूणां अविष्यां नि अयान्. अह्यर्षु occurs only here. It can mean अहिवत् अर्षति (glides) or अहि अर्षति or ऋषति (pounces on); Geld. prob. on account of the similar श्येन न तक्तः अर्षति IX. 69. 15 prefers the latter. अविष्या from अविष्यू to to be greedy; cf. यवसे अविष्यन् VII. 3. 2; भोजसे अविष्यन्तम् VIII. 51. 3. न्ययान् (aor. 3 s. of यम्). मोकी occurs only here and the निघण्टु has mentioned it among synonyms of night.

Tr. (The rider) even when travelling with swift steeds must unyoke now. (Savitṛ) bids also the wanderer to rest in

his journey. He restrains the greed of the very pouncers on serpents (eagles). The night has approached at the bidding of Savitr.

Verse. 4

पुनरिति । सम् । अव्यत् । विऽततम् । वयन्ती । मध्या । कर्तोः । नि । अधात् । शक्म । धीरः ॥ उत् । संऽहार्य । अस्थात् । वि । ऋतून् । अदर्धः । अरमतिः । सविता । देवः । आ । अगात् ॥ ४ ॥ [*न्यधा ७व्यू ३तू ँर ँधर

वयन्ती वस्त्रं वयन्ती नारीव रात्रिर्विततमालोकं पुनः समव्यत् संवेष्टयते । पुनःशब्दः पूर्वेद्युरप्येवमकार्षीदिति द्योतयति । धीरः प्रज्ञोऽपि सर्वो लोकः कर्तोः क्रियमाण कर्म । कर्तोः कर्तवै (नि० २-१) इति तन्नामसु पाठात् । शक्म कर्तुं शक्यमपि मध्या मध्य. उपक्रान्तं कर्मापरिसमाप्येत्यर्थः । न्यधात् निहितवान् । सवितर्युपरत इति शेषः । सर्वो लोकः संहाय शय्यां विहायोदस्थात् । अवशिष्टं कर्म कर्तुं पुनरुत्तिष्ठति । संपूर्वो जहातिः शय्यापरित्यागे वर्तते । तथा च श्रूयते । कलिः शयानो भवति संजिहानस्तु द्वापरः (ऐ० ब्रा० ७-१५) इति सविता सर्वस्य प्रसविता सूर्योऽरमतिरनुपरतिर्देवो द्योतमान आगात् आगच्छति । उदेतीति यावत् । ऋतून् कालविशेषांश्च व्यदर्धः । विदारयति ॥

a b describe the fixed alternation of Night and Day; *c d* show सवि० as the power behind. पुनः सं अव्यत् वि ततम् व यन्ती. वयन्ती (from वे to weave) female weaver. विततम् that which has been stretched. सं व्ये (i) to cover with a garment or something like it (with instru. or acc.); cf. सं विव्यानः ओजसा शवोभिः इन्द्र वनिनः वि वृश्चसि I. 130. 4; (ii) to lay a garment or something like it on (with acc.) cf.; cf. सीव्यन् तमासि द्रुविता (रोदसी) सं अव्ययत् II. 17. 4; इन्द्रः वृजनं न भूम (earth) सं विव्ये I. 173. 6; शुष्मम् चर्षणिभ्यः स विव्यधुः VI. 72.5; वितर्तं समव्यत् then means 'laid the extended web (of darkness as a veil or cloak on the world). Who the female weaver is and what she does exactly has been a problem while Sāy. and Old. understand the वयन्ती to be night (मोर्की in 3 *d*) Roth connects it with

अरमति. Sāy. understands वितत to be daylight and the object of समव्यत्. Old. takes वितत (the outstretched web) as obj. to वयन्ती and supplies "the beings" as obj. to समव्यत्; according to Geld. the description of the approach of night is being continued in *ab* and a human weaver and a human artisan are to be understood as the objects of description: पुनः समव्यत् (= rolled up) being true only in the case of a human weaver and being inapplicable to Night. (Cf. Tr. p. 294; but in V. S. II. 188-9 he takes the weaver to be the Night and the धीर to be the Sun; in translating I. 115. 4 also he is still thinking of the Night as the weaver, p 138) But धीरः in *b* occurs everywhere excepting one simile (I. 130. 6; V. 2. 11; 29. 15) as an epithet of the gods and in a parallel passage मध्या कर्तोः वितनम् सं जभार (I. 115. 4) the same words वितनम् and मध्या कर्तोः are used for describing the cessation of the Night's activity at day-break. सवितृ has been described as presiding over day and night (cf. यः इमे उभे अहनी पुरः एति V. 82. 2) and here as in I. 115. 4 we have a contrast between the Night's work and the Sun's work. In I. 115. 4 the Night at the approach of day gathers up her outstretched web of darkness. Here at the approach of Night the Sun restrains his light and the Night once more lays the outstretched web of darkness (वितनम्) on the world. The peculiar meaning of संव्ये has not been rightly understood and hence arose the difficulty. मध्या कर्तोः. मध्या is taken to be adv. from f. instr. by Gr. but Wh. and Macd. take it as m. instr. used as adv. कर्तोः from verb. n. कर्तु=करणम्; cf. मध्या गन्तोः I. 89. 9. शकमन् power cf. दुहन्ति शक्मना पयः IX. 34. 3; Gr. in this passage only understands it as 'work,' which is not necessary. नि अधात्. नि धा to restrain or control; cf. हेडः निधत्त I. 171. 1; कामं नि दधुः V. 32. 12. संहाय उत् अस्थात्. सं हा forms a contrast with उत् स्था the in ै० आ० passage quoted by Sāy. (VII. 15. 4, the following words being उत्तिष्ठन् त्रेता). In III. 51. 4 (सं सहसे पुरुमाय. जिहीते) it forms a contrast with सहसे; सं हा therefore means to be quiet, while उत् स्था would mean to show activity. ऋतून् वि अदधुः. व्यदधुः imperf. from perf. base of) विधृ to keep apart; cf. वि अवनीः अधारयः II.13.7; यज्ञैः

अथर्वा वि धारयत् X. 92. 10. सूर्याचन्द्रमसौ विधृतौ तिष्ठतः, बृह. उ. III. 8. 9. ऋतु signifies any recurring period of time; cf. I. 49. 2. अरमतिः see on this difficult word Geld. V. S II pages 255-57, where he refers to the interpretations of his predecessors. Roth in the great PW. understands it as 'Devotion', 'the Genius of sacrifice', but changed his mind and in the smaller PW. assigned a different meaning to the word, 'not resting'. Gr. gives it everywhere the meaning of 'the genus of prayer'. Geld. in V. S II wants to give only one meaning for all the passages, that of 'timely prayer' but in his Glossar and his Tr. he understands it as an adj. meaning 'punctual' in our passage, while taking it to denote a goddess elsewhere. Roth takes अ० as the subject of *a, c.* In V. S. II, Geld. takes अरमति as the subject of अस्थात् and अदर्धः; but in his Tr. he takes सविता as the subject of *c.* Geld. derives the meaning of 'punctual or timely prayer' and 'punctual' from अरं to which Sāy. gives the meaning of शीघ्र in VII. 68. 2. Actually Sāy. explains अरं by अत्यर्थं and this latter by शीघ्रम्. Geld.'s meaning is vitiated by two flaws: शीघ्र must mean 'punctual' acc. to it and the meaning of मति has disappeared. Max Müller understands अरमति apparently as 'servant' as well as 'service' (S. B. E XXXII 330 note on V. 54. 6), but this meaning is clearly wrong in view of the parallelism between this passage and V. 43. 6. Of the eleven places where the word अरमति occurs in nine it clearly means a certain deity invoked along with द्यौ, वाज, अनर्वण, भग, पुरंधि, &c, described as अग्नेः स्वा, मही, पनीयसी, वसूयुः, whom अग्नि and मरुतः are called upon to bring with them. Briefly, अरंमति and अरं मन(ण)स् (VI. 17. 10)* must be studied together just as अरंमणस् and वृधमणस (I. 167. 7) would have to be studied together; (सिन्धवः) तिरो मही अरमतिं दधन्विरे X. 92. 5, 'the showers of rain flow obscuring great अ०', and (अग्नेः)स्वा VII. 1. 6 also afford a certain clue and I would propose 'fierceness', 'the

* अर means adverse; cf. अरि, अराति &c.

'fierce, red glow of the sky deified', as the meaning of अरमति; thus we can account for अरमति belonging to fire, being obscured by rain and being brought by Agni and the Maruts.

For Savitr coming in the evening cf. कृष्णेन रजसा आ वर्तमानः, प्रतिदोषं अस्थात्, I. 35. 2, 10. The bright red twilight of evening probably led the poet to identify सवितृ with अरमति.

Tr. The female weaver (Night) has laid on (the world) her extended (web of darkness) once more; the wise one (Sun) has restrained his power in the midst of his activity. After lying quiet (during daytime) he (Savitr) has (now) shown activity; he has kept apart the divisions of time (N. and D.); the god Savitr has come as Aramati.

Verse 5

नाना । ओकांसि । दुर्यः । विश्वम् । आयुः । वि । तिष्ठते ।
अऽभवः । शोकः । अग्नेः । ज्येष्ठम् । माता । सूनवे । भागम् ।
आ । अधात् । अनु । अस्य । केतम् । इषितम् । सवित्रा ॥५॥

प्रभवः प्रभूतोऽग्नेः शोकेस्तजो दुर्यो गृहे भवो नानौकांसि यजमानानां पृथग्भूतान्यृहान्वि तिष्ठते अधितिष्ठति। विश्वमायुः सर्वमन्नं चाधितिष्ठति। आयुः सूनृत (नि० २-७) इत्यन्ननामसु पाठात्। मातोषाः सवित्रान्विषितं प्रेषितमस्य केतं प्रज्ञापकमग्नेर्ज्येष्ठं प्रथममग्निहोत्राख्यं भागं सूनवेऽग्नय आधात् आदधाति॥

Geld. treats *a* as an elliptical clause, but is willing also to take *a* and *b* together like Sāy. Acc. to him *a* would be दुर्यः, विश्वं आयुः, नाना ओकांसि (मृगयते), 'whosoever has a house, persons of all ages, seek their several abodes'. दुर्यः (from दुर् door; hence dwelling; cf. दुरोण house) belonging to the house. दुर्य-र्यो means 'house' also, cf. दुर्यं अग्निम् VIII. 74. 1. विश्वम् आयुः all life long; प्रभवः occurs only here; from भू with प्र, used in the same sense as प्रभु, powerful; of प्रभुः त्वष्टा, I. 889; प्रभुं सूर्यम् VII. 82. 3; प्रभु राधः I. 9. 5; acc. to Geld. a hendiadyoin for प्रभवन्. शोकः (शुच् to shine) lustre. वि तिष्ठते rises in various directions; cf. (अग्ने)

यत् विनिष्ठसे VIII. 60. 14. Geld. refers to II. 41. 17 in support of his meaning; but it does not convince. The evening being described here, Sāy.'s interpretation is out of the question; but it is likely, almost certain, that the Mother and Son are the night and fire and the ज्यष्ठ भाग the sacrifice; for otherwise between *a b* and *c d* there would be no connection. अस्य केत अनु सवित्रा इषितम्. केत (from कित्-चित् to see, to show oneself, to wish) desire; cf. मम देवासः अनु केतं आयन् IV. 26 2. इष् to send. सवि० has ordained the sacrifice for which the fire is hungry. Geld. takes it as सवित्रा इषितं अस्य केतं (desire, appetite) अनु; i. e. the appetite is sent by स०.

Tr. The mighty home-born lustre of Agni overspreads each home (to serve) a whole life-time. The mother (Night) places the largest share (the sacrifice) before the Son (fire), it being sent by Savitr in accordance with his desire.

Verse 6

संऽआववर्ति । विऽस्थितः । जिगीषुः । विश्वेषाम् । कामः ।
चरताम् । अमा । अभूत् । शश्वान् । अपः । विऽकृतम् । हित्वी ।
आ । अगात् । अनु । व्रतम् । सवितुः । दैव्यस्य ॥ ६ ॥

[*शश्वाँ

जिगीषुर्विजयेच्छुर्योद्धा विष्टितो युद्धार्थं प्रास्थितः समाववर्ति समावर्तयति । विश्वेषां सर्वेषां चरतां जङ्गमानाममा । अमा दम (नि० ३ ४) इति गृहनामसु पाठात् । गृहं प्रति कामोऽभूत भवति । शश्वान् नित्यं कर्मरतोऽपः कर्म विकृतमर्धकृतं हित्वी हित्वागात् । गृहमागच्छति । एतत्सर्वं दैव्यस्य दिवि भवस्य सवितुः प्रेरकस्य सूर्यस्य व्रतमस्तमयाख्यं कर्मानु । जायत इत्यर्थः ॥

जिगीषु: (desid. n. from जि to win or obtain, irrespective of battle or race; cf. अपः जयेम V. 2. 11; धनानि जयेम X. 42. 10; सोमं अजयः I. 32. 12). वि॑ष्टितः. वि स्था to break loose or go out from; cf. संवरणात् व्यस्थात् VII. 3 2. समाववर्ति = सं + आ + ववर्त् + ति, pre. from perf. base. अमा॑ adv. home, homewards · often in contrast with अरण्ये, अध्वन् etc.; cf. अमा च एनं अरण्ये पाहि VI. 24. 10.

श'श्वान् every one. अपः वि'कृतम्. वि कृ to change, to give a multi-form aspect to; cf. चमसम् चतुर्धा विकरोति IV. 35. 2 : रूपशः विकृतानि I. 164. 15. हित्वी' an older form of the absolutive in त्वा; cf. कृत्वी, I. 161. 3 ; गत्वी IV. 4. 5 also भूत्वी, जनित्वी etc. It is not found in the AV.

Tr. In conformity with the commandment of the divine Savitr the seeker of gain who had gone out returns; all wanderers have their desire turned homewards, leaving his work which has assumed diverse forms, every-one has come (home).

Verse 7

त्वया । हितम् । अप्यम् । अप्ऽसु । भागम् । धन्व । अनु ।
आ । मृगयसः । वि । तस्थुः ॥ वनानि । विऽभ्यः । नकिः ।
अस्य । तानि । व्रता । देवस्य । सवितुः । मिनन्ति ॥ ७ ॥

हे सावितस्त्वया अप्स्वन्तरिक्षे । आपः पृथिवी (नि० १-३) इत्यन्तरिक्षनामसु पाठात । जलाधारे वा । हितं निहितमप्यमप्सु संबन्धिनं भागं धन्वानु निर्जलप्रदेशेष्वपेक्ष्य *यथा मृगयसो मृगयमाणा मृगा आ समन्ताद्धि तस्थु अधितिष्ठन्ति । किंच वनानि वृक्षा विभ्यः पक्षिभ्य आवासादिरूपेण त्वया भागो दत्तः । अस्य देवस्य सवितुस्तानि तादृशानि व्रता व्रतानि कर्माणि नकिर्मिनन्ति । केऽपि न हिंसन्ति ॥

त्व'या अप्सु हित म् भाग म् अप्य म् (वि तस्थौ) The verb is to be supplied from *b* with which *a* is connected by आ=च. अप्यम् the aquatic creation. मृगय'स· ध'न्व अ नु वि त'स्थु·. मृगयस् is a doublet of मृगय (derived from मृगयते to hunt) wild animals that are hunted; cf. जन and जनस् from जायते, भर and भरस् from भृ, राध-राधस् from राध्; Geld. took it to mean a hunter in his Glossar, thinking that it could not mean the hunted; but changed his mind subsequently. वि स्था to spread over; cf. उषा वि तिष्ठते I 92 5: अग्नि· उर्वीम् वि अस्थात् II. 4. 7. धन्वन् firm land or a plain as opposed to water; cf न धन्व न अन्तरिक्षम् X. 89 6; य तिरः धन्व अतिरोचते. व नानि वि'भ्य· (हितानि). न किः none, cf नकिः अन्य· त्वावान् I. 52. 13.

---

* आदर्शे यथा इति नास्ति ।

Tr. Over the portion assigned by thee to it in the waters, the aquatic creation (has spread) and the wild animals have spread on the plains; the woods, (have been assigned) to the birds. None violate these commandments of the divine Savitr.

Verse 8

यात्ऽराध्यम् । वरुणः । योनिम् । अप्यम् । अनिऽशितम् ।
निऽमिषि । जर्भुराणः ॥ विश्वः मार्ताण्डः । व्रजम् । आ । पशुः ।
गात् । स्थऽशः । जन्मानि । सविता । वि । आ । अकरिः-
त्यकः ॥ ८ ॥ * ध्य

वरुणो याद्र ध्यं यातां गच्छतां राध्यं राधनीयमप्यमाप्तुं योग्यमनिशितमतीक्ष्णम् । सुखकरमिति यावत् । योनिं स्थानं निमिषि निमिषे सवितुरस्तमये सति विश्रामार्थं प्राणभ्यः प्रयच्छति । वरुणस्य रात्रेर्निर्वाहकत्वात् । जर्भुराणो भृशं गच्छन् विश्व सर्वो मार्ताण्डो मृताद्धिन्नादण्डादुत्पद्यमानः पक्ष्या गात् आगच्छति । विश्वः पशुरपि व्रज गोष्ठमागात् । सविता प्रेरक स्थशः स्थाने स्थाने जन्मानि जातानि भूतानि व्याकः पृथगकार्षीत् ॥

For the many alterations proposed by Ludwig, Roth, Weber of the text of this difficult rc, see Old, Noten, p. 220. Naturally no change is admissible. The whole rc illustrates the statement निवेशयन् अमृतं मर्त्यं च; *ab* takes the specific instance of Varuna याद्राध्यम् अप्यम् योनिम् वरुणः (गात्). अप्य watery. योनि place, residence; cf घृतम् अस्य योनि II 3. 11; असुरस्य योनौ X. 31. 6 यात् + राध्यम् (यात् in so far as, or as long as: identical with later यावत्; cf यात् अधमिसि I. 80. 15; राध्य from राध् to bring about, to attain adv in so far as it is attainable or (from राधस् blessing or favour) is allowed अनिशितम् adv. restlessly, by Varuna, knowing no night, from निशिता night or rest; the latter word occurs only in T S II. 2 2. 2. निमिषि जर्भुराण. निमिष् closing of the eye. अभुराण from भुर् to hurry; cf. यस्य व्रते शफवत् जर्भुरीति V. 83. 5: अग्नि. तन्वा जर्भुराण. II. 10. 5; Mitra and Varuna watch the world

आनिमिषा with their eye of the Sun (II. 27. 9 ; VII. 60. 7 ; I. 1.5. 1); it is possible for him now to close his eyes, but still there is no escape from restless work for him. विश्व॰ मार्ताण्ड॰: (योनिं गात्). मार्ताण्ड (मृत + अण्ड) a bird (born of a dead i e. broken egg). The word occurs again in the cosmic hymn X. 72. Old. suggests 'a mammal' as the meaning because it is born of an egg which is not a living thing but a dead one. This is against tradition and not very helpful. आ॰ prob. means च here. ज॰न्मानि things born. स्थश॰: वि. आ॰ अक॰. स्थश॰ in the appropriate place (स्थ). व्या कृ to divide, to separate ; it occurs only here in the RV ; in later literature it is a common word.

Geld. connected *b* with *c* once, but after Old.'s Noten were published he changed his mind, as elsewhere.

Tr. Varuna has gone to his watery residence, this much having been vouchsafed to him (by Savitr), restlessly agitating while his eyes are closed (for a nap) ; all birds (have gone to their nests), and all animals have gone to their stalls. Savitr has lodged the beings separately, each in its place.

Verse 9

न । यस्य । इन्द्रः । वरुणः । न । मित्रः । व्रतम् । अर्यमा ।
न । मिनन्ति । रुद्रः ॥ न । अरातयः । तम् । इदम् । स्वस्ति ।
हुवे । देवम् । सवितारम् । नमोऽभिः ॥ ९ ॥

यस्य सवितुर्देवस्य व्रतं प्रसवाख्यं कर्मेन्द्रो न मिनाति न हिनस्ति । वरुणश्च न मिनाति मित्रश्चार्यमा च न मिनाति रुद्रश्च न मिनाति । अरातयोऽसुराश्च न मिनन्ति । मिनातीति श्रुतमाख्यातं यथायोगं विपरिणामेन प्रत्येकमभिसंबध्यते । तं सवितारं सर्वस्य प्रेरकं देवं द्योतमानमिदमिदानीं नमोभिरन्नरूपैर्हविर्भिः सह । नम आयुः (नि० २-८) इत्यन्ननामसु पाठात् । स्वस्ति क्षेमाय । हुवे स्तौमि ॥

इद॰म् स्वस्ति॰ हुवे॰ हु-ह्वे to cry out loudly to, to speak out loudly, to invoke ; cf. याम् सुष्टुतिम् हुवे I. 17. 9. ऋभुम् रायिम् हवामहे IV. 37. 5.

स्वण्युम् आ हुवाध्यै I. 122. 5. स्वस्ति (सु + अस्ति) n. acc. welfare; or स्वस्ति might be treated as an adv. giving the sense of different cases; cf. स्वस्तये वायुम् उप ब्रवामहै सोमम् स्वस्ति (स्वस्तये) V. 51. 12; सं सूरिभिः हरिव. सं स्वस्ति (स्वस्तिभि.) नेषि V. 42. 4. इदम् adv. now, here.

Tr. Here I invoke the god Savitr for welfare with salutations, that god whose commandments are violated by neither Indra nor Varuna nor Aryaman nor Rudra nor the enemies.

Verse 10

भगम् । धियम् । वाजयन्तः । पुरन्धिम् । नराशंसः । ग्नाःपतिः ।
नः । अव्याः ॥ आऽअये । वामस्य । संऽगथे । रयीणाम् ।
प्रियाः । देवस्य । सवितुः । स्याम ॥ १० ॥

भगं भजनीयं धियं ध्यातव्यं पुरंधिं पुरस्य धारयितारं बहुप्रज्ञं वा सवितारम् पुरंधिर्बहुधिः (नि० ४-३) इति यास्कः। वाजयन्तः वाजिनं बलिनं * कुर्वन्तः ॥ विभक्तिव्यत्ययः। नः स्तुवतोऽस्मान् नराशंसो नरैः शंसनीयो † ग्नाःपतिर्देवपत्नीनां पतिश्छन्दसां पतिर्वा। तथा च श्रूयते। छन्दांसि वै ग्ना इति उत ग्ना व्यन्तु देवपत्नी (ऋ० ५-४६-८) इति च। सवितान्याः अव्यात्। किंच वामस्य धनस्य रयीणां पशूनां च। तथा च श्रूयते। पशवो वै रयिरिति। आय आगमने संगथे संगमने च निमिते। देवस्य द्योतमानस्य सवितु. प्रेरकस्य वयं प्रियाः स्याम भवेम ॥

भगम् धियम् वाजयन्त पुरन्धिम्. भग, धी and पुरन्धि are deities; as to धी cf. विश्वे देवास शृणवन् वचांसि ये। सरस्वती सह धीभि. पुरन्ध्या X. 65. 13. She is the goddess of prayer and usually mentioned in the pl.; cf. VII. 35. 11; VIII. 35 2; 101. 16 etc. भग is one of the Ādityas and stands for wealth or luck, while पुरन्धि stands for दक्षिणा, according to Geld. वाजयन्तः is adj. to वयम् understood, *b* being parenthetical. वाजय to put fire into, to stir to activity; cf. इमाः ओषधीः वाजयन् X. 97. 11. धनानाम् सातये त्वा वाजयामः. I. 4. 9. नराशंस represents the sacred speech and is identified with Agni. ग्नाः पतिः the ग्नाः are goddesses and are frequently mentioned

* आदर्शे कुर्वत इति पाठः। † आदर्शे ग्नास्पति. इति पाठः।

with त्वष्टृ, but one cannot say if नराशंस is the नास्पति. Observe the peculiar compound in which the first member retains its plural form. The Brāhmānas indentify the नाः with the metres but that is only the metaphorical manner of the Brāhmanas. They form a Gana of goddesses.

Tr. Stirring Bhaga, Dhī, and Pūsan to action,—may Narāśamsa, (and) the Lord of the Gnās protect us,—may we be dear unto Savitr that we might acquire precious things and store wealth.

Verse 11

अस्मभ्यम् । तत् । दिवः । अत्ऽभ्यः । पृथिव्याः । त्वया ।
दत्तम् । काम्यम् । राधः । आ । गात् ॥ शम् । यत् । स्तोतृऽभ्यः । आपये । भवाति । उरुऽशंसाय । सवितः । जरित्रे ॥११॥

हे सवितः अस्मभ्यं त्वया दत्तं तत् प्रसिद्धं काम्य कमनीय राधो धनं दिवो द्युलोकात् अद्भ्योऽन्तरिक्षलोकात् पृथिव्या भूमेश्च गात आगच्छतु । किंच स्तोतृभ्यः स्तोतृणामापये बन्धवे तद्वंशजाय यद्धन शं सुखकरं भवाति भवेत् उरुशसाय बहुस्तुतये जरित्रे स्तोत्रे मह्यम् । जरिता कामः (नि० ३-१७) इति स्तोतृनामसु पाठात् । हे सावितः तत्प्रयच्छ ॥

काम्यम् रा'धः (from काम desire) desirable, lovely ; cf काम्यम् वसु II. 22 3. For आपि see II. 28. 11. भवाति subj The जरितृ is the poet himself.

Tr. May such desirable gifts, given by thee, Savitr, come to us from heaven, from the waters and from the earth as would bring luck to the chanting priests, to the patron and to the singer, eloquent in praise.

No. 10

MANDALA III SŪKTA 9

सखायस्त्वेति नवर्चं नवमं सूक्तं वैश्वामित्रम्। अत्रेयमनुक्रमणिका। सखायो नव बार्हतं त्रिष्टुवन्तामिति। अन्त्या त्रिष्टुप्। शिष्टा अष्टौ बृहत्यः। प्रातरनुवाकाश्विनशस्त्रयोर्बार्हते छन्दस्यस्य सूक्तस्य विनियोगः। अथैतस्या इति खण्डे सूत्रितम्। सखायस्त्वायमग्निरग्र आ याहि (आ० ४-१३) इति॥

Verse 1

सखायः। त्वा। ववृमहे। देवम्। मर्तासः। ऊतये॥ अपाम्।
नपातम्। सुऽभगम्। सुऽदीदितिम्। सुऽप्रतूर्तिम्। अनेहसम्॥१॥

विश्वामित्र स्तौति। हे अग्ने सखायः। सोमाज्याद्यविष्प्रदानेनोपकारकत्वान्मित्राणि। मर्तासो मनुष्या ऋत्विजो वयमवां नपातमवां नप्तारं सुभग शोभनधनयुक्तं सुदीधितिं शोभनदीप्तिं सुप्रतूर्तिं शोभनप्रतरणं कर्मानुष्ठातृभिः सुखेन गन्तव्यमनेहसमुपद्रवरहितमेतादृशं देव त्वामूतये रक्षणाय ववृमहे वृणीमहे। सखायः। ख्या प्रकथने। समाने ख्यश्चोदात्त इति समान उपपदे डिदित्यनुवृत्तौ ख्यातेरिण्। तस्य डित्त्वाट्टिलोपः। तत्संनियोगेन यलोपः। समानस्य छन्दस्यमूर्ध्नेति सभावः। उपपदस्योदात्तत्वम्। णिदित्यनुवृत्तौ सख्युरसंबुद्धौ (पा० ७-१-९२) इति णिद्भावः। वृद्ध्यायादेशौ। आद्युदात्तः। ववृमहे। वृङ् सम्भक्तौ। छन्दसि लुङ्लङ्लिट इति वर्तमाने लिट्। क्रादित्वादिडभावः। निघातः। ऊतये। अव रक्षण इत्यस्य उदात्त इत्यनुवृत्तावूतियूतीत्यादिना क्तिन्नन्तत्वेन निपातनादन्तोदात्तः। अपाम्। ऊडिदमिति विभक्तेरुदात्तत्वम्। सुभगम्। आद्युदात्त द्व्यच्छन्दसीत्युत्तरपदाद्युदात्तत्वम्। सुप्रतूर्तिम्। क्त्वादयश्चेत्युत्तरपदाद्युदात्तत्वम्॥

सखाय. The Vedic singers style themselves as friends of the gods; cf. I 30. 7; also देवम् त्वा मर्त्य सख्याय हुवे I. 139. 2; देवानाम् सख्यम् उप सेदिम वयम् I. 89. 2. अपाम् नपातम् "child of the waters" an epithet of Agni. अपां नपात् has been also invoked as an independent deity in II. 35. नपात् (strong form of नप्तृ; occurring only in the nom., acc and voc; नप्तृ in instr., da., gen.) son; cf. विष्णोः नपात्, ऊर्जो नपात्, शवसो नपात् etc.; सुभगम् Gr lucky, lovely; Old. blessed; Geld. gentle; from भग (i) luck, god's blessing (ii) the good luck of being beloved. सुदीदितिम् (from दी-

दीदि to shine). सुप्रणूर्तिम्. प्र+तॄ prosper, to advance; cf. उनिष्ठत प्रनर्त सखायः X. 53. 8). अनह'सम् (from एहस्, a synonym of क्रोध, निघ० २-१३) above anger or threat of another; but Sāy.'s "unscathed" appears to be better; cf. अनेहः छर्दिः VIII. 18. 21; अनेहसम् मन्त्रम् I. 40. 6; अनहसा पथा I 129. 9.

Tr. We, thy mortal friends, choose thee, a god, the child of the waters, beautiful, lustrous, ever advancing, unscathed, to be our protector.

Verse 2

कायमानः । वना । त्वम् । यत् । मातॄः । अजगन् । अपः ॥
न । तत् । ते । अग्ने । प्रऽमृषे । निऽवर्तनम् । यत् । दूरे ।
सन् । इह । अभवः ॥ २ ॥

हे अग्ने वना काननानि *रक्षितुं कायमानः कामयमानस्त्वं यद्यस्मात्कारणात्तानि विहाय मातृरपो मातृभूता अपोऽजगन् अगमः। गतवानसि। अप्सु प्रविष्टत्वाच्छान्तो वर्तसे। तत्तस्मात्ते तव निवर्तनम्। नितरां तत्रैव वर्तनम्। तेन च विनाशो लक्ष्यते। स विनाशो न प्रमृषे मह्यते। कुत इत्यत आह। यद्यस्मात्कारणाद्दूरे सन् अदृश्यतया वर्तमानस्त्वमिहास्मत्संबन्धिष्वरणिरूपेषु काष्ठेष्वभवः। मन्थनात् क्षणमात्रेणास्माकं समीपे भवसि। तस्मात्तव दूरतो वर्तनमस्मभ्यं न रोचते। अस्मिन्नर्थे यास्कः। कायमानश्चायमानः कामयमान (नि० ४-१) इति वा। वनानि त्वं यन्मातॄरपोऽगम उपशम्यन्। न तत्ते अग्ने प्रमृष्यते निवर्तनं दूरे यत्सन्निह भवसि जायमानः (नि० ४-१४) इति। कायमानः। कमु कान्तौ। कमेर्णिङ्। लटः शानच्। मकारलोपश्छान्दसः। अजगन्। गम्लृ गतावित्यस्य लङि बहुलं छन्दसीति शपः श्लु। हल्ङ्यादिना सिलोपः। मो नो धातोरिति नकारः। यच्छब्दयोगादनिघातः। अढागमस्वरः। प्रमृषे। मृष तितिक्षायाम्। व्यत्ययेन कर्मणि तप्रत्ययः। लोपस्त आत्मनेपदेष्विति तलोपः। धातुस्वरः। अभवः। छन्दसि लुङ्लुङ्लिट इति लडर्थे लङ्। यद्योगादनिघातः॥

There is a reference in this ṛc to the flight of fire to the waters and his being brought back after promises of sacrifice

* आदर्शे रक्षितुं इति नास्ति।

by the gods; cf. X 51. 9. कांयमानः (from कै–का–कन् to long for, to rejoice in). वना acc. pl. of वन tree, standing here for fuel; cf. यत् वातजूत. वना वि अस्थात् I. 65. 8. अजगन् imperf. 2. s. from perfect base of गम्. निवर्तनम् न प्रमृषे. निवर्तनम् return to this world after his disappearance. न प्रमृषे inf from प्र + मृष् to forget or to slight; cf. मा नः सख्या पित्र्याणि प्र मर्षिष्ठाः I. 71. 10. For the peculiar use of the infinitive (which has survived in classical Sanskrit also in expressions like कार्यं यशसेऽर्थकृते व्यवहारयुजे, etc.) see Macd. V. G. S. 211 &c.; its later equivalent is the poten. pass. participle; cf. मा वाम् राति. स्तुषे (I. 122. 7) = स्तोतव्या; सावितु. तत् न प्रमिये (III. 54. 4) = is indestructible.

Geld. thinks that here is a reference to Agni's delay to appear in the course of attrition, which is combined with that to the myth of Agni's flight. He translates *cd*: Thou must not forget to return, (and that) though now far away, thou wert once here. This is not very satisfactory, though ingenious. Prob. *d* means: To us it makes the greatest difference when thou art away and when thou art here.

Tr. Thy coming back, oh Agni, when thou hadst gone to thy mothers, the waters, in thy yearning for wood, is not a thing to be forgotten; for thou wert far away and art (now) here.

Verse 3

अतिं । तृष्टम् । ववक्षिथ । अर्थ । एव । सुऽमनाः । असि ॥
अऽग्रे । अन्ये । यन्ति । परि । अन्ये । आयते । येषाम् । सख्ये ।
असि । श्रितः ॥ ३ ॥

हे अग्ने तृष्टं स्तोतुस्तृष्णाभिलाषं तदुचितफलप्रदानेन सफलं कर्तुमति ववक्षिथ अतिशयेन वोढुमिच्छसि । अथैव अथापि त्वं सुमना असि संतुष्टमनस्को वर्तसे । किंच । त्व येषां षोडशानामृत्विजां सख्ये मैत्रे श्रितोऽसि वर्तसे तेषां मध्येऽन्येऽध्वर्यु-प्रभृतयो द्वादशर्त्विजः प्रयान्ति । प्रकर्षेण होतुं गच्छन्ति । अन्ये उद्गातृप्रभृत-

यश्चत्वारः । पर्यासते परित आसीना वर्तन्ते । ववक्षिथ । वह प्रापण इत्यस्य सनि रूपम् । अभ्यासस्य सन्यत इतीत्वाभावश्छान्दस । तदन्ताद्वर्तमाने लिट् । थल आर्द्धधातुकस्येड्वलादेरितीट् । कास्प्रत्ययादामिन्याम् न भवति मन्त्रत्वात । निघातः । प्रप्र । प्रसमुपोद इति द्विर्वचनम् । यन्ति । इण् गतावित्यस्य लटि रूपम् । एकान्याभ्यां समर्थाभ्यामित्यन्यशब्दयोगात्पूर्वस्य निघाताभावः । आसते । आस उपवेशने उत्तरत्वान्निघातः । असि । अस् भुवि । तासस्त्योर्लोप इति सकारलोपः । यद्वृत्तयोगान्न निहन्यते ॥

तृट्म् अति ववक्षिथ. तृट् (from तृप्) pungent; cf. तृष्टम् एतद् कटुकम् एतद् X. 85. 34 : here it probably stands for smoke Geld., relying on शत० ब्रा० II. 3. 2. 9 and RV. I. 140. 5; II. 2 9, thinks that the first appearance of smoke when fire is kindled was regarded as the work of the evil spirit तृट्. अतिवक्ष् to grow beyond, to be too strong for; cf अति विश्वम् ववक्षिथ (of Indra) I. 81 5. सुमनाः benign. प्र प्र यन्ति. The reduplication of प्र ought to show frequency of movement; but Pānini appears to think (VIII. 1. 6) that the reduplication of प्र, सम्, उप and उद् serves no other purpose than पादपूरण ; cf. however उपोप मे परामृश I. 126 7 ; किन्न उत्-उत् उ हर्षसे दातवै उ IV. 21. 9, where there is an obvious emphasis gained by the repetition. प्रप्रया shows warlike or business activity.

Tr. Thou hast become too strong for the pungent (smoke) and yet thou art benign; of those in whose friendship thou abidest some go on and on: others sit round (thee).

Verse 4

ईयिवांसम् । अतिं । स्रिधः । शश्वतीः । अतिं । सश्चतः ॥ अनु ।
ईम् । अविन्दन् । निऽचिरासः । अद्रुहः । अप्ऽसु । सिंहंऽइव ।
श्रितम् ॥ ४ ॥

हे अग्ने अद्रुहोऽद्रोग्धारो निचिरासो नितरां चिरासश्चिरंतना विश्वेदेवाः स्रिधः शोषकाञ्छत्रून्बलेनातिक्रम्येयिवांसं गच्छन्तं शश्वतीर्बह्वीः सश्वतः संगतिकारिणीः सेनाश्चात्यतिक्रम्य गच्छन्त अप्सु श्रित तिरोहितमत एव सिंहमिव गुहाप्रविष्टं

सिंहमिव भीमम् ईं एनं त्वामन्वविन्दन् अनुगम्यालभन्त। ईयिवांसम्। इण् गतावित्यस्य क्वसावुपेयिवाननाश्वाननूचानश्च (पा० ३-२-१०९) इति निपातितः। प्रत्ययस्वरः स्त्रिधः। स्त्रिधे क्षयार्थस्य शोषणार्थस्य वा क्विप् चेति क्विप्। धातुस्वरः। सश्चतः। षस्ज गतौ। जकारस्य व्यत्ययेन चकारः। लटः शत्रादेशः प्रत्ययस्वरः। अविन्दन्। विदॢ लाभ इत्यस्य लङि रूपम्। निचिरासः। नितरां चिराः। आज्जसेरसुगित्यसुक्। समासस्वरः। अद्रुहः। द्रुह जिघांसायाम्। संपदादित्वाद्भावे क्विप्। बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम्। श्रितम्। श्रिञ् सेवायामित्यस्य श्रयुकः क्तितीतीट्प्रतिषेधः। प्रत्ययस्वरः॥

The theme of Agni's flight into waters is continued here from rc 2. स्त्रिध् obstruction, hence obstructors; cf. I. 48. 8. शश्वत् each, all, many. सश्चत् (from सश्च् perf. base of सच्, to follow with inimical intent) an enemy; Old. Geld. take it to be a feminine word meaning hindrance or difficulty, but सश्चत् is a regular present participle and शश्वतीः is adj. to स्त्रिधः. निचिरासः watchful (from चि with नि); cf. निचेतारा I. 184. 2: occurs only thrice and as an epithet of gods

Tr. The observant and non-violent (gods) found him abiding in waters like a lion, gone past all obstacles, past enemies.

Verse 5

ससवांसंऽइव । त्मना । अग्निम् । इत्था । तिरःऽहितम् ॥ आ ।
एनम् । नयत् । मातरिश्वा । पराऽवतः । देवेभ्यः । मथितम् ।
परि ॥ ५ ॥

मातरिश्वा वायुरित्थत्थं त्मना स्वेच्छयाप्सु प्रवेशेन तिरोहितं निलीनं परिपरितो मथित मन्थनेन निष्पादितमेनमग्निं देवेभ्यः। तादर्थ्ये चतुर्थी। देवार्थं परावतो दूरदेशादानयत् आनीतवान्। तत्र दृष्टान्तः। ससृवांसमिव। यथा स्वाच्छन्द्येन ससृवांसं सरन्त गच्छन्त पुत्रं पिता बलादानयति तद्वत्। ससृवांसमिव। सृगतावित्यस्माल्लिट्। तस्य कुः। इवेन विभक्त्यलोप इत्युक्तत्वात्प्रत्ययस्वरः। त्मना। आत्मनशब्दस्य मन्त्रेष्वाङ्यादेरात्मन इत्याकारलोपः। इत्था। था हेतौ च च्छन्दसीति व्यत्ययेन थाप्रत्ययः। प्रत्ययस्वरः। एनम्। अन्वादेशे द्वितीयाटौस्वेनः

[[पा० २-४-३४] इत्येनादेशः। अनुदात्तश्च। नयत। णीञ् प्रापण इत्यस्य लङि रूपम्। अडभावश्छान्दसः। मातरिश्वा मातर्यन्तरिक्षे श्वसितीति श्वन्नुक्षन्नित्यादिना निपातितः॥

The myth of Agni's disappearance and discovery is continued. त्म'ना = आत्मना; इत्था = इत्थम्; पराव'त् f. distant country cf. I. 48. 7. देवेभ्यः प'रि away from the gods.

Tr. When Agni had run away at his sweet will and lay thus concealed, Mātariśvan churned him away from the gods and bought him from far-off lands.

Verse 6

तम् । त्वा । मर्ताः । अगृभ्णत । देवेभ्यः । हव्यऽवाहन ॥
विश्वान् । यत् । यज्ञान् । अभिऽपासि । मानुष । तव । क्रत्वा ।
यविष्ठ्य ॥ ६ ॥ * झाँ

हे हव्यवाहन हव्यानां वोढर्हे अग्ने मर्ता मनुष्या अध्वर्युप्रभृतयस्तं तादृशमप्सु तिरोहितं त्वा त्वां देवेभ्यो यष्टव्यदेवतार्थमगृभ्णत अगृह्णत। मानुष मनुष्याणां हितकारिन्यविष्ठ्य युवतम हे अग्ने तव क्रत्वा *कर्मणा माहात्म्येन विश्वान्सर्वान्स्माभि: क्रियमाणान् यज्ञान् यद् यस्मात्कारणादभिपासि सर्वतः पालयसि। तस्मात्त्वा†मगृ:ह्णतेति पूर्वत्रान्वयः। अगृभ्णत। ग्रह उपादाने। क्र्यादिर्वाच्छा। ग्रांह्-ज्यावयीति संप्रसारणम्। हृग्रहोर्भश्छन्दसीति हकारस्य भकारः। तिङ्डतङ इति निघातः। हव्यवाहन। वह प्रापण इति धातोर्ण्युडित्यनुवृत्तौ [३-२-६४-६५] हव्येऽनन्तपादमिति [६६] ञ्युट्। उपधावृद्धिः। योरनादेशः। अपादादित्वादाष्टमिक-मनुदात्तत्वम्। विश्वान्। विश प्रवेशन इत्यस्मादशिप्रुषिलटिरणिकणिखटिविशिभ्यः क्वन्निति (उ० १-१४९) क्वन्। कित्त्वादुणाभावः। नित्त्वादाद्युदात्तत्वम्। अभि-पासि। पा रक्षणे अस्य धातो रक्षणार्थत्वान्न पिब देशः। यच्छब्दयोगान्न निघातः धातुस्वरः। क्रत्वा। टा। जस.दयश्छन्दसि विकल्प्यन्त इत्यत्र नादेशाभावः। यणा-देशः। प्रत्ययस्वरः। यविष्ठ्य। युवशब्दादतिशायने तमबिष्ठनाधितीष्ठन्। स्थूलदूर-युवेति यणादिपरं लुप्यते पूर्वस्य च गुणः। वस्वादित्वात्स्वार्थिको यप्रत्ययः॥

---

* तव कर्मणा इत्यादर्शः। † मगृभ्णत इत्यादर्शः।

मानुष good to मनुष् (man) ; cf. मनुषः न योषाः I. 167. 3 ; सीदन्तु मनुषः यथा I. 26. 4 ; मानुष इन्द्र I. 84. 20.

Tr. This being the case, O carrier of oblations to the gods, mortals took thee up, as thou protectest all sacrifices by the power of thy will, O youngest god, benign to man.

Verese 7

तत् । भद्रम् । तव । दंसना । पाकाय । चित् । छदयति ॥
त्वाम् । यत् । अग्ने । पशवः । संऽआसते । संऽइद्धम् । अपिऽशर्वरे ॥ ७ ॥

हे अग्ने तव संबन्धि तदिदं भद्रं शोभनं दंसना अग्निहोत्रादिकं कर्म पाकाय चित् । चिच्छब्दोऽप्यर्थे । पाकायेति । कर्मणि चतुर्थी । पाकोऽर्भकः । तद्वदज्ञमपि यजमानं छदयति स्वफलप्रदानेन पूजयति । पशुपुत्रादिभिः परिवृत करोतीत्यर्थः ; छदयतिशब्दोऽर्चतिकर्मा । छन्दयति छदयति (नि० ३-१४) इति तन्नामसु पाठात् । यद्वा । पाकशब्दः प्रशस्यं वक्ति । पाको वाम (नि० ३-८) इति प्रशस्यनामसु पठितत्वात् । तद्भद्रं प्रशस्यं यजमानमभिमतफलप्रदानेन पूजयतीत्यर्थः । यस्मात्कारणादपिशर्वरे शर्वरीमुखेऽग्निविहरणकाल एव *यत यं समिद्ध दीप्यमानं त्वां पशवो द्विपदाश्चतुष्पदाश्चोभये पशवः समासते । सम्यगासते । पर्युपासत इत्यर्थः। तदिदं पश्वादिलक्षण फल यजमानाय प्रयच्छतीत्यर्थः । भद्रम् । भदि कल्याण इत्यस्माद्धातोरुपरि रक्प्रत्ययेन निपातनादन्तोदात्तत्वम् । पाकाय । पा रक्षण इत्यस्मादिण्भीकापाशल्येत्यादिना कन् । पायते रक्ष्यते राजादिनेति पाकः । निरवादायुदात्तः । छदयति । छद अपवारणे । स्वार्थे णिच् अदन्तत्वाद्वृद्ध्यभावः । निघातः । समासते । आस उपवेशने । अदादित्वाच्छपो लुक् । अनुदात्तान्तत्वाज्झस्यादादेशः । योगाद्निघातः । तिङि चोदात्तवतीति गतेर्निघातः । धातुस्वरः ॥

भद्रम् (from भन्द् to shine ? to bring good luck ?) blessing. दंसना a wonderful feat पाकाय चित छदयति पाक simple, childish, ignorant . cf. पाकेन मनसा VII. 104. 8. छद् (i) to appear ; cf. कृष्टयः मे अक्षिपत् अच्छान्त्सु X. 119 6. अपिशर्वर appears also in VIII 1. 29, प्रापित्वे अपिशर्वरे ; where प्रापित्व means late afternoon and अपिशर्वर, bordering on night · see V. S. II. 178.

* आदर्शे यत् य इति नास्ति ।

Tr. That blessing of thine is a wonder and is evident even to the simple mind, (viz.) that at the approach of night as thou art kindled, beasts lie down around thee.

Verse 8

आ । जुहोत । सुऽअध्वरम् । शीरम् । पावकऽशोचिषम् ॥
आशुम् । दूतम् । अजिरम् । प्रत्नम् । ईड्यम् । श्रुष्टी । देवम् ।
सपर्यत ॥ ८ ॥

ऋत्विजो यजमानः प्रेरयति । हे ऋत्विजः पावकशोचिषं शोधकदीप्तिं शीरं काष्ठेष्वोषधीषु चानुशायिनं स्वध्वरं शोभनयज्ञोपेतमिममग्निमाजुहोत आहुतिभिरासमन्तात्तर्पयत । अपि च । आशुं कर्मणि व्याप्तं दूतमाह्वानकारित्वेन देवानां दूतमजिरं क्षिप्रं गन्तारं प्रत्नं पुरातनमीड्यं स्तोतव्यं देवं द्योतमानमिममग्निं श्रुष्टी सपर्यत श्रुष्टीति क्षिप्रनाम (नि० ४-२) इति यास्कः । क्षिप्रं पूजयत । जुहोत । हु दानादनयोः । अस्माद्धातोर्लोट । जुहोत्यादिभ्यः श्लुरिति शपः श्लुः । श्लाविति द्विर्वचनम् । लोटो लङ्वदिति लङ्वद्भावे तस्थस्थमिपामिति थस्य तादेशः । छन्दसीत्युत्तौ तस्य तप्तनप्तनथनाश्चेति तबादेशः । पित्त्वाद्गुणः । निघातः । स्वध्वरम् । बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । शीरम् । शीङ् स्वप्ने । अस्माद्धातोः स्फायितञ्चिवञ्चीत्यादिना रक्प्रत्ययः । कित्त्वाद्गुणाभावः । प्रत्ययस्वरः । पावकशोचिषमित्यत्र पवनं पावः शुद्धिः । तं करोतीति पावकः । आतोऽनुपसर्गे कः । प्रत्ययस्वरः । बहुव्रीहौ प्रकृत्या पूर्वपदमिति पूर्वपदप्रकृतिस्वरत्वम् । आशुम् । अशू व्याप्तौ । अस्माद्धातोः कृवापाजिमीत्यादिना उण् । उपधावृद्धिः । प्रत्ययस्वरः । आजिरम् । अज गतिक्षेपणयोरित्यस्माद्धातोरजिरशिशिरशिथिलेति किरच् । प्रत्ययान्तत्वेन निपातनादन्तोदात्तत्वम् । प्रत्नम् प्रगस्य छन्दसि गलोपश्च (पा० ४-३-२३-२) इति गलोपः । चकारात् त्नप्रत्ययः । प्रत्ययस्वरः । ईड्यम् । ईड स्तुता । अस्माण्णयत् । ईड वन्देत्यादिनाद्युदात्तत्वम् । सपर्यत । सपरशब्दात्कण्ड्वादिभ्यो यक् पूजायां वर्तते । लोण्मध्यमपुरुषबहुवचनम् । शप् । अतो गुण इति पूर्वरूपत्वम् । निघातः ॥

शीरम् (from श्री to cook), glowing, burning; the expression शीरम् पावकशोचिषम् occurs in VIII. 43. 31; 102. 11; X 21. 1. आजिरं (from अज् to drive) impetuous. प्रत्नम् (त्न = तन्) ancient श्रुष्टी obediently, willingly.

Tr. Offer a sacrifice to the god who sacrifices well, who glows and whose lustre purifies. Worship willingly the god, the quick, impetuous, ancient, adorable messenger.

Verse 9

त्रीणि । शता । त्री । सहस्राणि । अग्निम् । त्रिंशत् । च । देवाः ।
नव । च । असपर्यन् ॥ औक्षन् । घृतैः । अस्तृणन् । बर्हिः ।
अस्मै । आत् । इत् । होतारम् । नि । असादयन्त ॥ ९ ॥

*त्रीणि शता त्रीणि शतानि त्री सहस्राणि त्रीणि सहस्राणि त्रिंशच्च नव चैकोनचत्वारिंशदधिकशतत्रयोपेतत्रिसहस्रसंख्याका देवा इममग्निमसपर्यन अपूजयन् । किंच ते देवा घृतैरिममग्निमौक्षन् असिञ्चन् । तथास्मा अग्नये तदर्थं बर्हिरस्तृणन् बर्हिषास्तरणं वेद्याच्छादनमकुर्वन् । आदिदनन्तरमेव ते देवास्तस्मिन्बर्हिष्येनमग्निं होतारं कृत्वा न्यसादयन्त उपावेशयन् । देवैः पूज्यमिममग्निं सपर्यतेति पूर्वेणान्वयः । देवसंख्या च बृहदारण्यकेऽभिहिता । महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव देवा इति । कतमे ते त्रयस्त्रिंशदष्टौ वसव एकादश रुद्रा द्वादशादित्यास्त एकत्रिंशदिन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिंशौ (बृ० आ० ३-९) इति । शता । दशानां दशतां शभावस्तश्च प्रत्ययः । दश दशतः परिमाणमेषां शतानि । सुपां सुलुगित्यादिना सुपो डादेशः । प्रत्ययस्वरः । त्री । सुपां सुलुगिति पूर्वसवर्णदीर्घः । फिट्स्वरः । सहस्राणि । कर्दमादित्वान्मध्योदात्तः । त्रिंशत् । त्रयाणां दशतां त्रिन्भावः शच्च प्रत्ययः । त्रयोदशतः परिमाणमस्य त्रिंशत् । प्रत्ययस्वरः । नव । कनिन्नित्यनुवृत्तौ णु स्तुतावित्यस्माद्धातोर्णुदंशोर्नुदश्चेति कनिन् । गुणश्च । नित्वादाद्युदात्तः । असपर्यन् । लङि रूपम् । निघातः । औक्षन् । उक्ष सेचने । *लङि आडजादीनामित्याडागमः । वृद्धिः । पादादित्वान्न निहन्यते । आगमस्वरः । अस्तृणन् । स्तृञ् आच्छादने । लङ् बहुवचने क्र्यादित्वाच्छ्ना । झेरन्तादेशः । नित्यं ङित इतीकारलोपः । संयोगान्तलोपः । श्नाभ्यस्तयोरात इत्याकारलोपः । लुङ्लङ्लृङ्क्ष्वित्यडागमः । स चोदात्तः । आगमस्वरः । वाक्येत्यनुवृत्तौ चादित्वान्निघाताभावः । बर्हिः । इतिरित्यनुवृत्तौ बृंहेर्नलोपश्चेतीसिः । तत्सनियोगेन नलोपः । प्रत्ययस्वरः । असादयन्त । षदॢ विशरणगत्यवसादनेषु । अस्माद्धेतुमति चेति णिच् । उपधावृद्धिः । णिचश्चेत्यात्मनेपदम् । लङि बहुवचने रूपम् । निघातः ॥*

* आदर्शे लङि इति नास्ति ।

Tr. Three hundred, three thousand, thirty and nine gods worshipped Agni; they sprinkled him with pourings of ghee; they spread the Barhis for him and then made him take his seat as the hotṛ.

No. 11

MANDALA III. SŪKTA 32

इन्द्र सोमं सोमपत इति सप्तदशर्चं तृतीयं सूक्तं वैश्वामित्रं त्रैष्टुभमैन्द्रम् । अनुक्रान्तं च । इन्द्र सोमं व्यूनेति । पृष्ठ्याभिप्लवषडहयोर्द्वितीयेऽहनि मरुत्वतीय इन्द्र सोममितीदं सूक्तं निविद्धानीयम् । द्वितीयस्येति खण्डे सूचितम् । इन्द्र सोमं पात ऊतिरवमेति । मध्यंदिनः (आ० ७-६) इति । गोसवविवधयोरपि मरुत्वतीयशस्त्र एतत्सूक्तम् । सूचित च । इन्द्र सोममेतायामेति मध्यंदिनः (आ० ९-८) इति । उद्भिद्बलभिदोरपि मरुत्वतीय एतत्सूक्तम् । सूचितं च । इन्द्र सोममिन्द्रः पूर्भिदिति मध्यंदिनः (आ० ९-८) इति ॥

Verse 1

इन्द्र । सोमम् । सोमऽपते । पिब । इमम् । माध्यंदिनम् ।
सवनम् । चारु । यत् । ते ॥ प्रऽप्रुथ्य । शिप्रे इति । मघऽवन् ।
ऋजीषिन् । विऽमुच्य । हरी इति । इह । मादयस्व ॥ १ ॥

विश्वामित्रो ब्रूते । सोमपते सोमस्याधिपते हे इन्द्र इममस्माभिर्माध्यंदिने सवने क्रियमाण सोम सोमरसं पिब । यद्यस्मात्ते त्वदर्थं क्रियमाणं माध्यंदिनं मध्यदिनसबन्धि सवनं निष्केवलाख्यं शस्त्रं चारु रमणीयं वर्तते । मघवन् धनवन् ऋजीषिन् । ऋजीषशब्देन गतसारं सोमद्रव्यमुच्यते । तद्वन् हे इन्द्र । हरी रथे योजितावश्वौ रथाद्विमुच्य शिप्रे हनू प्रप्रथ्यान्नत्येन ग्रासेन पूरयित्वेह देवयजनदेशे मादयस्व तावश्वौ हर्षय । प्रप्रथ्य । प्रोथृ पर्याप्तावित्यस्य ल्यपि रूपम् । ह्रस्वश्छान्दसः । लित्स्वरः । ऋजीषिन् । अर्ज पर्ज अर्जन इत्यस्मादर्जेश्च ऋजि च (उ० ४-२८) इतीषन्प्रत्यय ऋजि इत्यादेशश्च धातोः । अर्ज्यत इत्यृजीषम् । तदस्यास्तीतीनिप्रत्ययः । आमन्त्रितनिघातः । मादयस्व । मदि स्तुत्यादिषु । हेतुमण्णिच् । निघातः ॥

The hymn is composed for invoking Indra along with the Maruts at the mid-day Soma pressing. पिब. The accent presents a difficulty. Old. explains it (ZDMG 70, 736) as being due to emphasis. चारु (from चन् to be pleased) agreeable, प्रप्रुथ्य. प्रुथ् to make a loud sound; cf. प्रोथत् अश्व. न VII. 3. 2; अप प्रोथ दुन्दुभे दुच्छुना VI. 47. 30. शिप्रा From words like अयःशिप्र and हिरण्ययी: शिप्राः a part of the helmet was called शिप्रा on account of that being the word for the portion of the face covered by it, prob. the upper and lower jaws. शिप्रे प्रप्रुथ् is to make a particular sound of satisfaction after or before a drink. ऋजीषिन् same as ऋजीष I. 32. 6. हरी (du.) horses of a bay colour: horses of gods other than Indra are also called हरि. मद् (मदति–माद्यति) to rejoice, to be intoxicated.

Tr. Here is Soma, Indra, lord of Soma; drink it, this being the mid-day libation which is acceptable to thee; sound thy jaws, beautiful and mighty god; unyoke thy bays and drink thy fill.

Verse 2

गाऽआशिरम् । मन्थिनम् । इन्द्र । शुक्रम् । पिब । सोमम् ।
रारिम । ते । मदाय ॥ ब्रह्मऽकृता । मारुतेन । गणेन । सऽ-
जोषाः । रुद्रैः । तृपत् । आ । वृषस्व ॥ २ ॥

हे इन्द्र गवाशिरं गव्यस्य पयस आशीर्मिश्रणं यस्मिन् तं सोमम् । अपि च मन्थिनं मन्थसंयुक्तं शुक्रमभिनवम् यद्वा शुक्रामन्थिग्रहे वर्तमानम् । एवं त्रिषु सवनेषु वर्तमानमिम सोमं पिब । ते तव मदाय हर्षाय ररिम । तं सोमं वयं प्रयच्छामः । मारुतेन । मरुतां गणो मारुतः । स च ब्रह्मकृत् । ब्रह्म स्तोत्रं करोतीति ब्रह्मकृत् । इन्द्रस्तोत्रं कुर्वाणेन मारुतेन गणेन रुद्रैरेकादशसंख्याकै रुद्रैश्च सजोषाः संगतस्त्वं तृपत् सोमपानेन तृप्यन् आ वृषस्व । तमिमं सर्वतो जठरे सिञ्च । धारय । गवाशिरम । श्रीणातेराङ्पूर्वात्किप्यपस्पृधेथामानृचुरित्यादिना निपातनादाशिरादेशः । ह्रस्वीहौ पूर्वपदप्रकृतिस्वरः । पिबा । व्यचोऽतस्तिङ इति संहितायां दीर्घः । ररिम । रातेश्छान्दसे वर्तमाने लिटि रूपम् । असमानवाक्यत्वान्निघाताभावः । आगमा अनुदात्ता इतीटोऽनुदात्तत्वात्प्रत्ययस्वरः । तृपत् । तृप प्रीणने । तुदादिः । आगमानुशासनस्यानित्यत्वान्नुमभावः । वृषस्व । वृषु सेचने । व्यत्ययेन शः ॥

गवाशिरम् (गो + आशिर् from श्री-आ to cook, to dress food) prepared with milk, मन्थिनम् whipped with added flour. शुक्र (शुच्) bright. ररिम (रा to give). ब्रह्मकृता. ब्रह्म a hymn. सजोषाः of accordant mind with, along with. तृपत् to satiety, to one's satisfaction, used adv.; often with पा, here with वृष्. आ वृष् pour like rain, a stronger पा.

Tr. Drink the bright Soma, mixed with milk and flour; we have offered it for thy exhilaration. Drink your fill with the sons of Rudra, the hymn-chanting band of Maruts.

Verse 3

ये । ते । शुष्मम् । ये । तविषीम् । अवर्धन् । अर्चन्तः । इन्द्र ।
मरुतः । ते । ओजः ॥ माध्यन्दिने । सवने । वज्रऽहस्त । पिब ।
रुद्रेभिः । सऽगणः । सुऽशिप्र ॥ ३ ॥

हे इन्द्र ये मरुतः ते तव शुष्मं शत्रूणां शोषकं तेजो ये च मरुतस्तविषीं बलं चावर्धन् युद्धसहकारितयावर्धयन्। ते मरुतोऽर्चन्तस्त्वां स्तुवन्तः सन्तः ते तवौजो युद्धसामर्थ्यमवर्धयन्। वज्रहस्त वज्रयुक्तौ हस्तौ यस्येति तादृश। सुशिप्र शोभनहनो। शिप्रे हनू नासिके वा (नि० ४-१) इति यास्कः। हे इन्द्र रुद्रेभिः। रोदयन्ति शत्रूनिति रुद्रा मरुतः। तैः सगणस्त्वं माध्यदिने सवने सोमं पिब। अवर्धन्। वृधु वर्धने। अन्तर्भावितण्यर्थः। यङ्लुगन्तयोगादभ्यासः। माध्यंदिने। उत्सादित्वादञ्। त्रित्वादाद्युदात्तः॥

Between शुष्म and तविषी and between तविषी and ओजः there is hardly any difference. शुष्म (श्वस्) signifies physical strength; तविषी (from तु to wield power, cf. ब्रह्म तुतोत्) power of organization, and ओजस् (वज्) of spirit. अर्चन्तः chanting. सगणः like सजोषाः means, grouped with, along with. The word invariably occurs of Indra in connection with the Maruts.

Tr. In the midday libation, O vajra-armed, strong-jawed Indra, drink with the Maruts, sons of Rudra, who increased thy might, power and valour by their songs.

Verse 4

ते । इत् । नु । अस्य । मधुऽमत् । विविप्रे । इन्द्रस्य । शर्धः ।
मरुतः । ये । आसन् ॥ येभिः । वृत्रस्य । इषितः । विवेद ।
अमर्मणः । मन्यमानस्य । मर्म ॥ ४ ॥

ये मरुत इन्द्रस्य शर्धो बलभूता आसन् त इत् त एव मरुतोऽस्य । द्वितीयार्थे षष्ठी । इममिन्द्रम् मधुमत् । तव सहाया वयमास्महे त्वं युद्धमभिगच्छेति माधुर्योपेतं वाक्यं यथा भवति तथा । विविप्रे नु क्षिप्रं प्रेरयन् । येभिर्यैर्युद्धसहायैर्मरुद्भिरिषितः प्रेरित इन्द्रोऽमर्मणः परैरविदितमर्मस्थानस्यात एव मन्यमानस्य न कोऽपि मम हन्तेत्यभिमन्यमानस्य वृत्रस्यासुरस्य मर्म यस्मिन् स्थाने प्रहृतौ सत्यां स मरिष्यति तादृशं स्थानं विवेद अज्ञासीत । विविप्रे । विप क्षेपण इत्यस्य लिटि व्यत्ययेनात्मनेपदम् । इरे च । इरयो रे [६-४-७६] इति रे इत्यादेशः । निघातः । आसन् । अस भुवीत्यस्य लङि रूपम् । यद्वृत्तयोगान्निघाताभावः । विवेद । विद ज्ञान इत्यस्य लिटि रूपम् । लित्स्वरः । मर्म । मृङ् प्राणत्याग इत्यस्मादौणादिको मनिन् । नित्स्वरः ॥

ये इन्द्रस्य शर्धः आसन् ' शर्धः troop. अस्य मधुमत् विविप्रे. मधुमत् adv. sweetly, with sweet words. विविप्रे perf. of विप् to be agitated, to be inspired; here, however, it appears to be used in the causal sense of ' to inspire '; cf. विपा गिरा V. 68. 1. Apparently it governs the geni. To connect अस्य with इन्द्रस्य as Old. does appears to be unjustified. Geld. supplies a word like ' companions ' after अस्य. अमर्मणः मन्यमानस्य cf. II. 23. 12.

Tr. It was they who sweetly inspired him (with ardour), these Maruts, who constituted Indra's force and stimulated by whom Indra found out the vulnerable point of Vṛtra, who regarded himself as invulnerable.

Verse 5

मनुष्वत् । इन्द्र । सवनम् । जुषाणः । पिब । सोमम् । शश्वते ।
वीर्याय ॥ सः । आ । ववृत्स्व । हरिऽअश्व । यज्ञैः । सरण्युऽभिः ।
अपः । अर्णा । सिसर्षि ॥ ५ ॥

हे इन्द्र मनुष्वत् मनोर्यज्ञमिव ममेदं सवनं यज्ञं जुषाणः सेवमानस्त्वं शश्वते शाश्वताय वीर्याय परपरिभवलक्षणाय सामर्थ्यायेमं सोमं पिब । हे हर्यश्व स तादृशस्त्वं यज्ञैर्यजनीयैर्मरुद्भिः साकमा वृत्स्व आगच्छ । किंच सरण्युभिरेकश्रुतिमन्मन्त्रानात्मन इच्छद्भिः यद्वा सरण्युभिः सरणशीलैर्मरुद्भिः सहितस्त्वमपोऽन्तरिक्षस्थितान्युदकानि अर्णा पार्थिवान्युदकानि सिसर्षि प्रापय । यद्वा अपः पश्चम्यन्तमेतत्पदम् । अपो व्याप्तादन्तरिक्षात्सकाशादर्णांसि प्रापय । वृत्स्व । वृतु वर्तने । व्यत्ययेन शपः श्लुः । लोटि रूपम् । सरण्युभिः । रण शब्दार्थः । क्विप् । समानो रणो ध्वनिर्येषां ते सरणा मन्त्राः । तानिच्छन्तः । सुपः क्यच् । क्यादिभ्युप्रत्ययः । यद्वा सृ गतौ । सृयुवचिभ्योन्युजागृजक्नुत्रः (उ० ३-८१) इत्यन्युच्प्रत्ययः । रषाभ्याम्० (पा० ८-४-१) इति णत्वम् । चित्त्वादन्तोदात्तः । अपः । आप्लृ व्याप्तौ । आप्नोतेः क्विप् ह्रस्वश्चेति क्विप् धातोर्ह्रस्वश्च । सावेकाच इति विभक्तेरुदात्तत्वम् । सिसर्षि । सृ गतौ । छान्दसो जुहोत्यादिः बहुलं छन्दसीत्यभ्यासस्येत्वम् ॥

मनुष्व'त्, from मनुष् man or Manu, an ancient sage, regarded as father of the human race: (i) like man, (ii) but better, as in the case of the sacrifice of Manu. शश्वत् continual, inexhaustible. सरण्यु'भिः अप': अर्णा सिसर्षि. सरण्यु (from सरण्य denom. from सरण, n. from सृ) dashing, rushing ; adj. to मरुद्भिः understood, acc. to Sāy. ; the sense requires a word denoting winds. Scholars have needlessly tried to change अर्णा to अर्णाः because in I. 174. 2 अर्णाः occurs in Pp. with अपः. As Old. points out, in V. 41. 14 (उदा वर्धन्ता अभिसाताः अर्णाः) अर्ण (र्णा) may be n. or f. noun. अपः, अर्णाः are in apposition as practically synonymons words, 'the waters, those gushing streams.' अर्णस् from ऋ–ऋण्व् to set in motion. सिसर्षि impera. from सृ used in causal sense, to let flow.

Tr. Accepting our Soma-pressing as thou didst at Manu's sacrifice, drink the Soma, Indra, for inexhaustible valour ; turn towards us, god of bay horses, on account of our sacrificial offerings ; let flow streams of waters with rushing (winds).

Verese 6

त्वम् । अपः । यत् । ह । वृत्रम् । जघन्वान् । अत्यान्ऽइव ।
प्र । असृजः । सर्तवे । आजौ ॥ शयानम् । इन्द्र । चरता ।

वधेन । वव्रिऽवांसम् । परि । देवीः । अदेवम् ॥ ६ ॥

[*न्वाँ ᵒत्याँ ᵒवाजा]

हे इन्द्र त्वं देवीर्देवनशीला अपः परि वव्रिवांसं परित आवृत्य वर्तमानमत एव अदेवं बहूदकतया स्वच्छत्वेनाप्रतिभासमानं शयानमेकत्र निश्चलतया वर्तमानं वृत्रं मेघं यदा चरता तमुद्दिश्य वर्तमानेन वधेन युद्धेन जघन्वान् हतवानसि तदा त्वमाजौ युद्धे सर्तवै अतिवेगगमनायात्यानिव यथाश्वान् प्रेरयसि तथा त्वमप उदकान्यन्तरिक्षादाकाशात् प्रासृजो ह प्रकर्षेण मेघभेदनं कृत्वा असृजः खलु । तं यजाम इत्युत्तरेणान्वयः । जघन्वान् । हन हिंसागत्योरित्यस्य कसौ विभाषा गमहनविद्विशामितीटो विकल्पितत्वादव्रेडभावः । अभ्यासाच्चेति हकारस्य घत्वम् । प्रत्ययस्वरः । असृजः । सृज विसर्गे । शविकरणी । यद्योगादनिघातः । सर्तवै । सृ गतौ । तुमर्थे तवैप्रत्ययः । अन्तश्च तवै युगपदिति (६-२-५१*) धातोः प्रत्ययस्य चोदात्तत्वम् । आजौ । अज गतिक्षेपणयोः । अज्यतिभ्यां च (उ० ४-१३०) इति इण्प्रत्ययः । णित्त्वादुपधावृद्धिः । अजन्ति गच्छन्त्यस्मिन्नित्याजिर्युद्धम् । प्रत्ययस्वरः । सर्तवाजावित्यत्र संहितायामायादेशे कृते तस्य लोपः शाकल्यस्येति यकारलोपः । सर्वविधीनां छन्दसि विकल्पितत्वात्सवर्णदीर्घत्वे कर्तव्ये यलोपो नासिद्धो भवति । सवर्णदीर्घः । शयानम् । शीङ् स्वप्ने । शानच् । अदादित्वाच्छपो लुक् । ङित्त्वाल्लसार्वधातुकस्वरेण शानचोऽनुदात्तत्वे धातुस्वरः । वधेन । हन्तेर्भावे हनश्च वध इत्यण्प्रत्ययो वधादेशश्च धातोरन्तोदात्तश्च । वव्रिवांसम् । वृञ् वरण इत्यस्य कसाविडागमश्छान्दसः । प्रत्ययस्वरः ॥

Geld. has translated असृजः of the Pp. faithfully and made the rc. a subordinate clause hanging on rc. 7. In his commentary he had connected it with rc 5, but that did not yield any sense. In his Tr. यद् has to be falsely rendered as 'since.' Sāy.'s interpretation of असृजत् really makes it out as a principal clause. It is clear that the Pp. wrongly accents असृजः. The संहिता is in no way changed by the reading असृजः with अ unaccented. जघन्वान् perf. part. from हन्, used as a verb acc. to Pān. III. 2. 107. The change जघन्वाँ is irregular at the end of a Pāda and is noted at प्रा. 285. अज m. a horse. सर्तवै. Infinitives in तवै are accented both on the root and on वै (Pān. VI. 20. 51). The double संधि in सर्तवाजौ is noted at प्रा. 176.

* तवै चान्तश्च युं० इत्यष्टाध्यायीपाठः ।

Tr. Thou releasedst waters, Indra, as they do steeds to run a race, when thou didst kill with thy quivering weapon Vrtra, the ungodly one, as he lay surrounding the godly (waters).

Verse 7

यजामः । इत् । नमसा । वृद्धम् । इन्द्रम् । बृहन्तम् । ऋष्वम् ।
अजरम् । युवानम् ॥ यस्य । प्रिये इति । ममतुः । यज्ञियस्य ।
न । रोदसी इति । महिमानम् । ममाते इति ॥ ७ ॥

नमसा हविर्लक्षणेनान्नेन वृद्धं प्रवृद्धमत एव बृहन्तम् महान्तमृष्वम् । ऋष्यते गम्यते स्तुतिलक्षणैर्मन्त्रैरिति ऋष्वं स्तोतव्यम् । अजरं जरारहितमत एव युवानं नित्यतरुणमेवंविधमिन्द्रं यजाम इत् । कुशिका वयं यज्ञसिद्ध्यर्थं स्तुतिवाक्यैः पूजयाम एव* । प्रिये प्रियतमे अपरिमिते रोदसी द्यावापृथिव्यौ यज्ञियस्य यज्ञार्हस्य यस्येन्द्रस्य तव महिमानं वैभवं न ममतुः न परिच्छेत्तुं शक्नुतः । न ममाते इति द्वितीयं क्रियापदमादरार्थम् । यजामः । यजेर्लटि रूपम् । ऋष्वम् । ऋषि गतौ । सर्वनिघृष्वक्ऋष्वेत्यादिना वप्रत्ययान्तो निपातितः । प्रत्ययस्वरः । प्रिये । ईदूदेदिति प्रगृह्यसंज्ञा । ममतुः । मा मान इत्यस्य लिट्यतुसि रूपम् । यङ्लुक्तयोगादनिघातः । प्रत्ययस्वरः । महिमानम् । महिशब्दात्तस्य भाव इत्यर्थे पृथ्वादित्वादिमनिच् । चित्स्वरः । ममाते । माङ् माने शब्दे चेत्यस्य लिट्यातामि रूपम् ॥

ममतुः—ममाते. Aufrecht on the strength of VII. 31. 7 (यस्य ने सहः रोदसी अनु मन्नाते) wants to change ममतुः to मन्मतुः; but he has ignored the अनु; in any case no change is possible. There is a distinction deliberately made here between the first verb used in the Parasmaipada and the second in the Ātm.; the first shows an attempt; the other the result.

Tr. We can but worship with salutations the mighty, sublime and lofty Indra, unaging and young, deserving our sacrifice, whose greatness the dear Heaven and Earth measured and measured not.

---

* आदर्शे एव इति नास्ति ।

Verese 8

इन्द्रस्य । कर्म । सुऽकृता । पुरूणि । व्रतानि । देवाः । न
मिनन्ति । विश्वे ॥ दाधार । यः । पृथिवीम् । द्याम् । उत ।
इमाम् । जजान । सूर्यम् । उषसम् । सुऽदंसाः ॥ ८ ॥

विश्वे सर्वे देवा इन्द्रस्य तव कर्म कर्माणि सुकृता सुकृतानि सुष्ठु निर्मितानि पृथिव्यादीनि पुरूणि बहूनि व्रतानि यज्ञादीनि च न मिनन्ति । एतानि सर्वाणि तव कर्माणि न हिंसन्ति । किंत्वाद्रियन्ते । किंच योऽयमिन्द्रः पृथिवीं भूलोकं द्यां द्युलोकमुत अपि चेमामिममन्तरिक्षलोकं च एतांस्त्रीन् लोकान् दाधार । *किंच सुदंसाः सुकर्मा शोभनकर्मा सन्निन्द्रः सूर्यं लोकप्रकाशकमादित्यम् उषसमग्निहोत्रादिकर्मनिर्वाहकमुषःकालं जजान उत्पादयामास । इन्द्रस्य कर्म सुकृता पुरूणीत्येतत्पदकदम्बकमेको द्वे वसुमतीत्यस्मिन्वर्गे । (ऋ० ३-२-३) पठितम् । अत्रापि तदेव पठ्यते । पदकाले नोऽत्सृज्यत इति चेन्न । वाक्यभेदात् । तत्रेन्द्रस्य कर्म सुकृता पुरूणीत्येकं वाक्यम् । अत्र तु कर्म सुकृतेत्येकं वाक्यम् । पुरूणि व्रतानीत्यपरम् किंच तत्रत्यं पदकदम्बकं प्रथमान्तमत्रत्यं द्वितीयान्तम् । अतो वाक्यभेदाद्विभक्तिभेदाच्च पदकाले नोत्सृज्यते । मिनन्ति । मीञ् हिंसायामित्यस्य लटि रूपम् । निघातः । दाधार । धृञ् धारण इत्यस्य लिटि रूपम् । तुजादित्वादभ्यासस्य दीर्घः । लित्स्वरः । जजान । जन जनन इत्यस्यान्तर्भावितण्यर्थस्य लिटि रूपम् । लित्स्वरः । सुदंसाः । सोर्मनसी इत्युत्तरपदाद्युदात्तत्वम् ॥

कर्म = कर्माणि. *a* is a repetition of III. 30. 13 *d*.

Tr. The deeds of Indra are well-done and many. None of the gods violate the commandments of that miracle-worker who created the earth, this heaven, the Sun and Usas.

Verse 9

अद्रोघ । सत्यम् । तव । तत् । महिऽत्वम् । सद्यः । यत् । जातः ।
अपिबः । हु । सोमम् ॥ न । द्यावः । इन्द्र । तवसः । ते ।
ओजः । न । अहा । न । मासाः । शरदः । वरन्त ॥ ९ ॥

* आदर्शे किंच इति नास्ति ।

अद्रोघ द्रोहवर्जित हे इन्द्र तव तन्महित्वं तादृशं माहात्म्यं सत्यं यथार्थम् यद्यस्माज्जात उत्पन्नः सद्यस्तदानीमेव सोममस्माभिर्दीयमानं सोमरसमपिबः । ह प्रसिद्धौ । किंच तवसो बलवतस्ते तवौजः सामर्थ्यं द्यावो दिवोपलक्षिताः सर्वे लोका न वरन्त न वारयन्ति । किंच । अहा प्रतिपदादीन्यहानि न वारयन्ति । तथा मासाश्चैत्राद्याः शरदः संवत्सराश्च तव सामर्थ्यं न वारयन्ति । किंतु तव सामर्थ्यमनुसृत्य सर्वे वर्तन्त इति भावः । अद्रोघ । आमन्त्रितस्य चेति षाष्ठिकमायुदात्तत्वम् ॥ अपिबः । यद्योगादनिघातः । मासाः । मसी परिमाणे । मस्यते परिभीयते त्रिंशता दिनैरिति मासः । कर्मणि घञ् । त्रित्वादाद्युदात्तः । शरदः शॄ हिंसायामित्यस्मात् शॄदृभसोऽदिरित्यधिकरणेऽदिप्रत्ययः । शीर्यन्तेऽस्यां तृणगुल्मवनस्पतीनां तेजांसीति शरत् । प्रत्ययस्वरः । वरन्त । वृञ् वरणे । अन्तर्भावितण्यर्थोऽत्रातिवारणे वर्तते । भौवादिकः । छान्दसे लङि रूपम् । निघातः ॥

तव॑सः ते ओ॑जः न॑ वरन्त. तवस् power, also powerful. वृ to stop, to come in the way of; cf. अस्य रंहिः न स्म वरन्ते युवतिं न शर्याम् (arrow) X. 178. 3. द्या॑वः is translated by Geld. by 'days' and अहा by 'days and nights.'.

Tr. Benign Indra, true is that greatness of thine, that so soon as thou wert born thou drankst Soma. Neither heavens, nor days, nor months, nor autumns (years) have prevented the power of thee who art strong.

Verse 10

त्वम् । सद्यः । अपिबः । जातः । इन्द्र । मदाय । सोमम् ॥
परमे । विऽओमन् ॥ यत् । ह । द्यावापृथिवी इति । आ ॥
अविवेशीः । अथ । अभवः । पूर्व्यः । कारुऽधायाः ॥ १० ॥

हे इन्द्र सद्यस्तदानीमेव जातः परमे व्योमन् उत्तमे स्थाने स्थितस्त्वं मदाय हर्षाय सोममपिबः । यत् यदा त्वं द्यावापृथिवी द्यावापृथिव्यौ आविवेशीर्हि आसमन्तादभृशं प्रविष्टोऽसि खलु । अथानन्तरं पूर्व्यः पुरातनः सन् कारुधायाः कर्मणां

---

* 'सद्यस्कीनाम्येकाहे निष्केवल्यशस्त्रे त्वं सद्यो अपिब इति सूक्तमुखीया । सूत्रितं च । त्व सद्यो अपिबो जात इन्द्रानु त्वा हि घ्ने अध देव देवाः (आ० ९–५) इति ।' अयमेश आदर्शे विशेषः ।

विधाताभवः खलु । द्यौमन् । अव रक्षणगत्यादिषु । विपूर्वस्यावतेर्नामन्सीमन्नित्यादिना (उ० ४-१५०) मनिन् । ज्वरत्वरेत्यादिना ऊठ् । विशेषेणौम व्याप्तिर्यस्य तत्। सुपां सुलुगित्यादिना सुपो लुक् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः । आविवेशीः । विश प्रवेशन इत्यस्य यङ्लुकि लङि सिपि यङो वेतीडागमः । इतश्चेति सिप इकारलोपः । यद्योगादनिघातः । कारुधायाः । कारुः । करोतेः कृवापाजिमिस्वदिसाध्यशूभ्य उण् प्रत्ययः । णित्त्वाद्वृद्धिः । दधातेर्वहिहाधाञ्भ्यश्छन्दसीत्यसुन् । णिदित्यनुवृत्तेरातो युक् चिण्कृतोरिति युगागमः । समासे गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेति सूत्रात्पूर्वपदप्रकृतिस्वरः ॥

आ अविवेशीः. aor. of. perf. base of विश्. पूर्व्यः कारुधायाः. पूर्व्यः (पूर्व) foremost, first. कारु + धायस् (धे to nourish) supporter.

Tr. Thou, Indra, immediately after being born, drankst Soma in the highest heaven for the pleasure of exhilaration. When thou didst enter heaven and earth, that same moment thou becamest the first supporter of poets.

Verse 11

अहन् । अहिम् । परिऽशयानम् । अर्णः । ओजायमानम् । तुविऽजात । तव्यान् ॥ न । ते । महिऽत्वम् । अनु । भूत् । अध । द्यौः । यत् । अन्यया । स्फ्यया । क्षाम् । अवस्थाः ॥ ११ ॥

[∞ ग्या ½

तुविजात । बहूनि जातानि पृथिव्यादीनि यस्मात्सोऽयं तुविजातः हे तुविजात इन्द्र तव्यानतिशयेन प्रवृद्धस्त्वमर्णः परिशयानमुदकं परितः शयानमुदकमन्तः कृत्वा परितो वर्तमानमत एवौजायमानं बलमाचरन्तमहिम् । आ समन्ताद्धन्त्यपहरत्युदकमित्यहिर्मेघः । तमिमं मेघमहन् उदकप्रेरणाय हतवानसि । अध अथ ते महित्वं महिमानं द्यौर्नानुभूत् नानुभवति । न जानाति । यद्यस्मात्त्वमन्यया एकतरया स्फिग्या कट्या क्षां भूमिमवस्थाः अवच्छाद्य तिष्ठसि । अहन् । हन्तेर्लङि सिब्लोपे रूपम् । अहिम् । हन हिंसागत्योः । आङि श्रिहनिभ्यां ह्रस्वश्चेति इण् प्रत्ययः । ङिच्च पूर्वपदस्य ह्रस्वश्च । वृषादित्वादायुदात्तत्वम् । ओजायमानम् । ओजःशब्दादाचारार्थे कर्तुः क्यङ् सलोपश्चेति क्यङ्प्रत्ययः सलोपश्च । ङित्त्वादात्मनेपदम् । प्रत्ययस्वरः । तव्यान् । तु इति सौत्रो धातुः । अस्मात्तुजन्तात्तुञ्छन्दसीती-

यसुन । तुरिष्टेमेयःस्विति तृचो लोपः । भसंज्ञायामोर्गुणः । इकारलोपश्छान्दसः । नित्स्वरः । भूत् । भवतेर्लुङि रूपम् । स्फिग्या । यच्चि भामिति भसंज्ञां बाधित्वा स्वादिष्वसर्वनामस्थान इति पदसंज्ञायां जश्त्वम् । तृतीयायाः पूर्वसवर्णः । क्षाम् । क्षि निवासगत्योः । अन्येभ्योऽपि दृश्यत इति निरुपपदादपि ड्प्रत्ययः । ततष्टाप् । क्षियन्ति निवसन्त्यस्यां प्राणिन इति क्षा भूमिः । उदात्तनिवृत्तिस्वरेणान्तोदात्तः । अवस्थाः । वस आच्छादन इत्यस्य लङ्यनुदात्तत्वादात्मनेपदम् । थास्यदादित्वाच्छपो लुक् । यथोगादनिघातः । अडागमस्वरः ॥

अर्हन् 2 s. अर्णस् = अर्ण and is used oftener than अर्ण. ओजायमानम्, pre. p. of denom. from ओजस्, displaying his power. तुविजात (तुवि mighty or many, occurring only in compounds and जात from जन्) born mighty; तर्त्यान्=तर्तीयान्, comp. of तवस् or तवस्वत् mighty. यत्.अध are correlated terms. यो: न अनु भूत. अनु भू to come up to. अन्यया स्फिग्या क्षाम् अवस्थाः. अन्या one of two. स्फिगी (cf. स्फिच्) hip, side. अवस्थाः (वस् 2A to cover).

Tr. O god born mighty, thou killedst the dragon, enveloping the flood and displaying his power, thou being more powerful; heaven could not come up to thy greatness, since thou didst cover the earth by one of thy sides.

Verse 12

यज्ञः । हि । ते । इन्द्र । वर्धनः । भूत् । उत । प्रियः । सुतऽसोमः । मियेधः ॥ यज्ञेन । यज्ञम् । अव । यज्ञियः । सन् । यज्ञः । ते । वज्रम् । अहिऽहत्ये । आवत् ॥ १२ ॥

हे इन्द्र अस्मदीयो यज्ञस्ते तव वर्धनो हविष्प्रदानेन वर्धयिता भूद्धि भवति खलु । उत अपि च सुतसोमः अभिषुतसोमवान्मियेधो यज्ञस्तव प्रियः । स त्वं यज्ञियो यज्ञार्हः सन् यज्ञं यज्ञस्य कर्तारं यजमानं यज्ञेनानुष्ठीयमानेनानेनाव । फलप्रदानेन रक्ष । किंचायं यज्ञस्ते तव वज्रमहिहत्ये वृत्रहनने कर्मणि आवत् रक्षतु । वर्धनः । वृधु वर्धन इत्यस्य ण्यन्तस्य नन्द्यादित्वात् ल्युप्रत्ययः । लित्स्वरः । भूत् । यथियोगादनिघातः । अत्र अवतेर्लोटि रूपम् । निघातः । सन् । असेः शतरि रूपम् । प्रत्ययस्वरः । अहिहत्ये । हन हिंसागत्योरित्यस्य भावे हनस्त चेति क्यप् तकारश्चान्तादेशः । कृदुत्तरपदस्वरः । आवत् । अवतेश्छान्दसे लङि रूपम् । निघातः ॥

मियेधः (cp. Avest. Myada and मेध X. 183. 10, I. 77. 3; etc. The word occurs only at the end of a pada and probably म्येध and मेध formed doublets) sacrificial offering. अहिहत्ये the killing of the dragon वृत्र. आवत् from अव to protect or help.

Tr. Yajña, indeed, O Indra, and the offering, dear to thee, where the Soma is pressed, have increased thy strength. An object of sacrifice, thou helpedst sacrifice by means of sacrifice; the sacrifice helped thy thunderbolt in the killing of Vrtra.

Verse 13

यज्ञेन । इन्द्रम् । अवसा । आ । चक्रे । अर्वाक् । आ । एनम् ।
सुम्नाय । नव्यसे । ववृत्याम् ॥ यः । स्तोमेभिः । ववृधे ।
पूर्व्येभिः । यः । मध्यमेभिः । उत । नूतनेभिः ॥ १३ ॥

हे इन्द्र सर्वो यजमानोऽवसा स्वरक्षकेण यज्ञेनेन्द्रं त्वामर्वागा चक्रे । हविष्प्रदानेनाभिमुखं करोति । तथाहं नव्यसे नवतराय सुम्नाय धनायैनं त्वामा ववृत्याम् । यज्ञनावृतं मदभिमुखं कुर्याम् । कीदृशस्त्वम् । यः पूर्वेभिः पुरातनैः स्तोमेभि स्तोत्रैर्ववृधे । तथा य इन्द्रो मध्यमेभिर्मध्ये भवैः स्तोत्रैरुतापि च नूतनेभिरस्माभिः क्रियमाणैरधुनातनैः स्तोत्रैर्वर्धते । चक्रे । करोतेर्लिटि रूपम् । नव्यसे । नवशब्दादीयसुनि भसंज्ञायामकारलोप ईकारलोपश्छान्दसः । नित्त्वादाद्युदात्तः । ववृत्याम् । वृतु वर्तने । लिङि बहुलं छन्दसीति शपः श्लुः । व्यत्ययेन परस्मैपदम् । निघातः । ववृधे । वृधु वर्धन इत्यस्य लिटि रूपम् । प्रत्ययस्वरः । मध्यमेभिः । मध्यशब्दात् शैषिकार्थे मध्यान्मः (पा० ४-३-८) इति मप्रत्ययः । प्रत्ययस्वरः । नूतनेभिः । नवशब्दस्य स्नप्तनप्त्वाश्च प्रत्यया वक्तव्या नू इत्यादेशश्चेति तनत्प्रत्ययो नू इत्यादेशश्च ॥

आ चक्रे अर्वाक्. आ + कृ to call to oneself. सुम्न welfare, good will or grace of the gods. अवसा need not be changed to अवसे as proposed; cf. अवसा आ ववृत्याम् I. 152. 7.

Tr. With that (cf. rc 12 *cd*) help as a motive I have called Indra towards myself; may I turn him (towards me) for a newer blessing, (that Indra) whose power was increased by the ancient hymns, by those of the middle period and by the recent ones.

Verse 14

विवेष । यत् । मा । धिषणा । जजान । स्तवै । पुरा । पार्यात् ।
इन्द्रम् । अंहः ॥ अंहसः । यत्र । पीपरत् । यथा । नः ।
नावाऽइव । यान्तम् । उभये । हवन्ते ॥ १४ ॥

यद्यदा धिषणा इन्द्रं स्तवानीति मदीया बुद्धिर्मां विवेष व्याप्नोत् तदाहं स्तोत्रं जजान करोमि । बुद्धेः स्वरूप दर्शयति । अहं पार्यात्पारे भवादतिदूरवर्तिनो विघ्नकारिणोऽह्न पुरा पूर्वं स्तवै स्तवानि । यत्र यस्यां धिषणायामेव जातायां सत्यां स इन्द्रो नोऽस्मानंहसः पापरूपाद्दारिद्र्याद्यथा पीपरत् यथा पारं नयेत् तथास्मदुभयपार्श्ववर्तिधनार्थिनो जना हवन्ते आह्वयन्ति । तत्र दृष्टान्तः । नावेव यान्तम् । यथा नद्यादिषु नौकया यान्तं गच्छन्तं पुरुषमुभय उभयकूलवर्तिनो जना हवन्ते आह्वयन्ति तद्वत् । विवेष । विष्लृ व्याप्तावित्यस्य लिटि णलि रूपम । लित्स्वरः । जजान । जन जनन इत्यस्य लिटचुत्तमे णलि रूपम् । वाक्यभेदादनिघातः । अंहसः । अम गत्यादिषु । अमेर्हुक् च (उ० ४-२१२) इत्यसुनप्रत्ययो हुगागमश्च । नित्स्वरः । पीपरत् । पॄ पालनपूरणयोरित्यस्य लुङि चाङि ह्रस्वाभ्यासेत्वदीर्घगुणाः । यथायोगादनिघातः । लित्स्वरः । नावेव । नुद प्रेरणे इत्यस्मादृग्लानुदिभ्यां डौ (उ० २-६४) इति डौप्रत्ययः । नुद्यत इति नौः प्लवः । सावेकाच इति तृतीयाया उदात्तत्वम् । इवेन नित्यसमासो विभक्त्यलोप इत्यादि । उभये । उभशब्दात्परस्य तयप उभादुदात्तो नित्यम् (पा० ५-२-४४) इत्ययजादेशः । वचनसामर्थ्यादादेरुदात्तत्वम् । हवन्ते । ह्वयतेर्लटि रूपम ॥

विवेष from विष्, Gr., to inspire; Pischel, to do, to manage; Geld. to bring about. विष् also means to seize, cf. समौ चित् हस्तौ न समं विविष्टः; X. 117. 2. The subject of विवेष according Gr. and Geld. is 'he'; according to Pischel it is 'I'; all take यन्मा धिषणा जजान as object of विवेष. Sāyana understands it quite differently, and more reasonably, as विवेष, rather than जजान, must be connected with यन्मा धिषणा, as, standing by itself, विवेष cannot yield a sense. धिषणा is a deity which represents the Soma cup deified, according to Roth and Berg.; the hymn or offering or both, according to Gr., 'earth' according to Pischel and Hillebrandt;

'divine inspiration' according to Geld. In this tangle of interpretations, one can only offer a tentative sense. See *Tr. b.* The poet now feels the urgent need of prayer and will not wait for an inspiration to come. पा'र्याद् अ'ह्न.. the पार्य अहः is a day of crisis on which help is required for surmounting it. पी'परत् aor. injunct. from पॄ to cross, to protect. Old. understands *cd* to mean: 'whensoever and how-soever he might save us from danger, both invoke him &c.'

Tr. I have created when the inspiration has seized me. Let me (now) praise Indra before the critical day, by which (means) and on which day may he rescue us. Him, like one plying a boat, both (parties) invoke (for help).

Verse 15

माध्यंदिने सवन आग्नीध्रीयस्य आपूर्णो अस्येति प्रस्थितयाज्या । सूत्रितं च । आपूर्णो अस्य कलशः स्वाहेति माध्यंदिन्यः (आ० ५-५) इति ॥

आऽपूर्णः । अस्य । कलशः । स्वाहा । सेक्तोऽइव । कोशम् ।
सिसिचे । पिबध्यै ॥ सम् । ऊं इति । प्रियाः । आ । अववृत्रन् ।
मदाय । प्रऽदक्षिणित् । अभि । सोमासः । इन्द्रम् ॥ १५ ॥

हे इन्द्र अस्य तव पानार्थं कलशो द्रोणकलशः सोमेनापूर्णः । स्वाहा स्वाहाकृतो दत्तश्च सोमसहितः कलशः । पिबध्यै तव पानार्थम् । सिसिचे । तं सोमं चोदिसाधारे सिञ्चामि । तत्र दृष्टान्तः । कोशं सेक्तेव । यथा सेक्तोत्सेचको जलपूर्णात्कोशात् इतेः सकाशाज्जलं पात्रान्तरे सिञ्चति तद्वत् । प्रियाः स्वादुतमाः सोमासो दत्तास्ते सोमा इन्द्रं त्वामभि अभिलक्ष्यैव मदाय तव हर्षार्थं प्रदक्षिणित् प्रादक्षिण्येन समावृत्रन् सम्यगावृत्य वर्तन्ताम् । आपूर्णः । पॄ पालनपूरणयोरित्यस्य कर्मणि निष्ठा । रदाभ्यामिति तस्य नत्वम् । गतिरनन्तर इति गतिस्वरः । स्वाहा । निपातत्वादायुदात्तः । सेक्तेव कोशम् । न लोकाव्ययेति षष्ठीप्रतिषेधः । सिसिचे । षिच क्षरण इत्यस्य लिटि रूपम् । पिबध्यै । पा पान इत्यस्य तुमर्थे शध्यैन्प्रत्ययः । शित्त्वान्पिबादेशः । नित्त्वादायुदात्तः । अववृत्रन् । वृतु वर्तन इत्यस्य लङि शप् । बहुलं छन्दसीति तस्य शपः श्लुः । व्यत्ययेन परस्मैपदम् । बहुलं छन्दसीति झे रुडागमः ॥

स्वा'हा adv., used either alone or with verbs like कृ, दाश्, रा etc., of which the sacrificer is the subject, or of मद्, पा, etc., of

which a god is the subject. It means apparently "with an accompanying interjection of स्वाहा". The interjection itself has lost its original meaning, whatever it might have been; it is of doubtful etymology, but the form appears to be instr.; cf. स्वाहा अन्ये स्वधया अन्ये मदन्ति X. 14. 3; probably it is from सु + वह्. कोश reservoir of water. सेक्ता one who pours water from his leather-bag (भृति) पिबध्यै inf. from पा. प्रदक्षिणित् on the right side; cf. प्रदक्षिणित् अभि गृणन्ति कारवः II. 43. 1. Turning or singing on the right side shows reverence or good luck.

Tr. The cup is filled: Svāhā! I have filled it for (his) draught as the water-carrier (fills) the reservoir of water. May (his) favourite Soma (cups) turn Indra to our right side for his exhilaration.

Verse 16

न । त्वा । गभीरः । पुरुऽहूत । सिन्धुः । न । अद्रयः । परि ।
सन्तः । वरन्त ॥ इत्था । सखिऽभ्यः । इषितः । यत् । इन्द्र ।
आ । दृळ्हम् । चित् । अरुजः । गव्यम् । ऊर्वम् ॥ १६ ॥

हे पुरुहूतेन्द्र गभीरो गम्भीरः सिन्धुः समुद्रस्त्वा त्वां न वारयति। ततः परि परितो वर्तमानाः सन्तोऽद्रयः शैलास्त्वां न वरन्त न वारयन्ति। किंतु त्वामनुसृत्य वर्तन्ते। यद्यस्मात् इत्था इत्थमनेन प्रकारेण सखिभ्यः सखिभिर्देवैरिषितः प्रार्थितस्त्वं दृळ्हं चिदतिप्रबलमपि गव्यं गवि भवमवटे वर्तमानमूर्वमूर्वानलमारुजः सम्यगभाङ्क्षीः। गभीरः। गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च। अस्मादीरन्प्रत्ययः। धकारस्य भकार आकारस्य ह्रस्वश्च गभीरगम्भीरौ। (उ० ४-३५) इत्यनेन निपात्यते। चित्स्वरः। सिन्धुः। स्यन्दू प्रस्रवणे। स्यन्देः संप्रसारणं धश्चेत्युप्रत्ययः संप्रसारणम्। दकारस्य धकारः। निदित्यनुवृत्तेराद्युदात्तः। परि षन्तः। सन्तः। अस्तेः शतरि रूपम्। उपसर्गप्रादुर्भ्यामस्तिर्यच्परः इति षत्वम्। केचित्परेः क्रियान्वयमिच्छन्ति। तदा षत्वमनुपपन्नम्। परि। निपातस्वरः। सन्तः। प्रत्ययस्वरः। वरन्त। वृञ् वरणे। भौवादिकः। लङि रूपम्। निघातः। अरुजः। रुजो भङ्ग इत्यस्य लङि रूपम्। गव्यम्। गोर्विकार इत्यर्थे गोपयसोर्यादिति यत्। यतोऽनाव इत्याद्युदात्तत्वम्॥

सिन्धुः m. sea. परि सन्तः coming in the way, obstructing; cf. नाकिः सुदासः रथ परि आस VII. 32. 10. इत्था = इत्थम्. *cd.* Sāyana and Geld. make the whole of it into a subordinate clause. संखिभ्यः इषितः. इषित urged on to activity. दृढं चित् गव्यम् ऊर्वम् अरुजः. गव्यं ऊर्वम् stall of cows; cf. सरमा दृढं गव्यं ऊर्व विदत् I. 72. 8. The story of Indra and the Angirases rescuing the cows from the Panis is referred to here; cf. also V. 29. 12; III. 90 4; etc. रुज् to break.

Tr. Neither the deep sea nor the mountain, O god invoked by many, have come in thy way and obstructed thee; thou hast so agitated for thy friends that thou hast shattered even the strong cow-stall (of the Panis).

Verse 17

शुनम् । हुवेम । मघऽवानम् । इन्द्रम् । अस्मिन् । भरे । नृऽतमम् ।
वाजऽसातौ ॥ शृण्वन्तम् । उग्रम् । ऊतये । समत्ऽसु । घ्नन्तम् ।
वृत्राणि । संऽजितम् । धनानाम् ॥ १७ ॥

हे इन्द्र वाजसातौ । वाजस्यान्नस्य सातिर्लाभो यस्मिन् सोऽयं वाजसातिः । अस्मिन्भरे । बिभ्रति जयलक्ष्मीमनेन योद्धार इति भरः संग्रामः तस्मिन् संग्रामे । शुनं शूनमुत्साहेन प्रवृद्धम् । यद्वा शुनमिति सुखनाम । सुखकरम् । मघवानं धनवन्तमत एवेन्द्रं निरतिशयैश्वर्यसंपन्नं नृतमं सर्वस्य जगतोऽतिशयेन नेतारं त्वां हुवेम कृशिका वयं यज्ञार्थमाह्वयेम । तथा शृण्वन्तमस्माभिः क्रियमाणां स्तुतिं शृण्वन्तमुग्रं शत्रूणां भयंकरं समत्सु संग्रामेषु वृत्राणि वृत्रोपलक्षितानि सर्वाणि रक्षांसि घ्नन्तं हिंसन्तं धनानां शत्रुसंबन्धिनां संजितं सम्यग्जेतारं त्वामूतये रक्षणाय वयमाह्वयेम । शुनम् । टुओश्वि गतिवृद्ध्योरित्यस्य निष्ठायां यस्य विभाषेतीट्प्रतिषेधः । यजादित्वात्संप्रसारणम् । दीर्घाभावश्छान्दसः । प्रत्ययस्वरः । हुवेम । ह्वयतेर्बहुलं छन्दसीति संप्रसारणे कृते शपो लुकि कृते च लिङि रूपम् । निघातः । भरे । भृञ् भरणे । घः कृषादित्वादाद्युदात्तः । वाजसातौ । षणु दाने । भावे क्तिन् । जनसनेत्यादिनानुनासिकस्यात्वम् । बहुव्रीहौ पूर्वपदस्वरः । समत्सु । अद भक्षणे । संपूर्वात् क्विप् । संभक्षयन्ति योद्धॄणामायूंषीति समदः संग्रामाः । कृदुत्तरपदस्वरः । घ्नन्तम् । हन हिंसागत्योरित्यस्य शतरि गमहनेत्यादिनोपधालोपः । हो हन्तेरिति घत्वम् । संजितम् । जि जये । क्विप् ॥

The rc is a refrain which appears at the end of Sūktas 30, 31, 34–36, 38, 39, 43, 48, 50. शुनं हुवेम. शुनं (ह्र) used adv. in the sense of "blessing or welfare." भर battle वाजसातौ may be taken as बहुव्रीहि or तत्पुरुष; in the latter case the meaning would be 'for winning booty.' समद् battle. सजित् winner.

Tr. May we for welfare invoke, in this battle where booty can be won, the bounteous Indra, the greatest hero, the powerful listener for (grantor of) help in combats, the killer of foes, the conqueror of wealth.

No. 12

MANDALA III SŪKTA 33

This is a dialogue hymn in which two rivers, विपाश् and शुतुद्री, and विश्वामित्र are the characters that play a part. The last two ṛks do not form a part of the dialogue, but rc 12, might be regarded as a narrative rounding off the dialogue, while ṛc 13 is a prayer which turns a poetic hymn to practical use. This passage granted for the ऋषि विश्वामित्र by the rivers was already a myth which the विश्वामित्रः delighted to narrate; cf. III. 53. 9, where विश्वामित्र besides is mentioned as taking king सुदास् with him when this crossing took place.

प्र पर्वतानामिति त्रयोदशर्चं चतुर्थं सूक्तम्। अत्रेयमनुक्रमणिका। प्र पर्वतानां सप्तोना संवादो नदीभिर्विश्वामित्रस्योत्तितीर्षोस्तत्र नदीवाक्यं चतुर्थीषष्ठ्यष्टमी-दशम्यः षष्ठीसप्तम्योस्त्विन्द्रस्तुतिरन्यानुष्टुबिति। अत्र चतुर्थीषष्ठ्यष्टमीदशमीनां नदीवाक्यत्वान्नद्य एव ऋषयः शिष्टानां विश्वामित्रवाक्यत्वात्स एव ऋषिः। अन्त्या-नुष्टुप् शिष्टास्त्रिष्टुभः। इन्द्रो देवता। यद्यपि षष्ठ्यां सप्तम्यां च $विश्वामित्रेण नद्यः स्तूयन्ते तथापि इन्द्र एव देवता। सूक्तविनियोगो लैङ्गिकः। पुरा किल विश्वामित्रः पैजवनस्य सुदासो राज्ञः पुरोहितो बभूव। स च पौरोहित्येन लब्धधनः सर्वं धनमा-दाय विपाट्छुतुद्र्योः संभेदमाययावनुययुरितरे। अथोत्तितीर्षुर्विश्वामित्रोऽगाधजले ते नद्यौ दृष्ट्वोत्तरणार्थमाद्याभिस्तुभिस्तुष्टाव॥

$ विश्वामित्रो नद्यश्च इत्यादर्शः।

Verse 1

अ । पर्वतानाम् । उशती इति । उपऽस्थात् । अश्वेइवेत्यश्वेऽइव ।
विषिते इति विऽसिते । हासमाने इति ॥ गावाऽइव । शुभ्रे इति ।
मातरा । रिहाणे इति । विऽपाट् । शुतुद्री । पयसा । जवेते
इति ॥ १ ॥

पर्वतानां गिरीणां शैलानामुपस्थादुत्सङ्गान्निर्गत्योशती समुद्रगमनं कामयमाने । गमने दृष्टान्तः । अश्वे इव ‡वडवे यथा विषिते मन्दुरातो विमुक्ते हासमाने अन्योन्यजवेन स्पर्धमाने । यद्वा हृष्यन्त्यावश्वे इव वडवे इव त्वरया गच्छन्त्यौ परस्परं हृष्यन्त्यौ । तथा गावेव शुभ्रे । यथा द्वौ गावौ शोभमानौ वर्तेते तद्वच्छुभ्रे शोभमाने । किंच मातरा । यथा मातरौ धेनू रिहाणे । अन्तर्णीतसनर्थो लिहिः । वत्सं जिह्वया लेढुमिच्छन्त्यौ शीघ्रं गच्छतस्तद्वत्समुद्रं गन्तुं जवाद्गच्छन्त्यौ पयसा संयुक्ते । विपाट् । कूलविपाटनात् विपाशनाद्वा विमोचनाद्वा विपाट् । शुतुद्री । शु क्षिप्रं तु तुन्ना तुन्नेव द्रवति गच्छतीति शुतुद्री । एतन्नामके नद्यौ प्र जवेते समुद्रं प्रति शीघ्रं गच्छतः । अत्र निरुक्तम् । पर्वतानामुपस्थादुपस्थानादुशत्यौ कामयमाने अश्वे इव विमुक्ते इति वा विषण्णे इति वा । हासमाने । हासतिः स्पर्धायां हर्षमाणे वा । गावाविव शुभ्रे शोभने मातरौ संरिहाणे विपाट्छुतुद्यौ पयसा प्रजवेते (नि० ९-३९) इति । उशती । वश कान्तौ । अस्य शतुर्ङित्त्वाद्ग्रहिज्यावयीत्यादिना संप्रसारणम् । विषिते । षिञ् बन्धन इत्यस्य कर्मणि निष्ठा । संहितायां परिनिविभ्यः सेवसितसयसिवुसहेत्यादिना (पा० ८-३-७०) षत्वम् । गतिरनन्तर इति गतेः प्रकृतिस्वरः । हासमाने । हासातेः स्पर्धाकर्मा हसे हसने वा । शानच् । तस्य लसार्वधातुकस्वरे कृते धातुस्वरः । रिहाणे । लिह आस्वादने । स्वरितेत्त्वादुभयपदी । शानच् । अदादित्वाच्छपो लुक् । लकारस्य रेफश्छान्दसः । रेफमवलम्ब्य णत्वम् । चित्त्वादन्तोदात्तः । विपाट् । पट गतौ पश बाधनस्पर्शनयोरिति वा ण्यन्तावेतौ विपूर्वौ । शकारस्य व्रश्चादिना षत्वम् । शुतुद्री छान्दसी रूपसिद्धिः । जवेते । जुङ् गतौ । भौवादिकः । ङित्त्वादात्मनेपदम् । आतो ङित इतीयादेशः । निघातः ॥

1–3. विश्वामित्र speaks. उशती. (वश्) full of ardour. उप'स्थ lap or bosom. विषित (वि + सि) let loose. हा'समाने. हास् occurs only in three places in the RV. and is used in the sense of running a race; cf. अवाजिनं वाजिना न हासयन्ति III 53. 23. रिह् = l. लिह्. जवेते from जु to rush on. *c.* The simile has been explained in 3 *cd.*

‡ आदर्शे वडवे इति नास्ति ।

Tr. From the lap of the mountains, racing like two fillies let loose, like two white mother-cows licking (their common calf), Vipāś and Sutudrī rush with their torrent.

Verse 2

इन्द्रेषिते इतीन्द्रऽइषिते । प्रऽसवम् । भिक्षमाणे इति । अच्छ ।
समुद्रम् । रथ्याऽइव । याथः ॥ समाराणे इति संऽआराणे ।
ऊर्मिऽभिः । पिन्वमाने इति । अन्या । वाम् । अन्याम् । अपि ।
एति । शुभ्रे इति ॥ २ ॥

हे नद्यौ इन्द्रेषिते इन्द्रेण प्रेषिते प्रसवं तस्येन्द्रस्यानुज्ञां भिक्षमाणे प्रार्थयमाने युवां समुद्रमच्छाभिमुख्येन याथः गच्छथः । तत्र दृष्टान्तः । रथ्येवेति । यथा रथिनौ लक्ष्यं देशमभिगच्छतस्तद्वत । किं कुर्वत्यौ । समाराणे परस्परं संगच्छन्त्यावूर्मिभिस्तरङ्गैः पिन्वमाने परिसरप्रदेशं संतर्पयन्त्यौ शुभ्रे शोभमाने । युवां समुद्रं गच्छथ इति पूर्वेणान्वयः । तथा वां युवयोर्मध्येऽन्यैकान्यामपरां नदीमप्येति । अपिगच्छति । परस्परमैक्यमापद्यत इत्यर्थः । इन्द्रेषिते । इष गतावित्यस्य कर्मणि निष्ठायास्तीपसहेत्यादिना इडागमः । तृतीया कर्मणीति पूर्वपदस्वरः । प्रसवम् । षू प्रेरण इत्यस्याप् । थाथादिस्वरः । भिक्षमाणे । भिक्ष याच्ञायाम् । आत्मनेपदी । शानचो लसार्वधातुकस्वरेणानुदात्तत्वे धातुस्वरः । रथ्येव । रथस्येमौ । तस्येदमित्यर्थे रथाद्यदिति यत्प्रत्ययः । तित्स्वरितः । इवेन विभक्त्यलोपः । याथः । यातेर्लटि रूपम् । समाराणे । ऋ गताविति लिट् । संपूर्वस्यार्तेः समो गमीत्यादिनात्मनेपदत्वात्तस्य कानजादेशः । ऋच्छत्यृतामिति गुणः । पिन्वमाने । पिवि सेचने । भ्वादिः । लसार्वधातुकस्वरेण शानचोऽनुदात्तत्वे धातुस्वरः ॥

भिक्षमाणे from भिक्ष् to seek. अच्छ towards; in almost all places it is changed into अच्छा. रथ्या' (इव), du. of रथी, occupants of the chariot, i. e. warrior and charioteer; cf. II. 39. 2. 3; III. 36. 6; VII. 39. 1. समाराणे'. आराण perf. part. from ऋ. अ'पि एति to flow into. शुभ्र shining, beautiful.

Tr. Impelled by Indra, seeking acceleration, O beautiful ones, you are proceeding to the sea (swiftly and well-paired) like the warrior and the charioteer; flowing together with swelling waves, one of you flows into the other.

Verse 3

अच्छ । सिन्धुम् । मातृतमाम् । अयासम् । विपाशम् । उर्वीम् । सुभगाम् । अगन्म ॥ वत्सऽइव । मातरा । संरिहाणे इति संऽरिहाणे । समानम् । योनिम् । अनु । संचरन्ती इति संऽचरन्ती ॥ ३ ॥

हे नद्यौ मातृतमामतिशयेन मातरं सिन्धुं स्रवन्तीं शुतुद्रीं त्वामच्छाभिमुख्येनायासम विश्वामित्रोऽहं प्राप्तोऽभूवम् । उर्वीं महतीं सुभगां सौभाग्यवतीं विपाश त्वामगन्म वयं प्राप्ताः स्मः । किं कुर्वत्यौ । मातरा मातरौ द्वे धेनू वत्समिव संरिहाणे । अन्तर्णीतसनर्थो लिहिः । जिह्वया लेहुमिच्छन्त्यौ यथा वत्समनुगच्छतस्तद्वत् समानमेक योनिं स्थानं समुद्रमनु अभिलक्ष्य संचरन्ती सम्यक् चरन्त्यौ । *युवामयासमिति पूर्वेणान्वयः । अयासम् या प्रापण इत्यस्य रूपम् । इडभावश्छान्दसः । अगन्म । गमेर्लङि बहुलं छन्दसीति शपो लुक् । स्वोश्वेति मकारस्य नकारः । निघातः । संचरन्ती । चरतिर्गत्यर्थः । तृतीयाद्युक्तत्वाभावादात्मनेपदाभावः । शतुर्लसार्वधातुकस्वरेणानुदात्तत्वे कृते धातुस्वरः ॥

अयासम् Aor. 1 s. from या. योनिम्, ordinarily, place of residence; here, bed.

Tr. I have approached the most motherly of streams (the Śutudrī); we have come to the broad, lovely Vipāś; like two mother-cows licking their calf, they flow along a common bed.

Verse. 4

एना । वयम् । पयसा । पिन्वमानाः । अनु । योनिम् । देवऽकृतम् । चरन्तीः ॥ न । वर्तवे । प्रऽसवः । सर्गऽतक्तः । किंऽयुः । विप्रः । नद्यः । जोहवीति ॥ ४ ॥

* अयासिषमिति इत्यादर्शः ॥

एवं स्तुते नद्यौ विश्वामित्रे प्रत्यूचतुः । एनेनेन पयसा पिन्वमानाः संतर्पयन्त्यो देवकृतं देवेनेन्द्रेण कृतं संदिष्टं योनिं स्थानं समुद्रमनु लक्षीकृत्य चरन्तीर्गच्छन्त्यो वयमास्महे । द्वयोर्बहुवचनं पूजार्थम् । तासामस्माकं सर्गतक्तः सर्गे गमने प्रवृत्तः प्रसव उद्योगो न वर्त्तवे निवर्तनाय न भवति । किंयुः किमिच्छन्नसौ विप्रो ब्राह्मणो नद्यो नदीरस्मान् जोहवीति भृशमाह्वयति । एना । इदंशब्दस्य तृतीयाया एनादेशः । सुपां सुलुगिति तृतीयाया अजादेशः । ऊडिदमिति विभक्तेरुदात्तत्वम् । पिन्वमानाः । पिवि सेचने । देवकृतम । तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरः । वर्त्तवे । वृतु वर्तने । तुमर्थे तवेन्प्रत्ययः । नित्स्वरः । सर्गतक्तः । क्ते चेति पूर्वपदप्रकृतिस्वरः । किंयुः किमिच्छन् । क्यचि मान्ताव्ययप्रतिषेधः (पा० ३-८-१) इति छान्दसत्वादत्र प्रतिषेधो न भवतीति क्यच् । क्याच्छन्दसीत्युप्रत्ययः । प्रत्ययस्वरः । नद्यः । छान्दसो यणादेशः । जोहवीति । ह्वयो यङ्लुक्यभ्यस्तस्य चेति संप्रसारणे कृते गुणो यङ्लुकोरित्यभ्यासस्य गुणः । यङो वेतीडागमः । गुणः । निघातः ॥

The rivers speak. वयंम्. The rivers use invariably the pl. when speaking of themselves; वि० uses the du. only in 1–3; even the poet uses the pl. in 12. सर्गतक्तः प्रसवः न वर्तवे. सर्गतक्त (सर्ग् from सृज् to let loose, तक्त from तक् to rush; also सर्गप्रतक्त I. 65. 6), dashing forward on account of the initial urge. वर्तवे from वृत् according to Sāy., who reads वर्त्तवे but वृत् is nowhere anit before तु it must be from वृ to stop. किंयुः desiring what; cf. ऋतयु, अश्वयु, वीरयु, सुम्नयु; etc.

Tr. Here we are, swelling with water and flowing in a bed fashioned by gods. Our torrent, rushing with its original urge, cannot be stopped. With what object in view does the singer invoke the rivers?

Verse 5

रंमध्वम् । मे । वर्चसे । सोम्यायं । ऋतऽवरीः । उप । मुहूर्तम् ।
एवैः ॥ प्र । सिन्धुम् । अच्छ । बृहती । मनीषा । अवस्युः ।
अह्वे । कुशिकस्य । सूनुः ॥ ५ ॥

विश्वामित्रो नदीः प्रतिब्रूते । ऋतावरीः ऋतमुदकम् तद्वत्यो हे नद्यो यूयं मे विश्वामित्रस्य मम सोम्याय । उत्तीर्याहं सोमं संपादयामीत्येवं सोमसंपादिने ।

वचसे तदर्थमेवैः । पञ्चम्यर्थे तृतीया । शीघ्रगमनेभ्यो मुहूर्तं मुहूर्तमात्रमुपरमध्वम् । उपपूर्वो रमिरुपसंहारे वर्तते । क्षणमात्रं शीघ्रगमनादुपरता भवत । सामान्येन नदीषूच्यमानासु समीहितं प्रयोजनमकुर्वतीषु पुरोवर्तिनीं शुतुद्रीं प्रति ब्रूते । कुशिकस्य राजर्षेः सूनुर्विश्वामित्रोऽहं बृहती महत्या मनीषा मनीषया स्तुत्यावस्युरात्मनो रक्षणमिच्छन् सन् सिन्धुं शुतुद्रीं त्वामच्छाभिमुख्येन प्राह्वे । प्रकर्षेणाह्वयामि । अत्र निरुक्तम् । उपरमध्व मे वचसे सोम्याय सोमसंपादिन ऋतावरीरृतवत्यः । ऋतमित्युदक नाम प्रत्यृतं भवति मुहूर्तमेवैरयनैरवनैर्वा प्राभिह्वयामि । सिन्धुं बृहत्या महत्या मनीषया मनस ईषया स्तुत्या प्रज्ञया वावनाय कुशिकस्य सूनुः । कुशिको राजा बभूव । इति (नि० २-२५) । रमध्वम् । रमु उपरमे । उपपूर्वाद्रमतेर्विभाषाकर्मकात् (पा० १-३-८५) इत्यात्मनेपदम् । ऋतावरीः । ऋतशब्दान्मत्वर्थे छन्दसीवनिपाविति वनिप् । वनो र चेति ङीप् रेफश्चान्तादेशः । वा छन्दसीति सवर्णदीर्घः । आमन्त्रितस्य पादादित्वात्षाष्टिकमायुदात्तत्वम् । एवैः । इण् गणौ । इणशीङ्भ्यां वन् । आर्धधातुकलक्षणो गुणः । नित्स्वरः । बृहती मनीषा । उभयत्र तृतीयायाः पूर्वसवर्णदीर्घः । अवस्युः । अवो रक्षणमिच्छन् । सुप आत्मनः क्यच् । नः क्य इति नकारान्तस्य पदसंज्ञाया नियमितत्वादत्र सकारस्य रुर्न भवति । क्याच्छन्दसीत्युप्रत्ययः । अह्वे । ह्वयतेर्लुङि सिच आत्मनेपदेष्वन्यतरस्यां (पा० ३-१-५८) इत्याङादेशः । गुणः । निघातः ॥

V. speaks. सोम्या य वचसे उप रमध्वं. The pl. has been used for du. सोम्य connected with सोम, i. e. either Soma-like and hence pious, or used in connection with सोम. The dative appears to be idiomatic; cf. आपश्चित् अस्मै अरमन्त III. 56. 4. ऋतवरीः the त is always lengthened in सं; see II. 28. 6; °वरी is the fem. form of °वन्. एव course, current, from इ; cf. अग्नेः एवेन I. 28. 3; मरुतां एवाः V. 41. 5. प्र. The verb is dropped in *c*, but can easily be supplied. The सिन्धु is शुतुद्री as can be seen from rc 2. अह्वे Aor. 1 s. from ह्वे.

Tr. O holy ones, stop a moment in your course in deference to my words that have accompanied the Soma. A great longing (in me) goes forth towards the river (Śutudrī). Desirous of (your) protection Kuśika's son has invoked (you).

Verse 6

इन्द्रः । अस्मान् । अरदत् । वज्रबाहुः । अप । अहन् । वृत्रम् ।

परिऽधिम् । नदीनाम् ॥ देवः । अनयत् । सविता । सुऽपाणिः ।
तस्य । वयम् । प्रऽसवे । यामः । उर्वीः ॥ ६ ॥ * स्माँ

नवः प्रत्यूचुः । हे विश्वामित्र । वज्रबाहुः वज्रयुक्तो बाहुर्यस्यासौ वज्रबाहुः तादृशो बलवानिन्द्रो नदीरस्मानरदत् । रदतिः खनतिकर्मा । अखनत् । कथमखनत् । उच्यते । नदीनां शब्दकारिणीनामपां परिधिं परितो निहितम् । उदकमन्तः कृत्वा परितो वर्तमानमित्यर्थः । तादृशं वृत्रम् । वृणोत्याकाशमिति वृत्रो मेघः । तं मेघमपाहन् जघान । तस्मिन् हत आपः पतिताः । ताभिर्गच्छन्तीभिर्वयं खाताः । एवं मेघहननद्वारेणाखनत् । न केवलमखनत् किं तर्हि सविता सर्वस्य जगतः प्रेरकः सुपाणिः शोभनहस्त उत्पत्तिस्थितिकर्तृत्वात्तादृशो देवो द्योतमान इन्द्रोऽस्माननयत् । मेघभेदनं कृत्वोदकप्रेरणेन समुद्रमपूरयत । तस्य तादृशसामर्थ्योपेतस्येन्द्रस्य प्रसवेऽभ्यनुज्ञायां वर्तमाना उर्वीरुदकैः प्रभूता वयं यामः गच्छामः । न तव वचनादुपरमामहे । उक्तार्थं यास्को ब्रवीति । इन्द्रो अस्मानरदद्वज्रबाहू रदतिः खनतिकर्मापाहन्वृत्रं परिधिं नदीनामिति व्याख्यातम् । देवोऽनयत्सविता सुपाणिः कल्याणपाणिः । पाणिः पणायतेः पूजाकर्मणः । प्रगृह्य पाणी देवान्पूजयन्ति । तस्य वयं प्रसवे याम उर्वीरुर्व्यः इति (नि० २-२६) । अरदत् । रदतेर्लङि रूपम् । वज्रबाहुः । बहुव्रीहौ पूर्वपदस्वरः । अहन् । हन्तेर्लङि रूपम् । निघातः । परिधिम् । डुधाञ् धारणपोषणयोरित्यस्मात्कर्मण्युपसर्गे घोः किरिति किप्रत्ययः । आतो लोपः । कृदुत्तरपदस्वरः । अनयत् । नयतेर्लङि रूपम् । सुपाणिः । पण व्यवहारे स्तुतौ च । अशिपणाय्यो रुडायलुकौ च (उ० ४-१२५) इतीण् । आयलुक् । बहुव्रीहौ नञ्सुभ्यामिति स्वरः । प्रसवे । षू प्रेरणे । ऋदोरविति भावेऽप्प्रत्ययः । थाथघञ्क्तेत्युत्तरपदान्तोदात्तत्वम् । यामः । या प्रापण इत्यस्य लटि रूपम् । निघातः । उर्वीः । उरुशब्दाद्वोतो गुणवचनादिति ङीष् । वा छन्दसीति सवर्णदीर्घः । प्रत्ययस्वरः ॥

The rivers speak. For अरदत् cf. I. 116. 7. अप अहन् imp. 3. s. from हन्. नदीनां परिधिम्. परिधि (धा with परि) he who envelopes or surrounds; cf. अद्रिं परिधिं IV. 18. 6. देवोऽनयत् acc. to प्रा० 150.

Tr. Indra armed with the Vajra cut us (our paths); he killed away the Vṛtra who encompassed the rivers. The divine Savitṛ with his beautiful hands led us. We go, broad as we are, at his instance.

Verse 7

प्रऽवाच्यम् । शश्वधा । वीर्यम् । तत् । इन्द्रस्य । कर्म । यत् ।
अहिम् । विऽवृश्चत् ॥ वि । वज्रेण । परिऽसदः । जघान । आयन् ।
आपः । अयनम् । इच्छमानाः ॥ ७ ॥ * यँ १

योऽयमिन्द्रोऽहिं मेघं विवृश्चत् उदकप्रेरणार्थं जघानेति यत्कर्म च्छेदनरूपं तदिदं तस्येन्द्रस्य वीर्यं सामर्थ्यं शश्वधा सर्वदा प्रवाच्यम् । प्रकर्षेण वचनीयम् तथा स इन्द्रः परिषदः परितः सीदत आसीनान् प्रतिबन्धकारिणोऽसुरान् वज्रेण विजघान । अथायनं स्थानमिच्छमाना इच्छन्त्य आप आयन् यान्ति । प्रवाच्यम् वच परिभाषण इत्यस्माद्दहलोर्ण्यदिति ण्यत् । णित्त्वादुपधावृद्धिः । वचोऽशब्द-संज्ञायाम् (पा० ७-३-६७) इति कुत्वाभावः । व्यत्ययेनायुदात्तत्वम् । यद्वा वाचयतेरचो यत् । यतोऽनाव इति स्वरः । शश्वधा । शश्वच्छब्दात्स्वार्थे धाप्रत्यय-स्तकारलोपश्च द्रष्टव्यः । विवृश्चत । ओव्रश्चू छेदने । तुदादिः । लङि ग्रहिज्यावयी-व्यादिना संप्रसारणम् । सह सुपेत्यत्र सहेति योगविभागात्समासः । समासस्वरः । परिषदः । क्विप् । संहितायां सदिरप्रतेरिति षत्वम् । जघान । हन्तेर्लिटि णलि रूपम् । निघातः । आयन् । अय गताविति्यस्य लङि रूपम् । पादादित्वादनिघातः । इच्छमानाः । इषु इच्छायामित्यस्माद्व्यत्ययेन शानच् । तस्य लसार्वधातुकस्वरे कृते प्रत्ययस्वरः ॥

V. speaks. शश्वधा' always; it occurs only here. परिषदः (परि+सद्) occurs only here; Gr. surrounding or besieging; Geld. barriers, enclosure. अयनम् Geld. outlet; Gr. path or way; it occurs only here, but न्ययन्, आयन्, परायण occur.

Tr. That heoric deed of Indra that he cut away the dragon must be for ever proclaimed; he smote off with his thunderbolt the barriers of waters. The waters flowed, seeking a way (for themselves).

Verse 8

एतत् । वचः । जरितः । मा । अपि । मृष्ठाः । आ । यत् ।
ते । घोषान् । उत्ऽतरा । युगानि ॥ उक्थेषु । कारो इति ।

प्रति । नः । जुषस्व । मा । नः । नि । कः । रिति कः । पुरुषत्रा ।
नमः । ते ॥ ८ ॥

नद्यः प्रसङ्गादिन्द्रस्तोत्रं कृत्वा विश्वामित्रं प्रत्यूचुः । जरितः स्तोतर्हे विश्वामित्र ते त्वदीयं यत्संवादात्मकं वचस्त्वं* मनीषा इत्यादि घोषानुद्घोषयन्वर्तसे तद्वचो मापि सृष्टाः मा विस्मार्षीः । किं कारणम् । उत्तरा युगान्युत्तरेषु याज्ञिकेषु युगेष्वहःसूक्थेषु कारो शस्त्राणां कर्तस्त्वं नोऽस्मान्प्रति जुषस्व । संवादात्मकेन तेन वाक्येन प्रतिसेवस्य । इदानीं नोऽस्मान् पुरुषत्रा पुरुषेषु मा नि कः । उक्तिप्रत्युक्तिरूपसंवादवाक्याध्यापनेन नितरां पुंवत् प्रागल्भ्यं मा कार्षीः । ते तुभ्यं नमः । सृष्टाः । सृजूष् शुद्धावित्यस्य लाङि व्यत्ययेनात्मनेपदम् । अदादित्वाच्छपो लुक् । व्रश्चादिना षत्वम् । निघातः । घोषान् । घुषिर् संशब्दन इत्यस्य शतरि सर्वविधीनां छन्दसि विकल्पितत्वादतो गुण इति पररूपत्वाभावः । सवर्णदीर्घः । शतुर्लसार्वधातुकस्वरे कृते धातुस्वरः । युगानि । युजिर् योगे । उञ्छादिषु घञन्तत्वेन निपातनादगुणत्वम् । विशिष्टविषयं च निपातनमिष्यते । कालविशेषे रथाद्युपकरणे चेति तत्र पाठादेवान्तोदात्तत्वम् । कालाध्वनोरत्यन्तसंयोग इति द्वितीया । कारो । करोतेः कृवापाजिमीत्यादिना उण्प्रत्ययः । आमन्त्रितत्वान्निघातः । कः । करोतेर्लुङि चेर्मन्त्रे घसेत्यादिना लुक् । हलङ्यादिना सिपो लोपः । न माङ्योग इत्यडभावः । पुरुषत्रा । देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलमिति सप्तम्यर्थे त्राप्रत्ययः । प्रत्ययस्वरः ॥

The rivers speak. अपि सृष् to forget. आ घोषान् subj 3 pl. from घुष् with आ; Gr. proclaim loudly; Geld. listen; Gr. also understands the word in the sense of listening in VIII. 64. 4; X. 89. 16. प्रति जुषस्व to show affection to; cf. पितेव पुत्रान् प्रति जुषस्व VI. 54. 2. मा नः नि कः पुरुषत्रा. The affix त्रा gives the meaning of 'among'; cf. अस्मत्रा, पाकत्रा, मर्त्यत्रा, देवत्रा, दक्षिणत्रा. निकृ to humiliate; cf. II. 23. 12.

Tr. Do not forget these words, O singer, so that future generations might listen to thee. Have kindly feelings to us in thy songs, O poet; do not let us down amongst men. Bow unto thee.

---

* नोऽभीत्या इत्यादर्शः ।

Verse 9

ओ इति । सु । स्वसारः । कारवे । शृणोत । ययौ । वः । दूरात् ।
अनसा । रथेन ॥ नि । सु । नमध्वम् । भवत । सुऽपाराः ।
अधःऽअक्षाः । सिन्धवः । स्रोत्याभिः ॥ ९ ॥

विश्वामित्रो नदीः प्रत्युवाच । स्वसारो भगिन्यः सिन्धवो हे नद्यः कारवे स्तोत्रं कुर्वाणस्य मम वचनं सु सुष्ठु ओ शृणोत । शृणुतैव । अनसा शकटेन रथेन च सह दूराद्विप्रकृष्टादेशाद्वो युष्मान्ययौ । प्राप्तोऽस्मि । यूयं सु सुष्ठु नि नमध्वम् । आत्मना स्वयं प्रह्वा भवत । तथा सुपारा । रथादीनां तीरासुखेनावरोहणारोहणे यथा स्यातां तथा शोभनरोधसश्च भवत । किंच यूयं स्रोत्याभि. स्रवणशीलाभिरद्भिरधोअक्षा रथाङ्गस्याक्षस्याधस्ताद्भवत । यदापोऽक्षस्याधस्ताद्भवन्ति तदा रथादीनि नेतुं शक्यन्ते । तस्मात्तत्परिमाणोदका भवतेत्यर्थाभिप्रायः । ओ इति प्रगृह्यसंज्ञा । शृणोत । श्रु श्रवण इत्यस्य लोटि तप्रत्ययस्य तप्तनप्तनथनाश्चेति तबादेशः । पित्त्वाद्गुणः । निघातः । ययौ । या प्रापणे इत्यस्य भूतमात्रे लिटयुत्तमे णल्यात औ णल इत्यौकारः । एकादेशस्वरः । वः । युष्मच्छब्दस्य द्वितीयाया बहुवचनस्य वस्नसाविति वसादेशः । षू । निपातस्येति संहितायां दीर्घः । नमध्वम् । णमु प्रह्वत्वे शब्दे चेत्यस्य कर्मकर्तरि न दुहस्नुनमां यक्चिणाविति प्रतिषेधाद्यगभावः । अधोअक्षाः । अधरशब्दस्य पूर्वावराणामसि पुरधवश्चैषामित्यसिप्रत्ययोऽधादेशश्च । अक्षशब्दोऽशू व्याप्तावित्यस्मादक्षेर्दैवने (उ० ३-६५) इति सप्रत्ययान्तः । कृदुत्तरपदप्रकृतिस्वरः । सिन्धवः । आमन्त्रितत्वान्निघातः । स्रोत्याभिः । स्रोतःशब्दात्स्रोतसो विभाषा ङ्यङ्ङ्यौ (पा० ४-४-११३) इति ङ्यप्रत्ययः । ङित्त्वाट्टिलोपः । प्रत्ययस्वरः ॥

V. speaks. ओ' = आ + उ. ययौ'. The RV. often employs forms of the 1 p. and 2 p. of the perf; cf. ययाथ in rc. 10. सुपारा': (from सु + पृ) easily fordable. अधोअक्षा' (अक्षस्य अधः भवा). स्रोत्या' stream.

Tr. O sisters, do please listen to the poet; he has come to you from afar with cart and chariot; bend down low, please; be easily fordable, O rivers, with your streams reaching below the axle.

Verse 10

आ । ते । कारो इति । शृणवाम । वचांसि । ययाथ । दूरात् ।
अनसा । रथेन ॥ नि । ते । नंसै । पीप्यानाऽइव । योषा ।
मर्यायऽइव । कन्या । शश्वचै । त इति ते ॥ १० ॥

नद्यः पूर्वं विश्वामित्रवाक्यं प्रत्याख्यायानया ऋचा तस्य वाक्यमाशृण्वुः । कारो स्तोत्रं कुर्वाण हे विश्वामित्र ते तव वचांसीमानि वाक्यान्याशृणवाम शृणुमः । तव समीहितं प्रयोजनं कुर्म इत्यर्थः । अनसा शकटेन रथेन च सह ययाथ । यतो दूरादागतोऽसि । वयं च ते त्वदर्थं नि नंसै । नीचैर्नमाम । प्रत्येकविवक्षयात्रैकवचनम् । रथेन गन्तुं गाधोदका भवामेत्यर्थः । तत्र दृष्टान्तः । पीप्यानेव योषा । पीप्याना पुत्रं स्तनं पाययन्ती योषा माता यथा प्रह्वीभवति । दृष्टान्तान्तरम् । यथा कन्या युवतिर्मर्यायेव मनुष्याय पित्रे भ्रात्रे वा शश्वचै परिष्वजनाय नम्रा भवति तद्वत्ते त्वदर्थं प्रह्वीभवामः । ते इति पुनरुक्तिरादरार्था । एतामृचं यास्क एवं व्याचष्टे । आशृणवाम ते कारो वचनानि याहि दूरादनसा च रथेन च निनमाम ते पाययमानव योषा पुत्रं मर्यायेव कन्या परिष्वजनाय निनमा इति वा (नि० २-२७) इति । कारो । संबुद्धौ शाकल्यस्येतौ (पा० १-१-१६) इति प्रगृह्यसंज्ञा । शृणवाम । श्रु श्रवण इत्यस्य लोट्याडुत्तमस्य पिच्चेत्याडागमः । पित्त्वादनुदात्तः । निघातः । ययाथ । या प्रापण इत्यस्य भूतमात्रे लिटि थल्येकाच उपदेशेऽनुदात्तादितीट्प्रतिषेधः । लित्स्वरः । अनसा । सहार्थे तृतीया । नंसै । णमु प्रह्वत्वे इत्यस्य लेट्युत्तमे लेटि सिब्बहुलमिति सिप् । वैतोऽन्यत्रेत्यैकारादेशः । निघातः । पीप्यानेव । पीङ् पाने इत्यस्यान्तर्भावितण्यर्थस्य लिटि कानचि रूपम् । चित्स्वरः । योषा । युमिश्रणे । वृतृवदिहनीत्यादिना (उ० ३-६२) सप्रत्ययः । यौतीति योषा । वृषादित्वादायुदात्तः । शश्वचै । ष्वञ्ज परिष्वङ्ग इत्यस्मात्संपदादिलक्षणो भावे क्विप् । पृषोदरादित्वादिष्टरूपसिद्धिरन्तोदात्तश्च ॥

ab. The rivers speak. पीप्याना इव योषा नि नंसै. पीप्याना perf. part. from पी–प्या–प्यै to swell with milk; cf. इषं जरित्रे नद्यः न पीपेः IV. 16. 21. नंसै aor. 1. s. from नम्. *c.* One river speaks. शश्वचै ते. शश्वचै subj. from perf. of श्वञ्च् to bend; cf. गिरीन् श्वञ्चयः X. 138. 2. मर्य a bride-groom; cf. मर्यो न शुभ्रः तन्वे मृजानः IX. 96. 20. *d.* The other river speaks. उत् श्वञ्च् to bend upwards, to heave up. Both नम् and श्वञ्च् occur in उत् श्वञ्चस्व नि नम वर्धमान. X. 142. 6. The accent on शश्वचै has

been accounted for by Old. by supposing this sentence to be of the type of "Come, do this", ZDMG. 60, 731; but the only proper explanation is by supposing शश्वच्चे to begin a new sentence; cf. Old. ZDMG. 60. 739.

Tr. (Both) "We have listened to thy words. O poet; thou hast come from afar with cart and chariot". (One) "Like a woman with swelling bosom (suckling her baby), like a maid for her lover, I will bend for thee." (The other) "I will bend for thee."

Verse 11

यत् । अङ्ग । त्वा । भरताः । संऽतरेयुः । गव्यन् । ग्रामः ।
इषितः । इन्द्रऽजूतः ॥ अर्षात् । अहं । प्रऽसवः । सर्गऽतक्तः ।
आ । वः । वृणे । सुऽमतिम् । यज्ञियानाम् ॥ ११ ॥

विश्वामित्रो नदीः प्रत्युवाच । अङ्गेत्यामन्त्रणे । हे नद्यो यद्यस्माद्युष्माभिरुत्तितीर्षोर्ममोत्तरणमभ्यनुज्ञातं तस्माद्भरता भरतकुलजा मदीया सर्वे त्वा परस्परमेकतामापन्नां नदीं त्वां संतरेयुः । सम्यगुत्तीर्णा भवेयुः । तदेव विशिनष्टि । गव्यन्गा उदकानि तरीतुमिच्छन्नीषितस्त्वयाभ्यनुज्ञात इन्द्रजूतो युष्माक प्रवर्तकेणेन्द्रेण च प्रेरितो ग्रामो भरतानां संघोऽर्षात् संतरेत् । यतः सर्गतक्तो गमनाय प्रवृत्तः प्रसवस्तेषामुद्योगोऽह पूर्वं युष्माभिरनुज्ञातः । अहं तु यज्ञियानां यज्ञार्हाणां वो युष्माकं सुमतिं शोभनां स्तुतिमा वृणे । सर्वतः संभजे । भरताः । भरतशब्दादुत्सादित्वादञ् । तस्य यञओश्चेति लुक् । अतच्प्रत्ययस्वरः । संतरेयुः । तरतेर्लिङि जुसि रूपम् । झेर्लसार्वधातुकस्वरे धातुस्वरः । तिङि चोदात्तवतीति गतेर्निघात. । गव्यन् । गो आत्मन इच्छन् । सुपः क्यच् । एकादेशस्वरः । ग्रामः । ग्रसतेरा च । (उ० १-१४१) इति मन्प्रत्ययः आकारादेशश्च । नित्स्वरः । इन्द्रजूतः । जू इति सौत्रो धातुर्गत्यर्थः । अनुदात्तङित आत्मनेपदेष्वन्यतरस्यामिति कित्त्वात् । कितीति निष्ठायामिड्प्रतिषेधः । तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरः अर्षात् । ऋ गताविति अस्य लेटि तिपि सिब्बहुलमिति सिप् । लेटोऽडागमः । एकाच इतीट्प्रतिषेधः । गुणः । प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः । वृणे । वृङ् संभक्ताविति अस्य लटि रूपम् । यज्ञियानाम् । यज्ञर्त्विग्भ्यां घखञाविति घप्रत्ययः । प्रत्ययस्वरः ॥

V. speaks. अङ्ग is a particle of address. गव्यन् going in search of cows. ग्रामः a clan, a band, a host. अर्षात् subj. of ऋष्; cf. अहर्षु II. 38. 3. आ वृ to beg for; cf. मरुता अवांसि आ अवृ IV. 55. 5.

Tr. After the Bharatas, an Indra-sped, cow-seeking, impetuous host, have crossed thee, then may thy current flow, dashing with its initial urge. I seek the good-will of you, the holy ones.

Verse 12

अतारिषुः । भरताः । गव्यवः । सम् । अभक्त । विप्रः । सुऽमतिम् । नदीनाम् ॥ प्र । पिन्वध्वम् । इषयन्तीः । सुऽराधाः । आ । वक्षणाः । पृणध्वम् । यात । शीभम् ॥ १२ ॥

गव्यवो गा आत्मन इच्छन्तो भरता भरतकुलजाः सर्वेऽतारिषुः तां नदीं समतरन् । विप्रो मेधावी विश्वामित्रो नदीनां सुमतिं शोभनां स्तुतिं समभक्त समभजत । यूयं तु यथापूर्वमिषयन्तीः कुल्यादिद्वारान्नं कुर्वाणा अत एव सुराधाः शोभनधनोपेतो यूयं वक्षणाः कृत्रिमसरितः कुल्याः प्र पिन्वध्वम् प्रकर्षेण तर्पयत । आ पृणध्वम् । ताः सर्वतः पूरयत च । शीभं शीघ्रं गच्छत च । अतारिषुः । तॄ प्लवनतरणयोरित्यस्य लुङि सिचि वृद्धिः परस्मैपदेष्विति वृद्धिः । अडागमस्वरः । गव्यवः । सुपः क्यच् । क्याच्छन्दसीत्युप्रत्ययः । तस्य स्वरः । अभक्त । भज सेवायामित्यस्य लुङि सिचो झलो झलीति लोपः । पादादित्वादनिघातः । पिन्वध्वम । पिवि सेचन इत्यस्य लोटि रूपम् । निघातः । इषयन्तीः । इषं कुर्वत्यः । तत्करोतीति णिच् । णाविष्ठवत्प्रातिपदिकस्येतीष्ठवद्भावाट्टेरिति टिलोपः । वा छन्दसीति सवर्णदीर्घः । प्रत्ययस्वरः । पृणध्वम् । पृण प्रीणने । लोटि रूपम् । व्यत्ययेनात्मनेपदम् । वाक्यभेदादनिघातः । यात । या प्रापण इत्यस्य लोटि रूपम् । अत्रापि न निघातः । शीभम् । शीभृ कत्थने । श्लाघ्यतेऽनेन तद्वानिति करणे घञ् । ञित्स्वरः ॥

The poet speaks. Geld. regards this as V.'s speech but *b* is against it. इषयन्तीः (causal of इष् to set in motion, and to be distinguished from इषय denom. from इष्) enlivening, refreshing, stimulating; cf. नः वस्त्र्यैः इषयन्ती रोदसी IV. 56. 4. सुराधाः from राधस् gift or blessing. वक्षणाः river-bed. शीभम् swiftly; cf. प्र यात शीभम् आशुभिः I. 37. 14.

Tr. The cow-seeking Bharatas have crossed (the rivers); the poet has been admitted to the favour of the rivers. Swell forth, giving new life, bringing excellent gifts, overflow your bed; run swiftly.

Verse 13

उत् । वः । ऊर्मिः । शम्याः । हन्तु । आपः । योक्त्राणि । मुञ्चत ॥ मा । अदुःऽकृतौ । विऽएनसा । अघ्न्यौ । शूनम् । आ । अरताम् ॥ १३ ॥

पूर्वमुत्तितीर्षुर्विश्वामित्रो नदीरुक्त्वाधुनोत्तितीर्षुः पुनराह । हे नद्यो वो युष्माकमूर्मिस्तरङ्गः शम्या *युग्यकटपार्श्वादिसंलग्ना रज्जव उदूर्ध्वं यथा भवन्ति तथा हन्तु गच्छतु । स तरङ्गो रज्जूनामधो गच्छतीत्यभिप्रायः । तथा हे आपो यूयं योक्त्राणि ता रज्जूर्मुञ्चत । यथा न स्पृशन्ति तथा यान्तीत्यभिप्रायः । व्येनसा विगतपापे अत एवादुष्कृतौ कल्याणकर्मकारिण्यौ अघ्न्यावघ्न्ये न केनापि तिरस्करणीये विपाद्रुद्भुतघ्यौ शूनं सवृद्धिम् । आरतामागच्छताम् । एवं विश्वामित्रो नदी स्तुत्वा ताभिरनुज्ञातोऽतरादिति । ऊर्मिः । ऋ गतौ । अर्तेरूच्चेति मिप्रत्ययः । ऊरित्यमादेशो धातोः । ऋच्छतीत्यूर्मिः । प्रत्ययस्वरः । शम्याः । शमु उपशमे । पोरदुपधादिति यत्प्रत्ययः । यतोऽनाव इत्याद्युदात्तत्वम् । हन्तु । हन हिंसागत्योरित्यस्य लोटि रूपम् । निघातः । योक्त्राणि । युजिर् योगे । करणे दात्रीशसयुयुजेत्यादिना ष्ट्रन्प्रत्ययः । नित्स्वरः । मुञ्चत । मुच्लृ मोक्षणे । निघातः । अदुष्कृतौ । इसुसोः सामर्थ्य इति विसर्जनीयस्य षत्वम् । व्येनसा । बहुव्रीहौ पूर्वपदस्वरः । सुपो डादेशः । अघ्न्यौ । हन हिंसागत्योरित्यस्य नञ्पूर्वस्याघ्न्यादयश्चेति निपातनाद्यक् । किच्चाद्युपधालोपः । हो हन्तेरिति घत्वम् । सर्वविधीनां छन्दसि विकल्पितत्वाद्धौडः शीभावाभावः । एकादेशस्वरः । शूनम् । श्वयतेर्नपुंसके भावे क्त इति क्तः । यजादित्वात्संप्रसारणम् । हल इनि दीर्घत्वम् । ओदितश्चेति निष्ठानत्वम् । निष्ठा च द्व्यजनादित्याद्युदात्तः । अरताम् । ऋ गताविति्यस्य लुङि च्लेः सार्तिशास्त्यार्तिभ्यश्चेत्यङादेशः । ऋटशोऽङि गुणः । न माङ्योग इत्यडभावः । निघातः ॥

This rc is used as a charm to be used while crossing deep waters; it is obviously included in the hymn because of an

* शम्या युगकीला युग्य० इत्यादर्शः

apparently similar purpose. Old. tries to fit it into the narrative thus: after V.'s crossing, the rivers once more flow with the full current; now comes an enemy in pursuit; he tries in vain to cross, his chariot is lost, but the innocent bullocks are saved by this incantation of the priestly poet. All this is very ingenious, but is not at all convincing. Sāyana would regard the rc as having been addressed by V. after the crossing. शम्या yoke; योक्त्रम ropes, leather bands. अदुष्कृतौ harmless. व्येनसा (du. from वि + एनस् sin) innocent. अघ्न्यौ (अ + हन् + य) not to be killed; the cow especially is mentioned as अघ्न्या in I. 164. 40; III. 1. 6; VIII. 69. 2; etc. The word occurs with the accent both on अ and घ्न्य. शूनं कृ (cf. II. 28. 11), to suffer from want or loss.

Tr. May your current strike up (from below) the yoke-pins; may the waters leave the ropes free: may not the harmless and innocent bullocks suffer privations.

No. 13

MANDALA III SŪKTA 42

उप नः सुतमिति नवर्चं चतुर्थं सूक्तं वैश्वामित्रं गायत्रमैन्द्रम् । उप न इत्यनुक्रमणिका । पूर्वसूक्तेन सहोक्तो विनियोगः ॥

Verse 1

उप । नः । सुतम् । आ । गहि । सोमम् । इन्द्र । गोऽआशिरम् ॥
हरिऽभ्याम् । यः । ते । अस्मऽयुः ॥ १ ॥

हे इन्द्र नोऽस्मदीयं सुतमभिषुतं गवाशिरं पयसा मिश्रितं सोमं प्रति उपा गहि । समीप आगच्छ । यतो हरिभ्यामश्वाभ्यां युक्तस्तव रथोऽस्मयुरस्मान्कामयमानो वर्तते । गवाशिरम् । आङ्पूर्वस्य श्रीणातेः क्विप्यपस्पृधेथामानृचुरित्यादिना शिरिस्यादेशः । बहुव्रीहौ पूर्वपदस्वरः ॥

गवाशिरं from गो + आशीर (श्री to cook) गो stands for गोर्विकार i. e. milk. गवाशिर is exclusively an epithet of Soma. In I. 87. 9, the substantive is dropped and the adj. is used as a substantive. For अस्मयु cf. II. 23. 8. Sāy. takes it as adj. to रथ implied in हरिभ्यां; cf. V. 74. 8. Geld. refers यस्ते to Soma and अस्मयु to Indra. Old. would refer अस्मयु also to Soma. अस्मयु elsewhere is adj. to Indra four times and to Soma five times; cf. IX. 9. 5; 6. 1 etc. and Old.'s interpretation is also more natural.

Tr. Approach with your bays, Indra, our Soma which has been pressed and mixed with milk, and which is thine and well-inclined to us.

Verse 2

तम् । इन्द्र । मदम् । आ । गहि । बर्हिःऽस्थाम् । ग्रावऽभिः । सुतम् ॥
कुवित् । नु । अस्य । तृप्णवः ॥ २ ॥

हे इन्द्र ग्रावभिः सुतमभिषुतं बर्हिःष्ठां बर्हिषि स्थितं मदम् । मद्यतेऽनेनेति मदः सोमः । तमिमं सोममागहि आगच्छ । कुवित्प्रभूतं यथा भवति तथास्य सोमस्य पाने नु क्षिप्रं तृप्णवः तृप्तो भव । मदम् । मदी हर्षे । मदोऽनुपसर्ग इत्यप्प्रत्ययः । तस्य पित्त्वादनुदात्तत्वे धातुस्वरः । बर्हिःष्ठाम् । ष्ठा गतिनिवृत्तौ । क्विप् । संहितायां पूर्वपदसकारस्यादेशप्रत्ययययोरिति षत्वम् । ष्टुत्वम् । कृदुत्तरपदस्वरः । तृप्णवः । तृप प्रीणन इत्यस्य लेट्यडागमः । कुविद्योगादनिघातः । क्षुभ्नादिषु नृनमनतृम्नोतीति पठितम् । तथापि सर्वविधीनां छन्दसि विकल्पितत्वादत्र णत्वप्रतिषेधो न भवति । प्रत्ययस्वरः ॥

बर्हिःष्ठाम् मदम्. बर्हिष्ठा m. verb. n. from स्था. मद an exhilarating drink, always refers to Soma; cf. सः त्वा अमदत् वृषा मदः I. 80. 2; मदस्य पिबतम् VIII. 5. 14. कुवित् तृप्णवः. कुवित् is regarded as an interrogative part., like the later कच्चित्, by European scholars on account of the कु in it, but there are other considerations that ought to weigh. The verb following it is accented, which is not the case with other interro. pron. or adv.; it is most often followed by a subjunctive or optative verb, which ill suits an interrogative clause; finally it has been mentioned as a synonym of बहु in निघण्टु III. 1 and is always and not inaptly rendered with बहुवारं or प्रभूतं by Sāyana. The fact that a series of

clauses containing कुवित् is immediately followed by another containing a verb in the present or aorist tense would suggest the interpretation of कुवित् as 'most probably', 'most certainly'; cf. कुवित् तुतुज्यात् सातये धियः शुचिप्रतीकं तं अया धिया गृणे I. 143. 6; कुवित् नः अस्य वचसः निचोधिषत् इन्द्रं उत्सं न वसुनः सिचामहे II. 16. 7; कुवित् सः सुपेशसः करति जोषिषत् हि II. 35. 1. Geld. has given the same meaning,—only in the Tr. of I. 146. 6 he has relapsed into Roth's interpretation. तृष्णवः subj. from तृप् to drink to one's heart's content.

Tr. Come, Indra, to yonder exhilarating drink, pressed with the stones and standing on the holy grass. Thou wilt most certainly drink it to thy heart's content.

Verese 3

इन्द्रम् । इत्था । गिरः । मम । अच्छ । अगुः । इषिताः । इतः ॥
आऽवृते । सोमऽपीतये ॥ ३ ॥

हे इन्द्र इषितास्त्वदर्थं प्रेरिता इत्थेत्थमनेन प्रकारेणोच्यमाना मम गिरः स्तुतिलक्षणा वाच इन्द्रं त्वामितोऽस्माद्देवयजनदेशादच्छागुः आभिमुख्येन गच्छन्तु । किमर्थम । सोमपीतये सोमपानार्थमावृते त्वामावर्तयितुम् । इत्था । इदंशब्दात्था हेतौ च छन्दसीति व्यत्ययेन थाप्रत्ययः । इदम एतेतौ रथोरितीदित्यादेशः । प्रत्ययस्वरः । अच्छ । अच्छगत्यर्थवदेष्विति गतिसंज्ञा । अगुः । इण् गतावित्यस्य लुङि रूपम् । निघातः ॥

इत्था' गिरः. इत्था an adv. used as adj. in the sense of 'willing,' 'sincere', 'true,' etc.; cf. इत्था विप्रं हवमानं गृणन्तं IV. 29. 5; इत्था धिया आ यातम् I. 2. 6; cf. also इत्थाधीः अमि यः नक्षति त्वा II. 20. 2. आवृते infin. from वृत्.

Tr. My sincere prayers, sent forth from here have gone in the direction of Indra to make him turn this way for the Soma draught.

Verse 4

इन्द्रम् । सोमस्य । पीतये । स्तोमैः । इह । हवामहे ॥
उक्थेभिः । कुवित् । आऽगमत् ॥ ४ ॥

स्तोमैस्त्रिवृत्पञ्चदशादिस्तोमसाध्यैः स्तोत्रैरुक्थेभिरुक्थ्यैः शंस्त्रैश्चेह कर्मणि सोमस्य पीतये सोमपानार्थमिन्द्रं हवामहे वयमाह्वयामः । कुविद्बहुवारमाहूतः स इन्द्र आगमत् यज्ञं प्रत्यागच्छतु । आगमत् । गमेर्लेट्यडागमः । आगमा अनुदात्ता इत्यटोऽनुदात्तत्वाद्धातुस्वरः । तिङि चोदात्तवतीति गतेर्निघातः । कुवियोगाद्-निघातः ॥

Tr. We invoke Indra with our hymns for a draught of Soma here; most surely he would come here on account of our hymns.

Verse 5

इन्द्र । सोमाः । सुताः । इमे । तान् । दधिष्व । शतक्रतो इति शतऽक्रतो ॥ जठरे । वाजिनीवसो इति वाजिनीऽवसो ॥ ५ ॥

हे शतक्रतो इन्द्र इमे सोमाः सुताः । ग्रावभिस्त्वदर्थमभिषुताः । हे वाजिनी-वसो अन्नधन । यद्वा । वाजोऽन्नमासु फलत्वेनास्तीति वाजिन्यः क्रिया । तासां वासक हे इन्द्र तान्सोमरसान् जठरे दधिष्व धारय । वाजिनीवसो । वाजशब्दान्म-त्वर्थेऽत इनिठनाविति नीप्रत्ययः । कृत्नेभ्यो ङीबिति ङीप् । तासां वसो । संबुद्धौ चेति गुणः । आमन्त्रितत्वादाष्टमिकमनुदात्तत्वम् ॥

दधिष्व from धा. शतक्रतो. क्रतु will or will-power. वाजिनीवसो from वाजिनी prize of victory (cf. I. 48. 6) and वसु possession or belonging, which practically amounts to the termination वत्.

Tr. Here is the Soma pressed; put it into your belly, O god of a hundred powers and rich in rewards.

Verse 6

विद्म । हि । त्वा । धनंऽजयम् । वाजेषु । दधृषम् । कवे ॥ अध । ते । सुम्नम् । ईमहे ॥ ६ ॥

हे कवे क्रान्तदर्शिन्निन्द्र वाजेषु युद्धेषु दधृषं शत्रूनामभिभवितारमत एव धनं-जयम् । धनं जयतीति धनंजयः । तादृशं त्वा त्वां विद्म हि जानीमः खलु । अथा-नन्तरं ते तव सुम्नं धनमीमहे याचामहे । विद्म । विदेर्लटि विदो लटो वेति मसो मादेशः । पादादित्वादनिघातः । धनंजयम् । जि जय इत्यस्माद्धन उपपदे संज्ञायां

भृतृवृजिधारिसहितपिदम इति खच्प्रत्ययः । अरुर्द्विषदजन्तस्य मुमिति पूर्वपदस्य मुमागमः । चित्त्वादन्तोदात्तः । दधृषम् । ञिधृषा प्रागल्भ्य इत्यस्य यङ्लुक्यभ्यासस्य रीगागमाभावश्छान्दसः । तदन्तात्पचाद्यचि यङोऽचि चेति यङो लुक् । लघूपधगुणे प्राप्ते न धातुलोप इति तस्य प्रतिषेधः । चित्त्वादन्तोदात्तः ॥

दधृषम् (from धृष् to be bold or overpowering). अध therefore. ईमहे (ईं 2 A. to beg, to long for).

Tr. We indeed know thee as the winner of wealth, as bold in deeds of heroism, O wise god; and hence we beg for thy blessing.

Verse 7

इमम् । इन्द्र । गोऽआशिरम् । यवऽआशिरम् । च । नः । पिब ॥
आऽगत्य । वृषऽभिः । सुतम् ॥ ७ ॥

हे इन्द्र गवाशिरं गव्यमिश्रणोपेतं सोमं तथा यवाशिरं यवमिश्रणोपेतं वृषभिर्ग्रावभिः सुतमभिषुतं नोऽस्मदीयमिम सोमं देवयजनमागत्य पिब । गवाशिरं यवाशिरमित्यत्र आङ्पूर्वस्य श्रीणातेः क्विप्यपसृधेथामानृचुरित्यादिना शिरित्यादेशः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः ॥

Tr. Come hither, Indra, and drink this (Soma), pressed with (or by) powerful (stones or priests) and seasoned with milk and barley.

Verse 8

तुभ्यं । इत् । इन्द्र । स्वे । ओक्ये । सोमम् । चोदामि । पीतये ॥
एषः । ररन्तु । ते । हृदि ॥ ८ ॥

हे इन्द्र तुभ्येत्तुभ्यमेव पीतये पानार्थं स्वे स्वकीय ओक्ये स्थाने जठरेऽभिषुतमिमं सोमं चोदामि प्रेरयामि । एष पीतः सोमस्ते तव हृदि हृदये ररन्तु अत्यर्थं रमताम् । तुभ्य । युष्मच्छब्दस्य चतुर्थ्येकवचने तुभ्यमह्यौ ङिति तुभ्यादेशः । सुपां सुलुगिति सुपो लुक् । ङयि चेत्पाद्युदात्तः । ओक्ये । वस्वादिन्वात्स्वार्थिको यत्प्रत्ययः । तित्स्वरितः । चोदामि । चुद प्रेरणे । ण्यन्तस्य लटि रूपम् । बहुलमन्यत्रापीति णेर्लुक् । निघातः । ररन्तु । रमु क्रीडायामित्यस्य यङ्लुकि लोटि सर्वविधीनां छन्दसि

विकल्पितत्वादत्राभ्यासस्य नुमभावः । संहितायामन्येषामपीत्यभ्यासस्य दीर्घः । निघातः । हृदि । हृदयशब्दस्य पद्दन्नोमास्हृदित्यादिना हृदादेशः । ऊडिदमिति विभक्तेरुदात्तत्वम् ॥

स्वे' ओक्ये'. ओक्य (from ओकस् home) a place which serves as one's home ; cf. सोम रारन्धि न' हृदि गावः न यवसेषु आ । मर्य. इव स्वे ओक्ये I. 91. 13. चुद् to send on, to pour. रारन्तु impera. from perf. base of रम्. Geld. construes *b* as सोमं पीतये तुभ्यं चोदामि

Tr. To thee alone I pour the Soma for thy draught in my home. May it dwell in thy heart.

Verse 9

त्वाम् । सुतस्य । पीतये । प्रत्नम् । इन्द्र । हवामहे ॥ कुशिकासः । अवस्यवः ॥ ९ ॥

हे इन्द्र अवस्यवस्त्वत्तो रक्षणामिच्छन्तः कुशिकासः कुशिकगोत्रोत्पन्ना वयं सुतस्य ग्रावभिरभिषुतस्य सोमस्य पीतये पानार्थं प्रत्नं पुरातनं त्वां हवामहे । स्तुतिलक्षणाभिर्गीर्भिराह्वयाम' । पीतये । स्थागापापचो भाव इति क्तिन् । द्विष्वत्सरतिशस्थान्तानाम् (फि० १-७) इत्यन्तोदात्तत्वम् । हवामहे । ह्वयतेर्लटि बहुलं छन्दसीति संप्रसारणे रूपम् । अवस्यवः । अव इच्छन्तीत्यर्थे सुपः क्यच् । क्याच्छन्दसीत्युप्रत्ययः । कुशिकासो अवस्यव इत्यत्र संहितायामन्यादवयादित्यादिना (पा० ६-१-११६) एङः प्रकृतिभावः ॥

Tr. We Kuśikas, anxious for thy protection, O Indra, call thee, the ancient one, for a draught of the pressed (Soma-juice).

No. 14

MANDALA IV. SŪKTA 30

नकिरिन्द्रेति चतुर्विंशत्यृचं नवमं सूक्तं वामदेवस्यार्षं गायत्रम् । अष्टमी चतुर्विंशी च द्वे अनुष्टुभौ । इन्द्रो देवता । दिवश्चिद्घेत्ययं तृच उषोदेवताक इन्द्रदेवताकश्च । तथा चानुक्रान्तम् । नकिश्चतुर्विंशतिर्दिवश्चित्तृच उषस्यश्च गायत्रं ह्यष्टम्यन्ये चानुष्टुभाविति । अतिरात्रे तृतीये पर्याये मैत्रावरुणशस्त्र उत्तमानर्जमिदं सूक्तम् । तथा च सूत्रितं नकिरिन्द्र त्वदुत्तर इत्युत्तमामुद्धरेत् (आ० ६-४) इति ॥

The hymn belongs to the Vāmadeva cycle, the first fifteen hymns being in hónour of Agni and the next seventeen being addressed to Indra. From the 16th to the 29th there is a regularly diminishing number of rks for each hymn, the 29th containing five. Now comes no 30 with 24 rks, and no. 31 with 15 and no. 32 with 24. These three hymns either consist of hymns of three or more rks which were arbitrarily combined into longer hymns, or they must have been made up of longer units, but were discovered later than the original Samhitā and inserted at the end of the old series of Indra hymns. That they cannot be exactly divided into trcas follows from the fact that rks 9 to 11 form a connected group and have been used in the sacrifice as a unit ; the 24th rc also cannot form part of a trca as it is in the Anustubh metre. Again, verses 12 to 18, in fact, verses 12 to 23, are intimately connected together.

Verse 1

नकिः । इन्द्र । त्वत् । उत्ऽतरः । न । ज्यायान् । अस्ति ।
वृत्रऽहन् ॥ नकिः । एव । यथा । त्वम् ॥ १ ॥ [*यँ

हे वृत्रहन्निन्द्र वृत्रस्य नाशकेन्द्र । लोक एकोऽपीति शेष. । त्वत्त्वत्त उत्तर उत्कृष्टतरो नकिरस्ति न भवति । त्वत्तो ज्यायान् प्रशस्यतर एकोऽपि नास्ति । हे इन्द्र त्वं लोके यथा प्रसिद्धो भवासि तथाविध एकोऽपि नकिरेवास्ति नैव भवति । कश्चिदपि लोक इन्द्रसदृशो नास्तीत्यर्थः ॥

उत्तरः higher. ज्या'यान्, comp. of an adj. derived from the root ज्जि-ज्या (cf. ज्येष्ठ), mightier, greater, older.

Tr. No one is higher than thee, Indra ; no one older. O killer of Vrtra ; there is no one like you.

Verse 2

सत्रा । ते । अनु । कृष्टयः । विश्वा । चक्राऽइव । ववृतुः ॥
सत्रा । महान् । असि । श्रुतः ॥ २ ॥

हे इन्द्र कृष्टयः प्रजास्ते त्वामनुलक्ष्यीकृत्य सत्रा सत्यमेव ववृतुः वर्तन्ते। तत्र दृष्टान्तः। विश्वा विश्वानि व्याप्तानि चक्रेव चक्राणीव। यथा चक्राणि शकटमनुवर्तन्ते तद्वत्। हे इन्द्र महांस्त्वं सत्रा सत्यमेव श्रुतो विश्रुतोऽसि। गुणैः प्रख्यातो भवसि॥

सत्रा (स + त्रा) under all circumstances, altogether, invariably; cf. एकः सत्र सूरः वस्व. ईशे I. 71. 9; सत्रा शंसं यजमानस्य तूनोत् II. 20. 7. कृष्टयः ते अनु ववृतुः. कृष्टि (from कृष्-क्तिन्) settlement, people, clan. The difficulty about ते (da.) is solved by Geld. who points to अनुसू (V. 53. 2), अनुस्था (III. 30. 4); अनुनम् (V. 32. 10); अनुअस् (I. 57. 2; 182. 8); अनुधा (I. 124. 4); अनुधा (VI. 36 2), which all govern the dative. विश्वा Gr. Old. Geld. are inclined to take it as विश्वाः attracted by the following word चक्रा. As a last resort, however, Old. suggests ते विश्वा अनु as the construction, meaning "(they follow) all (actions) belonging to thee." He (Noten p. 27) points out to passages like I. 134. 1; III. 51. 11; VIII. 63. 5, where after ते अनु there is a substantive like मनः, स्वधा, क्रतुं connected with ते; and विश्वा, he suggests, here takes the place of such a substantive. But विश्वा can be adj. to चक्रा.

Tr. The clans have invariably followed thee, as all the wheels (follow the chariot). Thou hast been invariably known to be great.

Verse 3

विश्वे । चन । इत् । अना । त्वा । देवासः । इन्द्र । युयुधुः ॥
यत् । अहा । नक्तम् । आ । अतिरः ॥ ३ ॥

हे इन्द्र विश्वे चनेत्सर्व एव देवासोऽसुरान्विजिगीषवो देवा अना प्राणरूपेण बलेन त्वा त्वां सहायं लब्ध्वा युयुधुः। असुरैः सह युद्धं चक्रुः। यद्यस्मात्कारणादहा अहःसु नक्तं रात्रिषु चातरः आ समन्तात् शत्रूनवधीः। अतः कारणाद्युयुधुरिति पूर्वेण संबन्धः॥

Here and in rc 5 we have the only references to Indra's fight with the other gods. The passages quoted by Bergaigne (Rel. Ved. III. 75–79) except perhaps V. 30. 5 (अतश्चिदिन्द्रादभयन्त देवाः), prove

nothing. विश्वे चन इत्. चन ordinarily does not give a negative sense but in a few passages it does give it, e. g. VI. 3. 2; VIII. 2. 14; II. 24. 12; etc. चन इत् occurs in VII. 86. 6 and X. 56. 4. अना (= अनया f. instru. adv.) thus; for the reason that; cf. X. 94. 3; Gr., 'for'. युध् to overpower or defeat; cf. दश राजानः समिताः सुदासं न युयुधुः VII. 83. 7. अहा नक्त आ अतिरः. आ तॄ (i) to dominate, to win; (ii) to embellish; cf. (i) इन्द्रः पूर्भित् आ अतिरत् दासम् III. 34. 1; (ii) ओजः मिमानः महिमानं आ अतिरत् II. 17. 2; एते द्युम्नेभिः विश्वं आ अतिरन्त VII. 7. 6. अहा = अहानि, acc. from अह n. = अहन्-अहर्. नक्तं n. night. Geld. translates c: 'since thou didst delimit day and night,' but the root आतॄ occurs in rc 7 and it must be interpreted in both places alike. In fact ṛks 3-7 contain one leading idea, viz. Indra's victory over his opponents and rc 7, which is its logical climax, contains a reaffirmation of the main statement.

Tr. Even all the gods (combined) could not defeat thee for the reason that for days and nights thou didst come out triumphant (or with Berg. 'by night thou didst win days').

Verse 4

यत्र । उत । बाधितेभ्यः । चक्रम् । कुत्साय । युध्यते ॥
मुषायः । इन्द्र । सूर्यम् ॥ ४ ॥

यत्र यस्मिन्युद्धे उतापि च हे इन्द्र त्वं बाधितेभ्यः कुत्ससहायेभ्यो युध्यते युद्धं कुर्वते कुत्साय च सूर्ये सूर्यसंबन्धि चक्रं मुषायः अमुष्णाः । अपहृतवानसीत्यर्थः । तस्मिन्युद्धे प्रावः शचीभिरेतदाशमिति परेण संबन्धः ॥

Amongst the exploits of Indra his help to Kutsa in the killing of Śuṣṇa deserves an important place. The Kutsa legend was very popular, it would appear, in the Ṛgvedic period and has obviously undergone a gradual process of development, of which we can get an idea from the various Kutsa passages which are scattered through all the Maṇḍalas of the RV except the third. Kutsa must have been originally one of the pioneer Aryan kings who obtained victories over the Dāsa or Dasyu chiefs; gradually he became a legendary figure, a friend of Indra and a ṛsi (I. 106. 6) from whom the

later rsis (VII. 25. 5) were fain to claim descent. It is difficult to form a connected idea of the Kutsa legend, especially its connection with the Sun's wheel; but a brief outline is given below, which may be helpful. Kutsa, son of Arjuna (I. 112. 23 &c.), a young hero (I. 63. 3), was in league with आयु and अतिथिग्व, father of सुदास्, but was defeated by तूर्वयाण (I. 53. 10; VI. 18. 13; VIII. 53. 2, II. 14. 7), who was, like all conquerors, helped by Indra; but later Indra apparently favoured कुत्स, especially in his battles with तुग्र, स्मदिभ (X. 49. 4) and शुष्ण (I. 51. 6; 112. 9, 23; 174. 4). In the developed legend Kutsa appears as Indra's charioteer (II. 19. 6; VI. 20. 5); उशनस् काव्य also plays an important part as an ally of Indra in the battle with शुष्ण (I. 51. 11); he forges the Vajra for Indra (I. 51. 10; 121. 12) and aids him with his ingenuity (V. 29. 9 ?); but the part played by the Sun is more important, although not quite explicable. Śusna apparently could not be killed by Indra in his own person and could not be killed after sunset (cf. the stories of the नृसिंह incarnation and the death of Jayadratha in later mythology). Indra disguises himself as Kutsa; they both repair to Kutsa's place and Kutsa's wife finds difficulty in knowing who is who (IV. 16. 10). Assured of the perfectness of the resemblance Indra takes Kutsa in his own chariot (IV. 16. 11; V. 29. 9; VI. 20. 5) to which were yoked the fleet steeds of the wind (I. 51. 10; I. 175. 4 : IV. 16. 11) and overtakes Śusna at about sunset (VI. 31. 3.). The Sun urged his own swift horse (एतश; it may or may not be his name as Geld. and Old. suppose) and Indra was compelled to arrest his speed, by depriving his chariot of a wheel (I. 130. 9; 174. 5; IV. 17. 4; 28. 2; V. 29. 10; VI. 31. 3). With Śusna Indra killed Kuyava and thousands of other followers (IV. 16. 12).

After the subordinate clauses in ṛks 4, 5, 6, the requisite prinicipal clause is to be supplied from 3 *c.* or has been consciously left unsaid on account of the आक्षेप in ṛc 7. बाधिते'भ्यः (Geld. देवेभ्यः मनुष्येभ्यश्च). सूर्यं चक्रं सुषायः. सुषाय denom. from verbal

n. from मुष् to rob; it governs two accusatives, सूर्य and चक्रं, चक्रं being the principal object.

Tr. And (so didst thou also) when for the sake of the oppressed, and of Kutsa who was fighting, thou didst rob Sūrya of a wheel,—

Verse 5

यत्र । देवान् । ऋघायतः । विश्वान् । अयुध्यः । एकः । इत् ॥
त्वम् । इन्द्र । वनून् । अहन् ॥ ५ ॥ [*वाँ ऽश्वाँ ऽनूँर

हे इन्द्र त्वमेक इदसहाय एव यत्र यस्मिन् संग्रामे देवानिन्द्रादीनृघायतो वाधमानान्विश्वान् सर्वान् राक्षसादीनयुध्यः युद्धमकरोः । तथा वनून् हिंसकानहन् अवधीः ॥

ऋघायतः from ऋघाय (denom. from an obsolete ऋघा, which is to be seen in ऋघावत्-वन्, meaning agitation) to be agitated, excited; cf. पर्वतासः ऋघायन्त III. 17. 2. वनून् (from वन् to overpower) enemies; it occurs only here in this sense; in X. 74. 1 ये सुश्रुत. वनुं सुश्रुणं धुः the meaning is obscure See App. III for the samdhi वनूँरहन्.

Tr. And when, single-handed, thou foughtst all the gods that were excited, and didst kill thy enemies,—

Verese 6

यत्र । उत । मर्त्याय । कम् । अरिणाः । इन्द्र । सूर्यम् ॥ प्र ।
आवः । शचीभिः । एतशम् ॥ ६ ॥

यत्र यस्मिन् संग्राम उतापि च हे इन्द्र त्वं मर्त्याय मनुष्यायैतशाख्याय ऋषये सूर्यमरिणाः अहिंसीः । कमिति पूरणः । तदानीं शचीभिर्युद्धकर्मभिरेतशमेतत्संज्ञकमृषिं प्रावः प्रकर्षेणारक्षः ॥

कम् is a slightly emphatic particle. This ṛc and I. 61. 15. and II. 19. 5 *cd* are intimately connected in sense. I. 61. 15 runs thus: प्र एतशं सूर्ये पस्पृधानं सौवश्व्ये सुष्विं आवत् इन्द्रः, while II. 19. 5 reads: स सुन्वते सूर्य आ रिणक्ति मर्त्याय आ यत् रयिं गृहदवयम् अस्मै भरत् अंशं न

एतशः उशस्यन्. The expression सुन्वन् मर्त्यः, सुष्वि and मर्त्याय are applied to एतश, who must be therefore a human being in these passages and not Sūrya's horse as Geld. says in V. S. II pp. 161–163. Geld. is less dogmatic in his Glo. and Tr. Indeed एतश need not be taken as the name of Sūrya's horse at all; like ऋज्र, आशु, the word एतश, swift, is used simply as a synonym of a horse; this tendency in the RV to use adjectives as substantives is to be seen in other cases as well, cf. वह्नि, वाजिनी, सूनृता, दक्षिणा &c. The story of एतश who ran a race with the bay horses of Sūrya by the grace of Indra is referred to in I. 54. 6; 61.15; 121. 12; II. 19. 4; V. 29. 5-7; V. 31. 11 &c. He also took a wheel out of Sūrya's chariot (V. 31. 11) and won the race. One एतश is supposed to be the author of X. 136. 6; this shows how the legendary figures were later translated to rsihood. Old. suggests that अरिणक् should be the reading in the place of अरिणाः just as in II. 19. 5. सं + रि occurs in V. 31. 11 but that according to Old does not help us; but there is no harm in speaking of Sūrya, after being obstructed, being let off, just like the waters; cf. अप. अरिणा. I. 56. 6; सप्त सिन्धून् अरिणात् II. 12. 3. शचीभिः power or energy. प्र आवः probably ought to be प्रऽआवः in the Pp.; cf. अहन् in rc 5.

Tr. And when thou, Indra, letst Sūrya on his course for a mortal and helpedst Etaśa with thy powers,—

Verse 7

किम् । आत् । उत । असि । वृत्रऽहन् । मघऽवन् । मन्युमत्ऽतमः ॥ अत्र । अह । दानुम् । आ । अतिरः ॥ ७ ॥

हे वृत्रहन् वृत्राणामावरकाणां तमसां हन्तर्मघवन्धनवान्निन्द्र त्वमादनन्तरमेव उतापि च । किमिति प्रश्ने । मन्युमत्तमोऽसि । अत्यन्तं क्रोधवान् भवसि । अत्रास्मिन्नन्तरिक्षे अह एव दानुं दनोः पुत्रं वृत्रमातिरः आ समन्तादहिंसीः ॥

आत् किम् 'What further?' used in cutting matters short, like किमनेन &c.; cf. IV. 23. 6. मन्युमत्तमः most energetic, from

मन्यु ardour, energy. अ॒ग्र अ॑ह. अह is emphatic. अत्र अह on this very account; cf. यत् इत् नु पृथिवी दशभुजि....अत्राह ते सहः द्यां अनुष्वधत्, I. 52. 11; अत्राह ते अवोभिः ता: स्वसारः स्तवन्त यत् सीम् अनु प्र मुचः रन्धयथ्यै IV. 22. 7. दा॑नु a demon. Vrtra is probably intended; cf. the epithet वृत्रहन्.

Tr. What more (need be said)! And thou art possessed of the greatest energy, O bounteous Vrtra-killer. It was on that account alone that thou triumphedst over the demon.

Verse 8

एत॒त् । घ॒ । इत् । उ॒त । वी॒र्य॑म् । इन्द्र॑ । च॒कर्थ॑ । पौंस्य॑म् ॥
स्त्रिय॑म् । यत् । दु॒:ऽह॒नायु॑वम् । वधीः॑ । दु॒हि॒तर॑म् । दि॒वः ॥८॥

[*र्य ।

हे इन्द्र उतापि च यत् यस्त्वमेतदुपलक्षितं पौंस्यं बलं वीर्यं सामर्थ्योपेत चकर्थ। कृतवानसि। चेदिति पूरणौ। किंच दुर्हणायुवं दुष्टं हननमिच्छन्तीं दिवो दुहितरं द्युलोकसकाशादुत्पन्नां स्त्रियमुषस वधीः अवधीः ॥

घ is an expletive. पौंस्य (also पौंस्न्यं) a manly act. दुर्हणायु॑वम्. acc. s. of दुर्हणायू (from दुर्हणा, occurring in I. 38. 6; 121. 14, meaning mischief; disaster) bent on mischief. दिव॑: दुहित॑रम् refers to Usas. The breaking of her chariot stands probably for the disappearance of her ruddy glow; it is referred to in II. 15. 6; X. 73. 6; 138. 5. The accent on चकर्थ shows that पौंस्यं चकर्थ is treated as a distinct clause for the sake of emphasis. पौंस्य is deliberately contrasted with स्त्रीवध.

Tr. And that itself was a heroic—it was a manly deed thou achievedst, that thou smotest that mischievous woman, the daughter of heaven.

Verse 9

दि॒वः । चि॒त् । घ॒ । दु॒हि॒तर॑म् । म॒हान् । म॒हीय॑मानाम् ॥
उ॒षस॑म् । इ॒न्द्र॒ । सम् । पि॒ण॒क् ॥ ९ ॥

हे इन्द्र महांस्त्वं दिवो दुहितरं द्युलोकस्य पुत्रीं महीयमानां पूज्यमानामुषसमुषोदेवीं संपिणक् चिद्ध संपिष्टवानसि खलु ॥

महीय॑माना conceited ; cf. सुभगा महीयते II. 56. 9. सं॑ पिणक् impf. 2 s. from सं॑पिष् to crush. The न् of the conj sign. is irregularly changed to ण् ; cf. ṛc. 13. 9 *a* is repeated from 8 *d*, as 10 *a* is from 9 *c* ; cf. V. 1. 5.

Tr. Thou indeed, O Indra, crushedst Usas, daughter of heaven, who had an overweening sense of power, powerful as thou art.

Verse 10

अपं । उषाः । अनंसः । सरत् । संऽपिंष्टात् । अहं । बिभ्युषी ॥
नि । यत् । सीम् । शिश्नथत् । वृषा ॥ १० ॥

वृषा कामानां वर्षितेन्द्रो यत यदा सीमेतदुषःसंबन्धि शकटं नि शिश्नथत् न्यवधीत् । तदोषा उषोदेवता बिभ्युषीन्द्रसकाशाद्भीता सती संपिष्टादिन्द्रेण संचूर्णितादनसः सकाशादपसरत् अपासरत् अपजगाम । अहेति पूरणः ॥

अं॑प सरत् अप सृ to run away. अं॑नसः from अनस् cart. सीम् it, acc. referring to अनः. नि॑ शिश्नं॑थत् aor. from caus. of श्रथ् to shatter. अह is an expletive.

Tr. From the shattered cart Usas ran away terrified, as the mighty god smashed it.

Verse 11

एतत् । अस्याः । अनंः । शये । सुऽसंपिष्टम् । विऽपांशि । आ ॥
ससार । सीम् । पराऽवतः ॥ ११ ॥

सुसंपिष्टमिन्द्रेण सुष्ठु संचूर्णितमस्या उषसः संबन्ध्येतदनः शकटं विपाशि विपाडाख्या नदी तस्यां तत्तीर । आ शये आ समन्ताच्छेते अशेत । सीमियमुषोदेवता शकटे भग्ने सति परावतो दूरदेशात्ससार अपससार ॥

शये = शेते ; in fact शये is the only form of 3 s. of the root शी that appears in RV. ; cf. I. 32. 9 ; 164. 30 ; etc. वि॑पांशि आ॑. The preposition आ makes explicit the meaning of the locative.

सीम् refers to अनः. Geld. understands it in the sense of 'herself' and refers it to उषस्; Old. also translates it in the same way in his 'Reli. des. V.' p. 166; but there appears to be no authority for it; in his Gl. Geld. does not point out to any passage in support of a nom. sense for सीम्. स'सार from caus. sense of सृ to cause to run; cf. अप अर्णा सिसर्षि III. 32. 5.

Tr. That cart of hers lies completely smashed on the Vipāś · she had driven it (thither) from afar.

Verse 12

उत । सिन्धुम् । विऽबाल्यम् । विऽतस्थानाम् । अधि । क्षमि ॥
परि । स्थाः । इन्द्र । मायया ॥ १२ ॥

हे इन्द्र उतापि च विबाल्यं विगतबाल्यावस्थां संपूर्णजलां वितस्थानां वितिष्ठमानां सिन्धुं नदीमधि क्षमि क्षमायां मायया प्रज्ञया परिष्टाः पर्यस्थाः । सर्वतः स्थापनं कृतवानसि ॥

विबाल्य'म् सिन्धुम्. विबाली n. of river mentioned only here, (from बाध्; cf. बिल from भिद्) वितस्थाना' from वि + स्था to spread; cf. II. 38. 5. क्ष'म, cf. I 25. 18. प'रि स्थाः, cf. I. 32. 8.

Tr. And, Indra, with thy miraculous power thou hemmedst the river Vibālī in as she spread on the earth.

Verse 13

उत । शुष्णस्य । धृष्णुऽया । प्र । मृक्षः । अभि । वेदनम् ॥
पुरः । यत् । अस्य । संऽपिणक् ॥ १३ ॥

उतापि च हे इन्द्र धृष्णुया धृष्णुः धर्षकस्त्वं शुष्णस्य शुष्णनाम्नोऽसुरस्य संबन्धि वेदनं वित्तमभि अभितः सर्वतः प्र मृक्षः प्रकर्षेणाबाधथाः । यद्यदास्य शुष्णस्य पुरः पुराणि नगराणि संपिणक् । संपिष्टवानसि । तदा प्र मृक्ष इति संबन्धः ॥

शु'ष्णस्य वे'दनम्. शुष्ण is a demon of drought overcome by Indra; mentioned about 40 times in the RV, described as अमानुष, अशुष्, शुसन, शुष्मिन्, मायिन्, but also identified with a chief

of the inimical aborigines and mentioned as दस्यु and दास ; cf. रु 4. Indra kills him for the sake of कुत्स , cf. I. 51. 6 ; 65. 3 ; 121. 9; II. 19. 6 &c. वेदनं belongings ; cf. त्वाहतस्य वेदनं भजेमहि VII. 32. 7. धृष्णुया. f. instr. adv. (from धृष्णु) boldly, mightily ; cf. मरुतां तन्यतुः धृष्णुया एति I. 23. 11. अभि प्र मृष् to seize (मृक्षः Aor. 2. s.).

Tr. And thou boldly seizedst the belongings of Śusna. when thou smashedst his cities.

Verse 14

उत । दासम् । कौलिऽतरम् । बृहतः । पर्वतात् । अधि ॥ अव ।
अहन् । इन्द्र । शम्बरम् ॥ १४ ॥

उतापि च हे इन्द्र त्वं दासमुपक्षपयितारं कौलितरं कुलितरनाम्नोऽपत्यं शम्बरमसुरं बृहतो महतः पर्वतादद्रेरध्युपरि अव अवाचीनं कृत्वाहन् हतवानसि ॥

दास (also दा॑स, but दास in comp.) a demon, a barbarian, the two being very often identified ; adj., belonging to a Dāsa; cf. दासीः पुरः I. 103. 3, दासीः विशः II. 11. 4 ; दासं वर्ण II. 12. 4 ; contrasted with आर्य X. 138. 3 ; the Dāsas were turned into domestic servants. cf. दासप्रवर्ग रयिम् 'wealth consisting of a number of Dāsas,' I. 92. 8. कौलितर occurs only here: 'son of कुलितर.' शं॑म्बर is mentioned 21 times in the RV. अ॑व अहन् cf. शम्बरं गिरेः अव हन् VI. 26. 5.

Tr. And thou smotest down the Dāsa, Śambara, son of Kulitara, from the mighty mountain.

Verse 15

उत । दासस्य । वर्चिनः । सहस्राणि । शता । अवधीः ॥
अधि । पञ्च । प्रधीन्ऽइव ॥ १५ ॥

उतापि च हे इन्द्र त्वं प्रधीनिव चक्रस्य परितः स्थितान् शङ्कूनिव हिंसकान्पञ्च शता पञ्च शतानि पञ्चशतसंख्याकान् सहस्राणि सहस्रसंख्याकान्दासस्य लोकानामुपक्षपयितुर्वर्चिनो वर्चिनामकस्यासुरस्य संबन्धिनोऽनुचरान्पुरुषानध्यधिकमवधीः हतवानसि ॥

वर्चिन् is mentioned also in II. 14. 6; VI. 47. 21; VI. 99. 5. In the last passage occurs the expression शतं वर्चिनः सहस्रं च; in the first यः वर्चिनः शतं इन्द्रः सहस्रं अपावपम्. अधि पञ्च 'plus five', goes with सहस्राणि शता; cf. (षट् सहस्रा) षष्टिः वीरास अधि षट् VII. 18. 14. The additional number would show that they may be more, not less. प्रधि a felly; distinguished from उपधि and शङ्खवः II. 39. 4; I. 165. 48. For the samdhi प्रधीँरिव see App. III. With the simile cp. II. 23. 13.

Tr. And thou smotest down, like so many fellies (of a war-chariot, which lie scattered,) the thousands and hundreds and five (warriors) of the Dāsa Varcin.

Verse 16

उत । त्यम् । पुत्रम् । अग्रुवः । पराऽवृक्तम् । शतऽक्रतुः ॥
उक्थेषु । इन्द्रः । आ । अभजत् ॥ १६ ॥

उतापि च शतक्रतुः शतकर्मेन्द्रस्त्वं तं प्रसिद्धमग्रुव एतन्नाम्न्याः पुत्रं परावृक्तमेतन्नामकमुक्थेषु स्तोत्रेष्वभजत् भागिनं कृतवान्। अयमर्थो वह्नीभिः पुत्रमग्रुवः (ऋ० ४-१९-९) इत्यस्यामृचि प्रतिपादित इति ॥

This reference to the unmarried woman's son is different from that in IV. 19. 9, where he is rescued from ants. The discarded son appears in a hymn to the Aśvins (I. 112. 8) along with some to Indra (II. 13. 12; 15. 7); but nowhere is he raised to dignity as in our rc. अग्रु unmarried woman. परावृक्त or परावृक् a man discarded by his family or society, from परा वृज्; cf. मा परा वक् भारभृत् यथा VIII. 75. 12 आ भज् to admit to a share in; cf. नः वाजे आ भज I. 43. 8; गोमति व्रजे आ भज VII. 27. 1. उक्थे आ भज् would mean to admit him as a priest. Gold. understands it differently to secure correspondence of meaning with नीचा सन्तं उद् अनयः परावृजम् (II. 13. 12) or परावृक् अतिष्ठत् (II. 15. 7). According to him उक्थे आ भज् would mean 'being mentioned in hymns relating to Indra's deeds'. This is correspondence with a vengeance.

Tr. And that out-cast son of the unmarried woman, Indra of a hundred powers got admitted to the chanting of hymns.

Verse 17

उत । त्या । तुर्वशायदू इति । अस्नातारा । शचीऽपतिः ॥
इन्द्रः । विद्वान् । अपारयत् ॥ १७ ॥ [*ची ++द्वाँ

उतापि च अस्नातारास्नातारौ ययातिशापादनभिषिक्तौ त्या त्यौ तौ प्रसिद्धौ तुर्वशायदू तुर्वशनामानं यदुनामकं च राजानौ शचीपतिः कर्मणां पालकः । यद्वा । शचीन्द्रस्य भार्या तस्याः पतिर्भर्ता । विद्वान् सकलमपि जानन्निन्द्रोऽपारयत् अभिषेकार्हावकरोत् ॥

तुर्व'शाय'दू . तुर्वश and यदु are mentioned together 16 times. The Kānvas appear to regard them as their own heroes (VIII. 7. 18 ; 9. 14). They have come from far-off regions (I. 36. 18 ; VI. 45. 1) across the sea (I. 174. 9 ; VI. 20. 12) and have been mentioned with द्रुह्यु and अनु (VIII. 10. 5), who, like themselves, have been turned by later mythology into sons of ययाति. अस्नाता'रा non-swimmers ; cf. अस्नातन् अपारयत् स्वस्ति II. 15. 5. For the peculiar kampa accent of शचीपति in the Pp. cf. प्रा. 212 : त'नून'पात् also has the kampa accent in the Pp. ; in both cases the kampa is optional; in the alternative by प्रा. 211 there would be a simple स्वरित on the नू and ची in तनूऽनपात् and शचीऽपतिः .

Tr. And the wise Indra, the lord of power, enabled Turvaśa and Yadu to cross safely (the sea).

Verse 18

उत । त्या । सद्यः । आर्या । सरयोः । इन्द्र । पारतः ॥ अर्णा-
चित्ररथा । अवधीः ॥ १८ ॥

उतापि च सद्यः सपदि हे इन्द्र त्वं त्या त्यौ तावार्यावार्यत्वाभिमानिनौ सन्तावपि इन्द्रविषयभक्तिश्रद्धारहितावित्यर्थः । सरयोः सरय्वा नद्याः पारतः

पारे तीरे वसन्तावर्णाचित्ररथा अर्णनामकं चित्ररथनामकं च राजानावववधीः अहिंसीः ॥

अ'र्णाचित्र'रथा are not mentioned elsewhere.

Tr. And thou killedst swiftly the Ārya kings Arna and Citraratha on the other side of the Sarayu.

Verse 19

अनु । द्वा । जहिता । नयः । अन्धम् । श्रोणम् । च । वृत्रऽहन् ॥
न । तत् । ते । सुम्नम् । अष्टवे ॥ १९ ॥ [*योन्धं

हे वृत्रहन् वृत्रस्य हिंसकेन्द्र त्वं जहिता जहितौ सर्वैर्बन्धुभिस्त्यक्तावन्धं चक्षुर्हीनमेकं श्रोणं च पङ्ग्वमपरं च द्वा एतौ द्वावनुनयः । अन्धपङ्गुत्वपरिहारेणानुनीतवानसि । हे इन्द्र ते त्वया दत्तं तत्सुम्नं सुखमष्टवे व्याप्तुं कोऽपि न प्रभवतीति शेषः ॥

अ'न्ध and श्रोण. They appear in I. 112. 8 (Aśvin hymn), II. 13. 12; 15. 7; VIII. 79. 2 (Soma); X. 25. 11 (Soma); अन्ध alone in IV. 19. 9. श्रोण lame. जहित (from हा to abandon) appears in I. 116. 10 and VIII. 5. 22 (Aśvins). अ'नु नयः. अनुनी to lead; cf. सुतीर्थ अर्वतः यथा अनु नः नेषथ सुगम् VIII. 47. 11. (न') अ'ष्टवे inf. from अश् to attain; Geld. 'not to be encompassed (by words)'.

Tr. The blind man and the lame one, both abandoned by men, thou ledst, Vṛtra-killer; this mercifulness of thine is not to be attained (by another god).

Verse 20

शतम् । अश्मन्ऽमयीनाम् । पुराम् । इन्द्रः । वि । आस्यत् ॥
दिवःऽदासाय । दाशुषे ॥ २० ॥

इन्द्रोऽश्मन्मयीनां पाषाणैर्निर्मितानां पुरां शम्बरस्य संबन्धिनां नगराणां शतं शतसंख्याकं दिवोदासायैतन्नामकाय दाशुषे हविर्दत्तवते यजमानाय व्यास्यत् व्यक्षिपत् ॥

दि॑वोदासाय दाशु॑षे. दिवोदास is another name for अतिथिग्व (I. 112. 14 : IV. 26. 3), father of सुदास् (VII. 18. 25), son of वध्र्यश्व (VI. 61. 1). Another दिवोदास whose name is पूरु is mentioned in I. 130. 7 and I. 127–139 belong to his son परुच्छेप according to the tradition, in any case to the Divodāsa family, according to I. 130. 10. Indra helped अतिथिग्व to kill शम्बर and to demolish his cities. दाशुषे da. from दाशस्, perf. p. from दाश् to worship, to sacrifice to a god. वि॑अम् to rend asunder; cf. व्यस्तः I 32. 7.

Tr. For the pious Divodāsa Indra rent asunder a hundred towns fortified with stone (belonging to Śambara).

Verese 21

अस्वा॑पयत् । द॒भी॒तये । स॒हस्रा॑ । त्रिं॒श॒तम् । हथैः॑ ॥ दा॒सानाम् ।
इन्द्रः॑ । मा॒यया॑ ॥ २१ ॥

इन्द्रो मायया स्वकीयया शक्त्या दासानां लोकानामुपक्षपयितॄणां राक्षसादीनां त्रिंशतं त्रिंशत्संख्याकानि सहस्रा सहस्राणि दभीतये दभीतयनामकस्यार्याय हथैर्हननसाधनैरायुधैरस्वापयत् अवधीत् ॥

दभी॑ति was protected from the Dāsa chiefs, धुनि and चुमुरि, by Indra (VII. 19. 4; X. 11. 3-9); धुनि and चुमुरि were charmed to sleep (II. 15. 9; VI. 20. 13; 26. 6), their weapons were burnt, their horses and chariots seized (II. 15. 4), and their followers numbering 110 made prisoners (II. 13. 9). हथ (from हन्) a deadly blow; cf. पुरा हयात् जीवान् नः अभि धेतन VIII. 67. 5.

Tr. For Dabhīti Indra by his miraculous powers made thirty thousand Dāsas to sink into sleep by his blows.

Verse 22

सः । घ । इत् । उत । अ॒सि॒ । वृ॒त्रऽह॑न् । स॒मा॒नः । इ॒न्द्र॒ ।
गोऽप॑तिः ॥ यः । ता । विश्वा॑नि । चि॒च्यु॒षे ॥ २२ ॥

* हन्त्स

उतापि च हे इन्द्र यस्त्वं तानि तानि विश्वानि समस्तान् शत्रून् चिच्युषे प्राच्याव-यः । हे वृत्रहन् वृत्राणां शत्रूणां हिंसकेन्द्र । गोपतिर्गवां पालकः स त्वं समानः सर्वेषां यजमानानां समः सन् प्रख्यातोऽसि । घेदिति पूरणौ ॥

समानः गोपतिः समान same or common; विश्वेषु हि त्वा सवनेषु तुञ्जते समानं एकं वृषमन्यवः पृथक् I. 131. 2; इष्कर्तारं अनिष्कृतं सहःकृतं...समानं इन्द्रं अवसे हवामहे; VIII. 99. 8. गोपति lord of cattle; and hence, lord; cf. विश्वस्य (VIII. 62. 7), जनस्य (IX. 35. 5), मे (VII. 18. 4) गोपति.. च्यु (Geld., Gl.) to undertake a difficult task, (Tr.) to set in operation, to bring about; cf. यानि च्यव इन्द्रः इत् ईशे एषाम् I. 165. 10.

Tr. This being so, thou art a common lord of all (the different things), since thou hast set them going.

Verse 23

उत । नूनम् । यत् । इन्द्रियम् । करिष्याः । इन्द्र । पौंस्यम् ॥
अद्य । नकिः । तत् । आ । मिनत् ॥ २३ ॥

उतापि च हे इन्द्र यत्पौंस्यं त्वदीयं बलमिन्द्रियं सामर्थ्योपेतं नूनं करिष्याः कृतवानसि खलु । अद्यायतनः कश्चिन्नद्वलं नकिरामिनत् न हिंस्यात् ॥

इन्द्रियम् belonging to, peculiar to, worthy of, Indra.

Tr. And now whatever Indra-worthy, manly act thou might do, no one might undo it.

Verse 24

वामंऽवामम् । ते । आऽदुरे । देवः । ददातु । अर्यमा ॥ वामम् ।
पूषा । वामम् । भगः । वामम् । देवः । करूळती ॥ २४ ॥

हे आदुरे शत्रूणामादारयितरिन्द्र ते तव वामंवामं यद्यद्धनीयं संभजनीयं धनमस्ति लोके तद्वामं वसु अर्यमारीणां नियमयितैतन्नामको देवो ददातु प्रयच्छतु । तथा करूळती कृत्तदन्तः पूषा पोषको देवो वामं धनं ददातु । भगोऽपि धनं ददातु । ननु करूळतीत्येतत्संनिहितत्वाद्भग इत्यनेन संबन्धनीयम् । अथवार्यमादीनां त्रया-

णामपि विशेषणत्वेन भाव्यम् । कथं पूष्णो विशेषणं स्यादिति साकाङ्क्षत्वान्न । सांनिध्याकाङ्क्षयोः सद्भावेऽपि योग्यतामन्तरेणान्वयायोगात् । तस्मात्पूषा प्रपिष्टभागोऽदन्तक (तै० सं० २-६-८५) इत्यादिश्रुतिषु पूष्ण एवादन्तकत्वेन प्रसिद्धेर्व्यवहितस्यापि तस्यैव विशेषणत्वं युक्तम् । वामं वननीयं भवतीत्यादि निरुक्तम् (६-३१) अत्र द्रष्टव्यम् ॥

वामं वामम् each desired thing: In an आग्नेडित the first member only is accented. आदुरे cannot be addressed to Indra, for he requires no boons from other gods. Durga (निरु. 6. 31) takes it to mean आदरवत् and refers it to the sacrificer Gr. follows him. The word occurs only here. Geld. appears to be right in supposing आदुरि to be the name of the poet's patron. अरु and वसु are thus addressed by name in VIII. 23. 28 and कलश in X. 32. 9. कंरूळती (करु from कृ + दत् + इन्; the उ of करु is lengthened and the द् of दत् is changed to ड्) having broken teeth Sāy. has shown good reasons for referring it to पूषन् and not to भग.

Tr. May Aryaman grant thee, Āduri, each desire; may Pūsan, the tooth-less god, and may Bhaga grant thee each desire.

No. 15

MANDALA V SŪKTA 1

आत्रेये पञ्चमे मण्डले षडनुवाकाः । तत्र प्रथमेऽनुवाके चतुर्दश सूक्तानि । तत्राबोध्यग्निरिति द्वादशर्चं प्रथमं सूक्तम् । अत्रेयमनुक्रमणिका । अबोधि द्वादश बुधगविष्ठिराविति । पञ्चमे मण्डलेऽनुक्तगोत्रमात्रेयं विद्यादित परिभाषितत्वदात्रेयौ बुधगविष्ठिरावृषी । अनादेशपरिभाषया त्रिष्टुप् । मण्डलादिपरिभाषयाग्निर्देवता । प्रातरनुवाक आग्नेये क्रतौ त्रैष्टुभे छन्दस्याश्विनशस्त्रे चैतदादिचत्वारि सूक्तानि । तथा च सूत्रितम् । अबोध्यग्निः समिधेति चत्वारि (आ० ४-१३) इति । अध्यायोत्सर्जनोपाकरणयोर्धामं ते विश्वमिति द्वयृचत्वेन विनियोग उक्तः ॥

Verse 1

अबोधि । अग्निः । सꣳइद्धा । जनानाम् । प्रति । धेनुꣳइव ।
आऽयतीम् । उषसम् ॥ यह्वाःऽइव । प्र । वयाम् । उत्ऽजिहानाः ।
प्र । भानवः । सिस्रते । नाकम् । अच्छ ॥ १ ॥

अयमग्निर्जनानामध्वर्य्वादीनां समिधा समिद्धिरबोधि प्रबुद्धोऽभूत् । धेनुमिव । अग्निहोत्रार्थधेनुं प्रति यथा प्रातर्बुध्यते तद्वदायतीमागच्छन्तीमुषसं प्रति । उषःकाल इत्यर्थः । अथ प्रबुद्धस्याग्नेर्भानवो ज्वाला यह्वा महान्तो वयां शाखां प्रोज्जिहानाः प्रोद्गमयन्तो वृक्षा इव प्रोज्जिहानाः स्वाधिष्ठानं त्यजन्तो नाकमन्तरिक्षमच्छाभिमुख्येन प्र सिस्रते प्रसरन्ति ॥

Budha and Gavisthira of the Atri family are the joint authors of this hymn. समिध्, an abstrast noun: the kindling, putting in of fuel; cf. यः ते समिधा उदाशति III. 10.3. उषसं प्रति अबोधि. For प्रति see on V. 80. 1. यह्व (also यहु, यह्वत्) primarily, restless or active; hence; bird or child; occurs only here in the sense of bird. प्र उत् हा jump up to. नाक m. the vault of heaven; cf. नाकस्य पृष्ठ I. 125. 5.

Tr. Agni has been awakened by the kindling of men in order to greet Usas that comes (beneficent) like a cow. His rays rise up towards the vault of heaven as the active (birds) to a branch.

Verse 2

अबोधि । होता । यजथाय । देवान् । ऊर्ध्वः । अग्निः । सुऽमनाः ।
प्रातः । अस्थात् ॥ सꣳइद्धस्य । रुशत् । अदर्शि । पाजः । महान् ।
देवः । तमसः । निः । अमोचि ॥ २ ॥

अयं होता होमनिष्पादकोऽग्निर्देवान्यष्टव्यान्यजथाय यष्टुमबोधि बुध्यते । सोऽग्निः प्रातःकाले सुमनाः शोभनमनस्को यजमानानुग्रहबुद्धिः सन् ऊर्ध्वोऽस्थात् उत्तिष्ठति । समिद्धस्यास्य रुशद्रोचमानं पाजो बलं ज्वालालक्षणमदर्शि दृश्यते । अथ तथाभूतो महान्देवस्तमसोऽन्धकारान्निरमोचि निर्मुक्तोऽभूत ॥

देवा'न् यज'थाय' यजथ abs. n., governs देवान्. पा'जस् n. lustre.

Tr. The hotṛ has been awakened that he may sacrifice to the gods. Up he has stood benign in the morning. His lustre, when he is kindled, appears brilliant. The great god has been freed from darkness.

Verese 3

यत् । ईम् । गणस्य । रशनाम् । अजीगरितिं । शुचिः । अङ्क्ते ।
शुचिऽभिः । गोभिः । अग्निः ॥ आत् । दक्षिणा । युज्यते ।
वाजऽयन्तीं । उत्तानाम् । ऊर्ध्वः । अधयत् । जुहूभिः ॥ ३ ॥

यद्यदेमयमग्निर्गणस्य सङ्घातात्मकस्य जगतो रशनां *रज्जुमिव व्यापारप्रतिबन्धकं तमोऽजीगः गिरति गृह्णाति वा । समिद्धो भवतीत्यर्थः । तदा शुचिर्दीप्तोऽग्निः शुचिभिर्गोभिर्दीप्तै रश्मिभिरङ्क्ते व्यनक्ति विश्वं जगत् । आदनन्तरमेव दक्षिणा प्रवृद्धा वाजयन्त्यन्नमिच्छन्त्याज्यधारा युज्यते युक्ता भवति । अथवा दक्षिणा प्रवृद्धाज्यधारा युज्यते । तां च धारामुत्तानामूर्ध्वतानामुपरि विस्तृतामूर्ध्व उन्नतः सन् जुहूभिरधयत् पिबति ॥

य'त् ईम् whenever or the moment when &c. For ईम् pron. see I. 116. 12 ; this one is used as adv. in combination with relative or interro. pron or adv. ; cf. ये इम् (V. 61. 11) whosoever. किंचन ईम् (II. 16. 2) not at all. गण स्य रशना'म् रशना is the string with which an animal is tied and is used metaphorically for prayer in IV. 1. 9 and IX. 87. 1 as the rope with which Agni is tied : but it is no use importing that simile, as Old. does, into our passage without an essential word like अग्नेः which would constitute the metaphor ; and how can the tied animal set into motion the string that ties it ? Hillebrandt's meaning of 'string,' row' has no authority in the RV. रशना is a string that binds and here it binds the गण. The गण, again, without a qualifying word must be Agni's गण, which consists of his flames ; cf. अग्ने याहि दूत्यं...देवान् अच्छ ब्रह्मकृता गणेन VII. 9. 5. Setting in

* आदर्शे रज्जुरिव इति पाठः ।

motion the strings that bind his flames would mean releasing his flames. गोभिः. The गो here stands for the गोविकार, viz. clarified butter. वाजय cf. II. 38. 10. (धा) *c.* The दक्षिणा is the priests' reward, also the cow of plenty. उत्ताना stretched; cf. उत्तानहस्ताः III. 14. 5; it refers to the metaphorical cow, the दक्षिणा, also suggested by धे (धा), to suck milk like a calf. जुहू ladle, the udder in the metaphor.

Tr. Whenever he sets in motion the string that binds his retinue (of flames), the bright Agni anoints himself with bright ghee. Then the cow of Bounty, that stirs men to activity, is yoked (to the task). While she lies stretched above, Agni sucks her with the ladles.

Verse 4

अग्निम् । अच्छ । देवऽयताम् । मनांसि । चक्षूंषिऽइव । सूर्ये ।
सम् । चरन्ति ॥ यत् । ईम् । सुवाते इति । उषसा । विरूपे
इति विऽरूपे । श्वेतः । वाजी । जायते । अग्रे । अह्नाम् ॥ ४ ॥

अग्निं देवमच्छाभिमुख्येन देवयतां देवानात्मन इच्छतां यजमानानां मनांसि सं चरन्ति । देवा यष्टव्यास्तदर्थं कदायं वर्धिष्यतीति ध्यायन्तीत्यर्थः । चक्षूंषीव सर्वेषां प्राणिनां यथा सूर्ये संचरन्ति तद्वत् । यद्यदेमेनमग्निमुषसा सह विरूपे नानारूपे द्यावापृथिव्यौ सुवाते जनयतः । तदानीं श्वेतः प्रकृष्टवर्णोपेतो वाजी वेजनवानग्निरह्नामग्र उदयकाले जायते प्रवर्धत इत्यर्थः ॥

देवयता'म् from देवय (देवान् आत्मने इच्छति), god-minded. वि'रूपे उष'सा. वि means diverse or different The विरूपे उषसा are उषासानक्ता.

Tr. The minds of the pious converge to fire as (men's) eyes to the sun. When the diverse-coloured dawns bring him forth, the white charger (Agni) is born at the head of the day.

Verse 5

जनिष्ट । हि । जेन्यः । अग्रे । अह्नाम् । हितः । हितेषु । अरुषः ।

वनेषु ॥ दमेऽदमे । सप्त । रत्ना । दधानः । अग्निः । होता ।
नि । ससाद । यजीयान् ॥ ५ ॥ * नोऽग्नि

अयमग्निर्जेन्य उत्पादनीयोऽह्नामग्र उदयकाले जनिष्ट प्रादुरभूत् । पश्चात् हितेषु वनेषु वनोत्थेषु काष्ठेष्वरुष आरोचमानः सन् हितः स्थापितः । पश्चादमेदमे तत्तद्यागगृहे सप्त रत्ना रमणीयाः सप्त ज्वाला दधानो धारयमाणः । अथवा यजमानेभ्यः सप्तविधानि रत्नानि दधानोऽग्निर्होता होमनिष्पादकः सन् यजीयान्यष्टव्यः सन् निषसाद निषण्णो भवति ॥

जेन्यः (from जन्) of noble birth, noble; cf. जेन्या योषा I. 119. 5; जेन्यो वृषा I. 140. 2; जेन्यं वसु II. 5. 1. Mark the repetition of जनिष्ट and अग्ने अह्नाम् from the last rc; cf. *d* repeated in 6 *a*; मृज्यते in 8; अन्यान् in 9. अरुषः red. दमेदमे (दम, domos. house) in each home. सप्त रत्ना. रत्न (from रा) gift, precious things. सप्त is a favourite number in the RV; here it stands for many. यजीयान् better than the human hotr.

Tr. The noble one, indeed, has been born at the head of the day, the red one placed on the piled wood; conferring seven precious things on each household, Agni has taken his seat as the better sacrificer.

Verse 6

जीवति यजमाने मृत इति शब्दो यदि स्यात्तदानीं सुरभिमतीष्टिः कार्या । तत्रेयमनुवाक्या । सूत्रितं च । अग्निर्होता न्यसीदद्यजीयान्त्साध्वीमकर्देववीतिं नो अद्या (ऐ० ब्रा० ७-९) इति ॥

अग्निः । होता । नि । असीदत् । यजीयान् । उपऽस्थे । मातुः ।
सुरभौ । ऊं इति । लोके ॥ युवा । कविः । पुरुनिःऽस्थः ।
ऋतऽवा । धर्ता । कृष्टीनाम् । उत । मध्ये । इद्धः ॥ ६ ॥

अयमग्निर्होता होमनिष्पादकः सन् यजीयान्यष्टव्यश्च सन् न्यसीदत् निषसाद । कुत्रेति तदुच्यते । मातुः सर्वस्य निर्मातुर्भूम्या उपस्थ उत्सङ्गे तत्रापि सुरभौ आज्यादिसौरभ्ययुक्ते लोके सर्वैर्द्रष्टव्ये स्थाने वेदिलक्षणे । उतापि च युवा नित्य-

तरुणः सर्वत्र मिश्रितो वा कविर्मेधावी पुरुनिःष्टो बहुस्थान ऋतावा यज्ञवान्धर्ता सर्वस्य धारक एवंभूतः सन् ऋष्टीनामृत्विग्यजमानानां मध्य इद्धः *दीप्तः सन् वर्तत इति शेषः ॥

मातुः उप'स्थे. The 'mother's lap' is the altar which is the centre of the Earth, i. e. देवयजन. उ लोक'. उलोके must be the original word, because उ and लोक invariably come together and against the ordinary rules उ coming before लोक remains unaccented even when it begins a Pāda (cf. III. 2-9; 35. 11; V. 4. 11). लोक occurs by itself, but only 7 times, and with a different meaning except in the case of VI. 47. 8, where we have the expression उरुलोक. लोक is therefore a later form of उरुलोक or उलोक and the Padakāra has unnecessarily split up the word into two Padas. उलोक means 'open space', 'a place'. पुरुनिष्टः. निः स्था to rise up from; cf. नळा इव सरसः निः अतिष्ठन्.

Tr. Agni has taken his seat as the better sacrificer in the mother's lap, in the sweet smelling place (the Vedi), the young, holy and wise god, rising up from many places, the supporter of the clans and kindled in their midst.

Verse 7

प्र । नु । त्यम् । विप्रम् । अध्वरेषु । साधुम् । अग्निम् । होतारम् ।
ईळते । नमःऽभिः ॥ आ । यः । ततान । रोदसी इति । ऋतेन ।
नित्यम् । मृजन्ति । वाजिनम् । घृतेन ॥ ७ ॥

त्यं तमग्निं नमोभिः स्तुतिभिर्नु क्षिप्रमीळते स्तुवन्ति । कीदृशं तम् । विप्रं मेधाविनमध्वरेषु साधुं फलसाधकं होतारं होमनिष्पादकम् । यो देवो रोदसी द्यावापृथिव्यावृतेनोदकेना ततान विस्तारितवान् । अग्नौ प्रास्ताहुतेरादित्यद्वारा वृष्ट्युत्पादकत्वात् । अथवा ऋतेन सत्यभूतेन हविषा दिवं तथाभूतेन वृष्ट्यादिफलेन भुवं चाततान । वाजिनमन्नवन्तं देवं यजमाना नित्यं घृतेनोदकेनाज्येन वा मृजन्ति परिचरन्ति ॥

* समिद्धः सन् इत्यादर्शः ।

वि॰प्र (विप् to be inspired) bard, sage साध्मन् (साध्) going straight to the goal, of पन्थाः II. 9 6 (रोदसी). आततान spread over; cf. पृथिवी द्यां रोदसी अन्तरिक्षं भानुना आ ततान X. 88. 3. नित्थं वाजिनम् one's own race-horse; cf. नित्यं मृजन्ति I. 166. 2: सदः IX. 92. 3. मृज् to polish.

Tr. That sage skilful in sacrifice, Agni, the hotr, they praise with salutations. Him who spreads himself over heaven and earth by his Law, their own race-horse (who brings rich prizes to them), they polish (groom) with ghee

Verse 8

मार्जाल्यः । मृज्यते । स्वे । दमूनाः । कविऽप्रशस्तः । अतिथिः ।
शिवः । नः ॥ सहस्रऽशृङ्गः । वृषभः । तत्ऽओजाः । विश्वान् ।
अग्ने । सहसा । प्र । असि । अन्यान् ॥ ८ ॥ * श्वाँ

मार्जाल्यः संमार्जनीयोऽयमग्निर्मृज्यते परिचर्यते । स्वे स्वकीये स्थाने । कीदृशोऽयम् । दमूना दानमना दान्तमना वा कविप्रशस्तः कविभिर्मेधाविभिः प्रशस्तः प्रकर्षेण स्तुत्यो नोऽस्माकमतिथिरतिथिवत्पूज्यः शिवः सुखकरश्च । सहस्रशृङ्गोऽपरिमितज्वालो वृषभो वर्षिता फलानाम् । तदोजाः । यत्प्रसिद्धं बलं तेजो वास्ति तदेवौजो यस्य तादृशः । सर्वबलस्वरूप इत्यर्थः । अथ प्रत्यक्षवाद् । हे अग्ने विश्वानन्यान् स्वव्यतिरिक्तान् सर्वान् सहसा बलेन प्रासि । प्रेति परेत्यर्थः । पराभवसि व्याप्तुं वा प्रभवसि ॥

मार्जाल्य[1] occurs only here Is it corrupt for मार्जाल्य, with which cp. विडाल्य, पनाय्य, स्पृहयाय्य? or is it from मार्जाल (cp. चषाल, चात्वाल, शिवाल, कीलाल) like ओक्य, गण्य, पृष्ठ्य? In either case it can mean 'worthy of being polished' or pertaining to मार्जाल (?), not, 'one who loves to be polished', as Gr. explains it. दमूना a housefriend. स्वे (scil स्थाने) तदोजाः, तस्य सहस्रशृङ्गस्य वृषभस्य ओज इव ओजः यस्य. प्र असि to surpass.

Tr. The house-friend, who deserves to be groomed, is groomed in his own place (the altar), the benign guest praised by poets, the bull of a thousand horns, having the

might of such a bull. Thou surpassest all other gods by thy might.

Verse 9

प्र । सद्यः । अग्रे । अति । एषि । अन्यान् । आविः । यस्मै । चारुऽतमः । बभूथ ॥ ईळेन्यः । वपुष्यः । विभाऽवा । प्रियः । विशाम् । अतिथिः । मानुषीणाम् ॥ ९ ॥

हे अग्ने त्वं यज्ञमासाद्य प्र सद्यस्तदानीमेवान्यान् स्वसमानानत्येषि अतिक्रामसि । यस्मै चारुतमः सन्नाविर्बभूथ । किंच त्वमीळेन्यः स्तुत्यो वपुष्यो वपुष्करो दीप्तिकरो वा विभावा विशिष्टदीप्तिमान् प्रियः प्रियभूतो विशां सर्वेषां प्राणिनां तथातिथिः पूज्यो मानुषीणां प्रजानां भवसि ॥

अ'ति इ occurs only in I. 132. 8; III. 9. 4, V. 53. 14; 83. 10; VIII. 32. 22; IX. 69. 9; 97. 31; 107. 19 and in our passage with प्र. The meaning everywhere is related to the primary meaning of 'going beyond'. Old.'s meaning of 'overtaking' does not appear to be justified. तस्मै, which is the antecedent of यस्मै in *b*, is to be understood in *a*. With the general sense cp. VII. 28. 1 *ab*; 66. 2 (तिरः अर्य· हवनानि श्रुतं न·).

Tr. Straightway thou givest preference over others (to him) for him thou, the most agreeable god, worthy of praise, handsome, lustrous, a favourite guest of the human clans, makest thy appearance.

Verse 10

तुभ्यम् । भरन्ति । क्षितयः । यविष्ठ । बलिम् । अग्ने । अन्तितः । आ । उत । दूरात् ॥ आ । भन्दिष्ठस्य । सुऽमतिम् । चिकिद्धि । बृहत् । ते । अग्ने । महि । शर्म । भद्रम् ॥ १० ॥

हे यविष्ठ युवतमाग्ने तुभ्यं क्षितयो मनुष्या भरन्ति संपादयन्ति । किम् । बलिं पूजां हविर्लक्षणामन्तितोऽन्तिकादुतापि च दूरात् । आ इति चार्थे । किंच भन्दिष्ठ-

स्यातिशयेन स्तोतुः सुमतिं स्तुतिमा चिकिद्धि आजानीहि । हे अग्ने ते तव शर्म सुखमस्मभ्यं दातव्यं *बृहन्महत् महि भद्रं महत्स्तुत्यं च ॥

क्षितिः (from क्षि to settle) settlements, clans. बलिं (from भृ, and used always as cognate obj. to भृ) offering. अन्तित॰ उत् दूरा त् ; cf II. 27. 13 ; III. 59. 2 ; IV. 1. 10 ; VIII. 27. 9. अन्तितः from near, from अन्ति near ; cf. यः नः अग्ने अभिदासति अन्ति दूरे, पदीष्ट सः I. 79. 11. भन्दिष्ठ (from भन्द् to shine ; cf. अग्निः पुरुप्रियः भन्दते धामभिः कविः III. 9. 4) the most brilliant. चिकिद्धि from कित् to note, to know. c is parenthetically addressed to the यजमान.

Tr. From far and near the clans bring offerings to thee, Agni, youngest (among gods).—Observe how the most brilliant god is propitious to thee !—Ample and auspicious is thy great protection.

Verse 11

आ । अद्य । रथम् । भानुऽमः । भानुऽमन्तम् । अग्ने । तिष्ठ ।
यजतेभिः । सऽअन्तम् ॥ विद्वान् । पथीनाम् । उरु । अन्तरिक्षम् ।
आ । इह । देवान् । हविःऽअद्याय । वक्षि ॥ ११ ॥ *र्व १

हे भानुमो दीप्तिमन्नग्ने अद्यास्मिन्यागदिने भानुमन्तं दीप्तिमन्तं समन्तं समीचीनप्रान्तोपेतं रथं जयतेभिर्यष्टव्यैर्देवैः सहा तिष्ठ आरोह । विद्वान्यष्टव्यदेवपरिज्ञानवांस्त्वं पथीनां देवयजनमार्गान्प्रति । द्वितीयार्थे षष्ठी । उर्वन्तरिक्षं प्रभूतेऽन्तरिक्षे देवान्यष्टव्यान्हविरद्याय हविर्भक्षणायेहा वक्षि आवहसि ॥

भानुमः. The termi. मस् is the older form of मत्, like वस् that वत्. सऽमन्तम् is understood only here by Gr. (and Old.) as adv. ; in three other places where it occurs, I. 185. 5 (युवतीं) ; VII. 80. 1 (रजसी) ; X. 114. 1 (धर्मा) it is adj. विद्वाऽन् पथीनाऽ उरु अन्तऽरिक्षम्. Old. takes पथीनाम् as gen. obj. to विद्वान् and अन्तरिक्षं also as another obj. in acc. to विद्वान् ; Zimmermann would take अन्तरिक्षं as an acc. of अत्यन्तसंयोग, by hypallage to stand for अन्तरिक्षपथम्. पथीनां अन्तरिक्षं can give good sense.

* आदर्शे बृहन्महद्भद्रं स्तुत्यं च इति पाठः ।

Tr. Mount thy chariot today, lustrous Agni, which is lustrous and rubs shoulders with the holy (gods). Conversant with the vast interval of the roads (that separate thee from us), bring the gods hither for eating the offerings.

Verse 12

अवोचाम । कवये । मेध्याय । वचः । वन्दारु । वृषभाय । वृष्णे ॥
गविष्ठिरः । नमसा । स्तोमम् । अग्नौ । दिविऽइव । रुक्मम् ।
उरुऽव्यञ्चम् । अश्रेत् ॥ १२ ॥

वयमाङ्गेयाः कवये मेधाविने मेध्याय मेधार्हाय वृषभाय वर्षकाय फलानां वृष्णे सेक्त्रे यूने वन्दारु वन्दनशीलं वचः स्तोत्रमवोचाम । अथ ऋषिरात्मानं परोक्षेणैव निर्दिश्य स्तुतिमुपसंहरति । गविष्ठिरोऽयमृषिर्नमसा नमस्कारेण हविषा वा युक्तं स्तोम स्तोत्रं अग्नावश्रेत । श्रयति रम । दिवि रुक्मं रोचमानं उरुव्यञ्चमुरुगमनमादित्यमिव ॥

मे॑ध्य (from मेधा) wise; occurs only twice; but cf. मेधिर I. 25. 20. वन्दा रु व॑चः. वन्दारु (cf. जभारु, शरारु, पियारु) glorificatory, from वन्द् to glorify, to praise; cf. इद्रस्य कृतानि प्र वन्दे VII 6. 1; गिरा वन्दस्व मरुतो अह VIII. 20. 20; वन्दारुः ते तन्वं वन्दे अग्ने I 147. 2. स्तो॑मं अश्रेत. श्रि to direct, to send forth: cf. ऊर्ध्व भानुं अश्रेत् IV. 6.2. उरुव्य॑ञ्च रुक्म म्॑. रुक्म m. gold. European scholars, following Sāy., have understood it metaphorically to stand for the sun; but it is not the poet who sends forth the sun; we have to supply देवाः in the simile. Further व्यच् means 'to encompass' cf. न ते महिमानं रजांसि विव्यक्ष VII. 31. 6; न त्वा रजः पार्थिव विव्याच VIII. 88. 5) and not 'reach' as Old. translates; उरुव्यच् therefore will not be a good epithet for the sun, रुक्म prob. The strong form of व्यच् is व्यञ्च् in declension like प्राञ्च् of प्राच् &c.

Tr. We have addressed our words of glorification to the wise sage, to the mighty bull. Gavisthira has reverently sent forth his hymn to Agni as (the Sun or Agni?) sends the all-suffusing golden hues into heaven.

No. 16

MANDALA V SŪKTA 63

ऋतस्य गोपाविति सप्तर्चं सप्तमं सूक्तम् । अत्रेयमनुक्रमणिका । ऋतस्य सप्तार्चं-नाना जागतामिति । आत्रेयोऽर्चनाना नाम ऋषिः । जगती छन्दः । तुह्यादिपरिभाषया मित्रावरुणौ देवता । विनियोगो लौकिकः ॥

Among the epithets of the joint deities Mitra and Varuṇa, a single hymn being separately addressed to Mitra, वृष्टिद्यावा, producers of rainy sky, and रीतिऽआपः, of flooded waters (V. 68. 5) are the most characteristic. The following hymn dwells on this rain-giving characteristic of the gods. Parjanya (3, 4, 6, 7) and the Maruts (2, 5, 6) play naturally an important rôle in it.

Verse 1

ऋतस्य । गोपौ । अधि । तिष्ठथः । रथम् । सत्यऽधर्माणा । परमे ।
विऽओमनि ॥ यम् । अत्र । मित्रावरुणा । अवथः । युवम् ।
तस्मै । वृष्टिः । मधुऽमत् । पिन्वते । दिवः ॥ १ ॥

हे ऋतस्योदकस्य गोपौ रक्षितारौ सत्यधर्माणा सत्यधर्माणौ युवां रथमधितिष्ठथः आरोहथोऽस्मद्यज्ञमागमनार्थम् । कुत्र । परमे व्योमनि निरतिशय आकाशे । हे मित्रावरुणौ युवं युवामत्रास्मिन्यज्ञे यं यजमानं अवथो रक्षथः तस्मै यजमानाय वृष्टिः पर्जन्यो मधुमदुदकं दिवो द्युलोकात्पिन्वते सिञ्चति वर्षयति ॥

ऋतस्य गोपौ. गोपाः, primarily, guardian of cows: hence, guardian. मधुमत् adv. पिन्व् to swell, to overflow, to flow.

Tr. Guardians of the Law, as gods of invariable ordinances you mount your chariot in the highest heaven. For him whom you protect here (on the earth), Mitra and Varuṇa, rain flows from heaven with honey.

Verse 2

संऽराजौ । अस्य । भुवनस्य । राजथः । मित्रावरुणा । विदथे ।
स्वःऽदृशा ॥ वृष्टिम् । वाम् । राधः । अमृतऽत्वम् । ईमहे । द्यावा-
पृथिवी इति । वि । चरन्ति । तन्यवः ॥ २ ॥ * सम्रा

हे मित्रावरुणा मित्रावरुणौ सम्राजौ सम्यग्राजमानौ युवामस्य भुवनस्य राजथः ईशाथे । स्वर्दृशा स्वर्गस्य द्रष्टारौ युवां विदथेऽस्मद्यज्ञे सम्राजाविति संबन्धः । वां युवां वृष्टिं राधो धनं वृष्ट्याख्यं धनममृतत्वं स्वर्गं चेमहे प्रार्थयामहे । युवयोस्तन्यवो विस्तृता रश्मयो द्यावापृथिवी वि चरन्ति । विविधं प्राप्नुवन्ति । अथवा वृष्टिं धनममृतत्वं चेमहे ॥

राजथः. There is a pun here on the root-meaning of सम्राट्. विद'थे Geld. (Gl. and Comm.) 'omniscience, esp. higher religious 'knowledge' and his construction is अस्य भुवनस्य सम्राजा विदथे राजथः; but this goes against the normal use of राजथः elsewhere; राज् governs the geni. and only occasionally the acc. and is never used with the loc.; भुवनस्य occurs with राज् in VI. 70. 2. VIII. 37. 3; IX. 86.5, 28 and भुवनं with वि राज् in V. 8. 5; 63. 7. Acc. to Geld.'s interpretation, besides, there is no logical connection between *ab* and *c*. The only way open to us then is to connect विदथे with स्वर्दृशा. विदथ occurs very often in the RV and in different meanings. For the different derivations of the word see on II. 23. 19. M. M. understands it in the sense of sacrifice, sacrificial assembly, assembly : to which Old. adds the meaning of sacrificial ordinances. स्वर्दृ'श् (cf. त्वादृश्, यक्षदृश्) appearing (dazzling) like the sun (used of the gods); (ii) looking on the sun, i. e. alive, or (Geld.) seeing with Sun's light (used of men in four places). Geld. thinks that the latter interpretation will do in all cases. विदथे स्वर्दृशा is prob. to be understood as 'appearing dazzling at the sacrifice,' वां रा'धः. राध· gift or blessing, standing in appo. to वृष्टिं and अमृतत्वम्. तन्यु' the thundering (Maruts) from तन् (तन्यति) to thunder, cf. पायु, मायु, पीयु, यज्यु, भुज्यु, &c. It occurs only here. वि' चर See on I. 32. 10.

Tr. You rule over the creation as the sovereign lord, appearing dazzling (like the sun) at (our) sacrifice. We beg of you as your gift rain and immortality.—The thundering (Maruts) move to and far between heaven and earth.

Verse 3

सꣳराजौ । उग्रा । वृषभा । दिवः । पती इति । पृथिव्याः ।
मित्रावरुणा । विचर्षणी इति विऽचर्षणी ॥ चित्रेभिः । अभ्रैः ।
उप । तिष्ठथः । रवम् । द्याम् । वर्षयथः । असुरस्य । मायया ॥३

* सम्रा

सम्राजौ सम्यग्राजमानावुग्रोद्गूर्णबलौ वृषभा वर्षितारौ दिवो द्युलोकस्य पती स्वामिनौ पृथिव्याश्च पती विचर्षणी सर्वस्य द्रष्टारौ मित्रावरुणौ । एवं महानुभावौ चित्रेभिश्चायनीयैरभ्रैर्मेघैः सह रवं स्तोत्रमुप तिष्ठथः । पश्चात् द्यां च वर्षयथोऽसुरस्योदकानिरसितुः पर्जन्यस्य मायया प्रज्ञया सामर्थ्येन ॥

वि॰चर्षणी very energetic. It is generally an epithet of gods, but in IV. 36. 5 and VIII. 13. 6 it is used of a man. उ प स्था to install oneself in ; cf. गृहंगृहं उपतिष्ठाते अग्निः I. 124 11. र वम् thunder. अ॰सुरस्य माय या. Is it the माया of *the* असुर (viz. वरुण or) is it an Asurian माया ? The same expression occurs in X. 177. 1 where the latter interpretation alone will do. अ॰सुरस्य मायया is thus used in the same sense as असुर्यस्य मह्ना II. 35. 5. The meaning of असुर is determined by the use of the word असुरत्व or असुर्य, which is used in the sense of sovereign power in II. 33. 9 ; 35. 2 ; VI. 20. 2 ; 30. 2 ; 36. 1, VII. 21. 7. Varuna, Indra, Agni, Savitr, Aryaman, Pūsan, Soma, Dyaus, and Mitrāvaruṇa have received the epithet ; but while for Indra विश्वे असुर्य has been claimed in VI. 20. 2, Varuna claims in IV. 44. 2 to be the first to have been invested with it. असुर्य in II. 23. 2 is Asura-like. The word असुर is derived from अस् by Gr. and Berg. (III. 71-73).

Tr. Mighty sovereigns, mighty lords of heaven and of

earth, most energetic Mitra and Varuna, you install yourself in thunder with beautiful clouds (and) by your Asurian power cause heaven to send down rain.

Verse. 4

माया । वाम् । मित्रावरुणा । दिवि । श्रिता । सूर्यः । ज्योतिः ।
चरति । चित्रम् । आयुधम् ॥ तम् । अभ्रेण । वृष्ट्या । गूहथः ।
दिवि । पर्जन्य । द्रप्साः । मधुऽमन्तः । ईरते ॥ ४ ॥

हे मित्रावरुणौ वां युवयोर्माया दिवि श्रिता आश्रिता । कैषा युवयोर्माया। उच्यते । सूर्यः सर्वस्य प्रेरको ज्योतिर्दीप्यमानश्चित्रं चायनीयमायुधमुक्तलक्षणायुधरूपश्चरति परिभ्रमत्यन्तरिक्षे । शत्रुमारकत्वादायुधमुच्यते । तं सूर्यमभ्रेण मेघेन वृष्ट्या च* दिवि गूहथः गोपायथः ॥ हे पर्जन्य देव त्वया मित्रावरुणाभ्यां वृष्ट्यर्थं प्रेरितेन मधुमन्तो द्रप्सा ईरते ईर्यन्ते त्वत्सृष्टा वा गच्छन्ति ॥

द्रप्स a drop. Ludwig and Berg. wish to change the text and take पर्जन्यद्रप्साः as one word, which, Old., as elsewhere, proves to be unncessary. ईरते 3 pl. Geld break loose, come. Gr. glorify. *d* contains the usual device of Vedic poets of invoking gods indirectly; cf II. 38. 10.

Tr. Your power dwells in heaven, Mitra and Varuna; that luminary, the sun, moves as your brilliant weapon; you conceal him with clouds and rain.—The honey-laden drops have come, Parjanya.

Verse 5

रथम् । युञ्जते । मरुतः । शुभे । सुऽखम् । शूरः । न । मित्रा-
वरुणा । गोऽइष्टिषु ॥ रजांसि । चित्रा । वि । चरन्ति । तन्यवः ।
दिवः । संऽराजा । पयसा । नः । उक्षतम् ॥ ५ ॥ * सम्रा

* आदर्शे च इति नास्ति ।

हे मित्रावरुणा युवयोरनुग्रहात् मरुतः शुभ उदकार्थं सुखं शोभनाक्षद्वारं रथं युञ्जते अश्वैर्योजयन्ति । शूरो न शूर इव । स यथा युद्धार्थं रथं युनक्ति तद्वत् । गविष्टिषु गवामुदकानामेषणेषु निमित्तेषु चित्रा चायनीयानि रजांसि लोकान् तन्यवस्तातरते मरुतो वि चरन्ति विविधं चरन्ति । तस्मात्तैः सहितौ हे सम्राजा युवां दिवो द्युलोकात्पयसोदकेन नोऽस्मानुक्षतम् सिञ्चतम् ॥

शुभे is used like श्रिये in I. 184. 3. For सुख see I. 44.2. गविष्टि, primarily, an expedition for cows; hence, an expedition or fight; cf. मा नः परा वर्क्न गविष्टिषु VI. 59. 7.

Tr. The Maruts have yoked their car with excellent axle-boxes–and it is a fine sight to see!—as a warrior does for fight, O Mitra and Varuna. The thunderers (the Maruts) move incessantly in the splendid aerial regions. Sprinkle water on us, sovereigns of heaven.

Verse 6

वाचम् । सु । मित्रावरुणौ । इराऽवतीम् । पर्जन्यः । चित्राम् ।
वदति । त्विषिऽमतीम् ॥ अभ्रा । वसत । मरुतः । सु । मायया ।
द्याम् । वर्षयतम् । अरुणाम् । अरेपसम् ॥ ६ ॥

हे मित्रावरुणौ युवयोरनुग्रहात् पर्जन्यो मेघः सु सुष्ठविरावतीमन्नवतीमन्नसाधिकां चित्रां चायनीयां त्विषीमतीं दीप्तिमतीं वाचं गर्जनशब्दं वदति शब्दयति वृष्ट्यर्थम । मरुतश्चाभ्रा अभ्राणि मेघान् सु सुष्ठु वसत आच्छादयन्ति मायया स्वप्रज्ञया । युवां च पर्जन्येन मरुद्भिश्च सहारुणामरुणवर्णामरेपसमपापां वृष्ट्यविघातिनीं द्यां वर्षयतम ॥

सु, adv., well, indeed, behold! इरा (cognate with इडा, इष्) refreshing drink; cf. इरा विश्वस्मै भुवनाय जायते V. 87. 4. त्विषि (त्विष्) brilliance, as well as overpowering, terrible onslaught; त्विषीमत् epithet of Indra in II. 22. 2; of Maruts V. 66. 10; but of सदनं III. 31. 12. (अ)वसत impf. 3. pl. अरेपस् taint-less; clear; an epithet generally of gods, from रेपस् (रिप्-लिप्); it is an epithet showing the result: the red sky would be bled white.

Tr. Behold! Parjanya (the rain-god) utters a beautiful, terrible voice that brings refreshment, O Mitra and Varuṇa; the Maruts have clad themselves in clouds by their power; sprinkle the red sky clear.

Verse 7

धर्मणा । मित्रावरुणा । विपःऽचिता । व्रता । रक्षेथे इति । असुरस्य ।
मायया ॥ ऋतेन । विश्वम् । भुवनम् । वि । राजथः । सूर्यम् ।
आ । धत्थः । दिवि । चित्र्यम् । रथम् ॥ ७ ॥

हे मित्रावरुणा विपश्चिता प्राज्ञौ युवां धर्मणा जगद्धारकेण वृष्ट्यादिलक्षणेन कर्मणा व्रता यज्ञादिकर्माणि रक्षेथे पालयथः । असुरस्य मेघानां निरसितुः पर्जन्यस्य मायया प्रज्ञया च ऋतेनोदकेन यज्ञेन वा निमित्तेन विश्वं भुवनं सर्वं भूतजातं विराजथः विदीपयथः इत्यर्थः । सूर्यमा सूर्यं च चित्र्यं पूज्यं रथं रंहणस्वभावं दिवि द्युलोके धत्थः धारयथः जगदुपकारार्थम् ॥

धर्मन् n. (from धृ to support) that which stabilises society, the eternal laws; धर्मणा strictly according to the laws. विपश्चित् (विप् to be inspired + चित् to know) inspired, wise. चित्र्य (चित्र + य) having properties of a wonderful thing, hence, wonderful, occurs only in VII. 20. 7.

Tr. By your Asura power you guard the commandments strictly acc. to your laws, Mitra and Varuna; you rule over the entire creation according to the Law; you hold the sun in heaven as your wonderful car (of inspection).

No. 17

MANDALA V. SŪKTA 73

षष्ठेऽनुवाके पञ्चदश सूक्तानि । तत्र यदद्य स्थ इति दशर्चं प्रथमं सूक्तमात्रेयस्य पौरनाम्न आर्षमानुष्टुभमाश्विनम् । अनुक्रान्तं च । यदद्य दश पौर आश्विनं तदानुष्टुभं त्विति । तदित्युक्तवादिदमादीनि षट् सूक्तान्याश्विनानि । आनुष्टुभं

त्विति तुशब्दादिदमुत्तरं च द्वे आनुष्टुभे । प्रातरनुवाक आश्विने क्रतावानुष्टुभे छन्दस्याश्विनशस्त्रे चेदमादिके द्वे सूक्ते । यदद्य स्थ इति सूक्ते (आ० ४--१५) इति सूत्रितम् ॥

Verse 1

यत् । अद्य । स्थः । पराऽवति । यत् । अर्वाऽवति । अश्विना ॥
यत् । वा । पुरु । पुरुऽभुजा । यत् । अन्तरिक्षे । आ । गतम् ॥१

हे पुरुभुजा बहुषु यज्ञेषु भोक्तारावधिकं रक्षितारौ वा हे अश्विना यद्यस्मिन् काले परावत्यत्यन्त दूरदेशे द्युलोके स्थो भवथः यद्वा अर्वावत्यरणवति गन्तुं शक्ये प्रदेशेऽन्तिके स्थः । यद्यदि वा अथवा पुरु बहुप्रदेशेषु स्थः । यद्यदन्तरिक्षे स्थ तस्मात्सर्वस्मादद्या गतम् आगच्छतम् ॥

अर्वाव'त् f. near regions. *c* The य'त् is superfluous; cf. आ in I. 25. 15 *b*; यत् in I 141. 7 *c*; सम् in IV. 40. 2. This is one of the rhetorical flourishes of the Vedic poet's style. With पुरु पुरुभुजा Old. compares पुरु पुरुह्वत· VII 2. 32. पुरु' is an adv. which intensifies the meaning of पुरुभुजा. The poet is deliberately piling up पुरु here and in rc 2. For पुरुभुजा cf. I. 116. 13.

Tr. Whether you be far or near, O Aśvins that enjoy very many (powers), or whether you are in the aerial regions, come (here).

Verse 2

इह । त्या । पुरुऽभूतमा । पुरु । दंसांसि । बिभ्रता ॥ वरस्या ।
यामि । अध्रिगू इत्यध्रिऽगू । हुवे । तुविःऽतमा । भुजे ॥ २ ॥

इहास्मिन्यज्ञे त्या तौ पुरुभूतमा पुरूणां बहूनां यजमानानां भावयितृतमौ पुरु पुरूणि दंसांसि कर्माणि बिभ्रता धारयन्तौ वरस्या वरणीयावध्रिगू अन्यैरधृतगमनकर्माणौ यामि उपागच्छामि । तुविष्टमा प्रभूततमौ । भुजे भोगाय पालनाय वा हुवे आह्वयामि ॥

पुरुभू (cp. शंभूः, मयोभू) Sāy.'s explanation has to be accepted. वरस्या' (instr.) with desire for a वरस् n. (cf. पुरू वरांसि VII. 62. 2)

boon. या to entreat ; cf. तत्त्वा यामि ब्रह्मणा वन्दमानः I. 24. 11. अ॑ग्रिगू (अ+घृ+गा) of irresistible onslaught; an epithet of gods in most places. तुवि॑ष्टम. तुवि (mighty) appears as तुवि॰ here and in तुविष्मत्. भुजे॑ inf.

Tr. Here I entreat those helpers of many men, workers of many wonders, irresistible gods, being desirous of their blessings. I invoke the mightiest gods that I may rejoice.

Verse 3

ई॒र्मा । अ॒न्यत् । व॒पु॒षे । व॒पुः । च॒क्रम् । रथ॑स्य । येम॒थुः ॥
परि॑ । अ॒न्या । नाहु॑षा । यु॒गा । म॒ह्ना । रजां॑सि । दी॒यथः ।३।

हे अश्विनौ युवां रथस्य युष्मदीयस्यान्यच्चक्रमीर्मा । अतेरीर्मेति रूपम् । गन्तर्यादित्ये वपुषे तस्य शोभायै वपुर्वपुष्मत् तेजोवत् चक्रं येमथु नियमितवन्तौ स्थः । अन्या अन्येन चक्रेण मह्ना महत्त्वेन स्वसामर्थ्येन नाहुषा युगा । नहुषा मनुष्याः । तेषां युगा युगोपलक्षितान् कालान् प्रातरादिसवनान् अहोरात्रादिकालान्वा रजांसि लोकांश्च परि दीयथः परिगच्छथः । न्यच्यस्य मूर्द्धनि चक्रं रथस्य येमथुः (ऋ० १-३०-१९) इत्युक्तम् ॥

With the rc cp. I. 30. 19, नि अच्यस्य मूर्धनि चक्र रथस्य येमथुः । परि द्यां अन्यत् ईयते and VIII. 22. 4, युवोः रथस्य परि चक्रं ईयते ईर्मा अन्यत् वा इषण्यति. The chariot of the Aśvins is described as running on one wheel ; the other is fixed ईर्मा (= इह, नि०) or on the bull's head (I. 30. 19), which is explained by Sāy. as the mountain, by Pischel following the Nirukta as the earth (V. S. 1. 212), by Berg. (II. 502) as the invisible world. व॑पुषे व॑पु॰. The repetition is like that of पुरु in rrs 1, 2. वपुः adj. beautiful ; n. beautiful appearance. अन्या॑ = अन्येन ; Old. would fain connect it with युगा as opposed to ईर्मा. ना॑हुषा युगा॑ generations of Aryans ; नाहुष is from नहु॰ or नहुष, an ancestor of the Aryans like मनु or मनुः and hence नाहुष like मानुष stands for Aryan : cf. नहुषस्य विशपतिं अग्निम् I. 31.11. Berg. (II. 502) tries to show that नाहुष formed a clan of the Aryans as distinguished from मानुष, but his argument is not convincing. प॑रि दी to fly round ; cf. परिदीय रथेन V. 83. 7.

Tr. Here on the earth they fastened a lovely wheel of (their) chariot as an embellishment; with the other they fly round the Aryan generations and the aerial regions.

Verse 4

तत् । ऊं इति । सु । वाम् । एना । कृतम् । विश्वा । यत् ।
चाम् । अनु । स्तवे ॥ नाना । जातौ । अरेपसा । सम् । अस्मे
इति । बन्धुम् । आ । ईयथुः ॥ ४ ॥

हे विश्वा व्याप्तौ यत् येन स्तोत्रेण वां युवामनु इत्वे अनु स्तुवे तदु । उ इति पूरणः । एना अनेन पौरेण सु सुष्ठु वां युवाभ्यां कृतं संपादितं भवतु । नाना पृथगेव जातौ समृद्धावरेपसाऽपापौ अस्मे अस्मभ्यं बन्धुमन्नं धनं वा समेयथुः सम्यक् गमयथः । सम्यक् प्रयच्छतामित्यर्थः ॥

एना, Gr. here; Sāy. by him (पौर, the poet); Lud. by it (the wheel, rc 3). एना occurs in I. 30. 3 as correlated with यत्; here it should be so correlated, just like अना in IV. 30. 3. तत् is explained in *cd*. नाना जातौ born in different places; acc. to Berg (II. 506) of different mothers; cf. इहेह जाता I. 181. 4, just like इहेहमातरा, epithet of इन्द्राग्नी in VI. 49. 2. बन्धु kinship, intimate connection; सनः बन्धुं असति निः आविन्दन् X. 129. 4.

Tr. That, indeed, was so well done by you that I praise all your (deeds), (namely) that, being born in (of) different places (mothers), pure as you are, you have come into intimate relation with us.

Verse 5

आ । यत् । वाम् । सूर्या । रथम् । तिष्ठत् । रघुऽस्यदम् । सदा ॥
परि । वाम् । अरुषाः । वयः । घृणा । वरन्ते । आऽतपः ॥५॥

हे अश्विनौ वां युवयोः सदा सर्वदा रघुष्यदं शीघ्रगं रथं सूर्या युवयोः पत्नी यदातिष्ठत् आस्थितवती तदा वां परि वरन्ते परितो वृण्वन्ति । के । अरुषा

आरोचमाना घृणा दीप्ता आतप आतापनाः शत्रूणां वयोऽश्वाः । अथवातप इति विशेष्यम् । वयो गन्तारं उत्कलक्षणा आतपः सर्वतस्तापयित्र्यो दीप्तयः परि वरन्ते ॥

The story of सूर्या has appeared in I. 184. 3. रघुष्यद् (रघु = Cl. लघु + स्यद्, स्यन्द्) swift, an epithet of Agni (III. 26. 2), मरुतः, horses &c. आत'पः घृणा' प'रि वरन्ते. The पदपाठ here as in IV. 43. 6, घृणा वयः अरुषास. परि ग्मन्, is alleged by Gr. to be wrong for घृणाः; Old., accepting this, explains the mistake as being due to the false analogy of I. 52. 6. But how could the पदकार be guilty of such a mistake? घृणा is nom. pl. from घृण n. sun's heat (from घृ to kindle); cf. शं नो भव... शं हिमा श घृणेन X. 37. 10; in IV. 43. 6 घृणा stands for घृणानि and so also here. आतपः is adj. to वयः, heated, from आ + तप्.

Tr. When Sūryā mounted your swift chariot, your red winged horses, (themselves) heated, warded off constantly the sun's heat for you.

Verese 6

युवोः । अत्रिः । चिकेतति । नरा । सुम्नेन । चेतसा ॥ घर्मम् ।
यत् । वाम् । अरेपसम् । नासत्या । आस्ना । भुरण्यति ॥ ६ ॥

हे नरा नेतारावश्विनौ युवोर्युवयोः । युवामित्यर्थः । अत्रिरस्मत्पिता ऋषिः सुम्नेन सुखेनाग्निदाहोपशमरूपेण हेतुना चेतसादरयुक्तेन मनसा । चिकेतति जानाति । स्तुतवानित्यर्थः । सति दुःखे सुखमुत्प्यते । दुःखस्य कः प्रसङ्ग इत्यत आह । यद्यस्मात् हे नासत्यौ वां युवयोरास्नास्येन तन्निष्पन्नेन स्तोत्रेण घर्मं दीप्तं दहन्तमग्निमसुरैः स्वदाहाय प्रक्षिप्तमरेपसमपापं सुखकरं भुरण्यति प्राप्तवान् । भुरण्यतिर्गतिकर्मा । अत्रेरग्नेः सकाशाद्रक्षणं हिमेनाग्निं घ्रंसम् (ऋ० १-११६-८). युवमृबीसमुत तप्तमत्रये (ऋ० १०-३९-९) इत्यादिभिः स्पष्टं प्रदर्शितम् ॥

Here is a reference to the Atri legend, referred to in I. 116. 8. चिकेतति, pre. from perf. base of चित् to know, सुम्न' (सु + म्ना) well-disposed, grateful. घर्म is usually an offering of heated milk, esp. for the Aśvins; but in the Atri myth it is a hot drink which the Aśvins rendered agreeable to Atri (I. 112. 7) and which is sweet, I. 180. 4. Acc. to Berg. (II. 472) it is

celestial milk corresponding to the terrestrial घर्म. भुरण्य'ति (Gr.) sets in undulating motion; in यज्ञेयज्ञे सवना भुरण्यथः VIII. 59. 1 also the same meaning has been given to it. Berg. correctly translates it as 'seeks avidly to drink'.

Tr. Atri thought of you with a grateful mind, when, O true ones, he drank with an avid mouth the pure celestial Gharma that you sent him.

Verse 7

उग्रः । वाम् । ककुहः । ययिः । शूष्वे । यामेषु । संऽतनिः ॥
यत् । वाम् । दंसःऽभिः । अश्विना । अत्रिः । नरा । आऽववर्तति ॥ ७ ॥

उग्र उद्गूर्णबलो वां युवयोः ककुह उच्छ्रितो महान् ययिर्गन्ता संतनिः सततं गच्छन् रथो यामेषु गमनेषु यज्ञेषु वा शूष्वे श्रूयते । हे अश्विना हे नरा यद्यस्माद् युवां दंसोभिः कर्मभिरत्रिरस्मत्पितावर्ततति आवर्तयति ॥

The Atri legend is continued in this rc. ककुह' the winged horse of the Aśvins; in pl. in I. 184. 3 and IV. 44. 2. ककुह is also an epithet of विष्णु, इन्द्र, and सोम्यो रसः meaning 'noble'. ययि' Gr. going fast; also an epithet of Soma in I. 37. 2. या'म journey. संतनि.: a tumultuous noise; also used of Soma in IX. 69. 2; 47. 14, which makes Berg. identify ककुह with the celestial Soma. आवव'र्तति pre. from perf. base.

Tr. Your mighty Kakuha went fast, and the tumultuous noise of his course was to be heard, when Atri returned home by your wonderful deeds, oh heroes.

Verse 8

मध्वः । ऊं इति । सु । मधुऽयुवा । रुद्रा । सिसक्ति । पिप्युषी ॥
यत् । समुद्रा । अति । पर्षथः । पक्वाः । पृक्षः । भरन्त । वाम् ॥ ८ ॥

हे मधूयुवा मधुरस्य सोमादेर्मिश्रयितारौ । हे रुद्रा रुत् स्तुतिः तया द्रवणीयौ रुद्रपुत्रौ वा । मध्वो मधुररसेन सु पिप्युषी सुष्ठु प्याययन्ती स्तुतिरस्मत्कृता सिषक्ति सेवते । यद्यदा समुद्रा समुद्द्रवणसाधनान्यन्तरिक्षाण्यति पर्षथः अतिपारयथः । यज्ञं प्राप्नुथ इत्यर्थः । पक्काः पृक्षोऽन्नानि हविर्लक्षणानि वां भरन्त भ्रियन्ते यजमानैः ॥

मधूयुवा रुद्रा' मधुयु lover of honey; the Pp. shortens the vowels in all these forms; cf. वसु'यवः &c. रुद्र brilliant; epi. of अग्नि, इन्द्र, मित्रावरुणा. This disproves Berg.'s contention (II. 436) that the epithet रुद्र is applied to the Aśvins because they are physicians like रुद्र; cf. I. 158. 1; II. 41. 7; &c. and the epithet रौद्र in X. 61. 15. म'ध्वः पिप्यु'षी सि'षक्ति' The accent सिषक्ति is due to the two vocatives that separate *a* and *b*, which made the poet think that a new sentence opened with सिषक्ति. मध्वः पिप्युषी (a cow) swollen with honey or sweetness. A (celestial) cow that never dries up is mentioned as belonging to the Aśvins in VI. 63. 8; also in VII. 68. 9, and prob. in VIII. 22. 4. It may stand for the dawn or prayer. सिषक्ति (सच्) follows, accompanies; cf. सुमतिः वा सिषक्ति VII. 70. 2; छायेव सिषक्षि I. 73 8. समुद्रा' = समुद्राणि (cf. अर्णांसि समुद्राणि VI. 72. 3). पक्का'ः पृ'क्षः पक्क cooked, not raw; cf. युवं पयः उस्रियाया अधत्तं पक्क आमायाम् I. 180. 3. पृक्ष् nourishment; nourishing drink; cf. पक्काः पृक्ष भुरजन्त in IV. 43.5. Old. points out that the पदपाठ should have been अतिपा'र्षयः (one word); he cites several other cases of similar mistakes in ZDMG, 61. 811. भरन्त pass. pre. 3 pl. from भृ to offer; Old. suggests an emendation, on the strength of IV. 43 5, to भुरन्त, which is obscure and not better.

Tr. O brilliant gods that love sweet things (a cow) with swollen udders accompanies (you). When you cross the seas, cooked food is offered to you.

Verse 9

सत्यम् । इत् । वै । ऊँ इति । अश्विना । युवाम् । आहुः ।
मयऽभुवा ॥ ता । यामन् । यामऽहूतमा । यामन् । आ । मऽळ-
यत्ऽतमा ॥ ९ ॥ [*उ अ

हे अश्विना युवां सत्यमित् सत्यमेव । वा इति पादपूरणः । मयोभुवा सुखस्य भावयितारावाहुः पुराविदः । ता तौ सुखकरत्वेन प्रसिद्धौ युवां यामन्यज्ञे यामहूतमागमनार्थं भृशमाह्वातव्यौ । भवतामिति शेषः । यामन्नस्मद्यज्ञेऽस्मदर्थागमने वा सृळयत्तमा चातिशयेन सुखयितारौ भवतम् । आकारश्चार्थे ॥

मयोभू causing joy. यामन् see I. 25. 20.

Tr. Truly have you been called joy-bringers, Aśvins. As such, you are invoked most in hymns of appeal for protection and you are the most gracious for a hymn of appeal.

Verse 10

इमा । ब्रह्माणि । वर्धना । अश्विऽभ्याम् । सन्तु । शंऽतमा ॥ या ।
तक्षाम । रथान्ऽइव । अवोचाम । बृहत् । नमः ॥ १० ॥ [*थाँ

अथ स्तुतिं निगमयति । इमेमानीदानीं कृतानि ब्रह्माणि परिवृढानि स्तोत्राण्यश्विभ्यां वर्धना वर्धनानि समर्धकानि शंतमा सुखतमानि सन्तु । या यानि तक्षाम संपादयाम रथानिव शिल्पी तद्वत्तक्षाम तानि सन्तु । वयं बृहत् प्रभूतं प्रभूतफलप्रदं नमो नमस्कारोक्तिमवोचाम ॥

शंतम conducing to welfare: hence, welcome. For the simile in *c* cf. अहं तष्टेव वन्धुरं पर्यचामि हृदा मतिम् *X.* 119. 5 *d.* The aorist shows the end of the hymn.

Tr. May these fortifying hymns. which we have fashioned (with sedulous care) like chariots, be welcome to the Aśvins We have spoken out a great (hymn of) reverence.

No. 18

MANDALA V. SŪKTA 80.

द्युतद्यामानमिति षड्चमष्टमं सूक्तम् । तत्रानुक्रमणिका । द्युतद्यामानं षडिति । सत्यश्रवा ऋषिः । अनुक्तत्वात् त्रिष्टुप् । उषस्यं त्वित्युक्तत्वादुषा देवता । प्रातरनुवाक उषस्ये क्रतौ त्रैष्टुभे छन्दस्याश्वितशस्त्रे चेदं सूक्तम् । सूत्रितं च । द्युतद्यामानमुषो वाजेन (आ० ४-१४) इति ॥

Verse 1

द्युतद्यामानम् । बृहतीम् । ऋतेन । ऋतऽवरीम् । अरुणऽप्सुम् ।
विऽभातीम् ॥ देवीम् । उषसम् । स्वः । आऽवहन्तीम् । प्रति ।
विप्रासः । मतिऽभिः । जरन्ते ॥ १ ॥

द्युतद्यामानं दीप्तरथां बृहतीं महतीमृतेन सत्येन यज्ञेन वार्तावरीमृतवतीमरुण-प्सुमरुणरूपां विभातीं द्युच्छन्तीं देवीं द्योतमानामुषसं स्वरावहन्तीं सूर्यं गच्छन्तीम् । एवं महानुभावामुषसं विप्रासो मेधाविन ऋत्विजो मतिभिः स्तुतिभिः प्रति जरन्ते स्तुवन्ति ॥

द्युत'द्यामानम् (यामन् going, way). अरुण'प्सु ; see on I. 149. 1. प्रति जॄ to sing their greetings, प्रति shows response (Berg. III. 298); of. प्रति स्तोमैः जरमाणः VII. 73. 3.

Tr. The singers greet with their prayers the divine and brilliant Usas, whose way shines (before her), who is great by her observance of the Law and is holy, who has a rosy throat, and who brings the sun with her.

Verse 2

एषा । जनम् । दर्शता । बोधयन्ती । सुऽगान् । पथः । कृण्वती ।
याति । अग्रे ॥ बृहत्ऽरथा । बृहती । विश्वंऽइन्वा । उषाः ।
ज्योतिः । यच्छति । अग्रे । अह्नाम् ॥ २ ॥

दर्शता दर्शनीयैषोषा बोधयन्ती । कम् । जनम् । प्रसुप्तमित्यर्थः । पथः सुगान् सुगमनान् कृण्वत्यग्रे सूर्यस्य पुरस्ताद्याति गच्छति । कीदृश्युषाः । बृहद्रथा प्रभूतरथा बृहती महती विश्वमिन्वा विश्व व्याप्नुवाना विश्वतर्पणा वा । ईदृश्युषा अह्नामग्रे ज्योतिस्तेजो यच्छति ॥

विश्वमिन्वा' from इन्व् to overpower.

Tr. Awakening men, the beautiful one goes ahead rendering the roads easy to tread. The mighty Usas, seated on a mighty chariot, and all-powerful, affords light ahead of the day.

Verse 3

एषा । गोभिः । अरुणेभिः । युजाना । अस्रेधन्ती । रयिम् ।
अप्रऽआयु । चक्रे ॥ पथः । रदन्ती । सुविताय । देवी । पुरुऽ-
स्तुता । विश्वऽवारा । वि । भाति ॥ ३ ॥

एषोषा अरुणेभिररुणवर्णैर्गोभिर्बलीवर्दै रथं युजाना योजयन्त्यस्रेधन्त्यशुष्य-न्त्यक्षीणा वा । किम् । रयिं धनमप्राय्यप्रगन्तृ अविचलितं चक्रे करोति । किं कुर्वती । पथो मार्गान् रदन्ती प्रकाशयन्ती । किमर्थम् । सुविताय सुष्ठु गमनाय देवी द्योतमाना पुरुष्टुता बहुभिः स्तुता विश्ववारा सर्वैर्वरणीया विभाति प्रकाशं करोति ॥

अ॑स्रेधन्ती; see on I. 44. 8. अ॑प्रायु occurs only thrice; acc. to Pp. from अ+प्र+आ+यु; प्र + यु to be absent-minded or careless; cf. न प्रयुच्छत: I. 25. 6; प्रयुतं शयानं अहिम् V. 32. 2; also प्रयुति, प्रयुत्वन्. Probably the word here is अप्रयु and the प्र has been lengthened metrically. It is adv. and means 'diligently'; निरु० 4.14 renders it by अप्रमाद्यत्. सुवित॑ n. (सु+इत) welfare, fortune. विश्व॑वारा, cf. I. 48. 13.

Tr. Yoking red bullocks to her chariot, she diligently procures wealth and never obstructs it. Opening out new avenues to fortune, she shines, longed for by all, praised by many.

Verse 4

एषा । विऽएनी । भवति । द्विऽबर्हाः । आविःऽकृण्वाना । तन्वम् ।
पुरस्तात् ॥ ऋतस्य । पन्थाम् । अनु॑ । एति । साधु । प्रजानतीऽ-
इव । न । दिशः । मिनाति ॥ ४ ॥

एषोषा व्येनी भवति विशेषेण श्वेता भवति । द्विबर्हा द्वयोः प्रथममध्यमयोः परिवृढोषाः पश्चात्तन्वं स्वीयां तनूमाविष्कृण्वाना प्रकटीकुर्वती । कुत्र । पुरस्तात् पूर्वस्यां दिशि । किंच ऋतस्यादित्यस्य पन्थां पन्थानं साधु सम्यगन्वेति । किंच

प्रजानतीव विश्वं प्रज्ञापयन्ती । इवेति संप्रत्यर्थे । न दिशो मिनाति । न हिनस्ति । प्रत्युत दिशः प्रकाशयति । अथवा प्रजानतीवानुगन्तव्यमिति प्रकर्षेणावगच्छन्ती च ऋतस्य पन्थामन्वेति ॥

द्वे॑'नी (वि diverse + एनी, f. of एन variegated) occurs only here द्वि॑ब'र्हाः from बर्हस् (बृंह्–cf. बृहत्, बर्हिष्ट) extent. द्विबर्हस् may mean 'having a double extent' i. e. an extent divided into two, the other half being under the horizon. पु॒र'स्तात् in front (of men); also with a pun, 'on the eastern horizon'. With *b* cp. सुसंकाशा मातृमृष्टा इव योषा आविः तन्वं कृणुषे दृशे कम् I. 123. 11. दि॑'शः मी to destroy the quarters, i. e. lose her orientation; cf. I. 124. 3 (*c d* identical); III. 30. 12.

Tr. Diversely coloured, she has a double extent, disclosing her body in front of men. She well follows the track of the Law and, as though she were an expert (traveller), never loses her orientation.

Verse 5

एषा । शुभ्रा । न । तन्वः॑ । विदाना । ऊ॒र्ध्वाऽइ॑व । स्नाती । दृ॒शये॑ । नः॒ । अ॒स्थात् ॥ अप॑ । द्वेषः॑ । बाधमाना । तमां॑सि । उ॒षा । दि॒वः॒ । दु॒हि॒ता । ज्योति॑षा । आ । अ॒गा॒त् ॥ ५ ॥

एषोषाः शुभ्रा न शुभ्रवर्णा निर्मला स्वलंकृता योषिदिव तन्वोऽङ्गानि विदाना प्रज्ञापयन्ती स्नाती स्नानं कुर्वाणोर्ध्वेवोन्नतेव स्नानादुत्तिष्ठन्तीव नोऽस्मदर्थमस्माकं पुरतो वा दृशये सर्वेषां दर्शनायोदस्थात्। पूर्वस्यां दिश्युत्तिष्ठति । किं कुर्वती । द्वेषो द्वेष्याणि तमांस्यपबाधमाना दिवो दुहितोषा॑ ज्योतिषा तेजसा सहागात् आगच्छति ॥

शु॒भ्रा॑ न॑ तन्व॑: विदाना. Old. would regard तन्वः as acc. pl. rather than as geni. s. and prefers 'discovering for herself new bodies,' i. e. forms of beautiful appearance, to 'being found out for her bodily graces' as a rendering of तन्वो विदाना; but there is another interpretation possible. In तुर्वशे यदौ अह्नवाय्यं विदानः VIII. 45. 47 or राध्यस्य वस्वः विदानासः and in the passive in इन्द्राय सोमाः

विदाना: the word विदान appears to have been used idiomatically in the sense of 'bestowing' and it governs the geni.; with 'a fair one bestowing her person' cp. तन्व विसस्रे जायेव पत्ये उशती सुवासाः X. 71. 4. शुभ्रा, acc. to Pischel, V. S. I. 309, is a courtesan. His proof is not at all convincing.

Tr. She rises to view before us, like a fair one bestowing her person, like a (maid) who rises from her bath; banishing enemies and darkness, Usas, heaven's daughter, has come with light.

Verse 6

एषा । प्रतीची । दुहिता । दिवः । नृन् । योषाऽइव । भद्रा ।
नि । रिणीते । अप्सः ॥ विऽऊर्ण्वती । दाशुषे । वार्याणि । पुनः ।
ज्योतिः । युवतिः । पूर्वऽथा । अकरित्यकः ॥ ६ ॥

एषोषा प्रतीच्यभिमुखा सती दिवो दुहिता नृन् सर्वान् प्राणिनः प्रति भद्रा योषेव कल्याणवेषा योषिदिवाप्सो रूपं निरिणीते । प्रेरयति । किंच दाशुषे हविर्दात्रे यजमानाय वार्याणि वरणीयानि धनानि व्यूर्ण्वती प्रयच्छन्ती युवतिर्नित्ययौवना सर्वत्र मिश्रयन्ती वा पुनरप्यपि पूर्वथा पूर्वमिव ज्योतिस्तेजोऽकः करोति ॥

प्रतीची' (f. of प्रत्यच् from प्रति + अच्) in front; cf. पुंसः प्रतीची एति I. 124. 7. It is *not* a part of the simile in *b*. योषाइव भद्रा' योषा is wrongly understood by Pischel as a courtesan; the word भद्रा, beautiful, auspicious, holy, goes against it. नि' रिणीते अ'प्सः. अप्सः is bosom. नि रि to let loose, to untie or uncover. With *b* cf. I. 92. 4; 123. 10; 124 4, 7; VI. 64. 2. विऊर्ण्वती' from वि + ऊर्णु (which is traced to the reduplicated form of वृ) to disclose. पूर्व'था adv. as of yore. The addition of था forms adverbs of time and manner; cf. प्रत्यथा, ऋतुथा; एवथा, इत्था &c.

Tr. This daughter of heaven, rising in front of men, uncovers her bosom like a beautiful maid; unfolding precious things to the worshipper, the young damsel has again made light as of yore.

No. 19.

MANDALA VII. SŪKTA 61.

उद्वां चक्षुरिति सप्तर्चं षष्ठं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं मैत्रावरुणम् । उद्वां सप्तेत्यनुक्रमणिका विनियोगो लैङ्गिकः ॥

Verse 1

उत् । वाम् । चक्षुः । वरुणा । सुऽप्रतीकम् । देवयोः । एति ।
सूर्यः । ततन्वान् ॥ अभि । यः । विश्वा । भुवनानि । चष्टे ।
सः । मन्युम् । मर्त्येषु । आ । चिकेत ॥ १ ॥

हे वरुणा मित्रावरुणौ देवयोर्द्योतमानयोर्वां युवयोश्चक्षुः प्रकाशकं तेजः सुप्रतीकं शोभनरूपमेवंरूपः सूर्यस्ततन्वांस्तेजो विस्तारयन्नुदेति उद्गच्छति । अथोदितो यो देवो विश्वा सर्वाणि भुवनानि भूतजातान्यभिचष्टे अभिपश्यति स देवो मर्त्येषु प्रवृत्तं मन्युं स्तोत्रं कर्म वा आ चिकेत आजानाति ॥

वरुणा' For the ending अ of the Samhitā here and in rc 7*a* (देव) the Pp. substitutes the ending आ. The sense requires it. The shortening is obviously for euphony and we have yet to develop an ear for it. The dual denotes मित्रावरुणा. Old. would see a du. form in वरुण itself, as in पृथिवि II. 31. 5. वां च'क्षुः cf. I. 115. 1; VI. 63. 1; X. 37. 1. It is for watching over the universe. सुप्र'तीकम् (from प्रतीक countenance) lovely; cf. अश्रीरं चित् कृणुथ, सुप्रतीकम् IV. 28. 6. ततन्वा'न्, perf. part. from तन्, who has spread (his lustre). मन्यु', in the most general sense, means 'intention: desire'; the good variety includes the further sense of 'courage, spirit'; the evil one of 'jealousy, fury'. It is the general sense that is denoted here.

Tr. O Mitra and Varuna, here rises the sun, spreading (his rays), who is the lovely eye of you gods, who regards all beings, he takes note of the purposes of men.

Verse 2

प्र । वाम् । सः । मित्रावरुणौ । ऋतऽवा । विप्रः । मन्मानि ।
दीर्घऽश्रुत् । इयर्ति ॥ यस्य । ब्रह्माणि । सुक्रतू इति सुऽक्रतू ।
अवाथः । आ । यत् । क्रत्वा । न । शरदः । पृणैथे इति ॥२॥

हे मित्रावरुणौ वां युवयोर्मन्मानि मननीयानि स्तोत्राणि स प्रसिद्धो विप्रो मेधावी ऋतावा यज्ञवान् दीर्घश्रुच्चिरकालं श्रोता एवमुक्तलक्षणो वासिष्ठ इयर्ति । प्रेरयति । यस्यर्षेर्ब्रह्माणि परिवृढानि स्तोत्राणि हे सुक्रतू शोभनकर्माणावावाथो रक्षथः । यत्कर्म शरदो बहून् संवत्सरान् पृणैथे आपूरयेथे स उदियर्ति ॥

ऋतावा. 'Conforming to the Law;' as applied to men it may be translated by 'pious'. मन्मन् (from मन्, cp. मति) prayer. दीर्घश्रुत् heard from afar, an epithet of gods, also of रयि, शर्म &c. It could be taken as pl. adj. to मन्मानि; but cf. यः (मर्त्यः) दीर्घश्रुत्तमः आविवासाति एतान् (देवान्) X. 93. 2. अवाथः and पृणैथे are forms of the subj.

Tr. It is a pious singer, Mitra and Varuna, one who is known from afar who is sending forth his prayers unto you. May you be gracious to his hymns, O gods of mighty intellect, that he may fill his autumns as it were with wisdom.

Verse 3

प्र । उरोः । मित्रावरुणा । पृथिव्याः । प्र । दिवः । ऋष्वात् ।
बृहतः । सुदानू इति सुऽदानू ॥ स्पशः । दधाथे इति । ओषधीषु ।
विक्षु । ऋधक् । यतः । अनिऽमिषम् । रक्षमाणा ॥ ३ ॥

हे मित्रावरुणा मित्रावरुणौ युवमुरोर्विस्तीर्णायाः पृथिव्या अपि प्र प्ररिरिचाथे । अस्येदेव प्र रिरिचे (ऋ० १-६१-९) इत्यादिषु प्रशब्दस्य रिरिच इत्यनेन सह संबन्धदर्शनादत्राप्युचितक्रियाध्याहारेण रिरिच इति योज्यम् । तथर्ष्वाद्गुणैर्महतो बृहतः स्वरूपतोऽतिमहतो दिवो द्यूलोकादपि प्ररिरिचाथे हे सुदानू शोभनदानौ

किंचौषधीषु विक्षु प्रजासु निमित्तभूतासु प्रजासु चेति वा स्पशो रूपं दधाथे । धारयेथे । किं कुर्वन्तौ । ऋधग्यत ऋधक् सत्येन यतो विवेकात् सत्येन गच्छतो जनाननिमिषमव्यवधानेन सर्वदा रक्षमाणा पालयन्तौ ॥

सुदानु, an epithet of gods and men ; Gr. tries to derive it from दानु dew ; but it is from दानु gift ; in fact Geld. derives दानु dew from दा to give. उरोः पृथिव्याः. उरोः is m. or n., not f., and we expect here a reference to the three-fold world. अन्तरिक्षात् is therefore to be taken as understood after उरा. (cf. III. 46. 3-Geld.). प्र goes with दधाथे. ऋधक् यत- adj. to स्पश. यत्, pre. p. from इ. ऋधक् (नि. 4. 25=पृथक्) apart, alone, secretly ; ऋधक् यतः hidden.

Tr. From the vast (aerial regions), from the earth, from the sublime and lofty sky, among plants and men, you have kept hidden spies, O bounteous Mitra and Varuna, you who protect with unwinking eyes.

Verse 4

शंस । मित्रस्य । वरुणस्य । धाम । शुष्मः । रोदसी इति ।
बद्बधे । महित्वा ॥ अयन् । मासाः । अयज्वनाम् । अवीराः ।
प्र । यज्ञऽमन्मा । वृजनम् । तिराते ॥ ४ ॥

हे ऋषे मित्रस्य वरुणस्य च धाम तेजःस्थानं शंस । स्तुहि । यथोर्द्वयोः शुष्मो बलं रोदसी द्यावापृथिव्यौ सह वर्तमाने महित्वा स्वमहत्त्वेन बद्बधे बध्नाति पृथक् स्थापयति इयं पृथिवीयं द्यौरिति पृथक्करोति । द्यावापृथिवी सहास्तामिति श्रुतेः । अयज्वनामननुष्ठातॄणां मासाः कालावयवा अवीरा अपुत्रा एवायन् । यन्तु गच्छन्तु । तद्विपरीतो यज्ञमन्मा यज्ञार्थं मतिमान्यज्वा वृजनं बलं प्र तिराते प्रवर्धयतु । प्रपूर्वस्तिरतिर्वर्धनार्थः ॥

शंसा, subj. I s. Pp. gives शंस, but in other cases of subj. 1 s. like अया(इ) IV. 18. 2, कृणवा (कृ) X. 95. 2, हिनवा (हि) X. 95.13 the Pp. similarly gives अय, कृणव and हिनव as padas. धाम Berg. (II. 213 n.) Law, nature, essence ; M. M. abode, law, com-

pany ; Geld. divine nature, power, ordinances ; Macd.–ordinance. Berg. has shown very strong grounds for rejecting Roth and Gr.'s meaning of 'abode,' adopted by M. M. The latter's reply (SBE, XXXII, p 383) is not very satisfactory. Here it should mean 'divine nature or power' of which *b* gives instances. बद्बधे, freq of बाध्; has crowded or oppressed; cf. न ते अन्तः शवसः धायि अस्य वि तु बाबधे रोदसी महित्वा, VI. 29 5 रोदसी बद्बधानः (अश्विनौ.) रथः VII. 69. 1 : also I. 52. 10. यज्ञंमन्मा (बहु°; मन्मन् thought). वृजंनम् see I. 184. 6. प्र॰ तिराते subj. 3 s. from प्रतॄ to extend.

Tr. Let me speak of the divine nature of Mitra and Varuna. Their strength has by its greatness oppressed heaven and earth. Warrior-less months have passed for the non-sacrificers. He who is intent on sacrifice may well widen his circle.

Verse 5

अमूरा । विश्वा । वृषणौ । इमाः । वाम् । न । यासु । चित्रम् ।
दद्दृशे । न । यक्षम् ॥ दुहः । सचन्ते । अनृता । जनानाम् । न ।
वाम् । निण्यानि । अचितै । अभूवन् ॥ ५ ॥

हे अमूरामूढौ हे विश्वा व्याप्तौ हे वृषणौ वर्षितारौ वां युवाभ्यामिमा इमानि स्तुतिवचांसि क्रियन्ते । यासु स्तुतिषु चित्रमाश्चर्यं न ददृशे न दृश्यते न यक्षं न पूजा दृश्यते । युवाभ्यां महिम्नोऽपि महत्त्वात् प्रयत्नेन क्रियमाणमपि स्तोत्रं न चमत्करोतीत्यर्थः । जनानामनृता स्तुत्यविषयाणि स्तोत्राणि दुहो द्रोग्धारः सचन्ते सेवन्ते । न महान्तः । वां युवाभ्यां क्रियमाणानि निण्यान्यन्तर्हितानि रहस्यान्यपि स्तोत्राण्यचितेऽज्ञानाय *नाभूवन् न भवन्ति ॥

A considerable difference of opinion prevails in the general interpretation of this rc, though not much in that of individual words. अमूर is exclusively applied to the gods elsewhere in the sense of 'wise;' *contra*, मूर IV. 26. 7; X. 4. 4 ; 46. 5.

* प्रथमावृत्तौ अभूवन् भवन्ति इति पाठः ।

यक्षम्, Geld. magic, illusion; Old., Boyer, something wonderful and mysterious. The latter meaning is preferable; cf. केनोप० 15, बृह० V. 4. 1. द्रुहः (from द्रुह् to do harm) demons. सच् to follow. निण्य secret. अचिते (infin. da. of चित् to know). Geld. follows Sāy. in the main. He takes विश्वा as predicative adj. to obviate the difficulty of accent. His construction is: इमाः i. e. मतयः वां (सन्ति), यासु &c.; *c*, *d* follow as independent clauses. Gr. and Lanman read अमूराः विश्वाः as against the Pp.; these and इमाः वाम् are connected with द्रुहः in *c*, while *b* is taken as an adj. clause to द्रुहः. Berg. and Old. accept this construction. The arguments in favour of the construction preferred for the Tr. below are as follows. We cannot set aside the Pp. as it envisages a definite meaning, and अमूराः cannot be an epithet of द्रुहः. As regards the accent difficulty due to the vocatives अमूर and विश्वा being accented and followed by the unaccented वृषणौ Old. has pointed out to an undoubted parallel in VIII. 87. 5: द्रप्सा हिरण्यवर्तनी शुभस्पती, which are all voc. epithets of अश्विनौ. विश्व as an epithet of a dual n. occurs in IV. 56. 1. The sentence इमाः वाम् has been left incomplete on account of the parenthetical *b* and is completed in *c*; cf. सोमस्य मा तवसं-वक्षि अग्ने वह्निं चकर्थ III. 1. 1. The द्रुहः are elements of evil, the laws of moral retribution in the world, which are unlike the demons we dream about.

Tr. O wise and mighty gods both, you have appointed these—there is nothing wonderful or mysterious about them—demons who pursue the falsehoods of men; no secrets remain unknown to you.

Verse 6

सम् । ऊं इति । वाम् । यज्ञम् । महयम् । नर्मःऽभिः । हुवे ।
वाम् । मित्रावरुणा । सऽबाधः ॥ प्र । वाम् । मन्मानि । ऋचसे ।
नवानि । कृतानि । ब्रह्म । जुजुषन् । इमानि ॥ ६ ॥

हे मित्रावरुणौ वां युवयोर्यज्ञं नमोभिर्नमस्कारैः स्तुतिभिः समु महयम् संपूजयाम्यहम् । तदर्थं हे मित्रावरुणा मित्रावरुणौ वां सबाधो बाधायुक्तोऽहं हुवे आह्वयामि बाधापरिहाराय । वां युवामृचसे सेवितुं नवानि नूतनानि स्तुत्यानि वा मन्मानि स्तोत्राणि । प्रभवन्तित्वत्यध्याहारः । कृतानि मया समूहीकृतानीमानीदानीं क्रियमाणानि ब्रह्म परिवृढानि स्तोत्राणि युवां जुजुषन् प्रीणयन्तु ॥

सं महयम्. inj. 1 s. from मह् caus. to consecrate, to offer. सबाधः (from बाध distress) distressed; Gr. Macd. zealous; for बाध cf. पुरा नो बाधात् दुरिता अति पारय IX. 70. 9. ऋचसे infin. in असे from अर्च् to sing praises of. ब्रह्म n. pl. जुजुषन् subj. 3 pl. from जुष् to please; ii to rejoice; iii to relish, to accept with pleasure. कृतानि goes with *c*.

Tr. I would offer sacrifice to you with salutations. I invoke you, Mitra and Varuna, because I am afflicted. I have composed new hymns to glorify you. May these prayers please (you).

Verse 7

इयम् । देवा । पुरःऽहितिः । युवऽभ्याम् । यज्ञेषु । मित्रावरुणौ ।
अकारि ॥ विश्वानि । दुःऽगा । पिपृतम् । तिरः । नः । यूयम् ।
पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥

*अनया स्तुतिमुपसंहरति । हे देवा देवौ मित्रावरुणौ युवभ्यां युवाभ्यां यज्ञेष्विय पुरोहितिः पुरस्क्रिया पूजा स्तुतिलक्षणाकारि कृताभूत् । तां सेवित्वा विश्वानि सर्वाणि दुर्गा दुःखेन गन्तव्यान्यापदस्तिरस्तिरस्कुरुतम् । तथा कृत्वा नोस्मान्पिपृतं पारयतम् । शिष्टो गतः ॥

देवा Pp. for देव. पुरो'हितिः the office of a पुरोहित, one placed (हित) at the head (पुर') for intercession with the gods. दुर्गा तिर':

* अयं मंत्रो भाष्यकृता (७–६०–१२) इत्यत्र व्याख्यातत्वादादर्शे 'इयं देवेति सप्तमी गता' एतावानेव निर्देशः । चतुर्थचरणस्तु (७–१–२०) इत्यत्र 'नोऽस्मान्यूयं त्वत्परिवाराश्च सर्वे स्वस्तिभिरविनाशिभिर्मङ्गलैः । तथा च यास्कः । स्वस्तीत्यविनाशनामास्तिराभिपूजितः स्वस्तीति (नि० ३–२१) । सदा पात रक्षत । ' इति व्याख्यातः ॥

across difficulties. *d* is the refrain of Vāsistha hymns; it is addressed to the gods generally.

Tr. This (hymn of) intercession we have offered in sacrifices, O divine Mitra and Varuna. Take us across all difficulties. Protect us evermore with your blessings, (ye gods).

No. 20

MANDALA VII — SŪKTA 71

पञ्चमेऽनुवाक एकोनविंशतिः सूक्तानि । तत्राप स्वसुरिति षड्चं प्रथमं सूक्तं त्रैष्टुभमाश्विनम् । अनुक्रम्यते च अप स्वसुः षडिति गतो विनियोगः ॥

A hymn to the Aśvins; cf, I. 116.

Verse 1

अप । स्वसुः । उषसः । नक् । जिहीते । रिणक्ति । कृष्णीः ।
अरुषाय । पन्थाम् ॥ अश्वऽमघा । गोऽमघा । वाम् । हुवेम ।
दिवा । नक्तम् । शरुम् । अस्मत् । युयोतम् ॥ १ ॥

स्वसुः स्वसृस्थानीयाया उषसः सकाशान्नक्तं रात्रिरप जिहीते अपगच्छति । तस्या अवकाशं दत्वा स्वयमपगतेत्यर्थः । स्वसा स्वस्रे ज्यायस्यै योनिमारैक् (ऋ० १-१२४-८) इत्युक्तम् । कृष्णीः कृष्णवर्णा रात्रिररुषायारोचमानायाह्ने सूर्याय वा पन्थां पन्थानं मार्गं रिणक्ति रेचयति । यस्मादेवं तस्मात्त्वयोरागमनसमयत्वात् हे अश्वामघाश्वधनौ हे गोमघा गोधनौ । उभयोः प्रदातारावित्यर्थः । ईदृशौ वां युवां हुवेम स्तुमः । आह्वयाम । दिवा नक्तं सर्वदा शरुं हिंसकमस्मदस्मत्तो युयोतम् पृथक्कुरुतम् ॥

न'क् अ'प जिहीते. नक् (नश्, Gr. nyxa–xos, later निश्, cf. नक्तम्) night. अप हा to go away from; cf. अप अनक्षासः (blind) बधिराः अहासत IX. 73. 6. With *a* cf. अप स्वसारं सनुतः युयोति I. 92. 11; अक स्वसुः तमः सं वर्तयति X. 172. 4; स्वसा स्वस्रे जायस्यै योनिं आरैक् I. 142. 8. The

night and dawn are spoken of as sisters. कृष्णी: the black one (night); only here; कृष्णा in I. 113. 2, अरैक् उ कृष्णा सदनानि अस्याः; also कृष्णासु अह्न अरुषः वि भाहि III. 15. 3. अरुष, the red one, is the sun or day; generally used of day; cf. III. 1. 4; 7. 5. पन्थां रिणक्ति leaves or makes clear the way; cf. I. 113, 1, 2, 16; II. 13. 5. अश्वामघा गो मघा; बहु०; मघ gift, wealth (from मंह् to give). शरु f. (from शॄ; cf. शर, शर्य, शल्य) an arrow or spear; cf. अमन्यमानान् शर्वा जघान II. 12. 10; here it is apparently used metaphorically. यु to separate.

Tr. The night leaves her sister dawn; the black one clears the way for the red one. We would invoke you, grantors of horses and cows. Remove the dart (from our heart), day and night.

Verse 2

उपऽआयातम् । दाशुषे । मर्त्याय । रथेन । वामम् । अश्विना ।
वहन्ता ॥ युयुतम् । अस्मत् । अनिराम् । अमीवाम् । दिवा ।
नक्तम् । माध्वी इति । त्रासीथाम् । नः ॥ २ ॥

हे अश्विनौ युवामुपायातम् उपागच्छतमस्मदाह्वानं प्रति । किमर्थम् । दाशुषे हविषां दात्रे यजमानाय । तदर्थं रथेन वामं वननीयं धनं वहन्ता वहन्तौ । अस्मदस्मत्तो युयुतं पृथक्कुरुतम् । किम् । अनिराम् । इरान्नम् । *तदभाववद्दारिद्र्यमित्यर्थः । अमीवां रोगं च । हे माध्वी मधुमन्तौ युवां नोऽस्मान् दिवा नक्तं सर्वदा त्रासीथां रक्षतम् ॥

अनिराम् (अन् + इरा refreshing drink) famishment, famine of water. अमीवाम् disease, plague. अनिरा and अमीवा are mentioned together in VIII. 48. 4, and X. 37. 4. माध्वी is an epithet of the Aśvins, always in the voc.; occurs in IV. 43. 4; V. 75. 1; also of ओषधि and गो in I. 90. 6, 8; 'bringers of मधु', sweet drink, standing for Soma, milk, honey &c. The stem

* आदर्शे तदन्नदारिद्र्यमित्यर्थ इति पाठः ।

app. is माध्वि, of obscure formation from मधु. आसीथाम् (Aor. opt. 2 du. from आ) has the accent of emphasis like पिब in III. 32. 1.

Tr. Come to the mortal sacrificer, Aśvins, bringing precious gifts on your chariot; remove famine and disease from us; protect us day and night, O bringers of sweetness.

Verese 3

आ । वाम् । रथम् । अवमस्याम् । विऽउष्टौ । सुम्नऽयवः ।
वृषणः । वर्तयन्तु ॥ स्यूमऽगभस्तिम् । ऋतयुक्ऽभिः । अश्वैः ।
आ । अश्विना । वसुमन्तम् । वहेथाम् ॥ ३ ॥

अवमस्यामासन्नायां व्युष्टौ व्युच्छन उषसि वां युवयो रथं सुम्नायवः सुखेना योजयन्तोऽश्वा वृषणो वर्षका युवामा वर्तयन्तु । स्यूमगभस्तिं सुखरश्मिं सूतरश्मिं वसुमन्तं प्रदेयधनयुक्तं रथं हे अश्विनाश्विनावृतयुग्भिरुदकयुक्तैरश्वैरुदकपदैरश्वैराव-हेथाम् ॥

अवमस्यां व्यु'ष्टौ. अवम (from अव + म, termi. of super.) lowermos', next, latest; cf. अवमा ऋतिः VI. 25 1. व्युष्टि (वि + वस्) dawning of day. सुम्नयु' inclined to favour or kindness. स्यू'मगभस्ति (स्यूमन् strap, riggings, from सिव् to sew, गभस्ति pole, from * गभ् to bifurcate like fingers, sun's rays &c.) of which the pole is fastened with ropes; occurs besides in I. 122. 15. ऋतयु'क् harnesed according to the Law, that is punctually; cf. IV. 51. 5; V. 39. 2, 4.

Tr. Let your mighty (horses), inclined to favour us, turn your chariot hither on this the latest dawning of day. Drive hither, O Aśvins, your wealth-laden chariot with its well-secured pole with your horses that are yoked punctually.

Verse. 4

यः । वाम् । रथः । नृऽपती इति नृऽपती । आस्ति । वोळ्हा ।
त्रिऽवन्धुरः । वसुऽमान् । उत्ऽस्यामा ॥ आ । नः । एना ।

नासत्या । उप । यातम् । अभि । यत् । वाम् । विश्वऽप्स्न्यः ।
जिगाति ॥ ४ ॥ * माँ

हे नृपती नृणां यजमानानां पालकावश्विनौ वां युवयोर्यो रथो वोळ्हा युवयोर्वाहकोऽस्ति सर्वदा संनिहितो वर्तते । कीदृशोऽसौ । त्रिबन्धुरः सारथ्यधिष्ठानस्थानत्रयोपेतो वसुमान् धनवानुस्रयामोस्रं दिवसं प्रति गन्ता । एनेतेन रथेन हे नासत्याश्विनौ नोऽस्मानुपायातम् । यद्रथो यश्च रथो वां विश्वप्स्न्यो व्याप्तरूपोऽभि जिगाति अभिगच्छति । अथवाह । यद्यस्माद्विश्वप्स्न्यो वसिष्ठो वां जिगाति स्तौति अत उपायातम् ॥

वोळ्हा (=वोढा from वह् + तृ). त्रिबन्धुरः. बन्धुर n., also बन्धुर्, is a chariot-seat; cf. अहं तष्टेव बन्धुरं पर्यचामि हृदा मतिम् X. 119. 5. The third seat is for Sūryā. उस्रयामन् (उस्र red, the red glow of the dawn, VI. 52. 15) journeying in early morning; cf. अरं मे उस्रयाणे अरं अनुस्रयाणे बभ्रू यामेषु अस्रिधा IV. 32. 24; it is called अहंपूर्वः in I. 181. 3. एना=अनेन. विश्वप्स्न्यः—विश्वं प्स्न्यं (प्सा to eat + न्य, अनीय) यस्य, to whom belongs all food, who nourishes every one; cf. विश्वप्स्न्याय प्र भरन्त भोजनम् II. 13. 2 (of Soma), in VII. 47. 6 and VIII. 86. 15 of रै. Gr. (Dict.) understood it as adj. to रथ; in his Tr. he takes it as referring to सोम. Berg. refers it to Agni (II. 438), because Agni feeds them (हविषा पिपर्ति I. 46. 4) and rises to receive them (ऊर्ध्वो वां अग्निः अध्वरेषु अस्थात् VI. 63. 4). जिगाति from गा.

Tr. You have, oh kings, a chariot to convey you, furnished with three seats, wealth-bringing and journeying at day-break; come to us on it, O true gods, at the time when the all-nourishing (fire) comes forward to receive you.

Verse 5

युवम् । च्यवानम् । जरसः । अमुमुक्तम् । नि । पेदवे । ऊहथुः ।
आशुम् । अश्वम् ॥ निः । अंहसः । तमसः । स्पर्तम् । अत्रिम् ।
नि । जाहुषम् । शिथिरे । धातम् । अन्तरिति ॥ ५ ॥ * सोमु

हे अश्विना युवं च्यवानं जरसो जीर्णादुपादमुमुक्तम् अमुञ्चतम् । युवं च्यवानमश्विना जरन्तं पुनर्युवानम् (ऋ० १-११७-१३) इति ह्यन्यत्र । तथा पेदव एतन्नामकाय राज्ञ आशुं शीघ्रगामिनमश्व निरूहथुः न्यवहतं युद्धे । युवं श्वेतं पेदवे (१-११८-९) इति निगमः । तथात्रिं महर्षिमंहस ऋबीसादग्नेः सकाशात्तमसश्च गुहान्तःस्थिताच्च सकाशान्निष्पर्तम् न्यपारयतम् । युवमृबीसमुत तप्तमत्रय ओमन्वन्तं चक्रथुः (ऋ० १०-३९-९) इति निगमः । तथा जाहुषं शिथिरे शिथिले भ्रष्टे स्वराष्ट्रेऽन्तर्मध्ये पुनर्निधात न्यधातम् । परिविष्टं जाहुष विश्वतः सीम (ऋ० १-११६-२०) इति ह्युक्तम् ॥

For the mythological references, see I. 116. 10, 6, 8, 20. The poet feels that he could not conclude his hymn without some reference to the miracles of the अ०. निं वह् to convey. निः स्पृ (generally without prep. or with अव) to save from ; cf. महो राये चितयन् अत्रि अस्पः V. 15. 5. शिथिरे अन्तः. शिथिर (from श्रथ्, cf. cl शिथिल) occurs once as an epithet of Savitr's arms, once of पूषन्'s अङ्गा, in V. 85. 8 (वि ष्य शिथिरान् इव) and in our passage without subst. ; Gr., 'something entwined' ; Berg. (II. 425) 'freed from the enveloping clouds'.

Tr. You released Cyavāna from old age ; you conveyed a swift horse to Pedu ; you saved Atri from distress and darkness ; you placed Jāhusa in an untramelled place.

Verse 6

इयम् । मनीषा । इयम् । अश्विना । गीः । इमाम् । सुऽवृक्तिम् ।
वृषणा । जुषेथाम् ॥ इमा । ब्रह्माणि । युवऽयूनि । अग्मन् ।
यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥ * षा इ०

*हे अश्विनाश्विनाविमं मनीषा स्तुतिर्युवयोः । कृतेति शेषः । तदेवादरार्थं पुनरुच्यते । इयं गीः स्तुतिः कृता । हे वृषणा कामानां वर्षकाविमामस्मत्कृतां सुवृक्तिं शोभनां स्तुतिं जुषेथां सेवेथाम् । इमेमानि ब्रह्माणि कर्माणि स्तुतिरूपाणि युवयूनि युवां कामयमानानि सन्त्यग्मन गच्छन्तु युवाम् । यूयं पातेति सिद्धम् ॥

* इयमृक् आदर्शे ७-७०-७ इत्यत्र व्याख्यातत्वात् केवलं इयं मनीषेति षष्ठी गता। इत्येतावान्निर्देशः ।

मनीषा' prayer. Mark the absence of संधि between मनीषा and इयम्. सुबर्हिः, (from बृज् to strew barhis) primarily, spreading of barhis as a seat for an honoured guest; hence, mark of honour; cf. I. 116. 1. युवय' yearning for you.

Tr. This is our prayer, this our song, O Aśvins. Accept with pleasure this mark of honour, O mighty gods. These hymns go forth in quest of you. (Ye gods,) protect us evermore with your blessings.

No. 21

MANDALA VII SŪKTA 77.

उषो रुरुच्च इति षड्चं सप्तमं सूक्तं वसिष्ठस्यार्षमुषस्यम्। तथा चानुक्रान्तम्। उषो रुरुचे षडिति। प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः॥

Verse 1

उषो इति। रुरुचे। युवतिः। न। योषा। विश्वम्। जीवम्।
प्रऽसुवन्ती। चरायै॥ अभूत्। अग्निः। समिधे। मानुषाणाम्।
अकः। ज्योतिः। बाधमाना। तमांसि॥ १॥

इयमुषा उषो समीप एव सूर्यस्य रुरुचे दीप्यते। युवतिर्यौवनोपेता योषा न योषिदिव। सा यथा वस्त्राभरणादिना पत्युः समीपे प्रदीप्यते तद्वत्। किं कुर्वती। विश्वं सर्वं जीवं जीवसंघं चरायै संचाराय प्रसुवन्ती प्रेरयन्ती। किंचाग्निर्मानुषाणां मनुष्याणामर्थाय समिधेऽभूत् समिन्धनीयोऽभवत्। कृत्यार्थे केन। समिद्धः संस्तमांस्यन्धकारान्बाधमाना बाधमानं *वा बाधकं ज्योतिस्तेजःसंघमकः अकार्षीत्। अथवा। औषसं ज्योतिस्तमांसि बाधमाना बाधमानान्यकः अकरोत्॥

उ'षो रुरुचे. उप रुच्(only here) approach with shining light; cf. निः रुच् remove by shining, VIII. 3. 20. यो'षा, the comple-

---

* आदर्शे वा इति नास्ति।

ment of जार, a lover; cf. I. 48. 5. चरा'यै inf. (i. e. dative of verb. n.) from चर्. सम्ि'धे, inf.

Tr. Like a young girl who has a lover, she comes up beaming, impelling the whole living world to activity. Now is the time when men should kindle Agni. Dispelling darkness, she has made light.

Verse 2

विश्वम् । प्रतीची । सऽप्रथाः । उत् । अस्थात् । रुशत् । वासः ।
बिभ्रती । शुक्रम् । अश्वैत् ॥ हिरण्यऽवर्णा । सुदृशीकऽसंदृक् ।
गवाम् । माता । नेत्री । अह्नाम् । अरोचि ॥ २ ॥

विश्वं कृत्स्नं जगत्प्रति प्रतीच्यभिमुखी सप्रथाः सर्वतः पृथुतरोदस्थात् उदगच्छत् । उदिता च रुशद्दीप्तं शुक्रं तेजोमयं वासो वसनीयं तेजःसमूहं बिभ्रती धारयन्त्यश्वैत् वर्धते । हिरण्यवर्णा हितरमणीयवर्णोपेता । सुदृशीकसंदृक् । संदर्शयतीति संदृक् तेजः । सुष्ठु दर्शनीयं संदृक् तेजो यस्याः सा तादृशी । गवां वाचां गवामेव वा माता निर्मात्री । उषःकाले हि पक्षिमनुष्यादीनां वाचो निर्गच्छन्ति । गवामपि तस्मिन्काले संचारात्तन्निर्मातृत्वम् । अथवा रश्मीनां निर्मात्री । अरोचि रोचतेऽह्नां नेत्री दिवसानां प्रापयित्री ॥

प्रतीची', f. of प्रत्यच् having the face turned *towards* (not *back*; cf. Old. Tr. of I. 95. 5); cf. पुंसः एति प्रतीची I. 124. 7. सप्र'थाः (प्रथस्, from प्रथ्, vast extent). रु'शत्, cf. I. 48. 13. अश्वैत्, aor. or impf. 3 s. of श्वित् to shine; cf. वि उषसां इव केतवः अश्वितन् X. 78. 7. सुदृ'शीकसंदृक्, बहु°; सुदृशीक (from दृश् like मृळीक, वृधीक, अनीक, भाऋजीक) lovely. संदृश् appearance, countenance.

Tr. With her vast extent she has risen in front of the world; wearing a brilliant garment she shines brightly. Of a golden hue and a lovely countenance, she has beamed forth, the mother of cows, the bringer of days.

Verse 3

देवानाम् । चक्षुः । सुऽभगा । वहन्ती । श्वेतम् । नयन्ती । सुऽ-

दृशीकम् । अश्वम् ॥ उषाः । अदर्शि । रश्मिऽभिः । विऽअक्ता ।
चित्रऽमघा । विश्वम् । अनु । प्रऽभूता ॥ ३ ॥

देवानां चक्षुश्चक्षुःस्थानीयं तेजो वहन्ती धारयन्ती सुभगा शोभनधना सुदृशीकं सुदर्शनमश्वं सर्वदा गन्तारमादित्यं नयन्ती प्रापयन्ती । किम् । श्वेतं श्वेतवर्णोपेतं सूर्यम् । प्रकाशयुक्तं कुर्वतीत्यर्थः । कीदृश्युषाः । रश्मिभिः स्वकीयैर्व्यक्तादर्शि दृश्यते च । चित्रामघा विचित्रधना विश्वमनु सर्वं जगदनुलक्ष्य प्रभूता प्रवृद्धा । सर्वजगद्व्यवहारायेत्यर्थः ॥

The देवानां चक्षुः and श्वेतः अश्वः describe the sun. व्यक्ता (from अञ्ज् with वि to anoint or deck out oneself with something) brightened. अनु प्र भू to spread over.

Tr. Bringing with her the eye of the gods (the sun) leading the lovely white horse, the beautiful Usas is to be seen spread over the world, brightened with her rays and bestowing wonderful gifts.

Verse 4

अन्तिऽवामा । दूरे । अमित्रम् । उच्छ । उर्वीम् । गव्यूतिम् ।
अभयम् । कृधि । नः ॥ यवय । द्वेषः । आ । भर । वसूनि ।
चोदय । राधः । गृणते । मघोनि ॥ ४ ॥

हे उषः अन्तिवामा । अन्त्यस्मदन्तिके वामं वननीयं धन यस्याः सान्तिवामा । त्वमित्रमस्मच्छत्रुं दूरेऽस्मत्तो विप्रकृष्टदेशे वर्तमानं कृत्वा व्युच्छ विभाहि । यथामित्रो दूरे भवति तथा व्युच्छेत्यर्थः । तथोर्वीं गव्यूतिं भूमिमभयं नोऽस्माकं कृधि कुरु । किं च द्वेषोऽस्मद्द्वेष्टॄन्यावय अस्मत्तः पृथक्कुरु । वसूनि शत्रूणां धनान्या भर आहर । राधो धनं चोदय प्रेरय गृणते स्तुवते मह्यं हे मघोनि धनवति ॥

अन्तिवामा, बहु० from अन्ति near and वाम. गव्यूति (गो + ऊति Gr.; गो + यूति Vārt. on VI. 1. 79, यूति from यु to join acc. to III. 3. 97; the latter is of course preferable) Pasture-land. याव॑य from यु to remove to a distance.

Tr. Having precious things in thy proximity, shine away the enemy to a distance; grant an extensive pasture-land and freedom from fear unto us; banish hatred; bring wealth; and send gifts to the singer, O bounteous goddess.

Verse 5

अस्मे इति । श्रेष्ठेभिः । भानुऽभिः । वि । भाहि । उषः । देवि ।
प्रऽतिरन्ती । नः । आयुः ॥ इषम् । च । नः । दधती । विश्वऽ-
वारे । गोऽमत् । अश्वऽवत् । रथऽवत् । च । राधः ॥ ५ ॥

हे उषो देवि अस्मे अस्मभ्यं श्रेष्ठेभिः प्रशस्येर्भानुभी रश्मिभिः प्रकाशैर्वि भाहि प्रकाशय । किं कुर्वती । नोऽस्माकमायुरायुष्यं प्रतिरन्ती वर्धयन्ती । हे विश्ववारे विश्वैः संभजनीये देवि नोऽस्मभ्यमिष च गोमद्गोभिर्बहुभिरुपेतमश्वावदश्वैश्चोपेत रथवद्रथैरुपेतं राधो धनं च दधती विभाहीति ॥

श्रेष्ठ super. of verb. n. from श्री to beautify. प्रतू cf. I. 25. 12.

Tr. Shine for us with loveliest rays, goddess Usas, prolonging life for us, and bestowing on us nourishment and gifts consisting of cattle, horses and chariots, O goddess longed for by all.

Verse 6

याम् । त्वा । दिवः । दुहितः । वर्धयन्ति । उषः । सुऽजाते ।
मतिऽभिः । वसिष्ठाः ॥ सा । अस्मासु । धाः । रयिम् । ऋष्वम् ।
बृहन्तम् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥

हे दिवो दुहितरुषः सुजाते शोभनजनने यां त्वा त्वां मतिभिः स्तोत्रैर्वसिष्ठा वर्धयन्ति सा त्वमस्मासु वसिष्ठेष्वृष्वं प्रदीप्तं बृहन्तं महान्तं रयिं धनं धाः धेहि ॥

Tr. O beautiful-born daughter of heaven, Uṣas, mayst thou, whose strength is increased by the Vasisthas with their hymns, confer on us noble and mighty wealth. (Ye gods,) protect us evermore with your blessings.

No. 22

MANDALA VII. SŪKTA 86.

धीरा त्वस्येत्यष्टर्चं षोडशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वरुणदेवत्यम् । तथा चानुक्रान्तम् । धीराष्टौ वारुणं हेति । गतो विनियोगः ॥

The बृहद्देवता narrates a story in connection with VII. 55. Vasistha stole into Varuna's house at night. Varuna's dog attacked him, but was silenced along with other followers by Vasistha with VII. 55. 2–3. Then Varuna bound Vasistha with his snares, whereupon Vasistha prayed to his father, Varuṇa, with VII. 86–89 and was released. Geldner accepts this childish story (Old. Noten II. 59) as the basis of this hymn, which is one of the most inspired of the Rgvedic collection.

Verse 1

धीरा । तु । अस्य । महिना । जनूंषि । वि । यः । तस्तम्भ ।
रोदसी इति । चित् । उर्वी इति ॥ प्र । नाकम् । ऋष्वम् । नुनुदे ।
बृहन्तम् । द्विता । नक्षत्रम् । पप्रथत् । च । भूम ॥ १ ॥

अस्य वरुणस्य जनूंषि जन्मानि महिना महिम्ना तु क्षिप्रं धीरा धीराणि धैर्यवन्ति भवन्ति । यो वरुण उर्वी विस्तीर्णे रोदसी चिद्द्यावापृथिव्यावपि वि तस्तम्भ विविध स्वकीये स्थाने स्थिते अकरोत् । यश्च बृहन्तं महान्तं नाकमादित्यं नक्षत्रं चर्ष्वं दर्शनीयं द्विता द्वेधा प्र नुनुदे प्रेरयति स्म । अहनि सूर्यं दर्शनीयं प्रेरयति रात्रौ नक्षत्रं तथेति द्विप्रकारः । भूम भूमिं च यः पप्रथत् अप्रथयत् विस्तारितवान् तस्यास्य वरुणस्येत्यन्वयः ॥

धी'रा. Gr. from धी; Geld. from धृ; Geld. quotes VIII. 48. 4 in support, but not convincingly; Peterson actually agrees with Sāy. in taking it in the sense of 'stable', as against Gr.; Geld. is with Sāy.; *b* justifies the interpretation. अस्य goes with महिना' (= महिम्ना; cf I. 32. 8). जनूं'षि created beings, esp. gods and men; cf. उभे जनुषी IX. 70, 3; देव्यानि मानुषा जनूंषि VII. 4. 1. चित् emphasises उर्वी प्र' नुनुदे set in motion; M. M. 'lighted on high', which is unacceptable. Berg. see in *c* a belief that the heavens moved only at night. द्विता'; acc. to Geld. (V. S. III.4.) = त्मना, by itself, all alone: (Gl.) on both sides, i. e. westwards by day and eastwards at night; (Tr.) repeatedly, ever; M. M., apart; R., Gr., Berg., an emphatic particle, Old. forsooth, verily. न'क्षत्र star; in the sing. refers to the sun; cf. सूर्यः उद्यत नक्षत्रं VII. 81. 2; it goes with नुनुदे: पप्रथत्, being accented, must begin a new sentence. भू'म n. = भूमिम्.

Tr. The creation has been stabilised by his greatness, of him who steadied apart heaven and earth, vast as they are; he set the lofty and great vault of heaven in motion, and the sun besides, and extended the earth.

Verse 2

उत । स्वया । तन्वा । सम् । वदे । तत् । कदा । नु । अन्तः ।
वरुणे । भुवानि ॥ किम् । मे । हव्यम् । अहृणानः । जुषेत ।
कदा । मृळीकम् । सुऽमनाः । अभि । ख्यम् ॥ २ ॥

[*न्वा ३ ऽन्व१

वरुणं शीघ्रं दिदृक्षमाण ऋषिरनया वितर्कयति । उतेति विचिकित्सायाम् । उत किं स्वया तन्वा स्वीयेनात्मीयेन शरीरेण सं वदे सहवदनं करोमि । आहोस्वित् तत्तेन वरुणेन सह संवदे । कदा नु खलु वरुणे देवेऽन्तर्भुवानि अन्तर्भूतो भवानि । वरुणस्य चित्ते संलग्नो भवानीत्यर्थः । अपि च मे मदीयं हव्यं स्तोत्रं हविर्वाहृणानोऽकुर्वन् वरुणः किं केन हेतुना जुषेत सेवेत । सुमनाः शोभनमनस्कः सन्नहं कदा कस्मिन्काले मृळीकं सुखयितारं वरुणमभि ख्यम् अभिपश्येयम् ॥

स्व'या तन्वा'। तनू f. with स्व or स्वयम् is often used in the sense of 'self'; cf. तन्वे स्वायै पिपर्षि V. 4. 6; स्वयं गातुं तन्वे इच्छमानम् IV. 18. 10. सं' वद् to converse with; cf. मरुद्भिः सं वदस्व I. 170. 5. त'त् refers to *b c d*. व'रुणे अन्तः भुवानि. अन्तः Ludwig, Gr. (Tr.) Macd., united with; Gr. (Dict.) Geld., अन्तः भू to insinuate oneself into; or to penetrate into; Geld compares यः इन्द्रे कर्मणा भुवत् VII. 32. 13; M. M., Berg. 'get unto, get near'. Gr. also explains अन्तः as an adv. with the sense 'in the company of' and cites बह्वीः समाः अकरं अन्तः अस्मिन् (असुरे) X. 124. 4. It would appear that अन्तः in VII. 86. 6 and X. 11. 4 is akin in sense to अन्तर in Gr. Dict. (4) 'beloved'; cf. यज्ञः वः अन्तरः VIII. 18. 19, हृदः अन्तरं वचः VII. 101. 5; युजः चित् अन्तरं सोमम् I. 10. 9; जायेव हृदि अन्तरा X. 91. 13. भुवानि, impera. 1 s. from aor. base. मृळीकं' कदा अभि' ख्यम्. मृळीक n. mercy. अभि ख्या to see, experience.

Tr. And I thus say to myself; when shall I be beloved of Varuna? Would he accept my offering without being angry? When, joyous at heart, shall I experience his mercy?

Verse 3

पृच्छे । तत् । एनः । वरुण । दिदृक्षु । उपो इति । एमि ।
चिकितुषः । विऽपृच्छम् ॥ समानम् । इत् । मे । कवयः । चित् ।
आहुः । अयम् । ह । तुभ्यम् । वरुणः । हृणीते ॥ ३ ॥

हे वरुण तदेनः पापं पृच्छे त्वां पृच्छामि । दिदृक्षु । छान्दसः सुलोपः । द्रष्टुमिच्छन्नहम् । येन पापेन हेतुना त्वदीयैः पाशैर्बद्धोऽस्मि । पृष्टः संस्तत्पापं कथय । अहं विपृच्छं विविधं प्रष्टुं चिकितुषो विदुषो जनानुपो एमि उपागाम् । ते कवयश्चित् क्रान्तदर्शिनो जनाश्च मे मह्यं समानमित् समानमेवैकरूपमेवाहुः अकथयन् । यदाहुस्तदाह । हे स्तोतः तुभ्यमयं हायमेव वरुणो हृणीते क्रुध्यतीति । अतः क्रोधं परित्यज्यास्मान्पाशेभ्यो मोचय ॥

दिदृक्षु as a desi. n. should have been दिदृक्षुं. The word has been explained variously: Sāy. = दिदृक्षुः; Ludwig, दिदृक्ष् verb. n. + सु (loc. pl.); Geld. = दिदृक्षा; Lanman (*Berg.* Old. Macd. agree) desi. n. used as adv., the accent being shifted; as a parallel to the adv. use of a verb. n. Old. quotes: त्वं नि दस्युं चुमुरिं धुनिं च अस्वापय. दभीत ये सुहन्तु (Gr. acc. du.) VII. 19. 9. Geld.'s expl. of *a* is very fantastic: 'I ask: Is curiosity a sin?' He refers this to the बृहद्दे० version of VII. 55. चिकितुषः, acc. pl. of चिकित्वस्, perf. part. from चित्. विपृच्छम् inf. in अम्.

Tr. With a desire to know what that sin is, Varuṇa, I go to those that know in order to put them questions. The wise ones have one common reply to make: it is this Varuṇa who is angry with thee.

Verse 4

किम् । आगः । आस । वरुण । ज्येष्ठम् । यत् । स्तोतारम् । जिघांससि । सखायम् ॥ प्र । तत् । मे । वोचः । दुःऽदभ । स्वधाऽवः ।
अव । त्वा । अनेनाः । नमसा । तुरः । इयाम् ॥ ४ ॥

* दूळ

हे वरुण ज्येष्ठमधिकं किमागः आस कोऽपराधो मया कृतो बभूव । यमेनागसा सखायं मित्रभूतं सन्तं स्तोतारं जिघांससि हन्तुमिच्छसि । हे दूळभ दुर्दभ अन्यैर्बाधितुमशक्य स्वधावस्तेजस्विन् हे वरुण तदागो मे मह्यं प्र वोचः प्रब्रूहि । एवं सति तस्य प्रायश्चित्तं कृत्वानेना अपापः सन्नहं तुरस्त्वरमाणः शीघ्रो नमसा नमस्कारेण हविषा वा त्वामवेयां उपगच्छेयम् ॥

ज्येष्ठ आगः heinous guilt. सखायम् cf. III. 9. 1; the word does not show equality or intimacy, but rather devotion on the part of the worshipper. दूळभ-दुर्दभ, one who cannot be harmed. स्वधावः voc. of स्वधावत् possessed of sovereign power, used of gods, from स्वधा, one's own nature, disposition, manner, customary act, power, the fulness of power that is the characteristic of a god. त्वा तुरः अव इयाम्. तुर (from तॄ-तुर् to make a dash, to overpower) impetuous (of gods), zealous

eager (of sacrificers &c.); cf. श्रोषन् ये अस्य शासं तुरासः I. 68, 5; तुरं वचः VIII. 60. 5. अव + इ, Gr. Geld. to come to; Macd. appease.

Tr. What was that heinous guilt, Varuna, that thou wishest to kill your singer and a friend. Speak it out, oh sovereign god whom none can do harm. I would eagerly come up to you with adorations as one free from guilt.

Verse 5

अवं । द्रुग्धानिं । पित्र्या । सृज । नः । अवं । या । वयम् ।
चकृम । तनूभिः ॥ अवं । राजन् । पशुऽतृपम् । न । तायुम् ।
सृज । वत्सम् । न । दाम्नः । वसिष्ठम् ॥ ५ ॥

हे वरुण पित्र्या पितृतः प्राप्तानि नोऽस्मदीयानि द्रुग्धानि द्रोहान् बन्धनहेतुभूतानवसृज विमुञ्च अस्मत्तो विश्लेषय । वयं च या यानि द्रोहजातानि तनूभिः शरीरैश्चकृम कृतवन्तः स्म तानि चाव सृज । हे राजन् राजमान वरुण पशुतृपं न तायुं स्तैन्यप्रायश्चित्तं कृत्वावसाने घासादिभिः पशूनां तर्पयितारं स्तेनमिव दाम्नो रज्जोर्वत्सं न वत्समिव च वसिष्ठं मां बन्धकात्पापादव सृज विमुञ्च ॥

द्रुग्ध (from द्रुह्) unrighteousness. पशुतृपं न तायुम्. Sāy.'s expl. is worth consideration. On the other hand '*trif*' in Avesta mean to steal and 'tāyu' means thief. Rather than compare Vasistha to a thief, Pischel would understand the acc. in पशुतृपं तायुं as due to an attraction and would read पशुतृप तायुः in its place. But when Vasistha is pleading guilty, in the usual self-abasement of god-minded persons, he can very well compare himself to a thief.

Tr. Release us from the unrighteous acts of our fathers release us from those that we have committed our-selves. Release, oh king, Vasistha like a thief who steals cattle like a calf from its father.

Verese 6

न । सः । स्वः । दक्षः । वरुण । ध्रुतिः । सा । सुरा । मन्युः ।

विऽभीदकः । अचित्तिः ॥ अस्ति । ज्यायान् । कनीयसः । उपऽ-
अरे । स्वप्नः । चन । इत् । अनृतस्य । प्रऽयोता ॥ ६ ॥

हे वरुण स स्वो दक्षः पुरुषस्य *स्वरूपवद्बलं पापप्रवृत्तौ कारणं न भवति । किं तर्हि धृतिः स्थिरोत्पत्तिसमय एव निर्मिता दैवगतिः कारणम् । धृ गतिस्थैर्ययोरिति धातुः । सा च धृतिर्वक्ष्यमाणरूपा । सुरा प्रमादकारिणी मन्युः क्रोधश्च गुर्वादिविषयः सन्ननर्थहेतुः । विभीदको द्यूतसाधनोक्षः । स च द्यूतेषु पुरुषं प्रेरयन्ननर्थहेतुर्भवति । अचित्तिरज्ञानमविवेककारणम् । अत ईदृशी दैवक्लृप्तिरेव पुरुषस्य पापप्रवृत्तौ कारणम् । अपि च कनीयसोऽल्पस्य हीनस्य पुरुषस्य पापप्रवृत्तावुपार उपागते समीपे नियन्तृत्वेन स्थितो ज्यायानधिक ईश्वरोस्ति । स एव तं पापे प्रवर्तयति । तथा चाम्नातम् । एष ह्येवासाधु कर्म कारयति तं यमधो निनीषति (कौ० उ० ३-८) इति । एवं च सति स्वप्नश्चन स्वप्नोऽप्यनृतस्य पापस्य प्रयोता प्रकर्षेण मिश्रयिता भवति । इदिति पूरकः । स्वप्ने कृतैरपि कर्मभिर्बहूनि पापानि जायन्ते किमु वक्तव्यं जाग्रति कृतैः कर्मभिः पापान्युत्पद्यन्त इति । अतो ममापराधो दैवागत इति हे वरुण त्वया क्षन्तव्य इति भावः ॥

स्वः दक्षः. दक्ष, Gr., insight, understanding, intention; Geld., power, will-power, character; Macd., intent. स्व दक्ष occurs in स जानत स्वैः दक्षैः अमूराः, I. 68. (8); without स्व, but in the same context in देवाः दक्षैः भृगवः सं चिकिरिरे, X. 92. 10. In I. 68. 8, Old. translates it by 'mind', Geld. by 'effort'; probably it means an effort of the will, volitional activity. धृतिः (Sāy. from धृ; Gr. from धृ-ध्वृ-धूर्व्, to tempt, to ruin; cf. ध्वरस्, सत्यध्वृत, अस्मृतध्रु, वरुणध्रुत्), Sāy. fate; Roth, Gr., Macd., seduction; Geld. (prob.) accident, chance. दक्ष is contrasted with धृतिः and *b* probably illustrates the धृतिः; hence 'fate' or 'chance' will not do. The word occurs only here. मन्युः anger. विभीदक one of the myrobalans, the fruit of which was used as dice for gambling (बेहडा in Mar.). कनीयसः उपारे. उपार from उप + ऋ, to commit guilt or unrighteousness; cf. आशसा निःशसा अभिशसा उपारिम जाग्रतः यत् स्वपन्तः। अग्निः...दुष्कृतानि...आरे अस्मत् अप दधातु ॥ X. 164. 3; also यत् उपारिम चरणे AV. VII. 106. 1, hence guilt or lapse in good conduct. The locative shows cause; Macd. illustrates it by यः प्रसवे असि VI. 71. 2.

* स्वभूतं तद्बलम् इत्यादर्शः ।

स्व'प्नः चन'. चन has a negative force here, as in V. 30. 3. प्रयोता' (from यु to drive away, to separate); cf. नकि. तं प्र योषत् VIII. 31. 17; अन्यान् प्रयावयन् अचरत् III. 48. 3.

Tr. It was not my volitional act, Varuna: it was temptation, wine, anger, unreason; there is a mightier one to actuate the lapses of a feebler one. Sleep itself does not banish sin.

Verse 7

अरम् । दासः । न । मीळ्हुषे । कराणि । अहम् । देवाय । भूर्णये । अनागाः ॥ अचेतयत् । अचितः । देवः । अर्यः । गृत्सम् । राये । कविऽतरः । जुनाति ॥ ७ ॥

मीळ्हुषे सेक्त्रे कामानां वर्षित्रे भूर्णये जगतो भर्त्रे देवाय दानादिगुणयुक्ताय वरुणायानागास्तत्प्रसादादपापः सन्नहमरमलं पर्याप्तं कराणि परिचरणं करवाणि दासो न यथा भृत्यः स्वामिने सम्यक् परिचरति तद्वत् । अर्यः स्वामी स च देवोऽचितो *अज्ञानस्मानचेतयत् प्रज्ञापयतु चेतयतु । गृत्सं स्तोतारं च कवितरः प्राज्ञतरो देवो राये धनाय धनप्राप्त्यर्थं जुनाति जुनातु प्रेरयतु ॥

दास': न'. The Dāsa was used as a servant; cf. दासप्रवर्ग रयिं I. 92. 8. मीळ्हुष'े (मीढ्वस् from मिह् to pour). अर्य': the noble one, lord, patron. गृत्स (Gr. from गृध्? ; Sāy. from गृ?) wise, contrasted with पाक ignorant; cf. मह्यं रातिं देवो दधौ मर्त्याय स्वधावान्। पाकाय गृत्सः IV. 5. 2; also X 28. 5. भूर्'णि (from भुर्) impetuous. अर'ं कृ to serve; to make ready; to equip: cf. इमे सोमाः अरंकृताः I. 2. 1; यदा अरं अकृन् ऋभवः...वेषणा IV. 33. 2; गृह· यामि अरंकृत· X. 119. 13. अ'चेतयत् (चित् caus.) has made to observe, has taught. जू to urge on, to speed.

Tr. Free from sin, I would serve like a servant the bounteous, impetuous god. The noble god has made the thoughtless wise. With his greater wisdom he speeds the wise man to wealth.

---

* अजानतो इत्यादर्शः ।

Verse 8

एकादशिने वारुणे पशावयमिति पुरोडाशस्यानुवाक्या । सूत्रितं च । अयं सु तुभ्यं वरुण स्वधाव एवा वन्दस्व वरुणं बृहन्तम् । (आ० ३-७)

अयम् । सु । तुभ्यम् । वरुण । स्वधाऽवः । हृदि । स्तोमः । उपऽश्रितः । चित् । अस्तु ॥ शम् । नः । क्षेमे । शम् । ऊं इति । योगे । नः । अस्तु । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ८ ॥

हे स्वधावोऽन्नवन्वरुण तुभ्यं त्वदर्थं क्रियमाणोऽयमेतत्सूक्तात्मकं स्तोमः स्तोत्रं हृदि त्वदीये हृदये सु सुष्ठूपश्रित उपगतः समवेतोऽस्तु । चिदिति पूरकः । अप्राप्तस्य प्रापणं योगः प्राप्तस्य रक्षणं क्षेमः । नोऽस्मदीये क्षेमे रक्षणे शमुपद्रवाणां शमनमस्तु योगे च नोऽस्मदीये प्रापणे शमु शमनमेवास्तूपद्रवाणाम । हे वरुणादयो देवा नोऽस्मान्सर्वदा स्वस्तिभिरविनाशैः पात रक्षत ॥

क्षे'म (from क्षि to dwell, to rest) used in antithesis with यो'ग (युज् or प्रयुज्), rest (enjoyment) as opposed to activity ; (acquisition) : cf. पाहि क्षेमे उत योगे वरं नः VII. 54. 3 : क्षेमस्य च प्रयुजः च त्व ईशिषे VIII 37. 5 ; योगक्षेम itself occurs in X. 166. 5.

Tr O sovereign god Varuna, let this hymn (addressed) to thee, indeed dwell in thy heart. Let there be welfare for us in rest and activity. (Ye gods), protect us evermore with your blessings.

No. 23.

MANDALA VII. SŪKTA 95.

प्र क्षोदसेति षड्चं षष्ठं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं सरस्वतीदेवताकम् । तृतीया तु सरस्वद्देवताका । अनुक्रम्यते च । प्रक्षोदसा पद्व सारस्वतं तु तृतीया सरस्वत इति । गतः सूक्तविनियोगः । प्रथमे छन्दोमे प्रउगशस्त्रे प्रक्षोदसा धायसा सश्च एषेति प्रउगम् (आ० ८-९) इति । सारस्वते पशौ प्र क्षोदसेति वशाया याज्या । सूत्रितं च । प्र क्षोदसा धायसा सश्च एषा पावीरवी कन्या चित्रायुः (आ० ३-७) इति ।

Verse 1

प्र । क्षोदसा । धायसा । सस्रे । एषा । सरस्वती । धरुणम् ।
आयसी । पूः ॥ प्रऽबाबधाना । रथ्याऽइव । याति । विश्वाः ।
अपः । महिना । सिन्धुः । अन्याः ॥ १ ॥

सरस्वत्या एषा नदीवाङ्निगमा । एषा दृश्यमाना नदीरूपा सरस्वत्यायस्ययसा निर्मिता पूः पुरीव धरुणम् । लिङ्गव्यत्ययः । धरुणा धारयित्री । धायसा धारकेण क्षोदसोदकेन प्र सस्रे प्रधावति शीघ्रं गच्छति । सिन्धुः स्यन्दनशीला नदीरूपा सान्या विश्वाः सर्वा अप आपगा महिना महिम्ना प्रबाबधाना भृशं बाधमाना रथ्येव प्रतोलीव विस्तीर्णा सती याति गच्छति । यद्वा । रथ्येव रथिनेव यथा रथी रथेन मार्गस्थं तरुगुल्मादिकं चूर्णीकृत्य गच्छति तद्वत् स्वकीयेन वेगेन सर्वं संपिंषती गच्छतीत्यर्थः ॥

धा'यसा क्षो'दसा. धायस् (from धे to suck) nourishing. क्षोदस् n. (क्षुद् to pound) flood. धरु'णम् (धृ) support; cf. ऋतस्य दृढा धरुणानि IV. 23. 9. रायः धरुणम् VII. 34. 24. (विश्वाः अपः) प्रबा'बधाना, pre. p. from freq. of बाध्, pressing forwards. रथ्या' इव याति; cf. III. 33. 2; (chariot horses). रथ्या' इव is to be distinguished from र'थ्या इव where the accent is different, also from रथीरिव or रथ्यो यथा where the meaning is different. Geld. (Gl.) in our passage and in III. 36. 6 (आपः समुद्रं रथ्येव जग्मुः) takes रथ्या, like Sāy., as meaning a road. The simile occurs besides in II. 39. 2. आतर्यावाणा रथ्येव वीरा (अश्विना वरं आ सचेथे), 3 (अर्वाञ्चा यातं), VII. 39. 1 (भेजाते अद्री रथ्येव पन्थाम्) and तना न रथ्या VIII. 25. 2. In all these, as well as in passages where रथ्यो' occurs by itself, the meaning of road is inapplicable. It seems unreasonable to devise a new meaning for just two or three of these passages. (Old. ZDMG, 61. 832) *in our passage would take* रथ्येव=रथ्यः इव (*acc.* pl.) and as nom. pl. in III. 36. 6,—an equally arbitrary procedure. Where रथीरिव or रथ्य इव do occur (V. 61. 17; VIII. 47. 5 &c.) in all the six cases the meaning of रथी is 'chariot-horse'. The similes are therefore absolutely different there is a good reason why रथ्या, meaning horses, should be in du.

The simile is with respect to speed, and is drawn from the chariot-race.

Tr. With a nourishing flood runs this Sarasvatī, a mainstay, a citadel of iron (for us). The river rushes like a pair of chariot horses, pressing forward with her might all other waters (that flow into her).

Verse 2

सारस्वत एव पशौ वपाया एकाचेतदित्यनुवाक्या । सूत्रितं च । एकाचेतत्सरस्वती नदीनामुत स्या नः सरस्वती जुषाणा (आ० ३-८) इति ।

एका । अचेतत् । सरस्वती । नदीनाम् । शुचिः । यती । गिरिभ्यः । आ । समुद्रात् ॥ रायः । चेतन्ती । भुवनस्य । भूरेः । घृतम् । पयः । दुदुहे । नाहुषाय ॥ २ ॥

सहस्रवत्सरेण क्रतुना यक्ष्यमाणो नाहुषो नाम राजा सरस्वतीं नदीं प्रार्थयामास सा च तस्मै सहस्रसंवत्सरपर्याप्तं पयो घृतं च प्रददौ । अयमर्थोऽत्र प्रतिपाद्यते । नदीनामन्यासां मध्ये शुचिः शुद्धा गिरिभ्यः सकाशादा समुद्रात्समुद्रपर्यन्तं यती गच्छन्त्येका सरस्वती नद्यचेतत् । नाहुषस्य प्रार्थनामज्ञासीत् । तथा भुवनस्य भूतजातस्य भूरेर्बहुलस्य रायो धनानि चेतन्ती प्रज्ञापयन्ती प्रयच्छन्ती नाहुषाय राज्ञे घृतं पयश्च सहस्रसंवत्सरक्रतोः पर्याप्तं दुदुहे दुग्धवती । दत्तवती ॥

एका शुचिः अचेतत्, चित् intr., to appear, to distinguish oneself; cf. सरस्वती अकवारी चेतति VII. 96. 3; संज्ञातरूपः चिकेतत् अस्मै I. 69 9. समुद्रात् आ Berg. *from* the (celestial) sea. रायः चेतन्ती. चित् here has the usual sense of 'knowing, observing.' नाहुषाय; see on V. 73. 2; the legend quoted by Say. is of no use for purposes of interpretation. भुवनस्य may be connected with रायः Gr. takes them severally with चेतन्ती.

Tr. Sarasvatī of all rivers is the one river that appears to go pure from the mountains to the sea; taking note of the wealth of the vast creation, she yields ghee and milk to the descendant of Nahusa (man).

Verse 3

सरस्वतदेवताके पशौ स वावृध इति पुरोडाशस्य याज्या । सूत्रितं च स वावृधे नर्यो योषणासु यस्य व्रतं पशवो यन्ति सर्वे (आ० ३-८) इति ।

सः । ववृधे । नर्यः । योषणासु । वृषा । शिशुः । वृषभः ।
यज्ञियासु ॥ सः । वाजिनम् । मघवत्ऽभ्यः । दधाति । वि ।
सातये । तन्वम् । ममृजीत ॥ ३ ॥

मध्यस्थानो वायुः सरस्वान् । नर्यो नृभ्यो हितो वृषा सेचनसमर्थः शिशुरल्पः प्रादुर्भावसमयेऽल्पतया दृश्यमानो वृषभो वर्षिता एवंभूतः स सरस्वान् यज्ञियासु यज्ञार्हासु योषणासु योषित्स्वात्मनः कलत्रभूतासु मध्यमस्थानास्वप्सु मध्ये ववृधे वर्धते । स तादृशः सरस्वान् मघवद्भ्यो हविष्मद्भ्यो यजमानेभ्यो वाजिनं बलिनं पुत्रं दधाति । ददाति तथा सातये लाभार्थं तन्वं तेषां शरीरं वि मामृजीत विमार्ष्टि । लाभार्थं संस्करोतीत्यर्थः । यद्यप्येषा सरस्वतः स्तुतिस्तथापि सरस्वत्याः प्रीणनार्थं तत्सवनामिति च्छान्दोगिके सारस्वते तृचेऽस्या उक्तो विनियोगो न विरुध्यते ॥

This rc describes सरस्वत्, who appears also in I. 164. 52; VII. 96. 4-6; X. 66 5 (invoked along with वरुण, पूषन्, विष्णु &c). In I. 164. 52 (cf. दिव्यं सुवर्णं...वृष्टिभिस्तर्पयन्तं) he is definitely मध्यस्थानः as Sāy. describes him. The सरस्वतः स्तनः (VII. 96. 6) is prob. a cloud. In VI. 49. 7 सरस्वती is called a वीरपत्नी and Macd. surmises that सरस्वत् must be the वीर, who therefore is described here along with सरस्वती. नर्यः manly; epithet of इन्द्र, देवाः, विष्णु &c. नर्यः and वृषभः are epithets showing the result of growth. साति distribution of gifts; वि पथः सातये सितम् VIII. 5. 9. वि मृज् to deck out; मामृजीत, pot. from perf. base.

Tr. The male calf has grown amidst holy females to be a manly bull; he gives to the bounteous (patrons) a prize-winner. Let him deck himself out to distribute his bounty.

Verse 4

दशरात्रेऽष्टमेऽहनि प्रउग उत स्या न इति सारस्वतः सप्तमस्तृचः । सूत्रितं च । उत स्या नः सरस्वती जुषाणेति प्रउगम् (आ० ८-१०) इति । सारस्वते पशौ

पुरोडाशस्योत स्या न इत्यनुवाक्या । सूत्रितं च । उत स्या नः सरस्वती जुषाणा सरस्वत्यभि नो नेषि वस्यः (आ० ३-७) इति ॥

उत । स्या । नः । सरस्वती । जुषाणा । उप । श्रवत् । सुऽभगा ।
यज्ञे । अस्मिन् ॥ मितज्ञुऽभिः । नमस्यैः । इयाना । राया ।
युजा । चित् । उत्ऽतरा । सखिऽभ्यः ॥ ४ ॥

उतापि च जुषाणा प्रीयमाणा सुभगा शोभनधना स्या सा सरस्वती नोऽस्माकमस्मिन्यज्ञ उप श्रवत् अस्मदीयाः स्तुतीरुपशृणोतु । कीदृशी सा । मितज्ञुभिः प्रह्वैर्जानुभिर्नमस्यैर्नमस्कार्यैर्देवैरियानोपगम्यमाना । चिच्छब्दश्चार्थे । युजा नित्ययुक्तेन राया धनेन च सगता सखिभ्य उत्तरोत्कृष्टतरा । ईदृश्यस्मदीया स्तुतीरुपशृणोत्वित्यन्वयः ॥

स्या' = सा. उप श्रु to listen to. मित ज्ञु (मित lowered + जानु kneeling. नमस्यः elsewhere, excepting VI. 68. 3 (नमस्येभिः शूषैः), is an epithet of gods meaning 'adorable'; in VI. 68. 3 and our passage it is a verb. n. from नमस्यति in the sense of 'that which or he who adores. इयाना' from ई to pray; cf. III. 42. 6. राया' युजा' is idiomatic for 'with accompanying wealth,' युज् being a companion; cf. पुरंध्या युजा VII. 32. 20; तपसा युजा X. 83. 3 उत्तरा higher, superior.

Tr. And may that lovely Sarasvatī, pleased, listen to us in this sacrifice, prayed to by (us) who kneel and do reverence, superior even to friends by her being accompanied by wealth.

Verse 5

पवित्रेष्टयां सारस्वतस्य हविष इमा जुह्वाना इति याज्या । सूत्रितं च । इमा जुह्वाना युष्मदा नमोभिर्दधिक्राव्णो अकारिषम् (आ० २-१२) इति ॥

इमा । जुह्वानाः । युष्मत् । आ । नमःऽभिः । प्रति । स्तोमम् ।
सरस्वति । जुषस्व ॥ तव । शर्मन् । प्रियऽतमे । दधानाः ।
उप । स्थेयाम । शरणम् । न । वृक्षम् ॥ ५ ॥

हे सरस्वति इमा इमान्यस्मदीयानि हवींषि जुह्वानास्तुभ्यं जुह्वतो वयं नमोभिस्त्वद्विषयैर्नमस्कारैर्युष्मत्त्वत्सकाशादा । उपसर्गश्रुतेर्योग्यक्रियाध्याहारः । आददीमहि धनानीति शेषः । स्तोमं चास्मदीयं स्तोत्रं प्रति जुषस्व प्रतिसेवस्व । वयं च प्रियतमेऽतिशयेन प्रिये तव त्वदीये शर्मञ्छर्मणि सुखे दधाना निधीयमानाः सन्तः शरणं न वृक्षमाश्रयभूतं वृक्षमिवाप स्थेयाम त्वामुपातिष्ठेम । संगच्छेमहि ॥

a is addressed to the patrons ; *b* is parenthetically addressed to सरस्वती; *a c d* form the main sentence. युष्मत् आ' from you, on your behalf ; cf. अस्मत् आ X 20. 8. द'धाना reflex. or pass. from धा. स्थेयाम opta. from स्था. शरणं' protection, shelter ; in appo. to वृक्षम् .

Tr. Offering these (oblations) on your behalf with salutations,--accept our hymn, Sarasvatī,--placing ourselves in thy most agreeable protection, may we obtain as it were a sheltering tree.

Verse 6

अयम् । ऊं इति । ते । सरस्वति । वसिष्ठः । द्वारौ । ऋतस्य ।
सुऽभगे । वि । आवरित्यावः ॥ वर्ध । शुभ्रे । स्तुवते । रासि । वाजान् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥

हे सुभगे शोभनधने सरस्वति अयं वसिष्ठस्ते त्वां *ऋतस्य यज्ञस्य संबन्धिन्यौ द्वारौ पूर्वापरे द्यावः विवृणोति । उ इति पूरकः । हे शुभ्रे शुभ्रवर्णे देवि वर्ध वर्धस्व । तथा स्तुवते स्तोत्रं कुर्वते वसिष्ठाय वाजानन्नानि रासि प्रदेहि । अन्यदद्गतम् ॥

Berg. (III 243) takes ते as geni. to ऋत'स्य द्वा'रौ ; but ऋत should mean 'the sacrifice' rather than 'Law' here. वि' आवः (from वृ). The augment of नश्, वृ, and वस् is lengthened ; ex. आनट्, आवः. व'र्ध, intransi., to be strengthened, to show one's greatness; cf. इन्द्रो वर्धते X. 94. 9; आदित्यासः अक्राः न वावृधुः X. 77. 2. रासि impera. 2 s.

---

* यन्तुः इत्यादर्शे विशेषः ।

Tr. Here has Vasiṣṭha opened the portals of the sacrifice for thee, bounteous Sarasvatī; be strengthened (by our offerings); give rewards to the singer. (Ye gods) protect us evermore with your blessings.

No. 24

MANDALA VIII. SŪKTA 29

बभ्रुरेक इति दशर्चं नवमं सूक्तम् । मरीचिपुत्रः कश्यपो वैवस्वतो मनुर्वा ऋषिः। तथा चानुक्रम्यते । बभ्रुर्दश कश्यपो वा मारीचो द्वैपदमिति । दशापि द्विपदा विंशत्यक्षरा विराजः । पूर्ववद्विश्वे देवा देवता । तृतीये छन्दोमे वैश्वदेवसूक्तात्पूर्वमेव द्वैपदं सूक्तं शंसनीयम् । सूड्यते हि । बभ्रुरेक इति द्विपदासूक्तानि पुरस्ताद्वैश्वदेवसूक्तानाम् (आ० ८–७) इति ।

The group of hymns addressed to the विश्वेदेवाः begins with No. 27 with 22 rks; No. 28 contains 5 rks, and No. 30 contains 4; the संहिताकार therefore must have regarded No. 29 as consisting of 5 rks and the metre as सतोबृहती like that of I. 48. 2. The hymn contains riddles, the names of the various gods not having been mentioned. As regards the deities of the individual rks mentioned by Sāy. there is tolerable agreement about the first nine, although the characteristics of Soma (ṛc 1) and Tvastr have not been clearly stated. The Atris, acc. to Sāy. and Geld., are the deity of ṛc 10, the Angirases acc. to Ludwig, Old. and Macd.; the Maruts acc. to Berg. I. 132 n, II. 332 (Old. partially agrees).

Verse 1

बभ्रुः । एकः । विषुणः । सूनरः । युवा ॥ अग्निः । अङ्गे । हिरण्ययम् ॥ १ ॥

अत्र दशानामृचां *किंचित्पदलिङ्गात्पृथग्देवताः । अत्र प्रथमायां बभ्रुरित्यनेन सोमोऽभिधीयते । सौम्यं बभ्रुमालभेत (तै० सं० २-१-३३) इत्यादिषु दृष्टत्वात् । बभ्रुर्बभ्रुवर्णः †सर्वलतादिषु परिपक्वः । यद्वा । डुभृञ् धारणपोषणयोः कुभ्रश्च (उ० १-२३) इति कुप्रत्ययः । सर्वस्य सुधामयैः किरणै‡स्तावदुदिते चन्द्रमसि $सर्वे स्वदुःखोपशमनेन पुष्यन्ति खलु । तादृशो विष्णो विष्वगञ्चनः सूनरः सुष्ठु रात्रीणां नेता । रात्रयश्चन्द्रनेतृकाः खलु । एतादृशो युवा प्रतिदिवसमाविर्भूतत्वात्तरुण एको देवः सोमो हिरण्मयं हिरण्मयमञ्जि । अभिव्यज्यते प्रकाश्यतेऽनेनेत्यञ्जि आभरणम् । अभिव्यक्तिसाधनं कुण्डलमुकुटादिकं स्वशरीरमङ्गे अभिव्यञ्जयति ॥

Gr. takes this as a description of Agni. बभ्रु: brown; an epithet of सोम in IX. 11. 4 : 31. 5 ; 33. 2 ; 63. 4 ; 107. 19, 20 of रुद्र II. 33. 5, 8, 15 ; of Indra's horses IV. 32. 22-4 ; of the अक्षाः X. 34. 11, 14. वि ष्णुः (from विषु diverse) of diveree forms. अञ्जि' n. an ornament from अञ्ज् to anoint, to adorn oneself with.

Tr. One (of them) is a brown, handsome youth. He adorns himself with a golden ornament.

Verse 2

योनिम् । एकः । आ । ससाद । द्योतनः ॥ अन्तः । देवेषु ।
मेधिरः ॥ २ ॥

अत्र योनिमिति लिङ्गादग्निरुच्यते । अग्नये गृहपतये इत्यादिषु दृष्टत्वात् । देवेषु देवानामन्तर्मध्ये द्योतनः स्वतेजसा दीप्यमानो मेधिरो मेधावी । अथवा मेधाकाङ्क्षिणां स्तोतॄणां मेधादातृत्वेन मेधायुक्तः । एवंविध एकोऽग्नेर्योनिं स्थानभूतमाहवनीयादिकमा ससाद । हविःस्वीकरणार्थमासीदति ॥

Gr. refers the rc to बृहस्पति ; others to Agni. द्यो'तनः (द्युत्) bright ; occurs thrice : epithet of उषस् in I. 123. 4 ; a prop. n. in VI. 20. 8. मे'धिर occurs 12 times in the sing. ; of these 8 times of Agni, twice of Indra, once of Varuna, Soma and Vasistha each.

---

* किंचित्पदं . देवतम् इत्यादर्शः । † शबलतादिषु इत्यादर्शः ।
‡ दुद्रते इत्यादर्शः । $ दुःखोपशमनानि पुष्टानि खलु इत्यादर्शः ।

Tr. One (of them), a bright one and the wise one among the gods, has seated himself in his (own) place.

Verse 3

वाशीम् । एकः । बिभर्ति । हस्ते । आयसीम् ॥ अन्तः । देवेषु ।
निऽध्रुविः ॥ ३ ॥

देवेष्वन्तर्देवानां मध्ये द्योतमानो निध्रुविर्निश्चले स्थाने वर्तमानः । यद्वा नितरां गमनमस्यास्तीति निध्रुविः सर्वदा गच्छन् । अथवा संग्रामेषु शत्रूणां पुरतोऽतिशयेन स्थैर्यवान् । एतादृश एकस्त्वष्टृनामको देव आयसीमयोमयधारां वाशीम् । वाशृ शब्दे । शब्दयत्याक्रन्दयति शत्रूननयेति वाशी तक्षणसाधनं कुठारः । तं स्वकीये हस्ते बिभर्ति धारयति ॥

Gr. refers this ṛc to Agni. वाशी an axe; the word, including वाशीमत्, occurs 10 times, the distribution of the wielders being: 4 मरुतः, 2 अग्निः, 1 देवाः or ऋभवः, 1 priests; 1 occurs in a simile and there remains our passage. त्वष्ट् is mentioned in X 53. 9 as wielding a स्वायसं परशुम् and this probably is identical with वाशी. निध्रुविः (नि + ध्रु) Gr. constant, true; Geld., Macd. durable, untiring; Macd. strenuous It occurs only in सदा वः आपित्वं निध्रुवि अस्ति VIII. 20. 22 and यः (अग्निः) मर्त्येषु निध्रुविः ऋतावा VII. 3. 1. Macd.'s meaning does not suit the other two passages; 'true' is the best meaning and देवेषु, as मर्त्येषु VII. 3. 1, would mean 'towards gods'.

Tr. One wields an iron axe in his hand; he is true to the gods.

Verse 4

वज्रम् । एकः । बिभर्ति । हस्ते । आऽहितम् ॥ तेन । वृत्राणि ।
जिघ्नते ॥ ४ ॥

अत्र वज्रलिङ्गादिन्द्रो देवता । एक इन्द्र आहितं स्वकीयहस्ते निहितं वज्रमेतन्नामकमायुधं बिभर्ति धत्ते । स एवेन्द्रस्तेन निहितेन वज्रेण वृत्राण्यावरकाणि रक्षांसि पापानि वा जिघ्नते भृशं हन्ति ॥

Tr. One wields the Vajra, (borne) in his hand; he kills enemies with it.

Verse 5

तिग्मम् । एकः । बिभर्ति । हस्ते । आयुधम् ॥ शुचिः । उग्रः । जलाषऽभेषजः ॥ ५ ॥

अत्र जलाषभेषज इत्यनेन रुद्रोऽभिधीयते । शुचिः । शुच दीप्तौ । सर्वतः स्वतेजसा दीप्यमानः । यद्वा । शुच शोके । शत्रूणां शोचयिता दुःखयिता । अत एवोग्र उद्गूर्णबलो जलाषभेषजो रोगापनयनेन सुखकरभैषज्यवान् । यद्वा । स्तोतॄणां दुःखरूपसंसारोच्छेदेन सुखकारिभिषग्रूपः । प्रथमो दैव्यो भिषगित्यादिश्रुतिभिरस्य भिषक्त्वं श्रूयते । तादृश एको रुद्रस्तिग्मं तीक्ष्णधारमायुधम् । आयुध्यति संप्रहरति शत्रूननेनेत्यायुधं पिनाकस्तं स्वकीये हस्ते बिभर्ति ॥

तिग्म' (तिज् to sharpen) sharp. जलाषभेषजः, an epithet of रुद्र in the only other passage, I. 43. 4, but जलाष (Gr. healing, Geld. cooling) occurs in क्व ते रुद्र हस्तः यः अस्ति भेषजः जलाषः II. 33. 7; also शं नः रुद्रः रुद्रेभिः जलाषः VII. 35. 6. The word is of obscure derivation. भेषज adj. healing; n. healing remedy; cf. अप्सु अन्तः अमृतं अप्सु भेषजम् I. 23. 19.

Tr. One, bright, mighty, the possessor of cooling remedies, holds a sharp weapon in his hand.

Verse 6

पथः । एकः । पीपाय । तस्करः । यथा ॥ एषः । वेद । निऽधीनाम् ॥ ६ ॥

पथ इति लिङ्गेन पूषा निगद्यते । संपूषन्नध्वनस्तिर (ऋ० १-४२-१) इत्यादिषु दृष्टत्वात् । एकः पूषनामको देवः पथो मार्गान् पीपाय । प्यायतिर्वर्धनकर्माप्यत्र रक्षणार्थः । येऽग्निहोत्रादि कर्म कुर्वन्ति तेषां स्वर्गमार्गं ये दुष्कृतं कर्म कुर्वन्ति तेषां यातनामार्गं च रक्षति । उभयेषां मार्गविपर्ययो यथा न भवति तथा पालयतीत्यर्थः । एष सोऽयं पूषा निधीनां पृथिव्यां निहितानि धनानि वेद वेत्ति । ज्ञात्वा स्तोतॄणां तानि ददातीत्यर्थः । तत्र दृष्टान्तः । तस्करो यथा । यथा चोरः पथि गच्छतां पुरु-

णां धनहरणार्थं मार्गं रक्षति । तथा च स चोरो गृहे निहितानि ज्ञात्वा तदाहृत्य स्वसहायेभ्यो यथा तानि ददाति तद्वत् ॥

पीपाय, perf. 3 s of प्यै–प्या–पि primarily, (i) to be full or to over–flow; (ii) to make full. hence meta. to make rich or prosperous or abundant; cf. चित्रां इषं आपः न पीपयः I. 63. 8; पीपिहि इषः VI. 17. 3; सुदुघा यस्य धेनु. स्वधा पीपाय II. 35. 7. Roth and Gr. regard the form as perf. of पि to protect; Ludwig, पथः पीपाय became fat *because of* the road; Bloomfield reads (अ)पीं(पि इ-)याय; Gr. suggests विवाय; Geld. प्यै=वृध्=रक्ष. तस्करः यथा is connected by Sāy. with *b*; *b* in other places contains either the verb for the whole rc or epithets of the subj. or a new clause; the kind of *enjambement* proposed by him appears to be unusual. With तस्करो यथा (पथः पयते) 'आत्मने' has to be understood. For विद् with geni. cf. I. 86. 8; 164. 32; VI. 29. 3. The simile may include *b*.

Tr. One has made the roads abounding in wealth,—like a thief. He knows about the (hidden) treasures.

Verse 7

त्रीणि । एकः । उरुऽगायः । वि । चक्रमे ॥ यत्र । देवासः । मदन्ति ॥ ७ ॥

उरुगायो विचक्रम इति पदालिङ्गाद्विष्णुरुच्यते । उरुगाय उरुभिर्बहुभिर्गातव्यः । यद्वा । बहुषु देशेषु गन्ता बहुकीर्तिर्वा । सर्वान् शत्रून् स्वसामर्थ्येन शब्दयत्याक्रन्दयतीति वोरुगायः । एतादृश एकोऽसहायो विष्णुस्त्रीणि पदानि भुवनानि वि चक्रमे साधुपादेन विक्रान्तवान् । वेः पादविहरणे (पा० १-३-४१) इति क्रमतेरात्मनेपदम् । यत्र येषु लोकेषु देवास इन्द्रादयो देवा मदन्ति यजमानदत्तैर्हावीर्भिर्माद्यन्ति तानि विचक्रम इत्यन्वयः ॥

After त्रीणि, पदानि is to be supplied. उरुगायः (उरु + गा to go); (i) wide-goer, wide-strider; also, (ii) long-lasting; (iii) wide latitude. In sense (1) it occurs 12 times, of which 8 relate to Visnu and the rest to Indra, Soma and Aśvinā. वि क्रम् to stride. With *c* cp. विष्णोः पदे परमे मध्वः उत्सः I. 154. 5; यस्य त्री पूर्णा

मधुना पदानि...मदन्ति. It is the privilege of gods alone to enjoy all the three; cf. I. 155. 5.

Tr. One, a wide-strider, took three strides, in (the regions of) which the gods rejoice.

Verse 8

विऽभिः । द्वा । चरतः । एकया । सह ॥ प्र । प्रवासाऽइव । वसतः ॥ ८ ॥

एकया सहेति लिङ्गादश्विनावभिधीयेते । द्वा द्वौ द्वित्वसंख्योपेतावाश्विनौ विभिः। वी गत्यादिषु । क्विप् । छान्दसो ह्रस्वः । गमनसाधनैरश्वैश्चरतः संचरेते । किंचेमावाश्विनावेकया सूर्याख्यया ताभ्यां स्वयं कृतया स्त्रिया सह प्र वसतः प्रवासं सर्वत्र गमनं कुरुतः । प्रवासे दृष्टान्तः । प्रवासेव । यथा प्रवासिनौ द्वौ पुरुषावेकया स्त्रिया सह प्रवसतस्तद्वत् ॥

वि'भिः with their winged horses; cf. I. 184. 3. ए'कया. She is Sūryā. प्रवासा'इव प्र' वसतः प्र वस् to go on a journey. प्रवासा (du. of प्रवास) a traveller. Roth. Lanman and Hillebrandt unnecessarily take प्रवासेव as irregular for प्रवासमिव.

Tr. Two (of them) move about with one female. They journey like travellers.

Verse 9

सदः । द्वा । चक्राते इति । उपऽमा । दिवि ॥ संऽराजा । सर्पिरा-सुती इति सर्पिःऽआसुती ॥ ९ ॥ [*ग्रा

सम्राजाविति लिङ्गेन मित्रावरुणावभिधीयेते । उपमा उपमौ परस्परं स्वकान्त्योपमानभूतौ । यद्वोपमीयत आभ्यां सर्वमित्युपमौ सर्वस्य । एतावेव सम्राजा सम्राजौ सम्यग्दीप्यमानौ । सर्पिरासुती सर्पिर्घृतमाभ्यामासूयत इति सर्पिरासुती । घृतहविष्कौ । द्वा द्वौ मित्रावरुणौ दिवि द्युलोके । सदः । सीदन्त्यत्रेति सदः स्थानम् । तच्चक्राते अकार्ष्टाम् ॥

सम्रा'ज् in the du. is the epithet of मित्रावरुणा in all passages but I. 17. 1; in the s. of इन्द्र, अग्नि, वरुण; in the pl. of आदित्यासः. दिवि' उपमा. The word उपमा appears in several passages; cf. सः उपमा

दिवः I. 31. 15 ; उपमा यो असुच्यत VIII. 69. 13 ; आग्निवेशिं गृणीषि...उपमां केतुं अर्थः V. 34. 9. Geld, following Sāy., thinks that it means 'image, standard of comparison ;' उपमा in V. 34. 9 is understood by Gr. to be f. acc. used adv. from उपम ; while Old. suspects a corruption of the text. उपमा in I. 31. 15 and VIII. 69. 13 is understood by both as f. instru. adv. ; but while उपमा in our passage acc. to Gr. is nom. du., it is f. instru. adv. acc. to Old ; while the adv. would mean 'in the nearest neighbourhood' acc. to Gr., it would mean 'on the top' acc. to Old. The meaning of the three passages quoted above is far from clear and it is no use adding to our difficulties unnecessarily ; further दिवि connects itself naturally with सदः चक्राते. उपम (from उप + super. म) means highest ; cf. II. 23. 1. सर्पिं रासुती ; elsewhere an epithet of Agni, but in one passage, by simile, of Mitra ; सर्पिः (ghee) आसुतिः (from आ + सु, primarily Soma-pressing, hence drink) यथोः.

Tr. Two (of them), highest sovereigns, drinkers of ghee, have taken their rest in the highest heaven.

Verse 10

अर्चन्तः । एकं । महि । साम । मन्वत ॥ तेन । सूर्यम् । अरोचयन् ॥ १० ॥

एकेऽब्रयो महि महत्साम त्रिवृत्पञ्चदशादि मन्त्रत अमन्वत । तदेवार्चन्तः पूजयन्त एतादृशा अत्रयस्तेनोक्तेन साम्ना सूर्यमरोचयन् अदीपयन् । त एवात्र देवता ॥

मन् to think out (cf. मन्म, मति) ; with स्तोमं V. 13. 2 ; 35. 8 ; श्लोकं VII. 82. 10 ; ऋतस्य प्रवाचनं X 35. 8. रुच् to ; shine ; cf. सूरः न रोचसे VI. 2. 6 : caus सूर्य अरोचयः ; of Indra III. 44. 2 ; VIII. 98. 2 ; of Soma IX. 63 7 ; सूर्यं अरोचयत् also of Indra and Soma ; nowhere RSIS. The siogers here are the Atris acc. to Sāy. and Geld. The latter cites V. 40 in support ; cf. गूळ्हं सूर्यं तमसा ब्रह्मणा अविन्दत् अत्रिं , 6 ; यं वै सूर्य स्वर्भानुः तमसा आविध्यत् आसुरः अत्रयः तं मनु अविन्दन्, 9. Macd. is in favour of the Āngirases and quotes...साम येन...अर्चन्त

अङ्गिरसः, गाः अविन्दन् I. 62. 2; ये क्रतेन सूर्य आरोहयन् दिवि X. 62. 3. Berg. (I. 132 n., II 282) favours the Maruts; they sing songs (I. 19. 4; II. 34. 1; III. 14. 4; V. 56. 5) and सृजन्ति रश्मिं ओजसा पन्थां सूर्याय यातवे VIII. 7. 8; cf. नमांसि अप बाधध्वम् VII. 56. 20. ज्योतिः कर्न I. 86. 10; रामीः अरुषीः अप ऊर्णुते II. 34. 12. Macd.'s parallelisms are more complete than those of Geld. or Berg.

Tr. Some, while singing, thought out a great Sāman; with it they made the sun shine brightly.

No. 25

MANDALA VIII. SŪKTA 72.

तत्र देवानामिति नवर्चमनुवाकापेक्षया चतुर्थं सूक्तम्। आनुष्टुभं देवदेवत्यम्। लोकनाम्नः पुत्रो बृहस्पतिराङ्गिरस एव वा बृहस्पतिर्ऋषिः। अथवा दक्षस्य दुहिता दितिर्ऋषिः। तथा चानुक्रान्तम्। देवानां नव लौक्यो वा बृहस्पतिर्दाक्षायण्यदितिर्वा दैवमानुष्टुभमिति। गतः सूक्तविनियोगः॥

We have two different opinions about this hymn; Bergaigne describes it as a hymn 'full of very advanced speculations on the origin of things' (II. 322 n.), while M. M. prefaces X. 72. 4–5 with the words, 'nothing can bring the perplexity of the ancient mind...more clearly...(SBB, XXXII,246) and Old. 'that a mystic confusion begins here is shown by 4 *cd*'. There is a mystification no doubt and a deliberate one; 'विपन्यया प्र वोचाम' is what the poet promises beforehand in this cosmogonic hymn. The perplexity and confusion is perhaps in the minds of the interpreters, who have begun by misunderstanding the word विपन्यया in rc 1. The poet has deliberately used a paradoxical style and older instances could be quoted which would support his paradoxes. The Usas, for example, is described as the mother and as the daughter of the sun in turns; cf. अजीजनत् सूर्यं यज्ञं अग्निम् VII. 78. 3 and उस्रा इव सूर्यः II. 23. 2. Yāska has very well explained

the inner meaning of these paradoxes in these words (Nir. VII): माहाभाग्याद् देवताया एक आत्मा बहुधा स्तूयते एकस्यात्मनः अन्ये देवाः प्रत्यङ्गानि भवन्ति । अपि च सत्त्वानां प्रकृतिभूमाभिर्ऋषयः स्तुवन्तीत्याहुः प्रकृतिसार्वनाम्याच्च इतरेतरजन्मानो भवन्तीतरेतरप्रकृतयः कर्मजन्मानः आत्मजन्मानः । आत्मैव एषां रथो भवति आत्मा अश्वः आत्मा आयुधं आत्मा इषवः आत्मा सर्वं देवस्य, which may be translated as follows: 'Divinity being omnipotent, the same divine essence is variously described and other gods become subordinate features of the same essence. Further it has been held that the Vedic poets are guided in their descriptions (of the gods) by the preponderent constituent elements of the things described (*in* connection with them) and the constituent elements being universal, the (gods) are in turn described as born of each other, or born on account of a certain activity, or born of themselves. The divine essence itself is their chariot, and horse, and weapon, and arrows, and every thing'.

Verse 1

देवानाम् । नु । वयम् । जाना । प्र । वोचाम । विपन्यया ॥
उक्थेषु । शस्यमानेषु । यः । पश्यात् । उत्ऽतरे । युगे ॥ १ ॥

अदितिर्दाक्षायण्यनेन सूक्तेन स्वयं यथादित्यानजनयत्तदब्रवीति । बृहस्पतिर्ऋषिपक्षे स ऋषिरदितेः सकाशादादित्योत्पत्तिप्रकारमाह । वयं देवानामादित्यानां जाना जन्मानि प्र वोचाम प्रकथयाम विपन्यया विस्पष्टया वाचा । वयमिति वोचामेति चोभयत्र पूजार्थं बहुवचनम् । अथैकवदाह । यो देवानां गणः पूर्वे युग उत्पन्नोऽप्युक्थेषु यागे शस्त्रेष्वनुष्ठीयमानेषूत्तरे युगे वर्तमानं स्तुवन्तं स्तोतारं पश्यात् पश्यति । अनेकेष्वपि युगेषु गतेषु कर्मसु स्तूयमानो वर्तत इत्यर्थः ॥

जा'न n. birth, birth-place; cf. एषां (मरुतां) जानम् V. 53. 1; त्रीणि अस्य (अग्नेः) जाना I. 95. 3. विपन्या' wonderful, picturesque, striking manner; from विपन्य to glorify; cf. वयं हि वां विपन्यामहे I. 180. 7; cf. also क्षेत्रात् आ विप्रं जनथः विपन्यया I. 119. 7; देवेषु अध्वरं विपन्यया धाः III. 28. 5. विपन्यु wishing to glorify in a striking manner; cf. (वाजयुः न रथं वयः प्रभरामहे) विपन्यवः दीध्यतः मनीषां II. 20. 1; जागृवांसः विपन्यवः

विप्रासः I. 22. 11. विपन्यु, a worker of striking deeds, occurs as an epithet of the अश्विना VIII. 8. 19 and मरुतः V. 61. 15. उत्तरे युगे, as opposed to पूर्व्ये युगे, rc. 2. After *d* Ludwig supplies तदर्थं, or probably it may be स पश्यति.

Tr. In pictureque style let us speak of the births of gods for him who, in a later age, when hymns are being chanted might see (their inner meaning).

Verese 2

ब्रह्मणः । पतिः । एता । सम् । कर्मारःऽइव । अधमत् ॥
देवानाम् । पूर्व्ये । युगे । असतः । सत् । अजायत ॥ २ ॥

ब्रह्मणोऽन्नस्य पतिरदितिरेतानि देवानां जन्मानि कर्मार इव स यथा भस्त्र-याग्निमुपधमति प्रज्वलनार्थमेवं समधमत । उदपादयदित्यर्थः । देवानां पूर्व्ये युगे । आदिसृष्टावित्यर्थः । तेषामुपादानकारणादसतो नामरूपवर्जितत्वेनासत्समानाद्ब्रह्मणः सकाशात्सन्नामरूपविशिष्टं देवादिकमजायत प्रादुरभूत् । असद्वा इदमग्र आसी-त्ततो वै सदजायत (तै० उ० २-७) इति हि श्रुतिः । न सदात्मकस्य प्रपञ्चस्या-सत्कारणत्वं युक्तमिति वाच्यम् । छन्दोगैः कथमसतः सज्जायेतेत्यसत्कारणत्वमाक्षिप्य सत्त्वेव सोम्येदमग्र आसीदित्यवधारितत्वात् (छा० उ० ६-२२) । तर्ह्यसत्कारण-प्रतिपादकवाक्यानां का गतिरिति चेत् तेषामव्याकृतत्वाभिप्रायत्वात् तद्धचेदं तर्ह्य-व्याकृतमासीत् (शत० १४-४-२-१५) इति श्रुतेः । यद्येवं तर्ह्यदितेः सकाशा-त्कथं देवाद्युत्पत्तिः । वायोरग्निरित्यादिवत् *अधिष्ठानात्सकाशात्तदुत्पत्तेः । यद्वा । देवानां कारणभूतं सदसतो ब्रह्मणः सकाशादुत्पन्नमिति योजनादुक्तन्यायोऽस्मि-न्पक्षेऽपि समान एव ॥

एता refers to जाना in 1; Ludwig refers it to भुवनानि understood; but the देवानां जाना is the matter at issue. सं कर्मार इव अधमत. कर्मार a blacksmith; it appears only here. धमा to forge; cf. अयः न देवाः जनिमा धमन्त IV. 2. 17. देवानां पूर्व्ये युगे. पूर्व्य belonging to the primordial times; epi. of कवयः VII. 76. 4; of Agni I. 74. 2. *b* broaches a topic which has been dealt with in other cosmogonic hymns (cf. असत् च सत् च परमे व्योमन् दक्षस्य जन्मन्

* अधिष्ठानसकाशात् इत्यादर्शः ।

अदितेः उपस्थे X. 5. 7; न असत् आसीत् नो सत् आसीत् तदानीम् X. 129. 1; सतः बन्धुं असति निः अविन्दन्) and elaborated in the Upaniṣads; cf. छान्दो० III. 19. 1; VI. 2. 1; बृह० I. 2. 1; I. 3. 28; तैत्ति० II. 7. 1.

Tr. Brahmanaspati forged these (births) like a blacksmith. In primordial generations of gods out of non-existence came existence.

Verse 3

देवानाम् । युगे । प्रथमे । असतः । सत् । अजायत ॥ तत् ।
आशाः । अनु । अजायन्त । तत् । उत्तानऽपदः । परि ॥ ३ ॥

† पूर्वार्धमुक्तम् । तदन्वाशा दिशोऽजायन्त । तत्परि तदन्वित्यर्थः । उत्तानपदः । उत्तानमूर्ध्वतानं पश्यन्त इत्युत्तानपदो वृक्षाः । तेऽजायन्त प्रादुरभवन् ॥

a is repeated from 2*b*. आशाः quarters; cf. इन्द्रः आशाभ्यः परि सर्वाभ्यः अभयं करत् II. 41. 12. तत् आशाः अनु तत् उत्तानपदः परि. M. M. 'from them (was born) Uttānapada;' Old. refers the तत् in *c* and that in *d* to सत्; and takes उत्तानपदः as abl. of उत्तानपद्. Between *c* and *d* there is not विरोध even; there would be only this विरोध acc. to Old.'s interpretation, viz. that सत् would be born from both असत् and उत्तानपद्; no paradox is intended here of the type illustrated by 4*cd*, or अहं सुवे पितरम् X. 125. 7. The विरोध goes if असत् itself is described as उत्तानपद्. The first तत् refers to सत्, while the second is a mere rhetorical repetition, *cd* forming one sentence. There is a distinction made here between अनु (cf. 5) and परि; अनु 'after' and परि 'from'. उत्तानपद् from उत्तान (cf V. 1. 3) stretched or stretched upwards. Who the उत्तानपद् is and why it is so called is a mystery which the poet wants his hearers to solve. Gr.'s meaning, making it an epithet, apparently of अदिति, 'whose legs have opened (in child-birth)' does not appear to be justified. The असत् itself is probably the उ०. The असत्, before creating the सत्, created space and then stretching the kind of legs it had, created the सत्. Old. finds the suggestion of a Yogic posture in उत्तानपद्; but this is

† पूर्वमन्त्रार्धरूपेण ।

reading a later meaning into a much earlier text. The Vedāntins explain the असत् as अव्याकृत and this is certainly the poet's intention.

Tr. In the early generation of the gods from non-existence came existence. It (existence) was born after the quarters, from that which had stretched its legs.

Verse 4

भूः । जज्ञे । उत्तानऽपदः । भुवः । आशाः । अजायन्त ॥ अदितेः ।
दक्षः । अजायत । दक्षात् । उ इति । अदितिः । परि ॥ ४ ॥

भूरुत्तानपदो वृक्षाज्जज्ञे । तथा भुवः सकाशादाशा अजायन्त । तथादितेर्दक्षोऽजायत उत्पन्नः । दक्षादु दक्षादप्यदितिः पर्यजायत । न स्वोत्पन्नं कार्यं स्वस्यैव कारणमपि भवतीति विप्रतिषिद्धमिति वाच्यम् । यास्काचार्य इदमेव वाक्यमुदाहृत्य विरोधमाशङ्क्य पर्यहरत् । तथा हि । अदितेर्दक्षो अजायत दक्षाद्वदितिः परीति च तत्कथमुपपद्येत समानजन्मानौ स्यातामित्यपि वा देवधर्मेणेतरेतरजन्मानौ स्यातामितरेतरप्रकृती (नि० ११-२३) इति ॥

ab. Space pre-supposes a material creation and material creation presupposes space. *cd.* दक्ष is one of the seven sons of अदिति. दक्ष is a deification of intelligence (Berg.), or of potentiality (M. M.), and अदिति of infinite space (Berg.) or infinity (M. M.); cf. Berg. III. 85. 98; M. M. SBE, XXXII, pp. 241-261.

Tr. From that which lay with its legs stretched was created the earth; from the earth were created the quarters. Dakṣa was born of Aditi; and verily Aditi of Daksa.

Verse 5

अदितिर्देवताके पशावदितिर्ह्यजनिष्टेत्येषा हविषोऽनुवाक्या । सूत्रितं च । अदितिर्ह्यजनिष्ट सुत्रामाणं पृथिवीं यामनेहसम् (आ० ३-८) इति ।

अदितिः । हि । अजनिष्ट । दक्ष । या । दुहिता । तव ॥ ताम् ।
देवाः । अनु । अजायन्त । भद्राः । अमृतऽबन्धवः ॥ ५ ॥

मित्रश्च वरुणश्च धाता चार्यमा चांशश्च भगश्च विवस्वानादित्यश्चेति । तथा तत्रैव प्रदेशान्तरेऽदितिं प्रस्तुत्यास्मान्मार्तम् । तस्या उच्छेषणमददुस्तत्प्राश्नात् सा रेतोऽधत्त तस्यै चत्वार आदित्या अजायन्त सा द्वितीयमपचादित्यष्टानामादित्यानामुत्पत्तिर्वर्णिता (तै० सं० ६-५-६-१) । सादितिः सप्तभिः पुत्रैर्देवानुप प्रैत् उपागच्छत । अष्टमं पुत्रं मार्ताण्डं सूर्यं परास्यत् उपरि प्राक्षिपदित्यर्थः ॥

We have now quite a different idea elaborated here. An eighth son is ascribed in this rc to Aditi; the seven are immortal, while the eighth who was born dead (?) or as a bird (?) accounts for the cycle of birth (प्रजा) and death in the universe (rc 9 *cd*). Berg. tries to identify इन्द्र with मार्ताण्ड in III. 104, 107; but in IV. 18. 5, which he quotes in support, the mother is concealing the child Indra, not rejecting him. The sons of अदिति have been variously enumerated in the RV.; in VII. 83. 4 Indra and Varuna have been mentioned as Ādityas; in VIII. 52. 7 Indra is mentioned as the fourth Āditya; in VIII. 18. 3 सवितृ, भग, वरुण, मित्र and अर्यमन् are mentioned as Ādityas; while in II. 27. 1 सवितृ is dropped and दक्ष and अंश are added. In Sāy.'s comm. a passage is quoted acc. to which धातृ and विवस्वान् are added and सवितृ, दक्ष and इन्द्र are omitted. परि from. देवान् उप प्र ऐत्. For देवान्, पूर्व्यं युगम् is substituted in rc 9. उप प्र इ, elsewhere, to go forward to meet; cf. I. 40. 1; 139. 1; here a slight change of meaning is necessary. मार्ताण्ड occurs only here and in II. 38. 8, where it means a bird (from मृतं अण्डम्). In later mythology मार्तण्ड is the Sun.

Tr. Of the eight sons that were born of the body of Aditi she went forth to live among the gods with seven. She rejected the bird (?).

Verse 9

सप्तऽभिः । पुत्रैः । अदितिः । उप । प्र । ऐत् । पूर्व्यम् । युगम् ॥
प्रऽजायै । मृत्यवे । त्वत् । पुनः । मार्ताण्डम् । आ । अभरत् ॥९

पूर्वमन्त्रोक्त एवार्थः पुनरत्रोच्यते । सप्तभिर्मार्ताण्डव्यतिरिक्तैर्मित्रादिभिरदितिः पूर्व्यं पुराणं युगमुप प्रत् उपगता । अथ प्रजायै प्राणिनामुत्पत्तये मृत्यवे तेषां मरणाय

मार्ताण्डं मृताद्व्यृद्धादण्डाज्जातं मार्ताण्डनामानं सूर्यं पुनराभरत आहरत द्युलोकेऽधारयत् । प्राणिमरणजननादीनां सूर्योदयास्तमयायत्तता स्फुटा । तस्यै व्यृद्ध-माण्डमजायतेत्यादि ब्राह्मणम् ॥ (तै० सं० ६-५-६-१) ।

त्वत् त्व-त्व (pron.) are used in the sense of 'the one--, the other ;' cf. उत त्वः पश्यन् न ददर्श वाचं उत त्वः शृण्वन् न शृणोति एनाम् X. 71. 4 ; they are used adv. in the sense of 'once,-another time', cf. स्तरीः उ त्वत् भवति स्हते उ त्वत् ; in our passage only त्व has been used only once after the second alternative. आभृ = आहृ. Bloomfield connects पुनः with मृत्यवे.

Tr. Aditi went forth to (live among) the primordial generation (of gods) with the seven sons. She took back the (rejected) bird for an (eternal) alternation of progeny and death.

No. 26

MANDALA X SŪKTA 108

किमिच्छन्त्येकादशर्चं नवमं सूक्तं त्रैष्टुभम । ऐन्द्रपुरोहितस्य बृहस्पतेर्गोषु बल-नाम्नोऽसुरस्य भटैः पणिनामकैरसुरैरपहृत्य गुहायां निहितासु सतीषु बृहस्पतिप्रेरिते-नेन्द्रेण गवामन्वेषणाय सरमा नाम देवशुनी प्रेषिता । सा च महतीं नदीमुत्तीर्य बलपुरं प्राप्य गुप्तस्थाने *निहितास्ता गा ददर्श । अथ तस्मिन्नन्तरे पणय इदं वृत्ता-न्तमवगच्छन्त एनां मित्रीकर्तुं संवादमकुर्वन् । तत्र प्रथमातृतीयाद्या अयुजोऽन्त्या-वर्जिताः पणीनां वाक्यानि । अत्र त ऋषयः सरमा देवता । द्वितीयाचतुर्थ्याद्या युज एता एकादशी च षट् सरमावाक्यानि । अतस्तासु सा ऋषिः पणयो देवता । तथा-चानुक्रान्तम । किमिच्छन्ती पणिभिरसुरैर्निगूढा गा अन्वेष्टुं सरमां देवशुनीमिन्द्रेण प्रहितामगुर्भिः पणयो मित्रीयन्तः प्रोचुः सा तान् युग्मान्त्याभिरनिच्छन्ती प्रत्याचष्ट इति । गतो विनियोगः ॥

In the following hymn there is a dialogue between Saramā, a canine messenger of Indra, and the Panis, mythical robbers of cows, which Indra releases from their clutches.

* नीतास्ता इत्यादर्शः ।

The dialogue is dramatic, being characterised by the treacherous suavity of the Panis and the loyal and proud answers of Sarama. Geld. would regard rc 11 as spoken by the gods. Old. understands thunder (prob. to represent the lowing of the celestial cows) as an essential accompaniment of the verse; both suppositions are equally unnecessary.

Verse 1

किम् । इच्छन्ती । सरमा । प्र । इदम् । आनट् । दूरे । हि ।
अध्वा । जगुरिः । पराचैः ॥ का । अस्मेऽहितिः । का । परिऽ-
तक्म्या । आसीत् । कथम् । रसायाः । अतरः । पयांसि ॥१॥

अनयागच्छन्तीं सरमां दृष्ट्वा पणयो वदन्ति । सरमा सरणशीलैतन्नामिका देवशुनी किमिच्छन्ती किं प्रार्थयमाना सतीदमस्मदीयं स्थानं प्रानट् प्राप्नोत् । आङ्पूर्वो नशिर्व्याप्तिकर्मा । तस्य लुङि मन्त्रे घसेत्यादिना च्लेर्लुक् । छन्दस्यपि दृश्यत इत्याडागमः ॥ पराचैः पराञ्चि पराङ्मुखान्यावृत्तिवर्जितानि यानि गमनानि तैर्जगुरिरुद्गूर्णः । महता प्रयत्नेनापि गन्तुं न शक्यत इत्यर्थः । गृ निगरणे । आङ्-गमहनेत्यादिना किन्प्रत्ययः । बहुलं छन्दसि (पा० ७-१-१०३) इत्युत्वम् । तादृशोऽयमध्वा दूरे हि विप्रकृष्टः खलु । यद्वा । पराचैः पराञ्चैर्जगुरिरत्यर्थं गन्त्री पार्ष्णिभागमनालोकमाना सतीदं स्थानं प्राप्नोति । दूरेऽयमध्वा यदृच्छया गन्तुं न शक्यते । अतो वयमेतां पृच्छामः । हे सरमे का कीदृश्यस्मेहितिः । कास्मास्वर्थ-हितिः । कोऽस्मासु त्वदपेक्षितार्थो निहितः । यद्वा । अस्मासु कोऽर्थो गतः । दधातेर्हिनोतेर्वा क्तिनि रूपम् । आगच्छन्त्यास्तव का कीदृशी परितक्म्या रात्रिरासीत् । यद्वा । तकतिर्गत्यर्थः । परितकनं परितो गमनं भ्रमणं वा कीदृशमासीत् । कथं च रसायाः शब्दायमानाया अन्तरिक्षनद्या योजनशतविस्तीर्णायाः पयांस्युदकान्यतरः तीर्णवत्यसि । एतद्वद । अत्र किमिच्छन्ती सरमेदं प्रानडित्यादिकं निरुक्तं द्रष्टव्यम् (नि० ११-२५) ॥

The Panis speak. प्र इदम् आनट्. इदं adv. here; cp rc 3, cf. तं इदं गृणीमसि I. 53. 2. आनट् 3 s. aor. from प्र + अश् to reach, arrive at; cf. प्र यत् आनट् त्रिवः अन्तान् X. 30 4. दूरे पराचैः जगुरिः. पराच occurs only in instru. pl.; it is identical in sense and derivation with पराच्, of which only nom. and acc. occur;

distant, *contra* अर्वाक्; from परा + अञ्च्; the sense is intensified by the addition of दूरे or आरे; cf बाधस्व दूरे निर्ऋतिं पराचैः I. 24. 9; आरे बाधेथां निर्ऋतिं पराचैः VI. 74. 2. जगुरि is derived from गा or गम् in निरु० 11. 25, and Gr. has adopted the derivation. Pān. (III. 2-171) derives it from गृ; the meaning will be 'losing itself' (Geld.), or in the caus. sense as in the case of ततुरि, पपुरि, 'causing one to be lost or engulfed;' Old.'s derivation from जॄ-जुर् yields a good sense ('wearying', 'exhausting'), but the change of ज् to ग् presents a real difficulty, although he invokes the ajd of Wackernagel § 138; for the derivation from गृ cf. मा मा द्रुग्धः भियसा नि गारीत् V. 40. 7. अस्मे हितिः (from अस्मे and हिति from धा) order or message (placed) for us. परितक्म्या cf. I. 116. 15; it refers to her troubles on the way.

